UNIVERSAL
LIBRARY

OU_184543

UNIVERSAL
LIBRARY

DARSANODAYA

BY

MAHAMAHOPADHYAYA PANDITARATNAM
ASTHANA DHARMADHIKARI
LAKSHMIRAM SRINIVASACHAR

WITH A FOREWORD IN ENGLISH

BY

SIR S. RADHAKRISHNAN, M.A., D.Litt.
VICE CHANCELLOR, ANDHRA UNIVERSITY.

Price Rs. 5

Checked 1968

DARSANODAYA

BY

MAHAMAHOPADHYAYA PANDITARATNAM
ASTHANA DHARMADHIKARI
LAKSHMIPURAM SRINIVASACHAR

WITH A FOREWORD IN ENGLISH

BY

SIR S. RADHAKRISHNAN, M.A., D.Litt.
VICE-CHANCELLOR, ANDHRA UNIVERSITY.



PRINTED AT MYSORE
BY THE ASST SUPDT GOVT BRANCH PRESS,
1933

Cleveland 1968

॥ श्रीः ॥

दर्शनोदयः

सकलदर्शनमूलसारसंग्रहरूपः

सुगृहीतनामधेयस्य स. राधाकृष्णमहाशयस्य प्रस्तावनासमलङ्कृतः

महामहोपाध्यायस्य, पण्डितरत्नस्य, आस्थान धर्माधिकारिणः
लक्ष्मीपुरं श्रीनिवासाचार्यस्य
कृतिः.

मैसूरु
राजकीय शाखामुद्रालये मुद्रापितः
१९३३.

॥ श्रीरस्तु ॥

अङ्कितम्

तत्त्वचिन्तोत्साह दैवभक्ति दाक्षिण्यशालिनः ।
कृष्णराजो यशोद्योतः तृतीयः चन्द्रसूर्ययोः ॥

श्रीमद्राजाधिराज महीसुरमहाराज तुरीय श्रीकृष्णराजस्य
सविधे
उपायनीकृतोऽयं प्रबन्धः

दर्शनोदयः

महीसुरमहीधुर्य तुर्य श्रीकृष्णभूपतेः ।
कीर्तिकेतुः विजयतां प्रबन्धो दर्शनोदयः ॥

तत्सौशील्येनैव शुद्धं तेनैव प्रचयं गतम् ।
किंकुर्वत जगतां नित्यमेतत् पुस्तुकमस्तु शम् ॥

इति
निवेदयिता
लक्ष्मीपुरं श्रीनिवासाचार्यः

FOREWORD

MAHAMAHOPADHYAYA Panditaratnam Lakshmipuram Srinivasachariar has desired me to write a foreword to his excellent work I have had the great privilege of studying some works on Visistādvaita Philosophy with him when I was at Mysore, and from my personal knowledge I can testify to his vast erudition and critical insight In Mysore, Mr Srinivasachariar, who is a master of our Scriptures, has established a great and beneficent influence of a kind which has more substance than show, through his many pupils What strikes me as somewhat out of the way about him is his courtesy to the opponents' views, which he combines with strength of conviction Generally, a Pandit finds it difficult to shake off a certain inflexibility His attitude to the other man's view remains somewhat obdurate But here is a Pandit who can appreciate even the views he does not share and give them a square deal

This book attempts a reconciliation of the different philosophical theories and offers a justification for them Such a reconciliation, I need not say, is most opportune at the present moment, when our thought and belief are undergoing transformations, deeper and more disturbing than any in recent times If there is one feature more than another, which characterises Hindu thought, it is

its hospitality to the different conceptions of reality Man's attempt to comprehend the truth, which is limitless, is bound to result in different views To take our stand on one limited view and make it adequate to the vast reality is the mistake which all dogmatists make The acceptance of a limited view becomes a barrier to the understanding of truths A seeker should recognise the immensity of reality and the inadequacy of limited views and formulas Our author has an adequate appreciation of this fundamental fact

Religion for the Hindu is personal experience or realisation It is life Deep faith in and steadfast devotion to the Supreme in any of its forms takes us beyond the imperfect and the painful and leads us to the peace and power, characteristic of the religious soul Whatever be our religious belief, if our heart and mind participate in the effort to know, and if we worship in spirit and in truth, the goal is easy to reach

The author is an earnest student of Visistādvaita Philosophy In this book he points out its great antiquity and offers a commentary on the great Classic of this School, *Śrībhāsya* I have no doubt that all students of this branch of Hindu Philosophy will find this book invaluable

Many other interesting problems are discussed in the course of the book For example, it is contended that *Sunyavāda* and *Sānkhya Darsana* are the two extremes and the other systems represent compromises of these opposite views The different conceptions of

causality, which are bound up with the different metaphysical doctrines, are elaborated with great care and learning

I feel that I am justified in saying that the book gives a comprehensive account of the different systems of Indian Philosophy Throughout, the author takes his stand on the original texts of which he is an accomplished master, though lengthy quotations are avoided Doctrinal discussions are summarised in a vivid and condensed form I have no doubt that the book will serve as a valuable guide to the student

It is a pleasure to know that His Highness the Maharajah of Mysore with his enlightened interest in Indian Philosophy and deep devotion to Hindu religion is making the publication of such works possible Seekers of truth at home and abroad are greatly indebted to him for his example as well as encouragement

S R

प्रबन्धविभागः

१ उपोद्घातः
२ विषयसूचिका
३ अत्रोदाहृतग्रन्थकर्तृनामावलिः
४ प्रसक्तप्रबन्धनामावलिः
५ प्रसक्तवादनामावलिः
६ द्रष्टव्यपदावलिः
७ द्रष्टव्यवाक्यावलिः
८ उदाहृतपद्यप्रथमपादावलिः
९ प्रसक्तबौद्धप्रबन्धावलिः
१० प्रबन्धः शुद्धिपत्रसहितः

उपोद्घातः

नास्ति विद्यासम चक्षु नास्ति सत्त्वसमं तपः ।
नास्ति रागसम दु ख नास्ति त्यागसम सुखम् ॥
(महाभा. शा. ३२९)

सम्बन्ध

अथेदानीं दर्शनोदयाभिधानोऽय प्रबन्धः प्रपञ्चविषये शून्यतावाद सत्यतावाद मध्यस्थतावाद च प्राधान्येन सामुद्दिश्य विचार प्रवर्तयितु प्रयतते । तत्र चाद्ययावत् समुपलभ्यमानाना प्रायेण सवत्सराणासह स्वात्प्राचीनाना प्रामाणिकत्वेन तैस्तैर्वादिभि परिगृहीताना प्रचयीकृतानांसह च प्रबन्धाना तात्पर्य सम्यगवधार्य प्रकाशीक्रियते इति नानादर्शनानामयनानि असन्दिग्धानि परिज्ञातानि भवितुमर्हन्ति जिज्ञासाविशेषशालिनामविदुषामपि किमुत विदुषाम् ॥

प्रयोजनम्

एवरीत्या क्रियमाणे विचारे गृहीतग्राहितानिबन्धनदुरभिनिवेशस्य निरन्वयविलयात् स्वकीयसम्प्रदायसमागते दर्शनेऽनादरमन्तरेण सात्त्विकी श्रद्धा समुदेति । परकीयेष्वपि दर्शनेषु ईर्ष्यासूयादिकमपसरति । विलसति च विशुद्धा च शान्ति. । एवमनेकविधानां दर्शनाना विभिन्नदृष्ट्या विभिन्नरुच्या च प्रवृत्ताना परिष्कृताना परिष्क्रिय-

माणानां च परिज्ञाने कालदेशविचारात्मक चरित्रविज्ञानपदाभिधेय लोक-पर्यायवृत्तान्तपरिज्ञानमपि प्रसिद्ध्यति प्रयोजनम् ॥

एवविधानां विविधाना दर्शनाना विषये दोषचिन्तां तिरस्कृत्य गुणाचिन्ता पुरस्कृत्य समीक्षायां सत्यां विज्ञानमार्गे प्रपञ्चस्योपकार शान्तिलक्षण कीदृश कियन्त चारीरचन् पूर्वाचार्या प्राचीना इति आश्चर्येण वशीकृता भवन्ति प्रायेण विवेकशालिन· पुरुषा· । तेन च लौकिकसम्पदपेक्षया लोकोत्तरायामस्यां विद्याभिधानायां सम्पदि व्यक्ती भवति विद्यमानोऽतिशय । ततश्च सर्वलोकयोगक्षेम इत्यत्र नास्ति बहु वक्तव्यमस्माकम् ॥

अधिकारी

अपि च प्रकृतेस्मिन् समये मनुष्याणा लौकिकसुखसम्पदामुप-करणान्यतिचित्राणि प्रत्यह प्रवर्धमानानि समुपलभामहे । ततश्च प्रायेण सर्वेषा मानवमानसाना विविधविक्षेपपरिपूर्णानामैकाग्र्यनामक व्यव-धानमतिदुर्लभदशामापद्यते । तदनुगुण ह्रासोऽप्यायुरारोग्यादे सम्प-द्यते । तथापि सङ्कुचिते काले विकसितविषयाणा जिज्ञासाऽपि विशाला विलसति । तस्माद्विनैव लौकिकव्यापाराणामुपरोध साराशविज्ञानाय एतादृशदेशकालदशानुसारेणेदृशाना प्रबन्धानामवतरणमावश्यकमित्य-स्माक युक्त प्रकरणप्रक्रम ॥

विषय

अत्रत्या विषया विस्तरेण सूचीपुटे प्रकटीकृता । सक्षेपतस्सार-स्त्वेष.—इह किलाधुना प्रपञ्चे सुखपदवाच्य किञ्चिदनुकूलतया वेदनीय स्वस्वभावनापरपर्यायवासनानुरोधेन अतिविचित्रतयाऽनुभूयमान-समानमेवाभिवाञ्छन्ति प्रायेण सर्वेऽपि प्राणिनः । तत्रापि परा काष्ठा-मपुनरावृत्तिमतीमीहन्तेऽभिसप्रासुम् । तत्रचोपायमन्वेषमाणाः तेषा तेषा

तत्त्वदर्शिनामनुभवापरपर्याय सप्रदाय समाद्रियमाणा कथचिदनुतिष्ठन्तो दृश्यन्ते । एवविधै. विविधै मार्गै परस्परविरोधिभिरपि प्रतिष्ठमाना. सर्वविधदु खनिदानभूत देहेन्द्रियादिविशोषकर सर्वास्वपि सपत्सु समृद्धयमानास्वपि निरतिशयदु खकर रागवेगमेवादौ समुन्मूलयितु प्रयतन्ते सर्वेऽपि परीक्षका इव दार्शनिका ॥

चार्वाकसिद्धान्त

तत्र स्वभाववादापरनामकमाकम्मिकतावाद बुद्धिमन्निदर्शनो बृहस्पत्याचार्य. प्रवर्तयामास । तत्र दैवशिरसीव स्वभावशिरसि सर्वभारसमारोपात् पौरुषो राग तदनुगुण प्रयत्नो वा निष्प्रयोजन इति परित्यक्तव्य इत्येव च चार्वाकसिद्धान्तसाराश । अतएव महाभारते कण्वाश्रमवर्णनप्रकरणे लोकायतशास्त्रप्रवीणाः विद्वास तस्मिन्नाश्रमे इतरशास्त्रप्रवीणैस्सह समुषिता इति विज्ञायते "लोकायतिकमुख्यैश्च" इत्यादिभिर्वचनै । तस्मात्तदपि दर्शन पुराबृहस्पतिनाम्ना बुद्धिमत्प्रवरेण केनचिद्विदुषा रागत्यागाय प्रवर्तित प्रचय गतमासीदित्यवधार्यते ॥

तत्र हि तत्त्वविषये प्रत्यक्षप्रमाणप्रसिद्ध बाह्यं भूतचतुष्टयात्मक अचेतनमेकमेव तत्त्वम् । तेषा भूताना सयोगविशेषेण कायाकारपरिणताना शक्तिविशेषलक्षण आन्तरपदाभिधेय ज्ञानादिपदवाच्यमाविर्भवतीत्युच्यते । ज्ञान नाम किञ्चिद्वस्तु काचिच्छक्तिर्वा सर्वथा सर्वैरप्यङ्गीक्रियत एव । तथाहि विद्यमान घटादि कस्यचिदेव व्यवहारयोग्यतामापद्यते न सर्वेषा नापि सर्वदा । तदवश्य यो यदा येन व्यवहरति तस्य तदा तस्मिन् व्यवहारानुगुण कश्चिदतिशयस्सञ्जात इति कल्पनीयः । स एव ज्ञानपदवाच्यः । तस्य लक्षण कारण विभाग इत्यादिका महती कथा ॥

इदमत्र चार्वाक तत्त्वम्—ज्ञानस्योत्पादिका या सामग्री शरीरार्थेन्द्रियसन्निकर्षालोकादिलक्षणा, तयैव व्यवहारोपपत्ते ज्ञानपदवाच्यः पदार्थ सामग्र्येव, नातोऽतिरिक्त कश्चित्पदार्थ इति। अतएव देहगतः पित्तधातु ज्ञानपदार्थ प्रकाश इति वैद्यशास्त्रमपि सङ्गच्छते इति ॥

तथाच चतुर्विधाचेतनतत्त्वरूपभूतात्मकमेवेद विश्वमिति चार्वाकनामकबार्हस्पत्यसिद्धान्त ॥

हिरण्यगर्भसिद्धान्त

तस्य चैतस्य सिद्धान्तस्य प्रतिपक्षभूत· चेतनमात्रतत्त्वसिद्धान्त· हिरण्यगर्भसिद्धान्त । तत्र हि चैतन्यलक्षण हिरण्यगर्भाख्य जीवपदवाच्यमेकमेव तत्त्व विश्वात्मना परिणमते इत्यभ्युपगम । अतएव पृथिव्यादिविकारक्षीरदध्याद्यात्मक सर्व वस्तु अल्पेनैव कालेन पूतरक्रिमिमयमुपलभ्यते । पुत्तिकामृदेव वर्षासमये शलभमय परिणमते । अतोऽनुद्भूतचैतन्यमचेतनमिति व्यवह्रियते, सर्व चेतनमय चेतनमेकमेव तत्त्वमिति हैरण्यगर्भसिद्धान्तः ॥

सांख्यसिद्धान्त

ततस्सांख्या चेतनतत्त्वमचेतनतत्त्वञ्चेति तत्त्वद्वयमङ्गीकृत्य स्वभाववाद बार्हस्पत्यसिद्धान्तमेव परिष्कुर्वन्त सर्वशून्यवादस्य साक्षात्प्रतिपक्षतया सर्वसत्यवाद समाश्रयन्त लोकयात्रा निर्वहन्ति । ततस्तृतीयमपि तत्त्वमीश्वराख्यमङ्गीकुर्वन्त पातञ्जलास्सेश्वरसांख्याभिधाना सांख्यप्रवचनापराभिधाना तत्त्वत्रयवादिनो बभूवु ॥

वेदान्तसिद्धान्त

ततश्चानेकतत्त्ववादिन वैशेषिकार्हतप्रभृतय सिद्धान्ता प्रक्रान्ताः । तेषामन्योन्य वैलक्षण्यं प्राय प्रसिद्धमेव सर्वेषाम् । एवमौपनिष-

दोऽपि कश्चित्सिद्धान्त अनादिपरपराप्रसिद्ध विश्वविदित एव ब्रह्मैक-तत्त्ववादः । तदेकमेव ब्रह्माख्य तत्त्व सल्लक्षण बोधलक्षण चेतिद्वया-कारं, तत्परिणामभूतामिद विश्वमिति प्राचीनो ब्रह्मवादः । स एव भर्तृप्र-पञ्चभास्करादिभि परिगृहीत परिष्कृत. प्रचयीकृतश्च ॥

तथा तदेकमेव सन्मात्रलक्षण ब्रह्म चेतनाचेतनेश्वरात्मकशक्ति-त्रययुत विश्वात्मना व्यक्तीभवतीति यादवप्रकाशप्रभृतिभि परिगृहीत-सल्लक्षणब्रह्मवाद. । तत्रैव चेतनाचेतनेश्वरात्मकधातुत्रयसघातलक्षणमेव ब्रह्मेति रामानुजाचार्यपरिष्कार ॥

सल्लक्षणमेव ब्रह्माविद्यालक्षणोपाधिवशाच्चेतनाचेतनेश्वररूपेण विव-र्तत इति मण्डनमिश्रादय । स एव सप्रदाय शङ्करादिभि सद-भिन्नबोधलक्षणामिति परिष्कृत्य प्रकाशित ॥

पूर्णप्रज्ञादिभिस्तु तत्त्वत्रयवादवदेवानेकतत्त्ववाद परिगृहीत' । तत्र स्वतन्त्रतत्त्व परतन्त्रतत्व चेति विभज्य विचार प्रक्रान्त ॥

एवविधैस्सप्रदायैरौपनिषदास्सिद्धान्तः विचित्रस्सवृत्त । एव दर्शनलक्षणदृष्टय इव मन्त्रकाण्डेऽपि देवतोपपरीक्षायां विचित्रा दृष्टय-इति पारस्करो यास्क निरुक्ते वदति---"एवमुच्चावचैरभिप्रायै ऋषीणां दृष्टयो भवन्ति" (७-१-४) इति ॥ एव सर्वेऽपि तत्त्व-निर्णयानुसारेण उपाय फल च निष्कर्षयन्ति ॥

बौद्धासेद्धान्त

सौगतसिद्धान्तस्तु निस्स्वभाव निरभिलप्य दुर्निरूप तत्त्वमिति। ये त्वितरैर्दार्शनिकै निरूपिता निरूपयिष्यमाणास्सिद्धान्ता , यच्च परी-क्षकै प्रतिष्ठापित प्रमाण प्रमा प्रमाता प्रमेयमित्यर्थचतुष्टय, यदपि च

पामैरै· इन्द्रियादिभिरुपलब्धमित्युच्यते वस्तुजात तस्य सर्वस्य सर्वविध-स्यापि प्रतिषेध एव तत्त्वस्य निरूपण लक्षणमपि ॥

तादृशस्य च तत्त्वस्य शून्यमिति व्यपदेशः । सर्वस्यापि हि लौकिकशब्दजालस्य विकल्पमूलत्वात् अलौकिक तत्त्वं कीदृशेन शब्देन केन वा प्रमाणेन बोधयितु बोद्धु वा शक्येत, भावाभावादिसकलविकल्प-विकल हि तत् । तस्य च केवलनिषेधवाचकेन तुच्छगगनकुसुमशून्या-भावादिपदैरेवोपचार शक्य तैमिरिकपुरुषोपलब्धकेशादिप्रतिषेधवत् । एवमुपचारेणोपदेशे कस्यचिद्विधि नास्ति नापि कस्याप्यभ्युपगतस्य प्रतिषेध· ॥

तत्राप्येतादृशस्य सकलप्रतिषेधलक्षणस्य शून्यत्वस्य उपदेश प्रपञ्चोपशम सर्वदृष्टिपरिक्षय सर्वसकल्पप्रणाश सर्वाभिनिवेशपरित्यागा-दिपदवाच्यसकलविकल्परूपवासनाविरामलाभायेत्यभिप्राय । तन्नैवविध-शून्यताभावनाऽपि काचिन्महती वासनेति अभिनिवेशग्राहादिपदवाच्य प्रपञ्चलक्षण स्थिर बन्ध एवेति कथ वासनामयप्रपञ्चोपशमलक्षणो मोक्ष इत्याशङ्क्य तैरेवेत्थ समाधान निरूपितम् । शङ्का यथा--- (बोधिचर्यावतारे)

शून्यता सर्वदृष्टीना प्रोक्ता निस्सरण जिनैः ।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ॥

इति । अत्र शून्यतादृष्टिलक्षणाभिनिवेशाविष्टा· न सिद्धाः किंतु बद्धा-ग्रगण्या एवेत्यभिप्रायः । समाधानं तु—

शून्यतावासनाघानाद्धीयते भाववासना ।
किंचिन्नास्तीति चाभ्यासात् साऽपि पश्चात्प्रहीयते ॥

अयमभिप्रायः—नैरात्म्यलक्षणनिस्स्वभावतैव सर्ववस्तूनां निज पारमा-

र्थिकं रूपम् । तत्रापि नाभिनिवेष्टव्यम् । अन्यथा भावाभिनिवेशो वा शून्यत्वाभिनिवेशो वा न कश्चिद्विशेष', उभयोरपि कल्पनारूपत्वादिति । एतदर्थमेव हि विंशतिविधाश्शून्यता इत्यादि' शून्यतानिरूपणप्रपञ्च प्रवर्तते । अयमेवार्थः बहुभिः प्रकारैरुपदिश्यते—(३०)

प्रपञ्चविनिवृत्त्येकस्वभावा या च शून्यता ।
तस्यां तु शून्यतादृष्टिरमलाया न शोभते ॥
प्रपञ्चोपशमायैव शून्यता सोपदिश्यते ।
तस्मात्प्रपञ्चोपशमश्शून्यतायां प्रयोजनम् ॥
शून्यत्व नास्तितारूप भवास्तु परिकल्पयन् ।
प्रपञ्च वर्धयन्नेव नच वेत्ति प्रयोजनम् ॥
सर्वसंकल्पहानाय शून्यताऽमृतदेशना ।
यश्च तस्यामपि ग्राहः त्वयाऽसाववसादित' ॥
अस्तित्वपूर्वक नास्ति अस्ति नास्तित्वपूर्वकम् ।
अतो नास्ति न गन्तव्यमस्तित्व नच कल्पयेत् ॥
अनुत्पादश्च तथता भूतकोटिश्च शून्यता ।
रूपस्य नामान्येतानि अभाव न विकल्पयेत् ।
यदा न भावो नाभावो मतेस्सन्तिष्ठते पुरः ।
तदाऽन्यगत्यभावेन निरालम्बा विनश्यति ॥

इत्यादीनि वचनानि माध्यमिकवृत्तिचतुस्तवबोधिचर्यावतारलङ्कावतारादिषु प्रदर्शितान्यत्रग्रन्थे समुदाहृतान्यवगन्तव्यानि अधिकानि च ॥ अस्य च सिद्धान्तस्य प्रत्युत्तर बादरायणेन वात्स्यायनेन शबरेण तदनुसारिभिरन्यैश्च प्रतिपादित मुख्यमिदमेव—सुपरिनिश्चितः प्रत्यक्षप्रत्ययः अव्यभिचरित' मुख्यो बाधक एकः । भ्रान्तिप्रमितिलक्षणबुद्धिभेदानु-

पपत्तिः द्वितीया ॥ यतश्शून्यवादिभिरेवमुच्यते—

इन्द्रियैरुपलब्ध यत्तत्तत्त्वेन भवेद्यदि ।
जातास्तत्त्वविदो बालास्तत्त्वज्ञानेन किं तदा ॥

इति ॥ इममभिप्राय हृदिनिधायायैरेवमुच्यते—"न च शक्यमेवमवगन्तुम्, यथोपलभ्यन्तेऽर्थाः न तथा भवन्तीति । यथा तु खलु नोपलभ्यन्ते तथा भवन्तीति । तथा हि सति शशो नास्ति शशस्य बिषाणमस्तीत्यवगम्येत" (शाबरम्) इति ॥ इयमेव भ्रान्तिप्रमितिलक्षणबुद्धिभेदानुपपत्तिः ॥

उपसंहार

अत्र सर्वेषामपि दार्शनिकानां साधारण्येनाभ्युपगताः पुनरेते दशार्था.—अहङ्कारममकारत्याग· । सुखदु.खाभ्युपगम । अनुभवप्रमाणीकरणम् । स्वभावसमाश्रयणम् । क्वचिदनादित्वाभ्युपगम.। क्वचिद्दुर्निरूपतावाद.। स्वस्वसस्कारानुरोधेन गुणदोषव्यवस्था। तदनुरोधेन सर्वशास्त्रतात्पर्यवर्णनम्। स्वकीयप्राचीनपुरुषवचनप्रामाण्यम्। प्रमाणमूर्धन्यतया कस्यचित्प्रबन्धस्य वेदाद्यात्मकस्य परिग्रहश्चेत्येते दशार्था. इति शम् ॥

श्रद्धालक्षणभावनामयत्वात्पुरुषाणां निरतिशयकाष्ठागतभावनाया एव यथास्वं सिद्धिरूपत्वाभ्युपगमात् यथाभावन सिद्धिर्भवतु कोऽत्रान्योन्यमशमस्यावकाशस्सिद्धान्तानामिति सर्व चतुरश्रम् ॥

शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः ।
स एव सर्वशास्त्रज्ञ· यस्य शान्त मनस्सदा ॥

इत्यावेदयति,

प्रबन्धप्रणेता.

प्रबन्धप्रधानविषयाः

१	पीठिका	1
२	शून्यतादर्शनम्	17
३	सत्यतादर्शनम्	76
४	मिथ्यात्वदर्शनम्	97
५	सेश्वरमीमांसा	147
६	विशिष्टाद्वैतदर्शनम्	191
७	शैवदर्शनम्	245
८	कार्यकारणभावः	256
९	श्रीभाष्यभूषणम्	289
१०	आगमसारः	489

विशिष्यविषयावलिः

विषय	पुटम्
पीठिका	
मीमांसा—विचारः	1
दर्शनोद्देशः	3
संप्रदायः विश्वसनीयः	6
भावनामयः पुरुषः	7
संप्रदायसमाश्रयः	12
खण्डनमण्डनविचारः	13
शून्यतादर्शनम्	
दर्शनक्रमः	17
शून्यपदार्थः	19
अभावस्तार्किकसंमतः	21
,, अद्वैतसंमतः	24
,, सौगतसंमतः	27
,, सांख्यसंमतः	29
विमर्शकावकाश	30
बौद्धसंप्रदायः	32
स्वप्रकाशविचारः	37
अनक्षरः धर्मः	40
शून्यतोपदेशः	43
आकाशदृष्टान्तः	46
अविद्या	48
प्रमाणम्	49
नैरात्म्यम्	52
प्रतीत्यसमुत्पादः	54
पुद्गलात्मा	59
कार्यकारणभावापलापः	60
स्वयूथ्यविरोधपरिहारः	62
प्रज्ञापारामिता	65
बौद्धधर्मः	68
सत्यतादर्शनम्	
स्वभाववादः	76
प्रयत्नवादः	77
परिष्कृतस्वभावः	78
वेदान्तवादः	83
एकत्ववादः	85
द्वैतवादः	89
द्वैतैकत्ववादः	92
मिथ्यात्वदर्शनम्	
अद्वैतवादः	97
विवर्तवादः	99
असद्वादः	109
अविद्यावादः	111
मायावादः	115
अध्यासवादः	119
अनिर्वचनीयवाद	122
तुरीयकोटिविश्रान्तिः	129
अविश्रान्तिः	131

विषय	पृष्ठम्
दुर्निरूपत्वोद्देशः	133
सौगतसांकर्यनिरासः	138
सेश्वरमीमांसा	
प्रतिज्ञा	147
वृत्तिकारः	150
मोक्षः	155
मोक्षसाधनम्	157
आक्षेपपरिहारः	158
परमात्मा	160
जीवात्मा	164
स्वयंप्रकाशत्वम्	167
धर्मभूतज्ञानम्	168
न्यायपरिग्रहः	168
असत्यात्सत्यप्रतिपत्तिः	171
व्यावहारिकावस्था	174
संस्थानंजातिः	175
ब्राह्मणत्वादिः	176
सत्ताद्वैतविचारः	177
शास्त्रप्रत्यक्षविरोधः	178
सन्मात्रप्रत्यक्षम्	180
निर्विकल्पकप्रत्यक्षं	181
यथार्थख्यातिः	181
न्यायाचार्यसम्मतिः	183
स्वायंभुवसम्मतिः	184
अद्वैतपूर्वपक्षः	185
भांस्करपद्धतिः	188
विशिष्टाद्वैतदर्शनम्	
तत्त्वविवेकः	191
श्रुतिसमन्वयः	195
तत्त्वनिर्वचनम्	198
त्रिगुणत्तत्वम्	201
कालतत्त्वम्	206
शुद्धसत्त्वम्	207
धर्मभूतज्ञानम्	209
प्रमाणम्	212
प्रत्यक्षम्	214
अनुमानम्	215
शब्दः	216
चेतनतत्त्वम्	219
ईश्वरतत्त्वम्	222
अवतारः	226
साधर्म्यवैधर्म्यम्	229
अद्रव्यनिरूपणम्	231
हितं—भक्तिः	235
प्रपत्तिः	237
पुरुषार्थः	240
शैवदर्शनम्	
पीठिका	245
प्रमेयसंग्रहः	246
तत्त्वविभागः	247
अशुद्धतत्त्वम्	248
शुद्धतत्त्वम्	250
पुरुषतत्त्वम्	251
परमशिवनिरूपणम्	252
प्रत्यभिज्ञा	253
कार्यकारणभावमीमांसा	
अवतरणिका	256

विषय	पुटम्	विषय	पुटम्
कार्यकारणभावखण्डनम्	258	तार्किकासत्कार्यवादः	272
कार्यकारणभावसमर्थनम्	262	वैदिकः मध्यस्थवादः	278
सांख्यसत्कार्यवादः	268	दुर्निरूपसत्कार्यवादः	280
पातञ्जलसत्कार्यवादः	270	दुर्निरूपः—अपह्नापः	284

श्रीभाष्यभूषणे प्रधानविषयाः

सामान्य सं॥	प्रतियोगि सं॥	सामान्य सं॥	प्रतियोगि सं॥
1 उपोद्घातप्रकरणम्	30	16 अनुभूतिनिरूपणम्	11
2 सूत्रपदार्थप्रकरणम्	23	17 विज्ञानवादः	12
3 लघुपूर्वपक्षः	4	18 अहमर्थः	13
4 लघुसिद्धान्तः	3	19 शास्त्रप्रावल्यम्	9
5 महापूर्वपक्षेप्रतिज्ञा	14	20 श्रुतिसमाधिः	6
6 श्रुतिप्रकरणम्	20	21 स्मृतिसमाधिः	7
7 स्मृतिप्रकरणम्	21	22 अविद्यानिरासः	8
8 अविद्या	22	23 सूत्रतात्पर्यम्	2
9 शास्त्रप्रावल्यम्	19	24 कार्यवाक्यार्थः	29
10 प्रत्यक्षाविरोधः	15	25 चतुस्सूत्र्यर्थः	26
11 अनुभूतिः	16	26 जन्माधिकरणम्	25
12 विज्ञानवादः	17	27 शास्त्रयोनिनयः	25
13 अहमर्थात्मवादः	18	28 भावनावादः	29
14 महासिद्धान्तेप्रतिज्ञाभङ्गः	5	29 नियोगवादः	28
15 प्रत्यक्षाविरोधनिरासः	10	30 समन्वयनयः	25
		नयसङ्गतिमालिका	

श्रीभाष्यभूषणविशेषविषयाः

अनुयोगिप्रतियोगिसंख्यासहिताः

विषय	पृष्ठम्
उपोद्घातप्रकरणम्.	
1 मङ्गलम्	289
2 मङ्गलपद्यव्याख्या	290
सूत्रपदार्थप्रकरणम्.	
3 संप्रदायः	292
4 अथातश्शब्दार्थ. 7-8	293
5 ब्रह्मजिज्ञासापदार्थः	294
6 शास्त्रैकत्वम्	296
7 अथ शब्दार्थसमर्थनम् 4	296
8 अतश्शब्दार्थसमर्थनम् 4	300
लघुपूर्वपक्षः	
9 साधनचतुष्टयम् 21	301
10 उद्गीथविचारः 22	302
11 कर्मसमुच्चय. 19	302
12 विरोधादिहेतुः 23	302
13 वाक्यजज्ञानम् 14	305
लघुसिद्धान्तः	
14 वाक्यजमसाधनम् 13	305
15 उपासनं साधनम्	306
16 उपासनंस्मृतिरूपम्	307
17 सैव भक्तिः	308
18 भक्तेरङ्गं कर्म	309
19 साधनसप्तकम् 11	309
20 धर्मेणपापापनयः	310
21 साधनचतुष्टयंनवृत्तम् 9	310
22 उद्गीथसमाधिः 10	311
23 विरोधादिनिरासः 12	311
महापूर्वपक्षप्रतिज्ञा	
24 निर्विशेषंब्रह्म 58	312
25 ब्रह्मातिरिक्तमिथ्या 59	313
श्रुतिप्रकरणम्	
26 ब्रह्मसत्यम् 83	314
27 जगन्मिथ्या 84	315
28 उभयत्रसूत्रम् 85	315
स्मृतिप्रकरणम्.	
29 विष्णुपुराणम् 87 .	315
30 भगवद्गीता 86	316
अविद्याप्रकरणम्.	
31 स्वरूपमनिर्वाच्यम् 92	316
32 तिरोधानम् 93	317
33 प्रमाणम् 96	317
34 तत्रविष्णुपुराणम् 103	318
35 निवृत्तिः निवर्तकं च 104	318

विषय		पुटम्
	शास्त्रप्राबल्यम्.	
36	बाध्यबाधकभावः	319
37	शास्त्रंप्रबलम् 79	320
38	मोक्षशास्त्रम् 80	321
39	निर्गुणवाक्यम् 82	322
40	सत्यादिवाक्यम् 82	322
41	कार्यवाक्यार्थः	325
	प्रत्यक्षाविरोधप्रकरणम्.	
42	प्रत्यक्षंसन्मात्रग्राहि 61	326
43	भेदेप्रमाणानुपपत्तिस्तर्कः 62	326
44	प्रमेयानुपपत्ति· 63	327
45	अनुमानम् 64	328
46	तस्यनिरुपाधिकत्वम् 64	329
47	सदेवानुभूतिः 64	330
	अनुभूतिप्रकरणम्	
48	अनुभूतिःस्वतस्सिद्धा 65	330
49	ज्ञानतालिङ्गकम् 65	331
50	मानसप्रत्यक्षम् 65	333
	विज्ञानवादप्रकरणम्	
51	अनुभूतिर्नित्या 66	334
52	अनुभूतिःनिर्विकारा 67	334
53	अनुभूतिःनिर्विशेषा 67	335
	अहमर्थोऽनात्मा.	
54	ज्ञाताऽनात्मा	336
55	संविदात्मता 73	336
56	अहमर्थानात्मता 69	337
57	पूर्वपक्षसारार्थः	338
	महासिद्धान्तेप्रतिज्ञानिरासः	
58	निर्विशेषमप्रमाणम् 24	340
59	निर्विकल्पकादिः 25	342
60	भेदाभेदवादः 25	344
	प्रत्यक्षविरोधः	
61	भेदेप्रमाणम् 42	345
62	नसन्मात्रेप्रत्यक्षम् 43	346
63	संस्थानमेवजातिःभेदश्च 44	347
64	अनुमाननिरासः 45	348
	अनुभूतिनिरूपणम्	
65	स्वत.परतस्सिद्धिः 48	349
	विज्ञानवादः.	
66	अनुभूतिरनित्या 51	352
67	स्मृतिः	352
68	अनुभूतिस्सविकारा 52	356
69	सविशेषा 53	356
	अहमर्थात्मवादः.	
70	विरोधयुक्तिदोषः 56	358
71	संग्रहकारिका 56	359
72	स्वयंप्रकाशः	360
73	प्रभाविचारः	361

विषय	पुटम्
74 संविदात्मतानिरासः 55	362
75 चिच्छायाचित्संपर्कः	365
76 चिदभिव्यङ्ग्यता 69	366
77 स्वतःप्रामाण्यम्	367
78 सुषुप्त्यवस्था 69	368
79 मुक्त्यवस्था 69 ..	370
शास्त्रप्राबल्यनिरासः.	
80 व्यवहारावस्था 37	371
81 असत्यात्सत्यासिद्धिः 38	372
82 स्फोटवादः 39 .	374
83 असत्यत्वम् 40 .	374
श्रुतिसमाधिः.	
84 निर्विशेषपरवाक्यम् 26	375
85 भेदनिषेधः 27	380
86 सूत्रविचारः 28 ...	381
स्मृतिसमाधिः.	
87 भगवद्गीता 30	382
88 प्रत्यस्तमितश्लोकः 29	384
89 ज्ञानस्वरूपश्लोकः 29	389
90 चतुश्लोकीद्वयम् 29	391
91 विभेदजनकश्लोकः 29	391
92 अत्रसंप्रदायः 29	392

विषय	पुटम्
अविद्याविचारः.	
93 आश्रयानुपपत्तिः 31	396
94 तिरोधानुपपत्तिः 32	397
95 स्वरूपानुपपत्तिः 31	397
96 अनिर्वाच्यत्वानुपपत्तिः 31	397
97 प्रमाणेप्रत्यक्षम् 33	398
98 अनुमानम् 33 . .	399
99 प्रत्यक्षनिरासः 33 ...	399
100 अनुमाननिरासः 33	401
101 ख्यातिविचारः 33	403
102 यथार्थख्यातिः 33	404
103 श्रुत्यादिदूषणम् 33	406
104 स्मृतिदूषणम् 34 .	407
105 निवर्तकानुपपत्तिः 35	409
106 सामानाधिकरण्यम्	409
107 अपर्यवसानवृत्तिः	412
108 सङ्कलितार्थः	414
109 निवृत्त्यनुपपत्तिः 36	417
प्रथमसूत्रतात्पर्यार्थः.	
110 अधिकार्यभावः	419
111 सिद्धव्युत्पत्त्यभावः	420
112 सिद्धव्युत्पत्तिसमर्थनम्.	421
कार्यवाक्यार्थः.	
113 मण्डनमतखण्डनम्	422
114 कार्यत्वनिरूपणम्	423
115 कार्यतावगमः	424

विषय	पुटम्
116 क्रियातिरिक्तता	425
117 देवताराधनम्	526
118 कल्प्यापूर्ववादः	426
119 अपूर्वनियोगः	427
120 शाब्दबोधः	428
121 कार्यनिराकरणम्	429
122 पूर्वपक्षयुक्तिः	431
चतुस्सूत्र्यर्थः	
123 जिज्ञासासूत्रम्	432
124 जन्मादिसूत्रम्	434
125 शास्त्रयोनिसूत्रम्	436
126 समन्वयसूत्रमू	437
जन्माद्यधिकरणम्.	
127 अधिकरणम् . .	438
128 लक्षणम्	439
129 विशेषणम्	441
130 उपलक्षणम्	441
131 सिद्धान्तः .	441
शास्त्रयोनित्वाधिकरणम्.	
132 अधिकरणावतरणम्	443
133 यामुनेयसरणिः	444
134 मध्यस्थशङ्कासमाधी	445
135 पूर्वपक्षः	445
136 सिद्धान्तः	447

विषय	पुटम्
भावनावादः.	
137 शास्त्रावस्था	449
138 प्रयोजनम्	449
139 भावनास्वरूपम्	451
नियोगवादः.	
140 नियोगस्वरूपम्	453
141 नियोगावगमः	453
142 नियोगःकार्यम्	454
143 नियोगानुबन्धः ...	455
144 अर्थपदार्थः .	456
समन्वयाधिकरणम्.	
145 अधिकरणविषयः .	457
146 पूर्वपक्षः	458
147 निष्प्रपञ्चीकरणम्. .	459
148 तन्निराकरणम्	460
149 ध्याननियोगः .	461
150 वाक्यार्थज्ञानम्	462
151 तन्निराकरणम् ..	464
152 जीवन्मुक्तिः .	464
153 भेदाभेदः	465
154 तन्निरासः	466
155 ध्याननिरासः	467
156 सिद्धान्तः	468
157 नयसङ्गतिमालिका	470

आगमसारविषयाः

आगमशब्दार्थः		486
तन्त्रशब्दार्थः		492
आगमविभागः		494
शैवागमः	....	495
पाञ्चरात्रागमः		497
वैखानसविभागः		500
पाञ्चरात्रप्रभेदः		503
पाञ्चरात्रप्रतिपाद्यः		505
नारायणीयभगवद्गीता		507
भागवतसिद्धान्त		510
मूलश्रुतिः		513
अर्चाविचारः		516
अर्चनंसुकरम्		520

अत्र प्रसक्तग्रन्थकर्तृनामावलिः

अक्षपाद 78, 121, 185
अघोरशिवाचार्य 249
अप्पयदीक्षित 246
अभिनवगुप्त 255
अभियुक्त 168
अयाचित 151
आनन्दगिरि 87, 125
आनन्दतीर्थ 27
आनन्दबोध 86, 131, 139, 193
उदयनाचार्य 26, 52, 80, 200, 496
उपवर्ष 19, 150, 153, 155, 374
औदुम्बरायण 101
कणाद 121
कपर्दि 150
कमलशील 20
कालिदास 255
कुमारिल 3, 6, 36, 42, 58, 114, 136, 155, 160, 164, 168, 169, 173
कूरेश 197, 515
खण्डनकृत् 137
गङ्गाधर 139
गुहदेव 150
गौडपादाचार्य 108
गौडमीमांसक 457
गौतम 130
चन्द्राचार्य 102
जरत्प्राभाकर 459
जरन्मायावादी 457
जरन्मीमांसक 431
जैमिनि 83, 102, 307
टङ्क 150, 307
टीकाकार 133
दिङ्नाग 20, 347
देवसूरि 490
द्रमिडाचार्य 125, 150, 309, 307
द्वैपायन 189, 194, 308
धर्मकीर्ति 20, 171, 307, 327, 347
नागार्जुन 20, 33, 62, 74
नागाह्वय 75
नाथमुनि 194, 396
नारायणाचार्य 189
निगमान्ताचार्य 151
न्यायसूत्रकार 112, 185
पतञ्जलि 102, 103
परकालसूरि 491

पराशर 189, 194
पार्थसारथि 152, 160, 167
प्रज्ञाकर 20, 112
प्रशस्तपाद 19, 175
प्राभाकर 142, 175
बलदेवाचार्य 515
बादरायण 15, 18, 47, 106, 140, 152, 188, 193, 245, 380
बाष्कलिबाध्व 43
बोधायन 13, 150, 152, 374, 112
ब्रह्मदत्त 92
ब्रह्मनन्दी 91, 307, 309
भर्तृप्रपञ्च 92, 30, 158
भर्तृमित्र 92, 30
भर्तृहरि 15, 85, 102, 171, 186, 193, 191
भवभूति 255
भामतीकार 133
भारुचि 150
भाष्यकार 108, 309
भास्कर 14, 30, 122, 193
भोजदेव 206, 248
भोजराज 515
मण्डनमिश्र 86, 88, 104, 110, 138, 158, 193, 343
मनु 9
मधुसूदन 89
मम्मट 254
महाचार्य 196
माणिक्यचन्द्र 254
माधवाचार्य 430
मैत्रेयनाथ 20
यादवप्रकाश 30, 96, 143, 189, 193
यामुन 119, 141, 501, 444
यास्क 101, 103, 107, 490
रामानुज 96, 143, 151, 154, 172, 175, 183, 189, 193
वररुचि 98, 102, 124, 431
वसुबन्धु 20, 61
वसुरात 102
वाक्यकार 91, 307
वाचस्पति 26, 86, 104, 106, 132
वात्स्यवरद 114
वात्स्यायन 16, 19, 21, 79, 121, 185, 350
वार्ताक्ष 101
वार्तिककार 133, 142
वाल्मीकि 189
वासुदेवस्वामी 501
विवरणकार 127, 144, 133, 175
वृत्तिकार 150, 152
वेदान्ताचार्य 6, 16, 18, 84, 97, 151, 184 189, 196
व्याडी 103
व्यास 36

व्यासदेव 29, 85
शबर 19, 121, 152, 153, 155, 167
शाकटायन 101
शान्तदेव 20
शान्तरक्षित 20
शङ्कराचार्य 88, 106, 136, 171, 186, 191
शालिकनाथ 63, 115, 182, 183, 298
शुकादि 89
शौनक 518
श्रीहर्ष 137, 139
सर्वज्ञात्मा 103
सामगाचार्य 189
सुदर्शनसूरि 196
सुरेश्वर 127
सूत्रकार 124, 143
सोमेश्वर 158, 160
हलभूति 151

अत्र प्रसक्तप्रबन्धनामावळिः

अद्वैतसिद्धि 108
अध्यात्मशास्त्र 197
अध्याशयसंचोदन 35
अनुव्याख्यान 27
अन्तर्यामिब्राह्मण 163
अभिधर्म 35, 36
अभिधर्मकोश 20
अभिसमयालंकार 20
अवैदिकदर्शनसंग्रह 139
अष्टसाहस्रिका 20
अष्टाक्षरब्रह्मविद्या 520
आगमप्रामाण्य 444
आत्मातत्त्वविवेक 26, 52, 114, 184, 200
आत्मासिद्धि 119, 141, 366, 370
आपस्तम्बधर्म 464
आर्यरत्नराशि 71
इतिहास 219
इतिहाससमुच्चय 6
इन्द्ररात्र 497
इष्टसिद्धि 108, 129, 146
ईश्वरप्रत्याभिज्ञा 254
ईश्वरसंहिता 497, 515
ईश्वरासिद्धि 444
उपनिषत् 164
ऋग्वेद 9, 516
ऋषिरात्रम् 497

एकायन 513
ऐतरेय 164
और्वपञ्चरात्र 505
कात्यायनकारिका 95
कामिका 250, 496, 520
कालोत्तर 503
काव्यप्रकाश 254
काव्यप्रकाशव्यख्या 171
कुमारिलवार्तिक 23
कृतकोटि 151
क्रतुपञ्चरात्र 505
खण्डन 139
खण्डनखण्डखाद्य 108
गौडपादकारिका 89
गौडपादकारिकाभाष्य 118, 142
चतुर्वर्गचिन्तामणि 505
चतुस्तव 33, 51
छान्दोग्य 164
जयमङ्गला 490
जया 503
तत्त्वटीका 151, 354, 365
तत्त्वनिर्णय 189
तत्त्वप्रकाश 206, 248
तत्त्वबिन्दु 105
तत्त्वकौमुदी 79
तत्त्ववैशारदी 82
तत्त्वसमीक्षा 105, 133, 132
तत्त्वसंग्रह 20
तत्त्वसंग्रहपञ्जिका 20
तत्त्वसार 114
तत्त्वालोक 115
तन्त्रवार्तिक 3, 42, 58, 83, 156, 161, 164, 168
तन्त्रवार्तिकव्याख्या 158
तात्पर्यचन्द्रिका 5, 521
तात्पर्यदीपिका 196
दक्षस्मृतिः 519
धर्मपद 28, 62
धर्मसङ्गीति 68
ध्वन्यालोक 255
नमस्कारसप्तश्लोक 390
नारदपञ्चरात्र 498
नारायणीय 2
निरुक्त 101
नीतिमाला I89
नैरात्म्यशास्त्र 84
न्यायकणिका 104
न्यायकुसुमाञ्जलि 76, 80, 457
न्यायपरिशुद्धि 41, 412, 515
न्यायबिन्दु 307
न्यायमकरन्द 86, 90, 97, 108, 112, 139, 144, 146, 193
न्यायमञ्जरी 112, 451, 495
न्यायरत्नाकर 36, 184
न्यायवार्तिक 7
,, तात्पर्यटीका 2, 24, 86, 105
न्यायसिद्धाञ्जन 16, 197
न्यायसुधा 158, 160

न्यायसूत्र 77, 78, 120
„ भाष्य 13, 16, 79
पञ्चपादिका 63, 88, 121, 139, 141, 154, 292, 294, 385
पञ्चाध्यायी 495
पद्मपुराण 501, 521
परमतभङ्ग 177
पराशरमाधवीय 153
पराशरसंहिता 493
पाञ्चरात्ररक्षा 36, 196
पाञ्चरात्रागमः 219
पातञ्जलसूत्र 120, 184
„ भाष्य 29
पाद्मसंहिता 9, 498
पाराशरविजय 196
पितापुत्रसमागम 51
पुण्डरीकसंवाद 520
पुराणसार 495
पौष्करसंहिता 491, 506
प्रकरणपञ्चिका 2, 86, 63, 146, 175, 177, 188, 193
प्रज्ञप्तिमात्रतासिद्धि 20, 61, 63
प्रपञ्चहृदय 151
प्रबोधचन्द्रोदय 76
प्रमाणनयालङ्कार 490
प्रमाणमाला 131
प्रमाणलक्षण 153
प्रमेयपारायण 181
प्रमेयकमलमार्तण्ड 287, 285
बाह्यार्थसिद्धि 179
बृहट्टीका 158
बृहदारण्यकभाष्य 65, 88, 97, 110, 167, 191
बृहस्पतिरात्र 497
बोधिचर्यावतार 28, 33, 44, 48, 60, 68, 76, 99, 116
बोधिचर्यावतार पञ्जिका 3, 5, 20, 23
बोधिचित्तविवरण 64
बौद्धागम 21
ब्रह्मतत्त्वसमीक्षा 131, 132, 105
ब्रह्मरात्र 497
ब्रह्मसिद्धि 86, 110, 138, 193
ब्रह्मसूत्रवृत्ति 150
ब्रह्माण्ड 512
ब्रह्मानन्दीय 108
भगवद्गीता 8, 65, 111, 166
„ भाष्य 118, 188
भरतचतुश्श्लोकी 391
भामती 44, 105, 109, 123, 125, 139, 145
भामती कल्पतरु 88
भावप्रकाशिका 381
भास्करभाष्य 13, 93, 100 106, 116, 143, 153
भुवनकोशदशक 407
मणिमेखला 151
मत्प्रवचन 53

महापञ्चरात्र 505
महाभारत 10, 36
महाभाष्य 85, 98, 102, 105
माण्डूक्यकारिका 4, 10, 65, 113, 125, 131
माण्डूक्यकारिका भाष्य 113, 120
माध्यमिककारिका 20
,, वृत्तिः 30
मानमेयरहस्य 177, 297, 353
मीमांसाशास्त्र 2, 150
मुण्डक 164
मूलश्रुति 513
मोक्षधर्म 498
यामलं 493
रत्नत्रय 505
रहस्याम्नाय 514
राणक 158
लङ्कावतार 20, 28, 32, 44, 46, 53, 56, 59, 62, 64, 75, 110, 116, 139, 146
वराहचतुश्शोकी 391
वराहपुराण 490
वाक्यं 307, 309
वाक्यपदी 2, 15, 84, 102, 103, 186, 191, 193
वाक्यार्थमातृका 298
वात्स्यायनभाष्य 121, 118, 137, 164, 183
वार्तिकं 3, 98, 102, 129, 155
वादावलिः 429
वाराहतन्त्र 492
विंशतिलक्षण 150
विदुरनीति 2
विधिविवेक 104, 449
विनय 36
विभ्रमविवेक 129
विरोधपरिहार 209
विवरण 106, 113, 108, 294
विष्णुतत्त्व 499, 521
विष्णुपुराण 113, 118, 205, 512
विष्णुसंहिता 492
विष्णुसहस्रनाम॥ 515
विंशतिलक्षण 150
वीरत्रयोदय 495
वृत्तिग्रन्थः 152
वेदान्त 98, 124, 375
वेदान्तशास्त्र 84
वेदार्थसंग्रह 150, 168, 194, 393, 397
वैकुण्ठदीक्षितीय 496
वैखानस सू॥ 501
वैयाकरणपरिभा 309
वैशंपायनसंहिता 36, 503
वैष्णवधर्मशास्त्र 500
व्याकरणाधिकरण 160
व्यासदेभाष्य 82, 184
शतदूषणी 143, 184
शतपथब्रा 499

शबरभाष्य 23, 62, 121, 123, 152, 374
शाण्डिलस्मृति 511,
शारीरक 26, 97, 129
शारीरकभाष्य 24, 87, 115, 126, 133, 153, 138, 301
शारीरकमीमांसा [307, 362, 84, 154
शालिस्तम्बसूत्र 48
शास्त्रदीपिका 24, 63, 109, 114, 165, 166, 175
शिवाद्वैतनिर्णय 395
शिवार्कमणिदीपिका 246, 496
शिवरात्र 497
शैववैष्णवागम 111
श्रद्धासूक्त 9
श्रीकरसंहिता 504
श्रीकण्ठभाष्य 246
श्रीभाष्य 13, 14, 93, 118, 143, 150, 152, 165, 169, 170, 192
श्रीभाष्यभूषण 198
श्रुतदीपिका 196, 381, 415
श्रुतप्रकाशिका 114, 143, 153, 170, 381
श्लोकवार्तिक 36, 63, 100, 114, 134, 158, 160, 161, 168, 170, 174, 347
श्वेताश्वतर 246
संकल्पसूर्योदय 18
संकेत 171, 254
संक्षेपशारीरक 103, 107, 127, 133, 144, 175
संग्रह 102
संवित्सिद्धि 42
सच्चरित्ररक्षा 497
सनत्कुमारसं 497
सर्वदर्शनसं 4, 42, 245
सर्वार्थसिद्धि 95, 97, 106, 130
सहस्रनामभष्य 197
सात्त्वतसं 506
सुगतशास्त्र 375
सुगतागम 36
सिद्धान्तबिन्दु 127, 89
सिद्धित्रय 447
सेश्वरमीमांसा 147, 160, 177, 189, 154
सूत्र 34, 36
सूत्रभाष्य 119, 122
सौरभेयागम 248
स्फोटसिद्धि 104
स्मृतयः 219
हयग्रीवसंहिता 504
हारीतस्मृतिः 501

अत्र प्रसक्तवादावलिः

अकस्माद्वाद 77
अख्यातिवाद 30
अणुवाद 258
अद्वैतदर्शन 4
अद्वैतवाद 97, 106
अद्वैतसिद्धान्त 139, 136
„ वेदान्त 160
„ शाङ्कर 133
अध्यात्मशास्त्र 83
अनन्यत्ववाद 98, 106
अनिर्वचनीयवाद 108, 123
„ कार्यकारणवाद 284
अनुमेयतावाद 352
अनुव्यवसायवेद्यता 352
अनुषङ्गवाद 77
अनेकान्तवाद 15, 82, 98
अन्वयदृष्टि 123
अपवाददृष्टि 108, 133
अभाववाद 171
अभावविचार 21
अभावाद्वैत 87
अभिन्ननिमित्तोपादान 246
अभिव्यक्तिवाद 122
अर्थासंस्पर्शवादः 431
अलीकवाद 131
अवच्छेदवाद 127
अवस्थावाद 192, 280
अविद्यावाद 103, 109, 111,
अविश्रान्तिपक्ष 131
असत्कार्यवाद 109, 256, 280
अस्वयंप्रकाश 351
अहमर्थात्म 358
आकस्मिकतावाद 256
आकृतिवाद 152
आगमि . 111
आत्मवाद 152, 153
आत्मैकत्व 166
आभास 127
आरम्भ 122, 256
आरादुपकारकत्व 310
आरोपदृष्टि 133
आर्यसत्य 21, 33, 49, 258
आर्हत 4, 81, 122
आलङ्कारिक 255, 211
आश्मरथ्यमत 193
ईश्वरवाद 258
उपवर्षसंमत 152
एकजीववाद 127
एकत्ववाद 82, 85, 165
एकायशाखा 219
ऐकात्म्यवा 165
ऐक्यसिद्धान्त 194

औडुलोमिमत 193
औदुम्बरायणमत 102, 103
औपनिषद 4, 20, 11
कदाचिद्वाद 77
कल्प्यापूर्ववादः 426
कापिल 20
कारणदृष्टि 106, 110, 132
कार्यदृष्टि 106, 110, 132
कार्यवाक्यार्थ 156, 422, 459
काशकृत्स्नमत 193
कुमारिलसिद्धान्त 112, 122, 176, 353
कोट्यश्चतस्रः 131
क्षणभङ्ग 83, 361
गौतमीय 77
चतुर्थीकोटिः 129
चार्वाक 17, 111, 258
चित्राक्षेप 152
,, परिहार 152
जगत्सत्यता 119
जगदनादि 83, 159
जयविजयवृत्तान्त 209
जरदौपनिषद 122
जरद्वैदिक 156
जरत्प्राभाकर 176, 182
जरन्मायावाद 93, 158, 121
जीवाश्रिताविद्या 87
ज्ञानानुत्पत्तिपक्ष 87
तार्किक 15, 57
तार्किकसमय 269
तार्किकसिद्धान्त 199
तुरीयकक्ष्या 130
तुरीयकोटि 130
,, पक्ष 284
दार्शनिक 256
दुर्निरूपता 132
दृष्टनष्टदर्शन 117
दृष्टिसृष्टि 127
द्वैतवाद 85, 114
द्वैतैकत्व 92 15
धर्मात्म 19, 61
धातुत्रय 194
ध्याननियोग 87, 93, 457, 462
नकुलीशपाशुपत 245
नव्यप्राभाकर 176
नव्यौपनिषद 122
नानात्वनिषेध 165
नित्यसुखपक्षः 183
निरपेक्षवाद 77
निरपेक्षेश्वर 245
निरालम्ब 23, 62, 152
निरीश्वरमीमांसक 157
निर्विशेषब्रह्म 184, 186, 200
निषेधवाद 107
निस्स्वभाववाद 119
निष्प्रपञ्चीकरणनियोग 93, 457
नैयायिकमत 22, 81, 112, 130, 367
नैरात्म्यदर्शन 11

न्यायदर्शन 22, 130
पञ्चमीकोटिः 109, 131
पण्डापूर्वसुख 430
परिणामप्रक्रिया 24
परिणामभेद 123
परिणामवाद 101, 103, 106, 144, 256, 362
पाञ्चरात्रागममूल 246
पातञ्जल 112, 192
पुद्गलात्मा 19, 61
प्रकार्यद्वैत 196
प्रतिबिम्बवाद 127
प्रतिभावाद 102
प्रतिभावाक्यार्थ 101
प्रत्यभिज्ञादर्शन 253
प्रत्येकयान 62
प्रपञ्चमिथ्यात्व 97
प्रभाविचार 361
प्रयत्नवाद 77, 119
प्रसङ्गवाद 77
प्राकट्यविचार 357
प्राभाकरमीमां 80
प्राभाकर्यायथ्रुत्यर्धः 178
बादरायणीय 83
बाधितानुवृत्ति 87
बाह्य 113, 115
बाह्याद्वैत 97
बुद्धदर्शन 3
बौद्ध 22
बौद्धप्राभाकर 142
बौद्धमतावलम्बि 143
ब्रह्मपरिणाम 186, 30
ब्रह्मवाद 101, 140
ब्रह्माद्वैतवाद 280
ब्रह्माश्रिताविद्या 87
भक्तिसिद्धान्त 245
भर्तृप्रपञ्चसिद्धा 192
भागवतसिद्धान्त 229
भावाद्वैतमत 357
भावान्तराभाववाद 21, 30, 170, 346
भाष्यकारमत 152
भास्करपक्ष 306, 188, 192, 194
भूतचैतन्यवाद 365
भूतवादि 111
भेदाभेदपक्ष 95, 143, 186, 344, 465
भ्रान्तिज्ञानवादि 121
भ्रान्तिवाद 78, 109, 120
मण्डनाद्वैत 87, 357, 422
मध्यमक 38
मध्यमकवाद 115
मध्यमागमनिष्ठा 285
मध्यस्थदृष्टि 133
महायान 62, 75
माध्यमिक 18, 24, 44, 63, 101, 258, 278
मायावाद 115, 116, 109
माहायानिक 19, 21, 43, 55, 62, 63

महायानिकपक्ष 141
,, पक्षानुप्रवेश 145, 179
मिथ्यावाद 175
मिथ्यादृष्टि 107
मीमांसकपक्ष 167
यदृच्छावाद 77
यादवप्रकाशपक्ष 306, 192, 194
योगाचार 37, 63, 116
रामानुजसिद्धान्त 158, 187, 192, 194, 184 118
लोकायत 76
लोकायतक्षपणक 142
लोकायतबौद्ध 176, 142
वनवादः 152
वर्णशब्दवादः 374
वस्तुविकल्पवाद 15
वाक्यार्थज्ञान 462
वाचस्पतिसिद्धान्त 127, 131
वार्तिककृदाशय 160
वार्ष्यायणिसिद्धा 103
विकारवाद 192
विचारासहत्व 109
विज्ञानपरिणाम 100
विज्ञानवाद 62, 138, 349, 140
विज्ञानाद्वैत 117
विज्ञानमात्र 3, 83
विवर्तवाद 85, 101, 103, 156, 158
विशिष्टाद्वैत 150, 154, 160, 164, 165, 175 183, 188, 189, 194, 196, 232, 376
विशुद्धाद्वैत 5, 88
विश्वापह्नव 287
वृत्तिकारमत 152
वेदान्तसिद्धान्त 17, 97, 100, 101, 117, 127, 219
वैदिकपुत्रवृत्तान्त 209
वैदिकमत 367
वैभाषिक 258
वैयाकरण 101
वैशेषिक 29, 112, 278, 343
व्यतिरेकदृष्टि 123, 137
व्यवहारदृष्टि 24
व्याकरणदर्शन 103, 104
व्योमातीतवाद 246
शक्तिवाद 192
सब्दार्थासंस्पर्श 101
शाङ्करमार्ग 371
,, सिद्धान्त 122, 194
,, अद्वैत 87
शाकटायनमत 102
शिवाद्वैत 253
शिशुपालवृत्तान्त 209
शून्यतादृष्टि 30
शून्यवाद 18, 23, 101, 102, 115, 119, 131, 138, 139, 152, 258
शून्यवादवैलक्षण्य 140

शैव 245, 206
शैवागममूल 245
श्रावकयान 62
श्रीभाष्याभिप्राय 198
षट्त्रिंशत्तत्त्ववाद 247
संबन्धाक्षेप 152
,, परिहार 152
संवृतिवाद 105
सत्यवाद 18
सत्कार्यवाद 184, 256, 268, 280
सत्तामात्रब्रह्म 193
सन्मात्रग्राहि 346
समुच्चयपक्ष 310, 158
सर्वज्ञोपदेश 285
सर्वशून्यवाद 199
सर्वसङ्करवाद 142, 143
सर्वानुकूलवाद 5
सर्वानुगतसन्मात्र [ब्रह्मवाद 192
सर्वास्तिवादि 146
सर्वैक्यवाद 199
सल्लक्षणब्रह्म 100, 86
सांख्यमत 278, 343, 90, 122, 221, 274
सापेक्षवाद 256
सापेक्षकारण 253
सापेक्षेश्वर 245
सुगत 343
सिद्धान्तभेद 141
सिद्धान्तसाङ्कर्य 142
सृष्टिप्रलय 279
सेश्वरमीमांसक 157
सेश्वरमीमांसापक्ष 150, 151, 183, 185, 189
सेश्वरसांख्य 29, 272
सौगतसिद्धान्त 122, 17, 23, 32, 138
सौत्रान्तिक 34
स्फोटवाद 101, 102, 151, 152, 181
स्याद्वाद 123
स्वतन्त्रतत्त्वत्रय 192
स्वभाववाद 5, 76, 77, 257
,, परिष्कार 119
स्वयंप्रकाशता 351
स्वायंभुव 184
हीनयान 33, 34

अत्र द्रष्टव्यपदालिः

अंशाधिकरण 412
अख्यातिः 122
अक्षरयोगः 237
अखण्डार्थ 377, 389
अग्रहरूपा 179
अघटितघटना 225

अघोरहृदय 253
अजडशक्ति 111
अचेतन 201
अज्ञानप्रतिबिम्बित 128
अज्ञानविषयीकृत 128
अज्ञानोपहित 128
अज्ञानानुपहित 128
अतिदेश 470
अदृष्टलिङ्गकं 444
अधिकरणत्व 439
अध्यवसाय 90, 203, 213
अध्यास 119, 120 122
अनन्त 150, 152
अनन्यत्व 97
अनादिमुक्त 253
अनिमिषप्रेक्षा 33
अनिर्वचनीय 25, 105
अनिर्वचनीयख्याति 121
अनुत्पादानिरोधा 64
अनुपलब्धि 353
अनुबन्ध 431
अनुभयात्मक 273
अनुभव 108
अनुभूतित्व 350
अनुविधेय 216
अनुवृत्ति 214
अन्तर्यामि 92, 128, 191
अन्यथाख्याति 121
अपच्छेदनय 321, 381
अपर्यवसानवृत्ति 412
अपवाद 470
अपृथक्सिद्धि 195
अभिमान 79, 90
अभिव्यक्ति 274
अभिसमयाधिगम 57
अभ्यासयोग 237
अर्चारूप 228
अर्थक्रियाकारित्व 108
अर्थक्रियासामर्थ्य 142
अर्थतत्त्व 350
अर्थभावना 451
अर्थपञ्चमाकार 418
अर्थश्रावक 62
अर्थापत्ति 354
अलीकनिर्भास 145
अवतार 88, 226
अवताररहस्य 229
अवतारविग्रह 209
अवरमुक्ति 252
अवस्था 92, 195, 202
अवान्तरस्थिति 136
अविद्या 79, 112, 120, 202, 396
अविद्यात्व 132
अविवेक 18, 79, 122
अव्यक्त 248
अव्याकृत 92
अशुभा 16
असत्यात्सत्यसिद्धि 372
असत्त्व 23

असत्प्रकाशनशक्ति 112
असम्मूढ 383
अहंकारतत्त्व 203
आकाश 46
आकाशशरीर 163
आकृति 102
आकृत्यधिकरण 412
आक्षेप 470
आख्यातार्थ 258
आगम 481
आत्मग्रह 11
आत्मज्ञान 180
आत्मविभूतिभाव 197
आत्मीयग्रह 11
आदिमुक्त 253
अधिकारिकशरीर 248
आधेयत्व 201
आप्त 490
आर्यसत्य 54
आलोचन 90
इतिकर्तव्यता 459
इन्द्रिय 248
इन्द्रियादि 203
इन्द्रियार्थसन्निकर्ष 121
इष्टसाधनता 423
ईशानमस्तक 253
ईश्वर 83, 184
ईश्वरतत्त्व 222, 247, 250
ईश्वरप्राणिधान 184
उच्छेदसंज्ञा 283
उत्पत्तिः 282
उत्पादव्यया 64
उत्सर्गापवाद 378
उपक्रमनय 381
उपचार 386
उपदेश 1, 88
उपादेशलिङ्गक 414
उपलब्धि 91
उपादेय 460
उपाधि 215
उपोद्घात 470
उभयलिङ्ग 382
ऊह 214
एकत्वैकान्त 98
एकनेत्र 252
एकपाद्विभूति 208
एकरुद्र 252
औत्पत्तिकी 103
औदार्य 169
कण्टकतैक्ष्ण्य 257
कथञ्चिन्नित्य 82
कथा 216
कर्म 83, 247
कर्मयोग 236
कर्मसमुच्चित 157
कर्मेन्द्रिय 250
कला 247
कल्पमन्त्र 493
कापाल 245
कारणसमवाय 269

कार्यता 423
कार्यलिङ्गक 444
कार्याकार 283
कार्यावस्था 123
काल 206, 247
कालामुख 245
कुलिङ्गशकुनि 10
कूटस्थ 126, 257
,, नित्य 201. 270
कृछ्राध्वा 247
केशोण्डूक 41
केशोपरादिवत् 187
क्रियायोगः 237
क्रोधः 32
क्षणिक 42
क्षीरादिवत् 187
क्षेत्रज्ञ 92 191
गाम्भीर्य 469
गुणतत्त्व 248
गोबलीवर्द 380
चण्डालमहिष 68
चतुर्निकाय 34
चतुष्कोटि 24
चिच्छायापत्ति 365
चित्सपर्क 365
चिदभिव्यङ्गय 366
चेतनतत्त्व 219
छागपशु 381, 197
जडशक्ति 111
जन्मसंज्ञा 283
जल्पवितण्डे 216
जिन 31
जाति 216
जीवन्मुक्ति 87, 35, 464
जीवस्वातन्त्र्य 223
जीवात्मस्वरूप 164
जीवेश्वरभेद 186
ज्ञान 79, 91
ज्ञानत्व 209
ज्ञानयोग 236
तत्त्व 199
तत्त्वज्ञान 22, 199, 121
तत्त्वदर्शी 88
तत्त्वाधिष्ठान 139
तत्पुरुषवक्त् 253
तत्त्वत्रय 192, 195
तत्त्वोत्पत्ति 204
तथागत 32
तन्त्र 492
तन्मात्र 204, 248
तमः 202, 204
तर्कः 2, 214
तात्त्विकं 132
,, शरीरं 248
तात्पर्यलिङ्ग 376
तादात्म्य 97, 136, 281
तायी 69
तीर्थकर 56
तुच्छ 101, 110
,, लक्षण 44

तुरीयकोटि 25, 109
तैजस 203
तैमिरिक 41
त्रिगुण 201
त्रिपाद्विभूति 208
त्रिमूर्ति 252
त्र्यध्वा 270
दिव्यं 214
दीक्षा 251
दुःख 42, 54
दुःखोपशम 119
दुर्घटत्व 398
दुर्निरूपत्व 137
दूषण 29
दृष्टान्त 470
देवताधिकर 426
देशना 37
द्विचन्द्रज्ञान 88
द्वित्वैकत्व 98
धर्मनैरात्म्य 61
धर्मभूतज्ञान 210
ध्यानत्व 307
ध्यानयोग 236
ध्रुवत्व 307
नटवत् 284
नटसामाजिक 242
नाथ 64
नाद 250, 374
नास्तितासाधर्म्य 116
निग्रह 216
नित्यविभूति 208
नित्यस्तथागत 57
नियति 247, 254
नियोग 453, 459
नियोज्य 459
निरन्वयदिनाश 122
निरन्वयोदय 106
निरभिलप्य 122
निरुपाख्य 282
निरुपाधिकनिषेध 86
निरुपाधिकविधि 86
निरुपाधिकाभाव 122, 138
निरोध 54
निर्माणशरीर 95, 188
निर्विकल्पक 181, 214
निर्विशेष 137
निष्कर्षकशब्द 414
निस्संवोधमुक्ति 92
निस्स्वभाव 122
नैरात्म्य 15, 18, 52
न्याय 12, 216
पक्षप्रतिपक्ष 18, 19
पञ्चकृत्य 251, 253
पञ्चशक्तिमय 208
पञ्चीकरण 205, 206
पञ्चोपनिषन्मय 208
पण्डित 120
पति 246
परभक्ति 88
परमं साम्यं 240

परममुक्ति 252
परमशिव 246, 252
परमात्मप्राप्ति 156
परमार्थतत्त्व 29
परमार्थदृष्टि 24
परमार्थसत् 26 38, 139
परमेश्वर 249
पराक् 359
पराक्रम 469
परिग्रहशक्ति 250
परिणामनित्य 201, 270
,, पदार्थ 106
पशु 246
पाटलिपुत्र 282
पारतन्त्र्य 56, 197 .201
पारमार्थिक 48
पाश 246
पाशुपत 245
पितृपुत्रभाव 201
पिशाच 37
पुण्यपाप 211
पुद्गलविक्षेप 35
पुद्गलनैरात्म्य 61
पुरुष 251, 257
पुरुषकार 119, 239
पुरुषार्थ 240
पुरुषोपराग 91
पुर्यष्टक 248
पुष्करपलाशवत् 90
पूजकाधम 502
पूर्णवर्मा 282
पृथग्जन 62
पृषदाज्यनय 417
पौरुषप्रयत्न 257
प्रकट 141
प्रकाराद्वैत 165
प्रकारैक्य 389
प्रकाश 209
प्रकाशन 38
प्रकृतिविकृति 205
प्रच्छन्न 141
प्रज्ञप्तिसत् 47, 52
प्रज्ञापारमिता 20, 28, 62 66
प्रतिबिम्ब 39
प्रतिबिम्बोदय 100
प्रतिषेध 29
प्रतिसंचर 205
प्रतीत्यसमुत्पाद 19, 54, 258
प्रत्यक् 359
प्रत्यकत्व 220, 359
प्रत्यक्ष 214
प्रत्यक्षप्रत्यय 23
प्रत्ययोपनिबन्धन 54
प्रत्यवेक्षण 37
प्रत्यात्मवेद्य 51
प्रत्यास 103, 104
प्रत्युदाहृति 470
प्रत्येकबुद्ध 62
प्रपञ्च 145
प्रपत्ति 238

प्रभा 204
प्रमाण 212
प्रमाण परतन्त्र 177
प्रयत्नसामान्य 258
प्रयाजादिवत् 95
प्रयोग 460
प्रलय 202, 205
प्रलयाकल 251
प्रवादुक 13
प्रवाहानादि 398
प्रसङ्ग 471
प्रस्थानत्रय 307
प्राकट्य 209
प्राकृतशरीर 253
प्राकृताप्राकृत 248
प्राण 204
प्राप्यकारित्व 204
प्रामाण्य 212
बन्ध 89
बाधज्ञान 213
बिन्दु 250
बीजशक्ति 127
बुद्ध 61
बुद्धभाषित 35
बुद्धि 90, 91, 203
बुद्धितत्त्व 249
बोधि 35
बोधिसत्त्व 35, 62
ब्राह्मण 124
ब्राह्मणत्व 176
ब्राह्मणपद 177
भक्ति 235
भक्तित्वव्यपदेश 313
भावना 451
भावनात्रय 387
भावनावलज 91, 215, 307
भावरूप 122
भावाद्वैत 87
भिद्यमानापह्नव 97
भिन्नाभिन्न 122
भुवनपति 251
भूत 248
भूतसूक्ष्म 206
भूतादि 203
भूषण 14
भूयोनुग्रह 396
भेद. विलक्षण 200
भेदशब्द. 165, 380
भेदाग्रह 122
भेदापह्नव 97
भौतिक 15
भौवनशरीर 248
भ्रम 122, 213
भ्रान्ति 49
भ्रान्तिपद 120
मध्यमावस्था 107
मन. 203
मन्त्र 492
मन्त्रमहेश्वर 251
मन्त्रेश 251

मयूरचित्रक 257
मल 247
महान् 203
महामाया 247, 250
महासमुद्र 191
महासामान्य 86, 177, 176
महासुप्ति 127
माध्यस्थ्य 19, 81 132, 170, 172, 178
मान 32
माया 22, 202, 247
मायापद 117, 248
मायामयी 127
मायाशक्ति 123
मार्या 27
मार्ग 54
माहेश्वर 253
मिथ्याज्ञान 22, 23, 121
मिथ्यात्व 108, 199, 403
मिथ्याध्यवसाय 118
मिथ्याप्रत्यय 79, 121
मुक्त्यवस्था 370
मूलप्रकृति 201
मोक्ष 89, 115, 119, 160
युक्ति 16, 108, 155
यावद्विशेषनिषेध 110
योग 386
योगिप्रत्यक्ष 214, 307
रजः 202
रति 211
राग 247
रूढि 386
रोधशक्ति 247
लक्षण 439
लक्ष्मीविग्रह 209
लीला 242
लीलारसैकरस्य 242
लीलाविभूति 208
लोकपर्याय 19, 83
लोकव्यवहार 26, 39, 51
लोहितोष्णीष 425
लौकिक 214
वन्ध्यापुत्र 282
वयुन 118
वर्णाः 102
वस्तुभूत 21
वस्तुभेद 181
वाक्पाणि 203
वात्सल्य 469
वाद 216
वादानधिकार 168
वामदेवगुह्य 253
वायुदृष्टान्त 166
वारुणलोक 162
विकल्प 90
विकार 92, 191
विचार 1, 50
विचारासहत्व 139
विज्ञानाकल 251
वितण्डाकथा 137

वितथाभिनिवेश 117
विद्या 79, 120, 247
विद्यातत्त्व 247, 250
विद्येश 250
विधि 451, 456
विधिर्वा 29
विधिरूप 26
विधेयत्वं 201, 457
विपरीतख्याति 121
विभव 227, 506
वियदब्ववत् 45
विरजानदी 209
विरोधनय 381
विवर्तपद 99 106
विवर्तरूप 99
विवर्तते 99
विवर्तात् 104
विशेषतोदृष्ट 444
विशेषात्मक 178
विश्रान्ति 25
विश्वापवाद 109
विषय 459
विषयत्व 209
विषयवाक्य 438
विषयपरिच्छेद 458
विषयोपराग 91
विष्णुलोक 209
वीरश्रृङ्गारादि 242
वीर्य 469
वेदान्तव्युत्पत्ति 218
वैकारिक 203
वेकुण्ठलोक 207
वैशिष्ट्यमैवैक्यं 194, 197
व्यक्त 202, 248
व्यधिकरणधर्मावच्छिन्न 81
व्यवस्थितरूप 129
व्यवहारप्रासिद्ध 39
व्यवहारावस्था 127
व्यष्टिः 205, 206
व्याख्यान 1
व्यापारावेश 91
व्यावहारिक 108
व्यूह 227, 506
व्योमव्याप्ति 250
व्योमशरीर 163
शक्तिः 92, 191, 233, 275, 276
शक्तितत्त्व 247, 250
शाक्तिशब्द 195
शब्दब्रह्म 163
शब्दशब्द 180, 102
शब्दभावना 451
शमथ 68
शाक्तंशरीरं 253
शाखान्तराधिकरण 378
शारीरकपद 154
शास्त्रजन्य 91
शास्त्रत्व 437
शास्त्रप्रमुख 153
शाम्त्रावस्था 449

शिखण्डी 252
शिवतत्त्व 247, 250
शिवोत्तम 252
शुद्धसत्त्व 207
शुद्धाध्वा 247
शुभा 16
शुभाश्रय 387
शून्यं 42
शून्यता 29, 32, 42, 44, 68
शून्यताभिनिवेश 32
शृङ्गारादि 211
शेषत्व 239, 380, 430
शेषशेषिभाव 197
शौर्य 469
श्रीकण्ठ 252
श्रीनिवासत्व 224
षाड्गुण्यमय 208
संघातावस्था 203
संबन्धोनाम 90
संप्रदाय 7, 87, 88
संवृति 26, 49, 112, 371
संवृतिशक्ति 285
संवृतिसत्य 51, 140
संशय 213
संसारएव 251
संसारदोष 32
संसारी 186
संस्थानं 175, 348
सकल 251
सङ्गति 470
सत्ख्याति 100
सात्तात्रैविध्य 108, 199
सत्तासमवाय 269
सत्त्वं 23, 202
सत्त्वपूरुषान्यता 30
सत्संप्रदाय 392
सदसदाकार 170
सदसदात्मक 170
सदाशिव 247, 250
सद्योजातपाद 253
सनातनधर्म 16
सप्तकोटिमन्त्र 219, 250, 252 493
सप्तमपदार्थ 29
समष्टि 205, 206
समा 216
समुदय 54
सर्वबुद्ध 62
सर्वकामावाप्ति 11
सर्वापत्ति 69
सर्वोपशम 11
सविकल्पक 214
ससंबोधमुक्ति 92
साङ्कर्य 114
सांवृत 101, 116
सांवृतिक 48
सांव्यवहारिक 50, 139
साक्षी 128
साधनसप्तक 309
सामान्याधिकरण्य 164, 409

सामान्यतोदृष्ट 444
सामान्यनिषेध 110
सामान्यविशेष 178, 181, 378
सार्वात्म्य 18
सिद्धव्युत्पत्ति 420
सिद्धान्त 504
सुख 211
सुगत 54
सूक्ष्म 252, 506
सूक्ष्मशरीर 206, 248
सृष्टि 202
सोपाधिकनिषेध 110
सौगतसर्वस्व 371
सौशील्य 469
स्थितप्रज्ञ 88
स्थिति 202
स्थूलनाद 250
स्थूलबिन्दु 250
स्फोट 374
स्मृति 214
स्मृतिरूप 91
स्रुघ्न 281, 282
स्वचिदाभास 128
स्वतःप्रमाण्य 367
स्वतस्त्वपरतस्त्व 213
स्वपरनिर्वाह 398
स्वभाव 83
स्वयप्रकाशत्व 167
स्वयंसिद्धता 140
स्वराट् 243
स्वरूपनिरूपक 224
स्वलक्षण 42
स्वसंविदितस्वभाव 51
स्वसंवेद्य 454
स्वसंवेदन 39
स्वसामान्यलक्षण 64
स्वाप्नपदार्थ 213
हित 235
हस्त्याकार 216
हेतूपनिबन्ध 54

अत्र द्रष्टव्यवाक्यावलिः

अंशविशेषणशक्तिपदानि 194
अकरणनिमित्त 157
अग्निश्शीत आदित्योनतपति 187
अग्नेरूर्ध्वज्वलनं 257
अज्ञानाश्रयीभूत 128
अतस्मिंस्तदितिज्ञान 121
अतीन्द्रियविषयेनानुमानं 205, 216
अथयोगानुशासनं 1

अथशब्दानुशासनं 1
अथलोकायतं 76
अथात अदेशोनेति 42
अथातश्शब्दौ 154
अथातस्सामयाचारि 1
अथातोदर्शपूर्ण 1
अथातोधर्मजिज्ञासा 1, 431
अथातोब्रह्मजिज्ञासा 2
अद्वैतंप्रमाणागोचरं 177
अध्यवसायाभिमान 203
अनादौसंसारे 176
अनाद्यविद्यावासनारो 112
अनिमित्ततोभावोत्प 77
अनिर्वचनीयनीलादि 145
अनिर्वचनीयत्वंविश्वस्य 137
अनुकूलत्वेनभासते 368
अनेकान्तोह्यनन्यत्वकर 98
अन्धपरम्परैवैषा 115
अन्यत्वानन्यत्वाभ्यां 134
अन्यथाख्यातिविपरीत 213
अन्योन्यप्रत्यनीकानि 13
अपकारःपरिहर्तव्यः 71
अपराध·क्षमापयितव्यः 69
अपिचारोपितंनेषध 26
अप्राप्तेहिशास्त्रमर्थवत् 436
अभिगमनोपादान 511
अभिमानशब्दप्रयोग 80
अभूततद्भावादिषु 279
अर्थकामौ पुरुषार्थौ 268
अर्थक्रियाकारित्वलक्षण 144
अर्थक्रियासामर्थ्य 141
अलीकाकारविज्ञानविकल्प 146
अवचनेनैवप्रोवाच 43
अवस्थिताआगन्तुकाच 276
अविद्याकृतमा 48
अविद्याकल्पितभेदनिवृत्ति 124, 462
अविद्याचतुर्धा 112
अविद्याद्विविधा 112
अविद्यामोहोविपर्यास 49, 112
अविद्याऽसत्पदार्थारो 49
अविद्यास्तमयः 177
अविद्यैवसंसार 177
अव्यक्तमक्षरंतमः 202
अष्टवर्षब्राह्मणं 7
अष्टादशशून्यता 28
असंसर्गाग्रहात्तथाभि 120
असत्यात्सत्यप्रतिपत्ति 171
असदितिसौगता 80
असद्ब्रह्मेतिवेद 379
असद्वाइदमग्र 85
असन्घट· 275
अस्तित्वनास्तित्वादि 169
अस्तुनार्हिशून्यतैव 26
अहंब्रह्मास्मीतिनगृ 186
अहमर्थस्यैवात्मता 155
अहमेवंनामावुद्धं 69
आकारोहिसा 175
आकशंनित्यंनानित्यं 46
आकाशाक्षरमाया 127

आकाशेचाविशेषात् 47
आत्मानमुपासीत 156
आत्मासमर्पयितव्यः 73
आत्मासर्वस्यद्रष्टा 164
आत्मैकत्वविद्या 98
आत्यन्तिकस्तुदेहोच्छेदः 115, 180
आत्मैवेदमग्रआसीत् 11
आत्रेयीनहन्यात् 198
आदित्योयूपः 420
आनन्दोविषयानुभव 141
आप्तकल्पश्चायं 183
आभाससमानयोगक्षेम 351
आमोदप्रमोद 209
आम्नायस्यबलीयस्त्वं 178
इतरेतराभावविषय 181
इदंप्रत्ययफलं 42, 54
इन्द्रोमायाभिः 165
उक्तन्तुशब्दपूर्वत्वं 161
उत्पत्तिध्वंसानेकत्व 140
उत्पत्तिविनाशतदुभय 130
उत्पादाद्धातथागत 42, 55, 59
उत्तर्गापवादन्याय 197
उद्यमःकर्तव्यः 68
उपदेशप्रकार 40
उपनिषत्स्वैकात्म्य 165
उपशान्तोऽयमात्मा 42
उपादानकारणदशा 184
ऋणक्लेशप्रवृत्ति 183
एकंवासंयोगरूप 378
एकआत्मनश्शरीरे 153
एकस्यग्राह्यग्राहक 167
ओमित्येतदक्षर 518
औत्पत्तिकस्तुशब्द 102
औदुम्बरीस्पृष्ट्वा 494
कर्मणःकर्मसाध्यता 257
कर्मैकेतत्रदर्शनात् 152
कल्पितगुरुशास्त्रादि 89
काममयएवायं 7
कारकचक्रव्यापार 269
कारकव्यञ्जकशब्दौ 278
कारकव्यापार 274
कारणादन्यत्कार्यं 284
कारणस्यात्मभूताशक्तिः 97, 281
काल्पनिकगुरुपरिच्छेद 89
किम्पुनस्तत्त्वं 21
कुतर्कदूषितान्तःकरण 12
कृतार्थास्मुखमास्महे 137
कृत्युत्पत्तिव्यक्तिशब्दाः 279
कृत्स्नप्रसक्ति. 15
केतःकेतुः 117
कोटिचतुष्टय 285
क्रतुमयःपुरुषः 8
क्रत्वर्थकर्तृप्रतिपा 159
क्रीडाशुकक्षीरास्वाद 511
खं ब्रह्मेतिचादित 163
गन्धर्वनगरमाया 45
गुरुलघुविकल्पानु 308
गोबलीवर्दन्याय 198

गाव्राह्मणचंडाल 233
गौरित्यत्रकश्शब्दः 151
ग्रहंसंमार्ष्टि 161
चतुर्विधंनिर्वाणं 53
चतुष्कोटिरहित 46
चित्तं दमयितव्यं 70
चेतनाचेतनतदुभय 130
चोदनालक्षण 456
छागपशु 197
जनीप्रादुर्भावे 279
जातपुत्रःकृष्ण 494
जीवन्नेवविमोक्तव्यः 74
त इमसत्या ताम. 379
तत्रभागवतामन्यन्ते 506
तत्त्वं तदन्यत्वं 122
तत्त्वतदन्त्वाभ्यां 122
तत्त्वमसि 11, 195
तत्त्वहितपुरुषार्थ 199
तत्त्वान्यत्वाभ्यां 99, 123, 127
तथागतएवमोक्षब्देन 54
तदत्यन्तविमोक्षोपवर्गः 183
तद्देशत्वन्तु 277
तद्धतोरेवतद्धेतुत्वे 235
तद्धैकआहुरसदेवेद 17
तस्मादग्नीषोमे 495
तात्त्विकत्वप्रकटनाय 132
तुरीयकोटिविश्रान्ति 131
तेषामेतानिज्योतींषि 163
त्रिगुणंकेवलाप्रकृतिः 205
दग्धपटेपट 463
दुर्निरूपत्वोद्देशः 137
दुष्टकारणजन्य 169
दृढविपर्यय 438
दृष्टनष्टस्वरूपता 116
दृष्टफलतया 108
दृष्टआत्मनिलिङ्ग 155
दैवपुरुषकारप्रभाव 159
द्वितीयाद्वैभयं भवति 12
द्विरूपंहिब्रह्म 126
धर्मपुद्गलनैरात्म्य 54
धर्ममात्रंनिवर्तते 184
,, मुपजायते 184
धर्मलक्षणावस्थाः 271
धर्माधर्मपरिक्षय. 180
नकस्याचित्प्रतिषेधः 41
नक्षत्रेष्टिवाक्यशेष 163
नचपुनरावर्तते 180
नतावदुभयनिषेधः 25
नबुद्धेनभाषितं 141
नभस्थलकमलायमान 145
नवविधापरिणामदृष्टिः 57
नसन्नासन्नोभयं 130
नस्थानतोपिपरस्य 381
नहिनिदर्शनमेवप्रमाण 279
नहिविधिशतेनापितथा 449
नहीदृशंशास्त्रस्यदैन्यं 455
नह्यनुष्णाशीतवत् 130
नाभावावसानः 110
नित्यंसुखंमहत्त्ववत् 183
नित्यनैमित्तिकप्राकृत 205

नित्यशुद्धबुद्ध 463
निमित्तकारणत्वमात्रं 246
निरञ्जन.परमंसाम्यं 165, 166
निरधिकरणकनिष्प्रतियोगिक 110
निरुपाख्यमीश्वरं 184
निरुपाधिकसबन्धो 215
निर्लुलितसामान्यविशेष 87
निवर्तकत्वात्सिद्ध 124
नीलाकारांधित्ति 145
नेतिनेत्यात्मेति 124
नैमित्तिकप्राकृतात्यन्तिक 205
नैरात्म्यवनदाहक 60
नैवश्येनादयः 456
पक्षेतरत्वंनोपाधि. 216
पञ्चविधोभिक्षु. 34
परंब्रह्माधिकृत्य 155
परमहंसपरिव्राजकद्वेष 142
परमेश्वरभक्तिमार्ग 185
परापरपुरुषभेद 166
परिणामोद्विप्रकारः 207
परिणामस्तुस्याद्ध्यादिवत् 394
परिणामात् 104
परिभुञ्जनाच्चैव 71
परीक्ष्यलोकान्कर्म 420
पापकुर्वतोपिनदोष. 72
पारमार्थिकंकूटस्थं 125
पारमिताः षड्विधाः 67
पिण्डोजातिर्विराद् 92, 191
पितृभूतईश्वरः 183
पुरुषप्रकृतिमहदहं 251
पुरुषमतिवैचित्र्यम् 65
पुष्पोदकाञ्जलिस्तुति 186
पूर्वाकारपरामर्शिनी 175
पूर्वकृतदुरितक्षय 157
प्रकाशाश्रयवद्वा 193
प्रकृत्याश्रय.पुरुष. 412
प्रक्षिप्तमिदंवाक्यं 142
प्रच्छन्नबौद्धनिराकरण 144
प्रतिविम्बंसत्यं 128
प्रतिविम्बमसत्यं 128
प्रतिशरीर भिन्ना आत्मानः 167
प्रधानपुरुषेश्वरपरमा 159
प्रमाणतश्चार्थप्रतिपत्ते. 22
प्रमाणविपर्यय 82
प्रमाणसम्बन्धार्हत्व 176
प्रागुत्पत्तेरुत्पत्तिधर्मक 130
फलसङ्गकर्तृत्वत्याग. 460
बद्धमुक्तव्यवस्था 167
बुद्धेक्षेमप्रापणं 465
बहुवेणुभारपीडित 142
बाधविकल्पपरस्पराङ्ग 157
बाल्ययौवनस्थाविरेषु 284
बुध्यहंकारचित्त 203
बुद्धिसिद्ध तु तदसत् 277
बुध्याविवेचनात्तु 22, 78
ब्रह्मवादिनोनीलाकारं 145
ब्रह्मसत्यं जगन्मिथ्या 138
ब्रह्मावसानोयंप्रति 25, 110, 138

ब्रह्मैवप्रपञ्चरूपेण 86
भक्तिविशेषावर्जितः 184
भयात्प्रवृत्तिस्तु 449
भावनामय.पुरुष. 11
भावनिवृत्तिरूपोभाव 23
भिन्नप्रवृत्तिनिमित्तानां 196
भूतभाविष्यत्तदुभय 130
भेदाग्रहाच्चनिष्क्रिये 80
भ्रमप्रमादालस्य 216, 219
मन्तव्योबोद्धव्य 156
मर्यादाकरणं 282
मानसम्बन्धरूपं 175
मायागन्धर्वनगर 22
माया.मात्रन्तु 381
मायावयुन 118
मायास्वभाव 115
माहायानिकपक्षप्रवेश 63
माहायानिकबौद्ध 116
मायेत्यविद्यमानस्य 118
मिथ्याज्ञाननिमित्त 80
मिथ्याज्ञानंवैखलुमो 79
मिथ्योपलब्धिविनाश 121
मृत्तिकेत्येवसत्यं 126
यंयंक्रतुमधीते 516
यआत्माअपहतपा 156
यत्परश्शब्दस्सशब्दार्थः 385
यथाप्रसिद्धिमाश्रित्य 49
यथाप्रसिद्धिव्यवहार 49, 50
यदग्नेत्वंस्यामह 412
यदपिकैश्चित्प्रमेय 86
यद्येपभगवान्बुद्धएक 42
यद्यपिसश्चित्तो 393
यद्धिप्रतीतंबाध्यते 24
यस्मिन्नूतत्त्वंनविहन्यते 105
यस्मिन्परिणम्यमाने 85
यस्यपृथिवीशरीरं 163, 195
यस्यांरात्रौतथा 32
यादशोयक्षस्ताद 277
यावज्जीवंयजेत 455
याश्चैता.प्रधानपुरु 83
युक्ततदुणकोपा 393
युष्मादस्मत्प्रत्यय 119
यूपादित्यैक्यवाक्य 372
रागद्वेषतदुभय 129
रागद्वेषासूया 16
लाभपूजाख्या 37
लोकवेदविरुद्धैरपि 496
लोकव्यवहारसिद्ध 52
लोकायतबौद्धांशद्वय 142
लौकि वैदिकशब्दभेद. 217
वत्सविवृद्धिनिमित्त 269
वसन्तायकपिञ्जलान् 516
वस्तुनिर्विकल्पोनास्तीति 15
वाक्यार्थज्ञाननिवर्त्यत्व 127
विंशतिविधाश्शून्यता 28
विकल्पजन्मानोहिशब्दाः 40
विगतद्वेषैःवेदान्तार्थ 13
विगीतंछिन्नमूलं 143
विचित्रमायाभिनिवेश 117
विचित्रार्थकराभिधायी 118

विज्ञानघनएवैतेभ्यः 84
विद्याचतुर्थी 112
विद्याष्ठिधा 112
विद्येश्वराराधन 251
विपक्षेतरत्वंवनसाधन 216
विरोधेत्वनपेक्ष्यंस्यात् 494
विषयाव्यभिचारित्वं 182
विषयावरणभङ्ग 249
विशेषतोदृष्टंसामान्य 216
विष्णुरुपांशुयष्टव्यः 462
वृश्चिकभयात्पला 119
वृत्तात्कर्माधिगमात् 154
वेदोषरावेदान्ताः 156, 431
वैदिकसम्प्रदाय 185
वैधर्म्याच्चनस्वप्नादि 140
वैयाकरणनिर्वचनं 196
व्यक्तेरपैतिनित्यत्वप्रति 82
व्यवहारप्रतिसंबन्धित्व 209
व्यवहारेभट्टनयः 430
व्याथगृहीतराजकुमार 237
व्यूहसङ्कर्षण 503
शक्तिविक्षेपलक्षण परिणाम 94
शक्तेश्चात्मभूतंकार्य 281
शब्देपिवुद्धेर्नियमा 58
शब्दैकसमधिगम्य 94
शमदमब्रह्मचर्य 180
शरीरात्मभावनिबन्धनं 164
शशविषाणकूर्मरोम 46
शशहयखरोष्ट्र 46
शशोनास्तिविषाणमस्ति 369
शाक्यभिक्षुनिर्ग्रन्थ 495
शान्तिस्सम्पादयितव्या 71
शान्तोदिताव्यपदेश्व 270
शारीरकेवक्ष्यामः 153
शिवविष्ण्वोरुपादान 497
शिल्पिसहस्रेणापि 133
शीतोष्णतदुभय 130
शून्यतावस्तुभूता 30
शून्यताशून्यतति 28
शृङ्गणस्तनकार्य 282
शैवदर्शनन्तु 496
श्रीभाष्यपरिश्रम 183
श्रुतेर्ज्ञापकत्वात् 187
श्रुतेस्तुशब्दमूलत्वात् 15
श्रुत्यर्थकल्पनाकुशलाः 12, 187
श्रुत्यर्थमाचार्योक्ति 13, 143, 396
षड्भावविकार 103
सञ्चितागामितदुभय 130
सम्प्रदायश्रवणपरिच 142
सम्प्रदायपरम्परया 13
सम्बन्धतत्त्वापलाप 285
सखत्वेवंवर्तयन् 156
सगुणेषूपासनेषु 124
सत्त्वमनन्यत्वंच 284
सत्त्वानन्यत्वे 284
सत्त्वासत्त्वाभ्या 140
सदभावमात्रंतत्त्वं 22
सदसदुभयानुभय 132
सदेवसोम्येदं 86

सन्मात्रमेववस्तु 193
सन्मात्रविषयंप्रत्यक्षं 180
सपक्षेतरत्वेनप्रतिहेतु· 216
समुच्चयकोटिभिन्न 170
सर्वंखल्विदंब्रह्म 195
सर्वज्ञानंयथार्थं 30, 213
सर्वंहिवस्तुजातं 13, 169
सर्वप्रत्ययेवेद्यत्वं 207
सर्वमेकंसदविशेषात् 86
सर्वमेवानिर्वचनीय 139
सर्वशक्तिसमाहारात्मिका 249
सर्वसमाहर पातञ्चलः 83
सर्वाधिष्ठातृत्वेनकारणत्व 128
सर्वान्कामानाप्ना 164
सर्वेणग्रहणं 98
सांख्ययोगपाञ्चरात्र 493
सामान्यविशेषन्याय 197
सामान्यविशेषरूपता 181
सालोक्यसामीप्य 209
सिंहेनभूत्वावहवः 411
सिद्धंतुनिवर्तकत्वात् 125
सिद्धेप्रामाण्यानुपपत्तेः 178
सिद्धेशब्दार्थसबन्धे 102
सुखदु·खतदुभय 129
सुगतविज्ञानवादसमान 142
सूक्तकाण्डमन्त्र 503
सूत्रकारोहपरमा 24
सूत्रकार·श्रुत्यनुकारी 13, 393
सौगतमेवभवतापि 141
स्कन्धधात्वायतनादि 41
स्त्रियंनहन्यात् 198
स्थाणुर्वापुरुषोवेति 182
स्थितैवैषाधर्मता 58
स्वप्नविषयाभिमानव 78
स्वयंव्यक्तदैवसैद्ध 504
स्वरूपंस्थितिः प्रवृतिः 200
स्वसंवेदनस्वभावतया 116
स्वसंवेद्यस्सभवति 167
स्वात्मनिक्रियाविरोधः 39
स्वाध्यायोऽध्येतव्यः 419
स्वामिभृत्यभावपर 166
हस्त्याकारप्रवृत्त्या 116

अत्रोदाहृतपद्यप्रथमचरणावलिः

अकिंचनधुरीणस्य 240
अङ्कुरादन्यतोज्ञान 50
अङ्कुरोजायतेबीजा 50
अङ्गुल्यग्रंयथात्मानं 38
अख्यातिरेषासवत्र 182
अगृहीतार्थगन्तृत्व 353
अग्निरुष्णोजलंशीतं 76
अग्निहोत्रंतपस्सत्य 9
अञ्जलिःपरमामुद्रा 521
अतःपूर्वसमावृत्त 162

अतश्श्रुतिस्मृतिशतैः 307
अतीतानागतंचित्तं 53
अत्यन्तभिन्नतास्माभिः 136
अत्रब्रूमोयएवार्थः 181
अत्राधिकारीविषयः 420
अथवामितियोग्यतास्तु 176
अथवाशक्तिनियमात् 275
अथवैचित्र्यसंस्थानं 45
अथान्योन्यवशाच्चित्तं 50
अधिकारस्स्वकीयत्व 450
अनक्षरस्यधर्मस्य 40
अनन्यसाध्येस्वाभीष्टे 238
अनाथानामहंनाथ 73
अनादिनिधनेप्येवं 163
अनादिनिधनंब्रह्म 85, 102, 191
अनित्यतांचभावेषु 60
अनिरोधमनुत्पादं 44
अनिर्वाच्याविद्या 105
अनिष्टोयस्त्वशक्तित्वा 162
अनुज्ञातंचसर्वत्र 300
अनुत्पादश्चतथता 45
अनुश्राव्यततःकुर्यात् 512
अनेकदोषदुष्टे ३ 69
अनेकभेदभिन्नंच 503
अन्तर्गुणाभगवती 393
अन्नादोमेध्यभक्ष 276
अन्यतोनापिचायात 60
अन्यत्पूर्णादपांकुम्भात् 521
अन्येत्वेवंविजानन्ति 500
अन्येनोपप्लवेभीष्टे 114
अन्योन्यगुरवोविप्राः 226
अन्योन्यपक्षप्रतिपक्ष 4
अन्वयव्यतिरेकौच 275
अपकाराशयोस्येति 72
अपच्छेदक्रमेपूर्वः 321
अपरपत्ययंशान्तं 44
अपरेयमितत्स्वन्यां 111
अपिचाशेषनित्यत्वे 279
अपूर्वाहिक्रियासाध्यं 428
अप्रच्युतस्वभावस्य 106
अप्राणवत्सुस्वल्पासा 389
अभिधानानवासितिः 429
अभूतंज्ञापयत्य 49
अभेदिनस्सावयवस्य 107
अभेदिनोनिर्विकृतेः 107
अमूर्तब्रह्मणोरूपं 389
अयःपिण्डेयथा 365
अयोग्यत्वंतिरोधानं 279
अलब्धगाधेगाम्भी 103
अलातचक्रगन्धर्व 45
अलातचक्रेलातस्य 182
अविद्यांविश्वजननी 418
अश्रमोपार्जितस्तस्मात् 72
अश्रीकरमसौम्यंच 501
असन्निकृष्टवाचाच 443
अव्यापारसुखास्वाद 68
अष्टाक्षराविधानेन 500
अस्तिकर्माईफलदं 239
अस्तित्वंसर्वभावानां 146

अस्तित्वपूर्वकंनास्ति 28
अस्तिनास्त्यस्तिनास्तीति 131
अस्तीत्येकेनायमस्तीति 84
अस्मदीयमिदंवाक्यं 58
अस्वभावाअनुत्पन्ना 45
अहंप्रत्ययवेद्यत्वं 167
अहंमद्रक्षणभरः 239
अहमात्मागुडाकेश 382
अहमेवापकार्येषां 72
अहमेवनकिंचिच्चेत् 11
अहिंसाप्रथमंपुष्पम् 521
आकाशंशशशृङ्गञ्च 45
आकाशवत्सर्वगतश्च 47
आकशस्यस्थितिर्यावत् 74
आगमाख्यंतुसिद्धान्तं 504
आगमोह्याप्तवचनं 490
आग्नेयंपञ्चरात्रं 501
आत्मजन्याभवेदिच्छा 258
आत्मनिसतिपरसं 52
आत्मभावंयधादीपः 38
आत्मसिद्धयनुकूलस्य 427
आत्माज्ञातव्यइति 114, 160
आत्मीकृतंसर्वमिदं 71
आदीप्तकायस्य 71
आद्यमेकायनंवेदं 497
आनन्तर्येप्यहेतुत्वं 293
आपीठान्मौलिपर्यन्तं 520
आप्रलयंयत्तिष्ठति 206, 248
आरम्भवादःकणभक्ष 107
आरोपदृष्टिरुदिता 107
आस्तांतावत्क्रियालोके 422
आस्तांभाविष्यद्बुद्धत्वं 74
आहुर्विधातृप्रत्यक्षं 326
इतस्ततःप्रधावन्ति 59
इत्थंतधाघटपट 254
इतिहासपुराणानि 390
इत्याहनास्तिक्य 155
इदंज्ञानमुपाश्रित्य 166
इदंमहोपनिषदं 499
इदंरजतमित्यत्र 181
इदंवस्तुबलायातं 44, 109
इन्द्रियस्येन्द्रियस्यार्थे 10
इन्द्रियैरुपलब्धंयत् 50, 146, 371
इयंकेवललक्ष्मीश 238
इष्टंप्राप्तुमनिष्टं 268
इष्टस्याजानिकासाच्च 426
ईदृक्सत्कार्यवादश्च 278
ईदृशःपरमात्मायं 511
ईश्वराव्याकृतप्राणैः 95
उक्तंतत्त्वमनादृत्य 14
उक्तानुक्तदुरुक्तादि 155
उत्तमःपुरुषस्त्वन्यः 166
उत्तरावयवैरुद्धे 361
उत्पत्तिराप्तिर्विकृतिः 463
उत्पत्तिर्विबुधानांच 492
उत्पत्तिश्चतथाभूता 106
उत्पत्तौकिलसिद्धायां 276
उपक्रमोपसंहारा 377
उपायभूतंव्य 40

उपायानांस्वरूपं 174
उपायाश्शिक्षमाणा 171, 374
उपैमिसर्वान्शरणं 69
उभेअंशत्रययती 452
ऋग्वेदपाठेपठितं 517
ऋग्वेदादिसमूहे 162
एकंयदिभवेच्छास्त्रं 2
एकत्वंचबहुत्वं 278
एकत्वमुक्तमेकस्य 161
एकपादंद्विपादंच 388
एकरूपंप्रतीतत्वात् 93, 466
एकवेदस्यचाज्ञानात् 514
एकस्यैकत्वमस्तीति 93, 466
एकस्यैवहिकालस्य 511
एकस्यैवास्तुमहिमा 86, 193
एकेनपरमात्मना 163
एकोदेवस्सर्वभूतेषु 378
एकोवेदोब्राह्मणानां 514
एकोहिश्रूयतेदेव 511
एकोह्यनेकशक्तिः 247
एतत्ज्ञेयंनित्यमेव 414
एतत्सर्वमिदंविश्वं 388
एतावन्मात्रतत्त्वा 286
एतेनैवप्रकारेण 182
एवंकामाधिकारार्थं 428
एवंकार्यात्मकेप्यर्थे 424
एवंचनानिरोधोस्ति 46
एवंपरवशंसर्वं 56
एवंबुध्वापरार्थं 73
एवंयेयुक्तिभिः 159
एवंशून्येषुधर्मे 48, 75
एवंसर्वमिदंकृत्वा 70
एवमाकाशनिष्ठस्य 73
एवमाद्युच्यमानं 37
एवमेकंसांख्ययोगं 498
एवमेकायनंधर्मं 514
एवमेषमहान्धर्मः 507
कणान्वाभक्षयेत् 41
कदलीस्वप्नमायाभं 57
कथंत्वमर्चनीयोसि 500
करणानामभूमि 366
कर्तव्यत्वेनवैयत्र 491, 505
कर्तुरिष्टाभ्युपायेहि 422
कर्तृत्वमधिकारत्वं 460
कर्मक्षयोहिविज्ञा 158
कर्मप्रवृत्तिहेतु 158
कल्पनापोढमभ्रान्तं 326, 347
कल्पितंभावमस्पृष्ट्वा 51
कस्माद्विपर्ययंकृत्वा 72
काकस्यकतिवादन्ता· 420
कायेनैवपठिष्यामि 69
कारयन्तुचकर्माणि 73
कार्यकारणभावोपि 286
कार्यताकृतिसाध्यत्वं 423
कार्यत्वंकारणत्वंच 133
कार्यत्वेननियोज्यंच 427, 455
कार्यरूपेणनानात्वं 93, 466
कार्यस्यैवप्रधानत्वात् 427
कार्यार्थत्वेपिवेदस्य 468
किन्तुस्वयंक्लेशरूपं 423

किंशुबुद्धप्रणतास्स्युः 37
किमुतस्थितयासाकं 59
कुड्यादिनिस्सृतत्वाच्च 37
कुणपःकामिनीभक्ष्यं 15
कुर्वत्कार्यमकुर्वद्वा 133
कृतितत्साध्यमध्यस्थः 459
कृतिसाध्यंप्रधानं 424
कृतेथपतंजलिना 102
कृपणधीःपरिणाम 107
कोशस्यकथनंचैव 492
क्रमेणभावएकत्र 286
क्रियाकारकभेदेन 39
क्रियादिभिन्नं 427
क्रियाविशेषएवायं 451
क्रियाहिक्षणिकत्वेन 425
क्रीडन्तुममकोय 73
क्वचित्साक्षात्पदोपात्तं 450
क्षणसंपदियं 68
क्षणिकास्सर्वसंस्काराः 58
क्षेत्रज्ञंचापिमांविद्धि 383
गम्भीरोत्तानभेदेन 64
गर्भस्तथागतस्यादौ 59
गन्धर्वयक्षदैत्याद्याः 388
गाधाताथागतानां 18
गुणकर्मत्वध्ययनं 297
गुणदर्शीपार्तृषन् 52
गुणानांपरमंरूपं 29
गुरुर्धियमभावस्य 140
गृहस्थस्यश्रावयितुः 300
गृहार्चनेकौतुकेवा 9
ग्राह्यंवस्तुप्रमाणं 252
ग्राह्यलक्षणसंयुक्तं 100
घटरूपंपटेनास्ति 200
घटाकाशादिनीतिश्च 360
चतुर्धाभेदभिन्नंच 504
चिच्छक्तिःपरमेश्वरस्य 111
चित्तंचित्तेनपश्यति 38, 116
चित्तमेवयदामाया 116
चित्रवटतरोर्मूले 45
चित्राचार्योयथाकश्चित् 63
चिन्तामणिर्भद्रघटः 73
चेतनेचेतनंक्षिप्तं 94
जगतामुपकाराय 389
जगद्दुःखहरेदुःख 70
जडोमाणवकोप्येष. 450
जननेचापिकार्यस्य 287
जन्मान्तरसहस्रेषु 10
जपमध्येगु 512
जातेरस्तित्वनास्तित्वे 169
जानात्यर्थान्तरं 134
जीवा.पशव. 496
ज्योतीषिविष्णुः 407
ज्वालादेरपिनाशित्व 361
ज्ञानंमोक्षनिमित्तंच 114
ज्ञानंविशुद्धंविमलं 408
ज्ञानस्वरूपमत्यन्त 384
ज्ञानस्वरूपोभगवान् 407
ज्ञानेनाकाशकल्पेन 508
तच्चविष्णोःपरंरूपं 388
ततश्चभाष्यकारेण 495

ततश्चयागाविषयं 428
ततश्चस्वर्गकामीय 428
ततश्चसत्त्वान्भगवान् 504
ततोन्यानन्यतेतस्य 135
ततोपियदतिक्रम्य 361
तत्तदुत्प्रेक्षमाणा 2
तत्त्वावधारणार्थं 268
तत्रज्ञातात्मतत्त्वा 115
तत्रपश्चपदा 496
तत्रसंव्यवहारा 507
तत्रार्थकर्माध्ययनं 297
तथताशून्यताकोटि 44
तथागताराधनं 74
तथाविधश्चसद्धर्मः 61
तथाहंसर्वसत्त्वानां 64
तथैवनित्यचैतन्या· 168
तथैवाश्रमधर्मस्य 492
तदेवचोदनोपज्ञ 240
तदुष्टाशयमेवातः 72
तद्धिकालान्तरस्थानात् 427
तद्भावभावतःकार्यं 286
तद्विद्धिप्रणिपातेन 7
तन्त्रंतन्त्रान्तरंच 503
तन्त्रसंज्ञंतुसिद्धान्तं 504
तन्त्रान्तरन्तुयत् 504
तत्सर्वदेशयाम्येषः 69
तन्मूलतःक्रियाः 512
तमोमोहोमहामोहः 113
तयोरनुपकारेपि 287
तयातिरोहित 388
तस्मात्कर्मक्षयादेव 114, 158
तस्माच्छ्रेयांस्यशेषाणि 392
तस्माज्जन्मप्रभृत्येक 505
तस्मात्पुंस·प्रवृत्तौ 450
तस्मात्फलस्यसाध्य 450
तस्मान्नविज्ञान 408
तस्मान्नियोज्य 426
तस्मान्मानान्तरा 428
तस्मात्सत्त्वोपभोगार्थं 74
तस्मात्सामान्यतोहेतु 268
तस्मात्सामान्यधर्मस्य 182
तस्मात्स्वप्नंसुते 52
तस्मादद्यवदेवात्र 159
तस्मादमित्रंमित्रंवा 72
तस्मादाकांक्षितासन्न 218
तस्मादुत्सङ्गेसर्पे 69
तस्माद्यन्नास्तिनास्त्येव 174
तस्मान्नप्रत्यभिज्ञापि 253
तस्मान्मयायज्ञन 71
तस्मिन्ध्यानमापन्ने 33
तस्मिन्सतीदमस्तीति 254
तस्यात्मपरदेहेषु 385
तस्यार्थवादरूपाणि 85, 191
तांप्रातिपदिकार्थंच 86, 193
तादूप्येणपरिच्छिन्ने 443
तानेववैदिकान् 493
ताभिर्विज्ञापितानर्थान् 33
तामर्चयेत् 518
तामसेनतु 502
तामेवचानुरुन्धानैः 285

तीर्थदोषैर्विनिर्मुक्तं 60
तुल्यार्थत्वेपितेनैषां 174
तुष्ट·किंनृपतिर्दद्यात् 74
तृष्णयाह्यादिताः 57
तेजोमूर्ति·पथर्जुना 163
तेनमायासहस्रन्तत् 118
तेनसाध्यत्वपर्यन्त 425
तेनान्यस्यान्यथाभानं 181
तेनोपनेतृसंबन्ध 168
तेभ्यश्चैतन्यमित्यादि 268
तेभ्योपिनागगन्धर्व 389
तेषामन्तर्गतापीच्छा 162
तैलार्थीसिकताःकश्चित् 275
तौचभावौतदन्यश्च 285
त्रिपदार्थेचतुष्पादं 492
त्रिविधाभवतिश्रद्धा 8
त्वय्याराधनका 513
दक्षिणापथवेदल्यां 75
दर्शनादर्शनमुक्ता 286
दानन्ददद्भिः 513
दीपःप्रकाशतइति 39
दीपार्थिनामहन्दीपः 73
दीपान्तमर्चनं 520
दुःखंहन्तुंसुखं 70
दुष्टकारणबोधेतु 169
दूषितासाधितावापि 81, 135
देवताप्रतिमां 513
देवयानंब्रह्मयानं 62
देवीभूषण 240
देवोवैकुण्ठनाथ 518
देशनालोकनाथानां 64
देशनाहियदन्यस्य 63
देहभेदप्रकारश्च 162
द्वयोरेकाभिसंबन्थात् 285
द्वादशाक्षरतत्त्वज्ञः 512
द्विष्ठोहिकश्चित्सबंन्धः 286
द्वेसत्येसमुपाश्रित्य 66
धर्मंभजस्व 521
धर्मधीर्मानबेदाङ्ग 471
धर्मपुद्गलनैरात्म्य 57, 61
धर्मस्तेनोपदिष्टोयं 58
धीरस्तीतिमतौशब्द 333
ध्यायेन्नारायणंदेवं 519
नक्लेशाविषयेषु 68
नगाधागाधिनंशास्ति 10
नचज्ञातात्मतत्त्वा 159
नचज्ञानविधानेन 157
नचशब्दार्थसंबन्ध 59
नचात्रातीवकर्तव्यं 3, 494
नचापूर्वाण्याधिष्ठाय 445
नचैकन्तदन्यत्द्वितो 43
नच्छिनत्तियथात्मानं 38
नतदास्तिबिना 383
नतद्योगयुजा 388
ननिरोधोनचोत्पत्ति· 89, 125
ननुनिश्श्रेयसंज्ञानात् 158
ननुमातृमान 144
ननुलोकप्रसिद्धेन 173
ननुशाक्यभिक्षु 144
नन्वसिद्धंमद्दायानं 33

नन्वेकचैतना 444
नन्वेवंरजताभासः 181
नपश्योमृत्युंपश्यति 164
नप्रहृष्येत् 383
नप्राप्तभगवत्पूजा 73
नबाधतेज्ञानमतैमि 51
नबुद्धिभेदंजनयेत् 65
नमायानास्तिसाधर्म्यत् 117
नयोहिद्विविधो 64
नरभेदान्नहिज्ञेयाः 93
नशब्दसंस्पर्श 431
नसतःकारणापेक्षा 133, 285
नसन्नासन्नसदसत् 24, 44, 130, 285
नसन्नासन्नसद्यदा 27, 54
नस्मृतेरप्रमाणत्वं 353
नस्वतोनापिपरतः 61
नहिप्रयोजना 450
नहिद्विचन्द्रः प्रागासीत् 94
नहिवस्तुस्वभावेन 15
नहिस्फटिकवन्नीलं 38
नह्यभावात्मकंमुक्त्वा 114
नानात्मकानामेकत्वं 15, 186, 404
नानेनवचनेनेह 507
नापूर्वेस्वर्गहेतु 428
नाभद्रकामिदंनाथाः 69
नारायणःपरो 508
नारायणीयं 503
नास्तिक्यपरिहारार्थं 174
नास्त्यहंनभविष्यामि 53
नाहंनिर्वामिभावेन 53
नित्यनैमित्तिकैरेव 158
नित्यसत्त्वाभवन्त्येके 76
नित्याश्शब्दार्थसंबन्धाः 102
नित्योज्ञानविवर्तोयं 100
निधयोमणयश्च 60
निमित्तमीश्वरस्तेषां 251
नियतिकृतानियम 254
नियोज्यस्तावदेतावान् 456
नियोज्यस्सन्च 425
निरपेक्षोत्तरज्ञानं 321
निरीहावशिकाश्शून्या 47
निरुद्धाद्धानिरुद्धा 61
निर्वातुकामांश्च 74
निर्व्यापारमना 386
निर्वृतेसुगतेपश्चा 75
निश्रितास्तीर्थवादानां 75
निस्स्वभावाअमीभावा 45
नीचाःकलहमिच्छन्ति 378
नेत्रवृत्तीर्द्विधाभू 406
नैरात्म्यवादिनोभाष्याः 60
नैवशब्देस्वतोदोषाः 219
नोदाहृतंत्वया 33
न्यायप्रस्थानमार्गान् 103
न्यायेनसंप्रदाया 162
पक्षोयोंगीकृतोयेन 6
पञ्चधर्मास्त्रिस्वभावाः 62
पञ्चरात्रस्यकृत्स्नस्य 36, 500
पञ्चशक्तिमयोदेवः 499

पञ्चापिपृथ 497
पञ्चेतरणि 498
पतत्रिभ्योमृगा 389
पत्नीपुत्रश्च 495
पत्रंपुष्पंफलं 521
पदजातंश्रुतंसर्व 218
पदार्थानांस्वतो 109
परधीजननार्थंच 354
परमात्मसंश्रय 145
परमात्मात्मनोः 417
परमार्थः 384
परश्शतपरीक्षोदात् 16
परस्मिन्भास 403
परात्मसमतामादौ 69
परापेक्षाहिसबन्धः 285
परिकर्मेणपश्यन्ति 60
परिग्रहपरित्यागौ 161
परिज्ञातमसद्भूतं 61
परिभोगायसत्त्वा 74
परिव्राद्कामुकशुनां 15
पर्वतादागमंल 103
पश्यन्नेकमदृष्टस्य 286
पाञ्चरात्रश्रुतितरोः 505
पारतन्त्र्यंहिसं 285
पार्थिवावयव 162
पित्तस्याग्रहणं 182
पीतशंखावबोधेच 182
पुंसांनेष्टाभ्युपाय 422
पुण्यविघ्नःकृतो 72
पुण्येनकायस्सुखित 74
पुद्गलस्संततिस्स्कंधाः 53
पुरुषंतुततस्सत्यं 500
पुरुषस्यप्रयत्न 451
पृथिवीरत्नसं 521
पृथिव्यादीनिभूतानि 73
पौराणकीमिदंवर्त्म 60
पौर्वापर्यविरोधश्च 381
पौर्वापर्यापरामृष्टः 500, 385
प्रकाश्यलोकेमद्यानं 75
प्रकृतियान्तिभूतानि 10
प्रज्ञाविवेकंलभते 2, 491
प्रतिबिम्बुसमेतस्मिन् 60
प्रतिमास्तूपसद्धर्म 72
प्रतिषेधाधिकारेपि 455
प्रतीतिंप्रतिनैवात्र 161
प्रततिव्यतिरेकेण 161
प्रतीयतेचेदुभयं 93, 466
प्रत्यक्षमनुमानंच 491
प्रत्यक्षमपिरूपादि 50
प्रत्यक्षसाधनायोगाः 91
प्रत्यक्षादिप्रमासिद्ध 85
प्रत्यक्षादेरनुत्पत्तिः 171
प्रत्यक्षालोकशब्दो 268
प्रत्यस्तमितभेदंयत् 384, 388
प्रत्यात्मवेद्यमानं 75
प्रद्युम्नंचानिरुद्धंच 500
प्रपञ्चविनिवृत्त्यैक 30, 4
प्रपञ्चोपशमाय 30
प्रभूतंवर्तिदेशेहि 361
प्रमाणत्वाप्रमाणत्वे 367

प्रमाणमप्रमाणंचेत् 51
प्रमाणषट्कविज्ञातः 354
प्रमाणान्तरगम्यं 428
प्रमाणान्तराविज्ञेया 425
प्रमाताचप्रमाचैव 221
प्रयुक्तंचोपनयनं 297
प्रयोगेपश्चिमेनास्ति 321
प्रयोजनमनुद्दिश्य 450
प्रयोज्यत्वंस्वविषय 452
प्रवःपान्तमन्धसो 516
प्रवृत्तिर्वानिवृत्तिर्वा 437
प्रसरंनलभन्तेहि 494
प्रायेणसंक्षेपरुचीन् 102
प्रारिप्सितंनिमित्तंस्यात् 290
प्रासादिकत्वमारोग्यं 74
प्रियंश्रद्देददतः 9
बद्धश्चेत्चित्तमातङ्ग· 70
बहूनामेकदु·खेन 70
बाष्पादिनाप्यधूमेन 173
बिम्बाकृत्यात्माना 518
बीजिसौभवहर्यक्ष 103
बुद्धबन्धुःप्रभाकरः 140
बुद्धिबोध्यंत्रयादन्यत् 58
बुद्धीनामपिचैतन्य 168
बुद्धै·प्रत्येकबुद्धैश्च 62
बुद्ध्याविवेच्यमानानां 78, 43, 110, 139, 285
बुभुत्सुरन्नमादत्से 268
बोधिसत्वाद्धियत् 74
ब्रह्माप्येतिप्रपञ्चोयं 94
ब्राह्मणत्वादिजातीनां 149
ब्राह्मणानांहि 506
ब्राह्मोनैमित्तिकस्तेषां 205
भक्तेःपूजादिमात्रत्वं 291
भक्तैरण्वप्युपहृतं 520
भजइत्येषधातुर्वै 308
भयंनाशङ्कते 450
भवत्यारोग्यसंपत्तिः 450
भवन्तिबहवोमूर्खाः 6
भाक्तभागवतं 504
भावशुद्धिर्मनुष्याणां 521
भावानांनिस्स्वभावानां 60
भावान्तरमभावोन्यो 171
भावार्था·कर्मशब्दा 451
भावाभावोपधिर्योग 286
भावेभाविनितद्भावः 286
भिन्नेकाघटनाभिन्ने 286
भीतेभ्योनाभयंदत्तं 73
भूतंतदविसवादि 61
भूपभूतान्यशेषाणि 388
भूमिच्छादयितुंसर्वा 70
भूमिरापोनलोवायुः 111
भूयसामेकपक्षश्च 187
भोक्ताभोग्यंप्रेरितारं 195, 415
भ्रमरीभ्रमरभ्रमेण 411
मत्कर्मकृत् 510
मत्कर्मचोदिताएव 72
मणिप्रदीपप्रभयोः 171
मधुरेतिक्तधीरेवं 182
मन्त्रसिद्धान्तसञ्ज्ञन्तु 504

मन्त्रैस्तीर्थैर्द्विजैर्दैवे 9
ममसाधर्म्यमागताः 166
ममैवांशोजीवलोके 166
मयापिपूर्वसत्त्वानां 71
मयाबालेनमूढेन 69
मय्यावेश्यमनोयेमां 8
मलाद्यसंभवाच्छाक्तं 253
महतामपिकेषांचित् 84
महतोवेदवृक्षस्य 515
महानन्दमहिम्नाच 241
महाभौतिकदेहस्थाः 162
महीघटत्वं 40
मांमदीयञ्चनिखिलं 240
मातृप्रमाणमितिमेय 144
मानुष्यंनावमासाद्य 68
मामाश्रित्यतुयान्त्येते 72
माययानिर्मितंयच्च 60
माययासततंवेत्ति 118
मायागजप्रकाशत्वात् 61
मीमांसासंज्ञकस्तर्कः 2
मुक्तिस्तुशून्यतादृष्टे. 31
मूलश्रुतिंयथावच्च 515
मृगतृष्णालातचक्र 49
मृल्लोहविष्फुलिङ्गाद्यैः 65
मोक्षार्थीनप्रवर्तेत 159
मोहस्वरूपावरणा 66
यंतुकर्मणियस्मिन् 11
यंवाकेष्वनुवाकेषु 514
यःपतञ्जलिशिष्येभ्यः 103
यःपश्यत्यात्मानं 52
यःप्रतीत्यसमुत्पाद 44, 56, 61
यच्चैतद्भुवनगतं 408
यच्छून्यवादिनश्शून्यं 27
यच्छ्रुतंनविरागाय 3, 512
यजेतेतिपदात् 428
यजेतेत्यत्रचा 452
यज्वभिर्यज्ञपुरु 512
यज्ञःपशुर्वह्नि 408
यतस्तच्छक्तियोगे 389
यतस्ततोवास्तुभयं 53
यत्करोमियद् 521
यत्प्रत्ययाचतत्रास्था 34
यत्प्रमाणैःपरिच्छिन्नं 93, 466
यथादेवाअसुरेषु 9
यथामुखीकृतश्चात्मा 73
यथायुवानंराजा 520
यथार्थसर्वमेवेह 181
यथालोकंयथावेदं 41
यथावादर्पणस्स्वच्छः 168
यथाहमात्मदोषेण 72
यथाहिगर्भोगर्भिण्यां 60
यथैवकण्टकादीनां 6, 77
यथैवकदलीस्तम्भः 53
यदन्यसंनिधानेन 60
यदप्यनुपपत्तेस्तु 429
यदम्बुवैष्णवः 407
यदर्थमेवजविामि 70
यदर्थवद्धर्मपद 36
यदातुशुद्धं 407

यदानभावोनाभावः 29
यदानभ्रान्तिरप्यस्ति 115
यदापश्यःपश्यते 164
यदाममपरेषां 69
यदामायैवतेनास्ति 115
यदिचर्थेपरित्यज्य 182
यदिज्ञानवशादर्थः 50
यदिबोधएवपर 144
यदेतदृश्यतेमूर्त 384
यदेवभवतांगोत्रं 58
यदेवरोचतेमह्यं 242
यदुःखजननंवस्तु 53
यद्यन्योस्तिपरः 385
यद्येकार्थाभिसंबन्धा 286
यद्येनकामाकामेन 238
यन्नधायकर्णिका 105
यन्मायावादिनोब्रह्म 27
ययाक्षेत्रज्ञशक्ति 388
यययायाभवेत् 129
यस्तुश्रुत्यापरिक्तः 162
यस्मात्सम्यक्परं 506
यस्माद्देवोजग 513
यस्यनास्तिनिजाप्रज्ञा 2
यस्यांरात्रथामधिगमः 32
यागस्यचेष्टहेतु 452
यागोमदिष्टहेतु 452
यादशीभावनायत्र 9
यादशेतुमनः 517
यादशेनतुभावेन 10
यानानांनास्तिवैनिष्ठा 62
यानुभूतिरजानन्ता 331
यावत्खलुप्रमातृ 450
यावत्प्रतिज्ञाक्रियते 36
युक्तियुक्तंतुगृह्णीमः 41
युगान्तेन्तर्हितान्वेदान् 218
येतुज्ञानविदः 384
येतुवाकनिषत् 514
येनृशंसादुरा 520
येपरेखादयोदृष्टाः 173
येममतमिदंनित्यं 8
येयथामांप्रपद्यन्ते 8
येषांसुखेयान्ति 71
योधुनापरमार्थेन 174
योनवित्तैर्नविभवैः 520
योमामजमना 383
योमामेवमसं 383
योवेदवृक्षंबहु 515
योहियेनविनानास्ति 72
रजतव्यवहारांशे 182
रागादिरहितेचास्मिन् 37
रागाद्यपेतंहृदयं 521
रङ्गेनविद्यतेचित्रं 63
राजसेनतुपूजा 502
राजीवकेसरादीनां 77
रात्रंचज्ञानवचनं 498
रूपश्लेषोहिसंबन्धः 285
लक्षणानभिमानंतु 428
लक्ष्यस्यलक्षणामिह 439
लक्ष्यस्वरूपमपि 439
लक्ष्यार्थनिष्ठमुप 439

लब्धरूपेकाचित्किंचित् 110, 138, 178
लब्ध्वापिसुबहून्लाभान् 70
लाभानश्यन्तुमेकामं 70
लिङादिस्तत्रकार्यं 425
लोकावतरणार्थंच 64
वञ्चनार्थउपन्यासः 371
वर्णात्मनानसत्याश्चेत् 173
वर्णैश्चतुर्भिः 506
वर्तमानापदेशेपि 450
वर्षातपाभ्यांकिव्योम्नः 124, 133
वस्त्वस्तिकिकुत्रचित् 407
वाक्यवाक्यार्थयोर्नापि 135
वापीकूपतटाकादि 9
वासनामात्रनिष्पं 253
वासनाहेतुकोलोकः 45
वासिष्ठंनारदीयंच 497
विकल्पयोनयश्शब्दाः 101, 431
विकल्पितंयत्तिमिर 40
विकारवादंकपिलादिपक्षं 107
विग्रहोहाविरादानं 519
विचारितेनतुयदा 50
विचित्राहियदामाया 63
विज्ञातेचास्यपारार्थ्ये 158
विज्ञानंजडरूपेभ्यः 39
विदितनिगमसीम्ना 510
विद्याविनयसंपन्ने 165
विधिर्वार्यस्वभावस्तु 450
विध्याक्षेपउपादानं 429
विनोपघातेनयदि 67
विभागादविभागाद्वा 278
विभेदजनकेज्ञाने 166, 385
विष्णुशक्तिपराप्रोक्त 388
विरोधादप्रमाणत्वात् 304
वेणुरन्ध्रविभेदेन 167, 385
वेदनंध्यानविश्रान्तं 235, 306
वेदस्वीकरणंपूर्वं 299
वेदाहतेऽपिकुर्वन्ति 493
वेदादुरुनियोगा 450
वेदान्तेषुयथासारं 515
वेदेनपञ्चरात्रेण 490
वेदोनृतावुद्धकृत 143
वैदिकास्तुस्वतःपूर्वं 367
वैद्यायथातुरवशात् 64
वैराग्यात्पक्वविज्ञानः 158
व्यवहार.कथ्यतेच्च 493
व्यवहारमनादृत्य 40
व्यापृतेनापिमनसा 513
व्युत्पत्तिरिहकार्यं 428
व्युत्पत्त्यभावःप्रति 294
व्युत्पत्त्यभावात् 438
शक्तयस्सर्वभावानां 233
शक्तिरूपेणकार्याणि 248
शब्दब्रह्मेतियच्चेदं 163
शब्दशक्त्यनुसारेण 162
शब्दादिषुविनश्यत्सु 59
शब्दान्तराणिस्वा 424
शमाद्यङ्गकतास्ना 304
शमार्थंसर्वशास्त्राणि 6

शयनासनदाना 513
शान्तिःपुष्पंतपः 521
शासनंभिक्षुतामूलं 34
शास्त्रार्थतत्त्वतोज्ञा 14
शुक्तिकायाविशेषा 181
शुद्धसत्त्वंप्रपञ्चस्य 119
शून्यतावासनाधाना 31
शून्यतासर्वदृष्टीनां 31
शून्यत्वंनास्तितारूपं 30
श्रृणुपाण्डवतत्स 500
श्रृणातिनिखिलान्दोषान् 239
शेषित्वंरक्षकत्वञ्च 438
शैवंञ्चवैष्णवञ्चैव 495
शैवंपाशुपतंसौ 496
शौनकोहंप्रव 516
श्रद्धानामत्परमाः 8
श्रद्धयाग्निस्समिध्यते 9
श्रद्धयेष्टञ्चपूर्तञ्च 9
श्रद्धाङ्कामस्यमातरं 8
श्रद्धान्देवायजमाना 9
श्रद्धांप्रातर्हवाम 9
श्रद्धामयोयंपुरुष 8
श्रद्धावान्लभतेज्ञानं 8
श्रीमन्नभीष्टवरद 239
श्रीयतेचाखिलैर्नित्यं 239
श्रोतव्यश्रुतिवाक्येभ्यः 306
श्रौतंवैखानसं 501
श्रौतेनैवहारिदेवं 501
षट्कर्मसाधनं 490
षट्केणयुगषद्योगात् 46
संतानस्समुदायश्च 52
संदर्शनादकस्माच्च 520
संप्रधार्यमिदं 425
संप्राप्यैनमृषयः 164
संबन्धिभेदात्सत्तैव 86, 193
संयोगजननेपि 287
संयोगसमवाय्यादि 286
संवृतिःपरमार्थश्च 51, 66
संवृतेर्नतुसत्यत्वं 174
संवृत्यायत्स्वरूपं 174
संस्कार्यगणनायां 298
सएवश्रुतिमन्त्र 493
सचायमात्म 452
सत्यत्वंनचसामान्यं 174
सत्यदर्शनतोमुक्तिः 33
सत्त्वेनभ्रान्तिबाधौ 129, 146, 317
सत्त्वेनमिथ्याशून्यत्वे 129
सत्यासत्येतुयौभागौ 86, 193
सद्भावएवंभवतो 408
सनिरन्वयनाशस्स्यात् 106
सप्तजन्मकृतं 519
समचैषंमहत्पुण्यं 105
समन्वयोऽविरो 438, 471
समस्तलोकनाथस्य 520
समस्तशक्तिरूपा 389
समुच्चयोविकल्पोवा 321
समुपोढेष्वनीकेषु 507
सम्यक्मृषादर्शन 48
सयत्नःयागहोम 452

सर्गप्रलयविज्ञानं 159
सर्गश्चप्रतिसर्गश्च 492
सर्वज्ञवन्निषेध्याच्च 159
सर्वज्ञेपिसदादेव 240
सर्वथासदुपायानां 169
सर्वसंकल्पहानाय 4, 31
सर्वस्यैवहिविज्ञानं 156
सर्वस्यैवहिशास्त्रस्य 431
सर्वहेतुनिराशंसं 5, 76
सर्वातिशायिषा 518
सर्वात्मकत्वादर्थस्य 15
सर्वावाप्तिसमर्थोवा 164
सर्वेर्थायेनतन्यन्ते 492
सर्वेषामेवभूतानां 205
सर्वोपलंभोपशमः 33
सर्वोपाधिविनिर्मुक्तं 511
सविश्वकृत्विश्ववित् 378
सांख्यावैशेषिकान्नाः 59
सांख्याश्शास्त्रविनिश्चयाः 91
सांनिध्यमात्रतस्तस्य 37
साक्षान्नारायणो 503
सात्त्विकेनतुपू 502
सामान्यविधिरस्पष्टः 198
सायावन्ममकार्ये 422
सिद्धान्तेषुचतुर्षु 505
सिद्धार्थासिद्धसं 431
सिद्धिर्नापरमार्थेन 173
सिद्धेशब्दार्थसंबन्धे 431
सुखस्यमोहनत्वच्च 241
सुखादेर्ज्ञानरूप 182
सुखायवास्याद्दःखाय 15
सुखार्थक्रियतेकर्म 73, 449
सुगतोयदिधर्म 80
सुदुष्करेणशौचेत् 238
सुरूपांप्रतिमां 517
सूत्राभिप्रायसंवृत्या 292
सृष्टिश्चज्योतिरा 493
सृष्टिश्चप्रलयश्चैव 490
सोहंसचत्वं 385
स्कन्धेषुपुद्गलम् 60
स्तुतिजपनिज 491
स्थितैषाधर्मतेत्येतत् 59
स्मृतिरेवहिसंस्कारः 253
स्मृतिलम्भेसर्वग्रन्थीनां 92
स्वकर्मणाभि 490
स्वक्रियादिविरोधश्च 268
स्वतश्शेषत्वकैङ्कर्ये 241
स्वप्नङ्केशोण्डूकं 45
स्वप्नोपमास्तुगत 46
स्वप्रवृत्त्यादिनैष्फल्यं 77
स्वयञ्चशुद्धरूप 114
स्वयूथ्यान्मार्यमा 68
स्वरूपपररूपाभ्यां 81
स्वरूपमादौतद्भेदः 471
स्वरूपमेववस्तूनां 200, 335
स्वरूपानादित्वं 398
स्वरूपानादित्वस्वपर 114
स्वरूपेणजपाद्यर्थः 299
स्वरूपेणयथावह्निः 168
स्वर्गकामकृतेस्साध्यः 429

स्वर्गकामपदश्रुत्या 428
स्वर्गकामदयःकार्यं 425
स्वर्लोकेतैजसप्रायाः 162
स्वसिद्धान्तव्यवस्थासु 4
स्वासिद्धान्तव्यवस्थित्यै 13
स्वस्योपनयनंचांगं 297
स्वाज्ञानाभावदृष्ट्याहि 354
स्वानुरक्तमतिजन्म 440
स्वावच्छेदकनिर्मुक्त 360
हन्तब्रह्मोपदेशोयं 42
हरचक्रस्यचाख्यानं 492
हस्तादिभेदेनबहुप्र 69, 5
हृदिरूपंमुखेनाम 512
हीनोत्कृष्टेषुधर्मेषु 64
हिरण्यगर्भ.पित्राख्यः 501
हिरण्यगर्भोपिततः 389
हिरण्यगर्भोभगवान् 388

बोधिचर्यावतारपञ्जिकोदाहृता बौद्धसिद्धान्तग्रन्थावलिः.

दर्शनोदयस्यविंशतितमपुटस्यापेक्षिता

अध्याशयसञ्चोदनसूत्रं 431
आकाशगर्भसूत्रं 159
आर्यगण्डव्यूहसूत्रं 10
आर्यतथागतगुह्यसूत्रं 123
आर्यप्रज्ञापारमिताशतसाहस्री 346
आर्यमञ्जुश्रीविक्रीडितसूत्रं 168
आर्यमञ्जुश्रीविमोक्षः 42
आर्यमैत्रेयविमोक्षः 16
आर्यलंकावतारः 484
आर्यरत्नमेघः 91
आर्यराजावतारसूत्रं 26
आर्यवज्रच्छेदिका 443
आर्यवज्रध्वजसूत्रं 79
आर्यवीरदत्तपरिपृच्छा 32
आर्यसत्यद्वयावतार 366
आर्यसमाधिराज 28
आर्यसर्वधर्मैनपुण्यंसग्रह 147
आर्यसर्वास्तिवाद 168
आर्याकाशगर्भसूत्रं 147
आर्याक्षयमतिसू 20
उपायकौशलसू 139
उपालिपरिपृच्छा 139
काशीराजपद्मजातक 69
चतुर्धर्मकसूत्रं 67
चतुस्तव 488
चन्द्रप्रदीपसूत्र 172
त्रिसमयराज 57
धर्मसङ्गीतिसू 105
नागार्जुनसूत्रसमुच्चय 164
नारायणपरिपृच्छा 37
नियतानियतावतारमुद्रा 41
पितापुत्रसमागम 361
प्रज्ञापारमिताअष्टसाहस्रिक 108

प्रशान्तविनिश्चयप्रातिहार्यसू 39
बोधिसत्वप्रातिमोक्ष 85
भिक्षुविनय 140
मञ्जुघोष 56
मैत्रीबलजातक 43
रत्नकूट 147
ललितविस्तरः 532
शालिस्तम्बसूत्रं 386
शिक्षासमुच्चय 58
शिक्षासूत्रं 159
शूरंगमसूत्रं 24
श्रद्धाबलाधानावतारमुद्रासू 40
श्रीसंभवाविमोक्ष 157
सुबाहुपृच्छा 28
सूकरिकावधानम् 155

॥ श्रीः ॥

दर्शनोदयः

मीमासा

अभिवन्द्य महोदारामस्मद्गुरुपरंपराम् ।
दर्शनोदयमीमांसामपूर्वामारभामहे ॥

यस्सर्वेष्वपि दर्शनेषु परमं व्याख्यातृभावं गतः
यो वेदान्तविशिष्टतत्त्वनिगमाचार्यत्वमप्याश्रितः ।
यो लक्ष्मीपुरचक्रवर्तितिलकः श्रीकृष्णराजाश्रितः
व्यातानीदिह दर्शनोदयमिमं स श्रीनिवासाह्वयः ॥

ये ह्यासन्निह दर्शनप्रवचनाचार्या दयाशालिनः
तेषामाशयनिर्णयः सुविशदं तद्वाग्विशेषैः कृतः ।
ते तुष्यन्तु तथा तदीयपदवीनिष्ठाश्च धीमद्वराः
तेनैतेन कृतेन हृष्यति पुनः श्रीवासुदेवः स्वयम् ॥

यथा सामान्यतः देश. कालो दशा च त्रिधा विज्ञायते । तथा शास्त्रमपि उपदेश व्याख्यान विचाररूपेण त्रिविधमिति पूर्वाचार्यास्सूचयन्ति । तत्राद्य—"अथ शब्दानुशासनम्, अथ योगानुशासनम्" इत्यादिकमनुशासनपदघटितप्रारम्भकम् । द्वितीय—"अथातो दर्शपूर्णमासौ व्याख्यास्यामः, अथातस्सामयाचारिकान् धर्मान् व्याख्यास्याम" इत्यादिकं व्याख्याप्रदघटितप्रारम्भकम् । तृतीय तु—"अथातो धर्म-

जिज्ञासा, अथातो ब्रह्मजिज्ञासा" इत्यादिकं जिज्ञासापदघटित-प्रारम्भकम् ॥

तृतीयमेव न्यायनिबन्धनात्मक शास्त्रम्, मीमांसाशास्त्रमित्युच्यते। "मीमांसाशास्त्रं च न्यायनिबन्धनरूपम्" इति प्रकरणपञ्चिकायां शास्त्र-मुखे प्रतिपादितम् । तथाचोक्त न्यायवार्तिकतात्पर्यटीकायाम्—

मीमांसासंज्ञकस्तर्कस्सर्वो वेदसमुद्भवः ।
सोऽतो वेदो रुमाप्राप्तकाष्ठादिलवणात्मवत् ॥

पूजितविचारवचनो हि मीमांसाशब्द । अयुक्तप्रतिषेधेन युक्ताभ्यनु-ज्ञानं तर्क । प्रमाणेतिकर्तव्यतात्वेन च प्रमाणाद्वेदादभेद उक्तः सोऽतो वेद इति ॥ (४१ पु.)

तथाच उपदेशकालं व्याख्यानकाल च अनादृत्य विचारकालानु-रोधेन प्राचीनग्रन्थपरामर्शमुखेनैव विचारोऽत्र चिकीर्षित । यत उच्यते वाक्यपदीये—(२—४९३)

प्रज्ञाविवेकं लभते विभिन्नागमदर्शनैः ।
कियद्वा शक्यमुन्नेतुं स्वयत्नमनुधावता ॥

तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥ इति ॥

तत्रापि—

एकं यदि भवेच्छास्त्रं ज्ञानं निस्संशयं भवेत् ।
बहुत्वादिह शास्त्राणां ज्ञानतत्त्वं सुदुर्लभम् ॥

इति नारायणीये उक्तत्वेऽपि—

यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः ।
न स जानाति शास्त्रार्थं दर्वी पाकरसं यथा ॥

इति विदुरनीतिवचनानुरोधेन विचारः कर्तव्यः ॥

तत्राप्यत्र विचारे परीक्षकै· तात्पर्ये परं दृष्टिर्विधेया न तु शब्दार्थे केवले। यतश्च प्रोक्त कुमारिलेन वार्तिकारम्भे—

नचात्रातीव कर्तव्यं दोषदृष्टिपरं मनः।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥ इति ॥

दर्शनोद्देश

सर्वेषां दर्शनानामिद खलु परममुद्देश्यम्—यद्रागादिदोषवर्जनमिति। तथाहि—(महाभारतम्)

शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः।
स एव सर्वशास्त्रज्ञ· यस्य शान्तं मनस्सदा ॥

यत् श्रुतं न विरागाय न धर्माय न शान्तये।
सुबद्धमपि शब्देन काकवाशितमेव तत् ॥

इत्यादि ॥

तथा—तन्त्रवार्तिके—(८१ पु.) "विज्ञानमात्र क्षणभङ्ग नैरात्म्य वादानामपि उपनिषत्प्रभवत्व विषयेष्वात्यन्तिक राग विनिवर्तयितुमित्युपपन्नं सर्वेषां प्रामाण्यम्, इत्युक्तम् ॥

एवसति तत्र यदि दार्शनिका एव परस्पर दर्शनेनैव निमित्तेन रागद्वेषपरिग्रहवन्तो भवन्ति ततो हास्यतर लोके किञ्चिदन्यन्न विद्यते इत्यापाततः यद्यपि प्रतिभाति। वस्तुतस्तु तत्तद्दर्शनमूलपुरुषाणां महतां वचस्सु परामृश्यमानेषु दर्शननिमित्तरागद्वेषशून्यत्वं स्वस्वदर्शनस्य स्पष्टमभिहितमवगम्यते ॥

बुद्धदर्शने बोधिचर्यावतारपञ्जिकायाम्—

आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ।
उभयोस्संप्रतिबद्धाः सर्वे भावाः प्राजायन्ते ॥ ४९२ पु. ॥

सर्वसंकल्पहानाय शून्यताऽमृतदेशना ।
यश्च तस्यामपि ग्राहः त्वयाऽसाववसादितः ॥ ३५९

(त्वया भगवता बुद्धेनेत्यर्थ. । चतुस्तववचनमिदम् ॥)

शून्यता सर्वदृष्टीनां प्रोक्ता निस्सरणं जिनैः ।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ॥ ४१४

प्रपञ्चविनिवृत्त्येकस्वभावा या च शून्यता ।
तस्यां तु शून्यतादृष्टिरमलायां न शोभते ॥ माध्य-वृत्तिः ॥

एवं शून्येषु धर्मेषु कि लब्धं कि हृतं भवेत् ।
सत्कृतः परिभूतो वा केन किं सम्भविष्यति ॥ ५९०

इति उदाहृतैर्वचनै. सर्वविधा दृष्टय. सकल्परूपा अभिनिवेशलक्षणाः परिहर्तव्या । सर्वाभिनिवेशरूपस्य रागद्वेषादिलक्षणस्य परित्यागायैव शून्यत्वोपदेश. । तत्र शून्यत्वोपदेशे लब्धेऽपि अभिनिवेश. न शान्तश्चेत् उपदेशो व्यर्थ एवेति स्पष्टमुच्यते । एव स्वसिद्धान्ते एव अभिनिवेश निषेधन् सिद्धान्त अन्यसिद्धान्ते द्वेषस्यावकाश कथ दास्यतीति सिद्धन्तविरोधेन निमित्तेन द्वेषो नास्तीत्युक्तं भवति ॥

आर्हतदर्शने सर्वदर्शनसग्रह वचनमिदमवधेयम्—

अन्योन्यपक्षप्रतिपक्षभावात्परस्परं मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छन्नपक्षपाती समयस्तथाऽऽर्हतः ॥

इति । अनेन वचनेन स्वदर्शनस्य दर्शनान्तरविरोधगन्ध एव नास्तीति स्फुटमुक्त भवति ॥

अद्वैतदर्शने माण्डूक्यकारिकायामद्वतप्रकरणे—

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।
परस्परं विरुध्यन्ते तैरयं न विरुध्यते । इति ॥

अत्रैवं श्रीशाङ्कर भाष्यं—एव रागद्वेषोपेता स्वस्वसिद्धान्तदर्शन-निमित्तमेव परस्पर विरुद्धयन्ते। तैरन्योन्यविरोधिभिः अस्मदीयोऽयं वैदिक. सर्वानन्यत्वादात्मैकत्वपक्ष. न विरुध्यते। यथा स्वहस्त-पादादिभिराघाते जातेऽपि पुरुषो यथैक्यज्ञानेन न क्रुध्यत्येवमस्मिन् दर्शने दर्शनान्तरनिमित्तद्वेषादिर्नास्तीत्यभिप्राय इति॥

विशिष्टाद्वैतदर्शने—सर्वस्य ब्रह्मात्मकत्वमुच्यते। ब्रह्मात्मकत्व नाम सर्वस्य ब्रह्मशरीरत्वम्। तथाचात्मन इव परेषामपि विश्व-रूपभगवद्रूपत्वानुसन्धाने कथ वैरावतार, एकशरीरावयवन्यायात। इति॥ (तात्पर्यचन्द्रिका ११—५५)

एवमसौ सर्वानुकूल्यसिद्धान्त इत्यप्युच्यते। प्रपञ्चे परिदृश्य-मान सर्वं सर्वशेषिणो भगवत निरतिशयमनुकूलम्। तत्र किंचिल्लीला-रसानुकूल किञ्चिद्भोगरसानुकूलम्। एतादृशसिद्धान्तनिष्ठावतो भागवत-स्यापि भगवत इव सर्वं अनुकूलमेव। एवस्थिते प्रातिकूल्यभावनाया एवाभावात् कथ परकीयसिद्धान्ते प्रद्वेष इति॥

एव विशुद्धाद्वैत-विशिष्टाद्वैतसिद्धान्तयो एकशरीरावयवन्याय एवानुसृत इति विज्ञायते। इम च न्यायं बाह्या अप्येवमुपदिशन्ति—(बोधिचर्या. ३२८ पु.)

हस्तादिभेदेन बहुप्रकारः कायो यथैकः परिपालनीय.।
तथा जगद्भिन्नमभिन्नदुःखसुखात्मकं सर्वमिदं तथैव॥ इति॥

अन्ततश्चार्वाकदर्शनमपि शान्तिमेव बोधयतीति विजानीम·—

सर्वहेतुनिराशंसं भावानां जन्म वर्ण्यते।
स्वभाववादिभिस्ते च नाहुः स्वमपि कारणम्॥

राजीवकेसरादीनां वैचित्र्यं कः करोति हि ।
मयूरचन्द्रिकादिर्वा विचित्रः केन निर्मितः ॥

यथैव कण्टकादीनां तैक्ष्ण्यादिकमहेतुकम् ।
कादाचित्कतया तद्वत् दुःखादीनामहेतुता ॥ इति ॥ बो. ५४१ ॥

अत्र दुःखादीनामहेतुतालक्षणयाऽऽकस्मिकतया तत्प्रयोजकत्वेन इतरेषु द्वेषो न कर्तव्य । अपितु स्वभावभावनया शान्त एव भवेदित्याभिप्रायः ॥

तस्मात्---

शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः ।
स एव सर्वशास्त्रज्ञः यस्य शान्तं मनस्सदा ॥

इति सुष्ठूक्तम् ॥

अस्य च इतिहाससमुच्चयादौ पठितस्य वचनस्य वयमन्वयमेव रोचयामहे । यथा—य विचारशीलः पुरुषः सर्वशास्त्रसार विजानाति तस्य मनस्सदा शान्तमिति । एकदेशज्ञानिनां गृहीतग्राहित्वाभिमान रूढमूल वर्तते । नानाशास्त्रसारग्राहिणस्तु तादृशाभिमानाविधुराः प्रायश्शान्ता भवन्तीति । ततश्च—"य एव सर्वशास्त्रज्ञ तस्य शान्तं मनस्सदा" इति पाठितव्यमिति ॥

सम्प्रदायो विश्वसनीय

पक्षो योऽङ्गीकृतो येन तमत्रस्यन् स निर्वहेत् ।
हारयेदन्तरा त्रस्यन् भीतोपद्रवकारिभिः ॥ ८६ पु

इति कौमारिलं वाक्यं श्रूयते तन्त्रवार्तिके ।
वेदान्ताचार्यवाक्यं तु रहस्योक्तं निशम्यताम् ॥
भवन्ति बहवो मूर्खाः क्वचिदेको विशुद्धधीः ।
त्रासितोऽपि सदा मूर्खैरचलो यस्स बुद्धिमान् ॥

इति लोकप्रसिद्धेन न्यायेन बहवः किल ।
सिद्धान्ताः परिदृश्यन्ते तैस्तदीयैः प्रवर्तिताः ॥

इह तावन्मनुष्याणामार्याणां द्विविधस्संस्कारः जननादारभ्य समाधीयते लौकिको वैनयिकश्चेति । प्रथम. सुप्रसिद्धः लौकिकेन व्यवहारेणैवाधीयमान· विचित्र एव वर्तते । द्वितीयस्तु विनयपद-वाच्यया "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत्" इत्यादि-शास्त्रविहितया शिक्षया पित्रादिसम्प्रदायपरम्पराया तत्तत्सिद्धान्तविचार-रूपमीमांसया च समाहितो वैनयिक इत्युच्यते ॥

तत्र सम्प्रदायो नाम "शिष्योपाध्यायसम्बन्धस्याविच्छेदेन शास्त्रप्राप्ति·" इति न्यायवार्तिके प्रथमसूत्रभाष्यान्ते उद्योतकर प्राह। आह च भगवानपि गीतायाम्—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन ॥ इति ॥

ततश्च तत्त्वसाक्षात्कारवतामुपदेशपारपर्येण सिद्ध एवार्थ सिद्धान्त इति तेषांतेषामभिप्रायः । स च संस्कारः तत्तत्सम्प्रदायसंस्कृतमानसानामेव हृदयङ्गम. । स एव दृढतमश्चेत् फलपर्यवसायीति श्रद्धातव्यश्च श्रद्धा-लुभिरिति निर्णयः ॥

भावनामय पुरुष

यतः—आत्मा नाम श्रद्धालक्षणविश्वासमयः । "अथो खल्वाहुः काममय एवाय पुरुष इति । स यथाकामो भवति तथाक्रतुः भवति । यथाक्रतुर्भवति तथा तत्कर्म कुरुते । यत्कर्म कुरुते तदभिसम्पद्यते" इति बृहदारण्यके ॥ ६–४–५ ॥

"अथ खलु क्रतुमयः पुरुष· यथाक्रतुरस्मिन् लोक पुरुषो भवति तथेत प्रेत्य भवति" इति छान्दोग्ये (३–१४–१)

"श्रद्धां कामस्य मातरम्" इति तैत्तिरीयके (ब्रा—२–८–८)

"स प्राण मसृजत प्राणात् श्रद्धाम्" इति प्रश्नोपनिषदि च श्रूयते ॥

भगवद्गीतायामपि—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥
श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥
यो यो यां यां तनूं भक्तश्श्रद्धयाऽर्चितुमिच्छति ।
तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्धधाना मत्परमाः भक्तास्तेऽतीव मे प्रियाः ॥
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चेति तामसी चेति तां शृणु ॥
सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषः यो यच्छ्रद्धः स एव सः ॥

इत्यात्मनां श्रद्धात्मक सस्कारलक्षण विश्वासमयत्वबोधकानि भगवद्गीता-वचनानि ॥ निष्कृष्टार्थस्तु—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ इति ॥

मनु —

श्रद्धेयेष्टं च पूर्तं च नित्यं कुर्यादतन्द्रितः ।
श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः ॥ इति ॥

अग्निहोत्रं तपस्सत्यं वेदानामुपलम्भनम् ।
आतिथ्यं वैश्वदेवं च हीष्टमित्यभिधीयते ॥

वापीकूपतटाकादिदेवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ इति ॥

पाद्मे चर्यापादे—(१४)

गृहार्चने कौतुके वा मण्डले वा घटेऽपि वा ।
अर्चनं श्रद्धया कार्यं श्रद्धापूतमिदं जगत् ॥ इति ॥

अस्य सर्वस्यापि श्रद्धामहिमवचनस्य मूल श्रद्धासूक्त (ऋग्वेद १०-१५१) ॥

श्रद्धयाऽग्निस्समिध्यते श्रद्धया हूयते हविः ।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः ।
प्रियं भोजेषु यज्वसु इदं म उदितं कृधि ॥

यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे ।
एवं भोजेषु यज्वसु अस्माकमुदितं कृधि ॥

श्रद्धां देवा यजमाना वायुगोपा उपासते ।
श्रद्धां हृदय्ययाऽऽकूत्या श्रद्धया विन्दते वसु ॥

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥ इति ॥

किमत्र बहुनोक्तेन—

मन्त्रे तीर्थे द्विजे दैवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावनां कुर्यात् सिद्धिर्भवति तादृशी ॥ इति ॥

अत एव परस्य ब्रह्मणोऽपि श्रद्धामयत्वमवगमयितु सर्वासूपनिषत्सु श्रद्धापदेन व्यपदेशस्समुपलभ्यते ॥

अत्र यद्यपीयमाशङ्का समुदेति । यथा—

यं तु कर्मणि यस्मिन् स न्ययुङ्क्त प्रथमं विभु. ।
तदेव स पुनर्भेजे सृज्यमानः पुनःपुनः ॥ मनु—१-२८ ॥
यादृशेन तु भावेन यद्यत्कर्म निषेवते ।
तादृशेन शरीरेण तत्तत्फलमुपाश्नुते ॥ १२-८१ ॥
न गाधा गाधिनं शास्ति बहु चेदपि गायति ।
प्रकृति यान्ति भूतानि कुलिङ्गशकुनिर्यथा ॥
जन्मान्तरसहस्रेषु बुद्धिर्या भाविता पुरा ।
तामेव भजते जन्तुः उपदेशो निरर्थकः ॥ महा भा सभा ४४

गीयते च—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृति यान्ति भूतानि निग्रहः किं करिष्यति ॥

इत्यादीनि वचनानि पुरुषकार प्रतिबध्नन्तीति ॥

अयमत्र समाधि.—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥ इति ॥

अय भाव·—प्रकृतिर्हि रागादिद्वारेण कार्यकारिणी । न तु वायूदकादिवत् पुरुष प्रेरयति । तत्र रागादिनिरोधे च पुरुषप्रयत्नस्सावकाश । ततश्च प्राचीनवासनानुरोधेन इष्टसाधनताज्ञाने सति इच्छाया सत्यामपि तदधीनो न भवेत् पौरुष पुरस्कुर्यादिति । इद च पद्य पुरुषकारावसरप्रदानपरमिति सर्वेषां भाष्यकृता पन्था. ॥

अत एवैतेषा वचनानां सारार्थ गृहीत्वा माण्डूक्यकारिकायां

वैतथ्यप्रकरणे (१७) एवमाहुः—

यं भावं दर्शयेद्यस्य तं भावं स तु पश्यति ।
तं चावति स भूत्वाऽसौ तद्ग्रहस्समुपैति तम् ॥ इति ॥

एतेन भावनामय पुरुष इति स्पष्टमुक्त भवति ॥

अतएव कुमारिलभट्टाचार्योऽपि तन्त्रवार्तिके अपूर्वाधिकरणे—

सर्वावाप्तिसमर्थो वा प्रकृत्याऽऽत्मा सदेष्यते ।
कश्चित्तु प्रतिबन्धोऽस्य कर्मभिस्सोऽपनीयते ॥

इत्याह सर्वकामावाप्तियोग्यतामात्मन स्वाभाविकीम् ॥

ततश्च पुरुषस्य भावनामयत्वे सिद्धे सैषा भावना सामान्येन त्रिधा प्रविभागमर्हति—सर्वोपशमभावना आत्मव्यतिरिक्तसर्वोपशम-भावना सर्वकामावाप्तिभावना चेति । तत्र प्रथमद्वितीये—सर्वमिद जगद्दुःखमय प्रतिकूलमितिभावनामूलसिद्धान्तनिबन्धने भवत । तृतीया तु सर्वस्य दु खमयत्व प्रतिकूलत्वरूपमौपाधिक प्राचीनानन्तविचित्र-कर्ममूलम् । सर्वकर्मनिवृत्तौ सर्व भगवतो विभूतिभूत शेषभूत सुखमय अनुकूलतममिति सिद्धान्तनिबन्धना ॥

इदमेकमत्रोदाहरणम् । सौगता खल्वेवमाहु —"त्यज्यता-मेष मूर्धाभिषिक्त प्रथमो मोह आत्मग्रहो नाम । तन्निवृत्तावात्मीय-ग्रहोऽपि विरस्यति - अहमेव न, किं ममेति । तदिदमहङ्कारममकार प्रहाणेन नैरात्म्यदर्शनमेव निर्वाणद्वारम् । तदुच्यते बोधिचर्यावतारे—

यतस्ततो वाऽस्तु भयं यद्यहं नाम किञ्चन ।
अहमेव न किञ्चेत् भयं कस्य भविष्यति ॥ ४४९ ॥

इति नैरात्म्यदर्शनमेव सर्वोत्तम रागभञ्जकमिति ॥

एतन्मतमभिसन्धायैव औपनिषद दर्शनमेव प्रवृत्त ब्रह्मात्मैक-त्वोपदेशाय—तत्त्वमसीति । अयमर्थ.—"आत्मैवेदमग्र आसीत् सोऽ-

बिभेत्। तस्मादेकाकी बिभेति। सहायमीक्षांचक्रे। यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति। तत एवास्य भय वीयाय। कस्माद्धि अभैष्यत् द्वितीयाद्वै भय भवति। (बृ उ ३-३-२) इति। रागादिभङ्गाय नैरात्म्यपर्यन्तानुधावन नोचितम्। आत्मसत्त्वेऽपि द्वितीयाभावे रागाद्यभावात् ऐकात्म्यदर्शनमेव वरमित्यैकात्म्यसिद्धान्त. ॥

आत्मभेदवादिसिद्धान्तरीतिस्तु—द्वितीयसत्त्वेऽपि तृतीयस्य परमेश्वरस्य सर्वनियन्तुस्सत्त्वात् तत्पारतन्त्र्यस्यैव सर्वेषा निरुपाधिकस्य तत्त्वमसीति समुपदिष्टत्वात् सर्वेषामात्मना समानाकारत्वेन वैषम्याभावात् वैषम्यहेतूना देवमनुष्याद्याकाराणामौपाधिकत्वात् सर्वेषां सर्वनियन्तृशरीरत्वेन तदवयवभावनया एकदेहीयहस्तपादादिन्यायेन रागद्वेषानवकाशात् नियन्त्रपेक्षया द्वितीयस्य स्वतन्त्रस्याभावेन नैव भयस्यावसर इति सङ्ग्रहः ॥

सम्प्रदायसमाश्रय

लोकसिद्धो न्यायोऽपि सस्काराधीनो विविधो विज्ञायते। तथाहि—प्राचीनो वेदान्तवादस्तु भेदाभेदलक्षण परिणामवाद.। स एव सर्वासामुपनिषदां सूत्राणा च तात्पर्यविषयभूत इति भूयसामभिप्राय। स एव हि वाद श्रीमतां शङ्कराचार्याणा प्राधान्येन निराचिकीर्षित। यत स्वयमाह—(बृ. उ. ४-३-६) "तस्मात् श्रुत्यर्थकल्पनाकुशला. सर्व एवोपनिषदर्थमन्यथा कुर्वन्ति। तथापि वेदार्थश्चेत्स्यात् कामं भवतु न मे द्वेषः" इति। तथाच वेदव्याख्यातार तत्राप्युपनिषद्व्याख्यातार. प्राचीनाः भूयांस आसन्निति "सर्व एव" इत्यनेनावधार्यते ॥

नैतावता शाङ्कर दर्शनं नवीनमित्यभिमतमिति न भ्रमितव्यम्। यतस्स एवान्यत्रैवमाह—(बृ. उ. ४-१-२०) "कुतर्कदूषितान्त करणाः

ब्राह्मणादिवर्णोपशदा अनुकम्पनीया आगमार्थविच्छिन्नसम्प्रदायबुद्धय." इति ॥

तथा माण्डूक्यकारिकाभाष्ये एवमुच्यते—"विगतद्वेषै. वेदान्तार्थतत्परै· सन्न्यासिभि परमात्मा द्रष्टु शक्यो नान्यै रागादिकलुषितचेतोभि स्वपक्षपातदर्शनै तार्किकादिभिरित्यभिप्रायः" इति ॥ (२-३५)

न्यायसूत्रभाष्ये तु—(४-२-४९) "अन्योन्यप्रत्यनीकानि च प्रवादुकानां दर्शनानि । स्वपक्षरागेण चैके न्यायमतिवर्तन्ते" इति ॥

तथा भास्करभाष्ये—(२९ पु) "तस्मात्सम्प्रदायपरम्परया च तद्व्याख्यान शोभनम्" इति तथा- (४१) "केचित्तु श्रुत्यर्थमाचार्योक्तिं च पृष्ठत कृत्वा अन्यदेव दर्शन रचयन्ति" इति । तथा—(८५) "सूत्रकारश्श्रुत्यनुकारी परिणामपक्ष सूत्रयाम्बभूव । अयमेव छान्दोग्ये वाक्यकारवृत्तिकाराभ्या सम्प्रदायतस्समाश्रित·" इति ॥

श्रीभाष्ये तु—"भगवद्बोधायनकृतां ब्रह्मसूत्रवृत्ति पूर्वाचार्यास्सञ्चिक्षिपु । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते" इति ॥

एव विलक्षणेषु बहुषु मार्गेषु सत्सु माध्यस्थ्येन परामृशता विमर्शकवराणा सस्कारलक्षणभावनामयत्वमेव सर्वमार्गाणामिति सुदृढ हृदयारूढ भवति । यत सर्व एव सिद्धान्तप्रवर्तका "सर्वे हि वस्तुजात प्रतीतिव्यवस्थाप्यम्" इत्यनुभवलक्षणां प्रतीतिमेव प्रमाणत्वेन पुरस्कुर्वन्ति । अनुभवश्च तत्तादृशभावनानिबन्धन इति विदितमेवैतत् ॥

खण्डनमण्डनविचार

स्वसिद्धान्तव्यवस्थित्यै परसिद्धान्त खण्डनम् ।
तस्मान्न दौर्जन्यमिति सर्वेऽप्याहुर्मनीषिणः ॥

तत्तत्त्वमप्यत्र यथा सङ्गतं स्यान्निशम्यताम् ।
सिद्धान्ते दृढविश्वासादुपाय फलसाधकः ॥

तत्तत्संस्कारदार्ढ्याय सर्वैर्यत्नो ह्यपेक्ष्यते ।
स्वसंस्कारानुरोधेन दूषणं भूषणं भवेत् ॥

तदेव परसंस्कारवशाद्भवति दूषणम् ।
एवंस्थिते दूषणादौ के वा खण्डनमण्डने ॥ इति

अत एवेत्थ भास्कराचार्येण भाषितम्—(२१९ पु)

उक्तं तत्त्वमनादृत्य दुर्ग्रहो गृह्यते यदि ।
तत्रास्माभिरिदं वाच्यं गृह्यतां गृह्यतामिति ॥
शास्त्रार्थं तत्त्वतो ज्ञात्वा चरिष्यामो वयं सदा ।
न नो व्यसनिता काचित् विमतिप्रतिबोधने ॥ इत्यादि ॥

श्रीभाष्ये (२-२-१) "परपक्षप्रतिक्षेपायानन्तर. पाद प्रवर्तते । अन्यथा वैदिकपक्षेस्मिन् किञ्चिच्छ्रद्धावैकल्य जायेतापि" इति ॥

तथाच परसिद्धान्तखण्डनमपि सम्प्रदायश्रद्धारूपस्य सस्कारस्य दार्ढ्यायैवेति न दौर्जन्यदोषावहमिति विजानीम ॥

स्वसिद्धान्तप्रचाररूपप्रवचनायेति येऽभिप्रयन्ति तेषामभिप्राय निरर्थक एव । अपरथा—जगत्यस्मिन्नेकसिद्धान्तपरिशेष एव स्यात् इति ॥

नन्वेव सर्वमार्गाणा वासनामयत्वे परमार्थत किमपि न स्यादिति प्रसज्यत इति चेन्न—लोकोत्तरे अतीन्द्रिये विषये वासनामयत्वापेक्षयाऽतिरिक्तस्य पारमार्थ्यस्यानभ्युपगमात् । वासनामय सर्वमपरमार्थमेवेति नियमस्यानभ्युपगमात् । लोकोत्तरस्य परमार्थतत्त्वस्यात्मलक्षणस्य श्रद्धामयत्वलक्षणवासनामयत्वस्यैव धर्मिग्राहकमानभूतश्रुत्युक्तत्वात् ॥

वस्तुन्यस्मिन् सर्वात्मके सर्वशक्तियुक्ते सर्वविधस्य विकल्पस्यैव

भूषणत्वात् । वस्तुनि विकल्पो नास्तीति वादिनो ये तार्किकादय वस्त्वैकरूप्यवादिनः तेऽपीत्थमाहु —

न हि वस्तु स्वभावेन पुरुषार्थत्वमश्नुते ।
तथात्वे सर्वदा सर्व सर्वेषां स्याद्यवस्थया ॥
सुखाय वा स्यात् दु.खाय न चैवं त्वव्यवस्थया ।
परिव्रादकामुकशुनामेकस्यां प्रमदातनौ ॥
कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः ।
अर्थस्सर्वात्मकस्तस्मात्सर्वाभ्युपगतो मतः ॥

तथा—पातञ्जलार्हतभाट्टा. अनेकान्तवादिन. परमार्थतो वस्तु विकल्पवादिन एव । औपनिषदा अपि ये द्वैतैकत्ववादिन भर्तृप्रपञ्च ब्रह्मदत्त भर्तृहरि भास्कर यादवप्रकाशादय तेऽपि सर्वे वस्तुविकल्पवादिनः । तथाचोक्त हारिणा (२—४४१) वाक्यपद्याम्—

नानात्मकानामेकत्वं नानात्वं च विपर्यये ।
सर्वात्मकत्वादर्थस्य नैरात्म्याद्वा व्यवस्थितम् ॥ इति ॥

अत्र नैरात्म्यात्सर्वमुपपद्यत इति चेन्न—अर्थक्रियाकारित्वलक्षणस्य शून्यताविरोधिनो रूपस्य सर्वानुभवसिद्धत्वेन तन्मार्गानाश्रयणात् ॥

सूत्रकारोऽप्याचार्यबादरायण —"कृत्स्नप्रसक्तिर्निरवयवत्वशब्द-कोपो वा" इत्याक्षेप "श्रुतेस्तु शब्दमूलत्वात्" इति समाहितवान् । शब्दैकसमधिगम्ये वस्तुनि यथाशब्द प्रत्येतव्ये लोक सिद्धन्यायविरोधचिन्ता न कार्येति तत्रत्याशय ॥

ततश्च भौतिकमेव सर्व सर्वात्मकमिति सर्वाभ्युपगमसम्भवे अभौतिकमतीन्द्रिय शब्दैकसमधिगम्य विलक्षण वस्तु सर्वात्मकमिति वादिनां कोऽतिरिक्तोऽपराध. ॥

एव ग्रन्थेषु लोकसिद्धप्रमाणप्रमेयव्यवस्थाया एव विचित्राया· परिदृश्यमानत्वात् स्वस्ववासनानुगुणैव युक्ति सद्युक्ति , तादृशो न्याय एव लोकसिद्धः समीचीनो न्याय , तादृश्येव व्यवस्था सुव्यवस्था, इतरदखिल असमञ्जसमिति च महान्तोऽपि धीमन्तोऽपि विश्वसन्ति । तथाऽनुतिष्ठन्ति । शान्ताश्च निवसन्ति । ततश्चैव लोकवैचित्र्ये निरूप्यमाणे पुसा प्रबन्धाना व्यवहाराणां सर्वेषामपि भावनामयतैव विशदतर परिस्फुरतीति स्वस्वसम्प्रदायसमाश्रयणमेव सर्वेषां श्रेय इति भद्रम् ॥

तथाचोक्त वेदान्ताचार्यैर्न्यायसिद्धाञ्जने—

परश्शतपरिक्षोदात्परस्तादपि वादिभिः ।
उपलम्भबलं स्थेयं तदादावेव गृह्यताम् ॥ इति ॥

इदमत्रावधेयम्—सर्वदर्शनाना सप्रदायाना च श्रद्धामयत्वेऽपि सनातनधर्मव्यवस्थानुरोधेन स्वीक्रियमाणैव श्रद्धा सात्त्विकीत्युच्यते । तयैव यथायथ पुरुषार्थप्राप्तिरिति सर्वशास्त्रसारार्थः । ततश्च सनातनधर्मव्यवस्था व्याकुलीकुर्वतां रागद्वेषमूलस्वच्छन्दाचारकुतुकिनां श्रद्धाऽपि परिग्राह्या स्यादिति शङ्काया नात्रावकाश· ॥

सनातनधर्मा अधर्माश्च न्यायसूत्रभाष्ये (१-१-२) वात्स्यायनेनोपदर्शिता —"रागद्वेषासूयेर्ष्यामायालोभादिभिः दोषै प्रयुक्त. शरीरेण हिसा स्तेय प्रतिषिद्धमैथुनान्याचरति । वाचाऽनृत परुष सूचनाऽसंबद्धानि । मनसा परद्रोह परद्रव्याभीप्सां नास्तिक्य चेति । सेय पापात्मिका प्रवृत्तिरधर्माय ॥

अथ शुभा—शरीरेण दान परित्राण परिचरणं च । वाचा सत्य हित प्रिय स्वाध्याय चेति । मनसा दयामस्पृहा श्रद्धां चेति । सेय धर्माय" इति ॥

शून्यतादर्शनम्

दर्शनक्रम

अथ प्रथममेतस्मिन् प्रबन्धे दर्शनोदये ।
प्रपञ्चशून्यतावादिसिद्धान्तः प्रविचिन्त्यते ॥
तत्तद्ग्रन्थस्थवाक्यानामेव योजनया कृता ।
मीमांसेयमतोऽस्माकमपराधो न कश्चन ॥
केवला दृष्टिरस्माकं तत्तत्सिद्धान्तनिर्णये ।
तत्तत्सिद्धान्तैकदेशमूलविभ्रान्तिशान्तये ॥
आदौ सौगतसिद्धान्तविचारे हेतुरुच्यते ।
दर्शनाना यतः पौर्वापर्ये नास्ति नियामकम् ॥

यद्यपि सर्वाणि दर्शनानि तत्तत्पुरुषविशेषाभिप्रायरूपाणि अनादीनीत्येव वक्तव्यानि भवन्ति । यस्मादनादित्वेनाङ्गीकृते वेदान्तदर्शने उपनिषत्स्वेव "अस्तीत्येके नायमस्तीति चैके" (कठ १-२०) "तद्धैक आहुरसदेवेदमग्र आसीत्" (छा ६-२) इत्यादिषु वाक्येषु चार्वाकदर्शनसौगतदर्शनादीनामभिप्रायस्यानुवादो दृश्यते । प्रायशश्चोपनिषदा साङ्ख्यसिद्धान्ताभिप्रायनिरासायैव भगवता बादरायणेन सूत्राण्यपि प्रणीतानि । ततश्च दर्शनेषु पौर्वापर्यलक्षण क्रम नियामकस्य कस्याप्यदर्शनात् अशक्यो निरूपयितुम् ॥

तथाप्यधुनोपलभ्यमानेषु प्रबन्धेषु तत्र निरूप्यमाणेषु युक्तिरूपन्यायेषु च शब्दतोऽर्थतश्च पौर्यापर्यदर्शनात् शक्य काञ्चित्क्रममभ्युपगन्तुम् ॥

एवं सत्ययं क्रमोऽस्माकमभिमत·—बौद्धं साङ्ख्यं तार्किकं स्वायंभुव शैव भाट्ट प्राभाकर शाङ्कर भास्कर यादव रामानुजीयमिति ॥

तथाऽमुमेव क्रमेऽभिप्रायमनुरुद्धय सङ्कल्पसूर्योदये द्वितीयेऽङ्के श्रीवेदान्ताचार्यै पद्यमिद पठ्यते—

गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना
श्लीणा काणादवाणी द्रुहिणहरगिरस्सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिः जगति गुरुमतं गौरवात् दूरवान्तं
का वा वार्तेतरेषां भजति यतिपतौ भद्रवेदी त्रिवेदीम् ॥

इति ॥

तत्रच सर्वेषां दर्शनानां मूलभूते इव द्वे एव साक्षात्पक्षप्रतिपक्षतयाऽवस्थिते बौद्धसाङ्ख्यदर्शने । इतराणि सर्वाण्यपि दर्शनान्येताभ्यामेव सङ्कीर्णानि क्वचित्क्वचित् विशिष्य परिष्कृतानीव प्रवृत्तानीति विज्ञायते ॥

तत्र बुद्धदर्शन नाम माध्यमिकसम्मत सर्वशून्यवाद· निस्वभाववाद निरन्वयोत्पत्तिविनाशवादः भ्रान्तिवाद· परतन्त्रवाद· इत्येवंप्रकारै व्यपदिश्यते । तस्य च प्रतिद्वन्द्वितयाऽवस्थित साङ्ख्यदर्शनन्तु सर्वसत्यवाद स्वभाववाद पारिणामवाद अविवेकवाद· स्वतन्त्रवाद इत्यभिलप्यते । तस्मात्सर्वशून्यवादस्य प्रतिपक्षभूतो वादस्सर्वसत्यवाद ॥

तद्विस्तरस्तु-सर्वमसदिति सौगता प्राहु । सदिति साङ्ख्या । अभाव इति भाव इति, क्षणिकमिति स्थिरमिति कार्यकारणयो भेद इत्यभेद इति, असत्कार्यमिति सत्कार्यमिति, नैरात्म्यमिति सार्वात्म्यमिति, भ्रान्तिरिति अविवेक इति, सर्व ज्ञानमयथार्थमिति यथार्थ-

मित्येवप्रकारैः सर्वैरपि सौगतसाङ्ख्ययोरेव पक्षप्रतिपक्षभाव । इतराणि सर्वाण्यपि दर्शनानि माध्यस्थ्येन स्थितानि। तदेतदुत्तरत्र विशदीक्रियते ॥

शून्यपदार्थ

तत्र विविधेषु सुगतमतसिद्धान्तेषु नि स्वभावानिर्वाच्यनैरात्म्याद्यपरपर्याय शून्यवाद एव काष्ठामुपगत इति माहायानिकानामभिप्राय । तत्र शून्यपदस्यार्थोऽपि तुच्छलक्षणाभाव एव न तु वस्तुभूत । श्रावकादियानवादिना सिद्धान्तेषु तु शून्यपदमपि स्वस्वाभिमतनिर्विशेषविज्ञानादिपरमेवेति तेते तथा तथा व्यवस्थापयान्ति । यथा च माहायानिका प्रतीत्यसमुत्पादवाद नित्यतत्त्ववाद धर्मात्मवाद पुद्गलात्मवादमेवमादीश्च स्वाभिमते नि स्वभाववादेऽन्तर्भावयन्ति तथा तत्र प्रमाणानि पुरस्तात्प्रपञ्चयिष्याम. । ततश्च सौगतसिद्धान्तोऽपि प्रवचनभेदेन इतरसिद्धान्तवत् विविधस्सवृत्त ॥

ततश्चाधुनातनानां बौद्धसिद्धान्तविमर्शकानामेकदेशदर्शिना "शून्यता भावलक्षणवस्तुरूपैव" इत्यादीनि वचांस्यपि सत्यान्येव । यस्माद्बौद्धसिद्धान्तप्रवर्तका विविधाभिप्रायवन्तस्समुपलभ्यन्ते ॥

तथा जैमिनि कणाद गौतम बादरायणादीना दर्शनानि तदीयभाष्यकाराणा शबर प्रशस्तपाद वात्स्यायनोपवर्षादीना शून्यवादानुवादवचास्यपि सत्यान्येव। यतो माहायानिकसिद्धान्तानुरोधेन शून्यवाद एव तै निराचिकीर्षित ॥

इम लोकपर्यायवृत्तान्तमजानाना केचन विमर्शका. स्वैः परिचितस्य प्रबन्धस्यार्थस्सर्वेषा बौद्धसिद्धान्तप्रबन्धकर्तृणामभिप्रेत इति व्यामुह्यन्त व्यामोहयन्तीतरानपीति वय विजानीम । तदेव तेषा भ्रान्तिकारणमपि पुरस्तात् सम्यक्प्रदर्शयिष्याम. ॥

अन्यथा पक्षप्रतिपक्षभावेनावस्थितयोः साङ्ख्यसौगतसिद्धान्तयोः सर्वभावसर्वाभाववादरूपयो वैलक्षण्यमेव न सिद्धयतीति कापिला एव प्रथम भ्रान्ता स्यु ॥

तथा "असदेवेदमग्र आसीत्" इत्यादिनाऽनूद्यमानस्यासल्लक्षणस्य नैरात्म्यदर्शनस्य प्रतिपक्षभूत अध्यात्मशास्त्रत्वेन प्रसिद्ध. "सदेव सोम्येदमग्र आसीत, आत्मा वा इदमेक एवाग्र आसीत्" इत्यादि सल्लक्षणात्मप्रतिपादक औपनिषदोऽपि वाद भ्रान्तप्रलपि तायेत ॥

एव शून्यवादस्य प्रवचनकर्तार· ये सस्कृतभाषामयप्रबन्धप्रणेतार नागार्जुन शान्तदेव प्रज्ञाकर प्रभृतय तै प्रणीता ये च माध्यमिककारिका बोधिचर्यावतार तत्पञ्जिकादय , येच विज्ञानवादस्य प्रवक्तार वसुबन्धु मैत्रेयनाथ शान्तरक्षित कमलशील प्रभृतय तै. प्रणीता प्रज्ञप्तिमात्रतासिद्धि अभिधर्मकोशाभिसमयालङ्कार तत्त्वसग्रह तत्पञ्जिकादय , ये च दिङ्नाग धर्मकीर्ति प्रभृतिभि वैभाषिकसिद्धान्तप्रवर्तकै· प्रोक्ता· वचनविशेषा , तथा ये पुनरिदानी समुपलभ्यमाना. शून्यवादस्य मूलभूताः अष्टसाहस्रिका प्रज्ञापारमिता लङ्कावतारसूत्रप्रमुखाः प्रबन्धा , बोधिचर्यावतारपञ्जिकायां प्रमाणत्वेन समुद्धता· प्राचीना प्राय. पञ्चाशत्सङ्ख्याका सूत्रप्रभृतयः प्रबन्धाश्च। त एते सर्वे शून्यताया भावस्वरूपत्वे साक्षादेव बाधका इति स्पष्टमेव विमर्शकविपश्चिताम् ॥

तस्मात्सस्कृतभाषामयशून्यवादप्रबन्धतात्पर्यमार्याणा विपश्चिदपश्चिमाना नावगतमिति साहसवचन एकदेशदर्शितावलसितमित्यवधेयम् ॥

तस्माच्छून्यतास्वरूप माहायानिकमतानुसारेण निरुपाधिकाभाव-पर्याय तुच्छलक्षणमित्येवावधार्यताम् ॥

अत एव बौद्धागमेष्वेव शून्यवादस्य प्रतिपक्षतया प्रसिद्धः माहायानिकैर्निराक्रियमाण आर्यसत्यवाद साश्लिष्यते । प्रपञ्चयिष्यते चेदमप्यग्रे ॥

अभावस्तार्किकसम्मत

अथैतादृशनिर्णयविवेकाय तत्तत्सिद्धान्तानुसारेण अभावादिप-दाना व्युत्पत्तिरेवादौ प्रदर्शनीयेति अभावविचार प्रारभ्यते—सर्वैरपि वादिभिः अभाव निस्वभाव तुच्छ स्वप्न माया गगन गन्धर्वनगर शशविषणादिपदानि पर्यायतया प्रयुज्यन्ते। तेषामर्थविषये चतुष्टयी गति ।

अभावो नाम—वस्तुप्रतियोगिक वस्त्वनुयोगिक वस्तुभूत कश्चित्पदार्थ इत्येक पक्ष तार्किकाणाम् ॥

वस्त्वनुयोगिक अवस्तुप्रतियोगिक अवस्तुभूतश्चेति द्वितीयः पक्ष निर्विशेषब्रह्मवादिनाम् ॥

अवस्त्वनुयोगिक. अवस्तुप्रतियोगिक अवस्तुभूत इति तृतीयः पक्ष शून्यवादिनाम् ॥

भावादन्योऽभावो नाम कश्चित्पदार्थ एव नास्तीति भावान्तराभाव-वाद तुरीय पक्ष साङ्ख्यानाम् ॥

अथैतेषामुपन्यास्यानम्—न्यायसूत्रभाष्ये प्रथमसूत्रे वात्स्या-यनेन—"किपुनस्तत्वम् । सतश्च सद्भाव असतश्च असद्भाव सत्स-दिति गृह्यमाण यथाभूतमविपरीत तत्त्व भवति । असच्चासदिति गृह्य-माण यथाभूतमविपरीत तत्त्व भवति" इति अभिहितमस्ति ॥

अत्रासत्पदार्थ सप्तम अभावाख्योऽभिमत· । अनूदितश्चायमर्थ छान्दोग्यशाङ्करभाष्ये=(६-२-१) "सदभावमात्र तत्त्व परिकल्पयन्ति बौद्धा । न तु सत्प्रतिद्वन्द्वि वस्त्वन्तरमिच्छन्ति । यथा—असच्चासदि तिगृह्यमाण यथाभूतमविपरीत वस्तु तत्त्व भवतीति नैयायिका " इति ॥

तथा (४-२-२६ ३१) न्यायदर्शन एव—"बुद्धया विवेचनात्तु भावना याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धि. । स्वप्नविषयाभिमानवदय प्रमाणप्रमेयाभिमान· । मायागन्धर्वनगरमृगतृष्णिकावद्वा" इत्यादीनि सूत्राणि शून्यवादानुवादरूपाणि ॥

समाधानसूत्राणि तु—"प्रमाणतश्चार्थप्रतिपत्ते. मिथ्योपलब्धिविनाश तत्त्वज्ञानात् स्वप्नविषयाभिमानप्रणाशवत्प्रतिबोधे" इत्यादीनि ॥

इदमत्र समाधानसूत्रभाष्यम्—"बुद्धया विवेचनात्तु भावाना याथात्म्योपलब्धि । यदस्ति यथा च । यन्नास्ति यथा च । तत्सर्व प्रमाणत उपलब्ध्या सिद्धयति । या च प्रमाणत उपलब्धिस्तद्बुद्धया विवेचनं भावानाम् । तेन सर्वशास्त्राणि सर्वकर्माणि सर्वे च शरीरिणा व्यवहारा व्याप्ता । परीक्षमाणो हि बुद्धयाऽध्यवस्यतीदमस्ति इद नास्तीति । तत्र न सर्वभावानुपपत्ति ॥ (४-२-२९)

उपादानवच्च (सालम्बनम्) मायादिषु मिथ्याज्ञान. प्रज्ञापनीयसरूप च द्रव्यमुपादाय साधनवान् परस्य मिथ्याध्यवसाय करोति, सा माया । नीहारप्रभृतीना नगरस्वरूपसन्निवेशे दूरान्नगरबुद्धिरुत्पद्यते, विपर्यये तदभावात् । सूर्यमरीचिषु भौमेनोष्मणा ससृष्टेषु स्पन्दमानेषूदकबुद्धिर्भवति सामान्यग्रहणात्, अन्तिकस्थस्य विपर्यये तदभावात् ।

क्वचित्कदाचित्कस्यचिच्च भावान्नानिमित्त मिथ्याज्ञानम् । दृष्ट च बुद्धिद्वैतं मायाप्रयोक्तु परस्य च दूरान्तिकस्थयो· गन्धर्वनगरमृगतृष्णिकासु। सुप्तप्रतिबुद्धयोश्च स्वप्नविषये। तदेतत्सर्वस्याभावे निरुपाख्यताया निरात्मकत्वे नोपपद्यत इति ॥ (४-२-३५)

तथाच ज्ञानद्वयमस्ति सम्यज्ज्ञान मिथ्याज्ञानमिति च । तत्र प्रथमेन द्वितीयस्य विनाश न त्वर्थापह्नव इति भाव ॥

अयमेवार्थ निरालम्बनवादरूपशून्यवादनिराकरणप्रकरणे शाबर भाष्यकुमारिलवार्तिकादिषु प्रपञ्चित । अत्र सर्वत्रोक्तो मुख्यो निरासहेतुरेष.—सुपरिनिश्चित अबाधित प्रत्यक्षप्रत्यय सर्वप्रमाणज्येष्ठ विरुद्धसर्वप्रमाणाना नावकाशप्रदो भवतीति ॥

तथाच निरुपाख्य निरात्मक अभावलक्षण तुच्छः शून्यतापदवाच्य परमार्थसत्य प्रपञ्चसत्यतावादिभि नाङ्गीकृतमिति सिद्धम् । सत्यतावादिमते सत्त्व नाम व्यवहारार्हत्वम्। असत्त्वन्तु विरोधिव्यवहारार्हत्वम्, तत्तन्निष्ठात्यन्ताभावप्रतियोगित्वमिति निष्कर्ष ॥

एतदेवानेन वाक्येन बोधिचर्यावतारपञ्जिकागतेन सौगतसिद्धान्ते स्पष्टीक्रियते—(३'१८) नच भावनिवृत्तिरूपोऽभाव , निवृत्ते निस्स्वभावत्वात्। यदि भावस्यैव कश्चित्स्वभाव स्यात्तदा तत्प्रतिषेधात्माऽभावोऽपि स्यात् । भावस्य स्वभावो नास्तीति प्रतिपादितमेव। अतो न भावनिवृत्तिरूपोऽभावो नाम कश्चिदस्ति ॥

नच भावाभावयोरुक्तक्रमेणासत्त्वे प्रतिपादिते तदुभयसङ्कीर्णात्मा सम्भवति उभयप्रतिषेधस्वभावता वा. भावविकल्पस्यैव सकलविकल्पनिबन्धनत्वात् तस्मिन्निराकृते सर्व एवामी एकप्रहारेण निरस्ता भवन्तीति । तस्मादुक्त च—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटि विनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥ इति ॥

अस्मिन् पद्ये असत्पद नैयायिकसम्मताभावपरम्, नतु स्वसमताभावपरम्। अन्यथा असदेव अभावरूप तत्त्वमिति सिद्धान्तविरोधप्रसङ्गः ॥

तथा—न्यायवार्तिकतात्पर्यटीकाया (३-२-१७) "अस्माभिर्भवदभिमतस्य तुच्छस्याभावस्यानङ्गीकारात्, अस्मदभिमतस्य भवद्भिरनङ्गीकारात्" इति विशदीकृतमस्ति ॥

तथा—शास्त्रदीपिकाया सम्बन्धाक्षेपपरिहारे "यद्धि प्रतीत बाध्यते मृगतोयादि तदसदेवेति लौकिकी प्रसिद्धि, नहि शशविषाणमृगतोयादीना च कश्चिद्विशेषो लोके" इत्युच्यते। ततश्च शशविषाषाणादिपदाना नैयायिकादिदृष्ट्या सत्प्रतिद्वन्द्विशशवृत्तिविषाणाभावादिपरत्वम्। बौद्धदृष्ट्या तु तुच्छलक्षाणभावपरत्वम्। ततश्च शून्यलक्षण तत्त्वन्तु तुच्छलक्षणाभावरूपमेवेति निष्कर्ष ॥

अभाव अद्वैतसम्मत

अनिर्वचनीयप्रपञ्चवादिना सिद्धान्ते तु व्यवहारदृष्टि परमार्थदृष्टिश्चेति दृष्टिद्वयमङ्गीक्रियते। अबाधिता व्यवहारदृष्टिरेव परमार्थदृष्टिरितीतरेषा सिद्धान्त। सैव व्यवहारदृष्टिरित्यनिर्वचनीयप्रपञ्चवादिसिद्धान्त। परमार्थदृष्टिस्तु प्रपञ्चप्रत्याख्यानमेव। तदेव प्रपञ्चस्यासत्त्वम्। तदुक्त शारीरकभाष्ये तदनन्यत्वमिति सूत्रे—"सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह। व्यवहाराभिप्रायेण तु स्यालोकवदिति महासमुद्रस्थानीयता ब्रह्मण· कथयति। अप्रत्याख्यायैव हि कार्यप्रपञ्च परिणामप्रक्रिया चाश्रयति उपासनेषूपयोक्ष्यत इति" ॥

तच्च प्रत्याख्यानं सौगत नैयायिक सिद्धान्तासङ्कीर्णमिति वक्तव्यम् । निरधिकरणकस्य अध्यासस्य निषेधस्य चानभ्युपगमात् सर्वाभावलक्षणेन परमार्थसत्येन शून्यवादसिद्धान्तेन न सङ्कीर्यते । नैयायिकसिद्धान्तरीत्या प्रपञ्चप्रत्याख्यानरूपमसत्त्वन्तु प्रपञ्चस्य प्रतियोगिन. असत्प्रतिद्वन्द्विन तत्त्वतापादक भवतीति न तदभिमतेनाप्यसत्त्वेन सङ्कीर्यात् । ततश्च प्रतिषेध निरुपाख्य अभाव इति व्यवह्रियमाणोऽपि निरुपाधिकत्ववैधुर्येण अनिर्वचनीयप्रपञ्चप्रतियोगिकत्वेन च विलक्षण· अनिर्वचनीय इति वाऽभ्युपगम्यते, नतु तत्त्वान्तरतयेति ॥

ततश्चासदभावादिपदानामतत्त्वभूताऽनिर्वचनीयप्रपञ्चप्रतिद्वन्द्वित्वेऽपि अतत्त्वलक्षण निरुपाख्य ब्रह्मसत्तातिरिक्तसत्ताशून्य व्यतिरेकेणा भाव इत्यादिभि पदै व्यवह्रियमाण उभयसिद्धान्तविलक्षणोऽर्थ इति निर्णय ॥

तदपिचाऽनिर्वचनीयत्व सदादिपक्षत्रयविलक्षणा तुरीयकोटिरित्येको मार्ग । तत्रापि न विश्रान्ति , अपि तु दुर्निरूपत्वमेवेत्यपरो मार्ग । तत्तत्त्वमुत्तरत्र स्पष्टीक्रियते । तथा च प्रपञ्चविषये साङ्ख्यसौगतमतविलक्षण सदसद्विलक्षणत्वमित्युक्त भवति । प्रपञ्चविनिवृत्त्यनन्तर सौगतवैलक्षण्यन्तु "ब्रह्मावसानोऽय प्रतिषेध नाभावावसान इत्यध्यवस्याम·" इति स्पष्ट भाषित सूत्रे ॥ (३–२–२२)

तथा तत्रैव "न तावदुभयनिषेध उपपद्यते शून्यवादप्रसङ्गात् । किंचिद्धि परमार्थमालम्ब्यापरमार्थ प्रतिषिध्यते । तच्च परिशिष्यमाणे कस्मिंश्चिद्भवति" इतिच । तथा महावैनाशिकसिद्धान्ते असदादिपदं सर्वाभावपरमित्यर्थोऽपि छान्दोग्यभाष्ये–(६-२-२) अवगम्यते ॥

तथा–(२-२-३१) शारीरकसूत्रे वाचस्पतिमिश्रेण माध्यमिकमतनिरासप्रकरणे एवमभिहितम्–"अपिचारोपित निषेधनीयम्। आरोपश्च तत्त्वाधिष्ठानो दृष्ट. । यथा शुक्तिकादिषु रजतादे । नचेदस्ति किञ्चित्तत्व कस्य कस्मिन्नारोप । तस्मान्निष्प्रपञ्च परमार्थसत् ब्रह्म अनिर्वाच्यप्रपञ्चात्मनाऽऽरोप्यते । तच्च तत्त्व व्यवस्थाप्य अत्तात्विकत्वेन सांव्यवहारिकत्व प्रमाणाना बाधकेनोपपाद्यते इति युक्तमुत्पश्याम" इति ॥

एव लेखनस्येद मूल तत्रत्य भाष्यम्–"न ह्यय सर्वप्रमाणसिद्ध लोकव्यवहार अन्यत्तत्वमनधिगम्य शक्यतेऽपह्नोतुम्, अपवादाभावे उत्सर्गप्रसिद्धे" इति ॥

एवमुदयनाचार्यविरचिते आत्मतत्त्वविवेके माध्यमिकमतनिरासोपसंहारे–"अस्तु तर्हि शून्यतैव परम निर्वाणमितिनेन्न" इत्याद्युक्तम् ॥

अयमत्रत्यस्सारार्थ –शून्यता नाम स्वतस्सिद्धा ? अन्यतस्सिद्धा ? असिद्धैव वा ? तृतीये कथ तदवशेषं विश्वम् ? द्वितीये यद्यन्यपदार्थ सवृतिस्तर्हि विश्वशून्यतयोर्न कश्चिद्विशेष । यदि सवृतिभिन्न ? तत्राप्येव त्रिविधविकल्पप्रसङ्ग इत्यनवस्था । प्रथमे–स्वतस्सिद्धतया तदनुभवरूपम्। शून्यत्वादेव न कालावच्छेद इति नित्यम् । अत एव न देशावच्छेद इति व्यापकम् । अत एव तस्य विशेषाभाव इत्यद्वैतम् । प्रपञ्चस्यापारमार्थिकत्वादेव निष्प्रतियोगिकमिति विधिरूपम् । अविचारितप्रपञ्चाक्षेपात्तु शून्यमिति व्यवहार । इति ॥

अथापि प्रपञ्चशून्यस्यानुभूतिमात्रस्य प्रपञ्चेन कस्सम्बन्ध इतिचेद्वस्तुत न कश्चित्। सवृत्या तु गगनगन्धर्वनगरयोराधाराधेयभाव इव विषयविषयिभाव । स च यथा नैयायिकैस्समर्थयिष्यते तथैव वेद्यनिष्ठ-

स्त्वसौ वेदान्तदर्शन इति विशेष । मायोपनीतोपाधिभेदाच्चानुभूतिरपि भिन्नेव व्यवहारपथमवतरति गगनमिव स्वप्नदृष्टघटकटाहकोटरकुटीकोटिभिस्तदास्तां तावदिति ॥

अनेन सन्दर्भेण शून्यपदस्य नैयायिकवासनया घटशून्य भूतलमिति व्यवहारवत्सकलविशेषशून्य वस्त्वित्यर्थोऽङ्गीकृत । तथाच शून्यता नाम कश्चिद्भावस्य धर्म इति तेषामभिप्राय इति विज्ञायते ॥

अत एवेमा वासनामुररीकृत्यानन्दतीर्थीये अनुव्याख्याने—"वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रे—

यच्छून्यवादिनश्शून्यं तदेव ब्रह्म मायिनः ।
न हि लक्षणभेदोऽस्ति निर्विशेषत्वतस्तयोः ॥

इति लिखितम् ॥

उदयनाचार्याभिप्रायेण तु—

यन्मायावादिनो ब्रह्म तच्छून्यं शून्यवादिनः ।
न हि स्वरूपभेदोस्ति स्वतस्सिद्धत्वतस्तयोः ॥

इति पठितव्य स्यात् ॥

वस्तुतस्तु—शून्य शून्यमेव । निर्विशेष निर्विशेषमेव । अस्ति ह्यनयोर्महीयान्विशेष सदसत्त्वलक्षण विधिनिषेधरूप ॥

सिद्ध वा असिद्ध वेति विकल्पस्य समाधान तु सिद्धत्वासिद्धत्वयोः प्रपञ्चरूपत्वेन तदतीते विकल्पस्यैव नावसर इति ॥

अभाव सौगतसम्मत

निरुपाधिकाभावलक्षणशून्यतासिद्धान्तस्तु लङ्कावतारे—(१५२)

न सन्नासन्न सदसद्यदा लोकं प्रपश्यति ।
तदा व्यावर्तते चित्त नैरात्म्यं चाधिगच्छति ॥

अस्तित्वपूर्वकं नास्ति अस्ति नास्तित्वपूर्वकम् ।
अतो नास्ति न गन्तव्यं अस्तित्वं न च कल्पयेत् ॥ लं. ११०॥

अनुत्पादश्च तथता भूतकोटिश्च शून्यता ।
रूपस्य नामान्येतानि अभावं न विकल्पयेत् ॥ लं ३४९ ॥

बोधिचर्यावतारपञ्जिकाया (४१६) एव पठ्यते—"भगवत्यां प्रज्ञापारमितायां विस्तरेणाध्यात्मशून्यतादयः अष्टादश शून्यताः प्रोक्ता । न च शून्यता भावाद्व्यतिरिक्ता, भावस्यैव तत्स्वभावत्वात् । अन्यथा शून्यताया भावाद्व्यतिरेके धर्माणां निस्स्वभावता न स्यात्, निस्स्वभावना तत्स्वभाव इति साधितम् । इदमपि प्रज्ञापारमितायामुक्तम्—एव प्रत्यवेक्षते न रूपशून्यतया रूप शून्य रूपमेव शून्य शून्यतैव रूपम् । न वेदनाशून्यतया वेदना शून्या वेदनैव शून्या शून्यतैव वेदना। एवं संस्कार एव सज्ञा एव विज्ञानमिति" ॥

तथा धर्मपदे विंशतिविधाश्शून्यता प्रतिपादिता ॥

लङ्कावतार(७४)सूत्रेत्वेव पठ्यते—"शून्यता शून्यतेति महामते परिकल्पितस्वभावपदमेतत् । परिकल्पितस्वभावाभिनिवेशेन पुनर्महामते शून्यताऽनुत्पादाभावाद्वयनिस्स्वभाववादिनो भवन्ति । तत्र सङ्क्षेपेण महामते सप्तविधा शून्यता—भावस्वभावशून्यता, अप्रचरितशून्यता, प्रचरितशून्यता, सर्वधर्मनिस्स्वभावशून्यता, परमार्थज्ञानमहाशून्यता, इतरेतरशून्यता" इति ॥

अयमत्र समुदायार्थ —सर्वधर्मशून्यता हि भावाभिनिवेशप्रहाणायोपादीयते । सापि शून्यता शून्यताभिमुखीकरणात्पश्चात्प्रहीयते । याऽपि च कथञ्चिद्भावकल्पना जायते, साऽपि समनन्तरविचारेण निवर्तते इति ॥ बो. च. ४१६ ॥

यदा न भावो नाभावः मतेस्संतिष्ठते पुरः ।
तदाऽन्यगत्यभावेन निरालम्बा प्रशाम्यति ॥ इति ॥ ४१७ ॥

एभिस्सन्दर्भैश्शून्यत्व नाम न भाव नाभाव. नधर्म न धर्मीत्येव सर्वविधनिषेधास्पद निस्स्वभाव तुच्छमित्यवधार्यते ॥

ततश्च शून्यमितिपदस्य इतरदार्शनिकैर्योऽर्थोऽभिधीयते स सौगतैर्नाङ्गीक्रियते । येऽपिच लौकिकाश्शब्दा तैस्सर्वैरप्यनभिधेय तत्तदर्थविलक्षणञ्च तत्त्वमिति कथयन्ति । सर्वनिषेधरूपत्वाच्छून्यमिति व्यवहरन्ति । तत्त्वत· विधिर्वा प्रतिषेधो वा नास्तीति वदन्ति ॥

एव यादृश परमार्थतत्त्वमद्वैतवाद्यभिमत तादृशमितरै कैश्चिदपि नाभ्युपगम्यते । एव सर्वेषु दर्शनेषूत्प्रेक्षितव्यम् । ततश्च तत्तत्सिद्धान्तिभिरुच्यमान तत्तादृश दूषण तादृशतादृशपदार्थाऽनभ्युपगम इत्येव परिशिष्यत्ते ॥

अभावस्साख्यसम्मत .

साङ्ख्यसिद्धान्तस्तु - शून्यवादस्य साक्षात्प्रतिपक्षभूत इति प्राक्सूचितम् । ततश्चासदादिपदानां परिणामविशेषलक्षणावस्थापन्नभावपरतैवाऽश्रीयते । प्रतिक्षणपरिणामिनस्सर्वे भावा. ऋते चितिशक्तेरिति तेषां मनीषा । अतएव सेश्वरसाङ्ख्ये पातञ्जलसूत्रे–(४-१३) व्यासदेवेनेत्थ भाषितम्––

गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथ प्राप्तं तन्मायेव सुतुच्छकम् ॥ इति ।

अयमत्राभिप्राय –मायातुच्छादिपदाना तिरोभावार्हतारूपावस्थापरत्वमेवेति ॥

अपिच–वैशेषिकादिसम्मत· सप्तमः पदार्थ अभावलक्षण तैर्नाभ्युपगम्यते एतस्मादेव शून्यवादावसरप्रसङ्गभयादिति शक्यंसमुत्प्रेक्षितुम्॥

तथा- सत्त्वपुरुषान्यताया अख्यातिरित्याश्रिता । ततश्च मिथ्या-ज्ञानलक्षणा भ्रान्तिरपि शून्यवादमूलभूता तैरपोद्यते । अतस्त एव प्रथमे अख्यातिवादिन इति निर्धार्यते । अतएव सर्वं ज्ञानं यथार्थमिति साङ्ख्यसिद्धान्त ॥

ब्रह्मपरिणामवादिनो भर्तृप्रपञ्च भर्तृमित्र भास्कर यादवादीना सिद्धान्तेषु तु अभावपदार्थ परिणामविशेषमापन्नो भाव एवेति साङ्ख्यसि-द्धान्तसिद्ध एव न्याय । अय प्राचीनो भावान्तराभाववाद । नवीन भावान्तराभाववादस्तु विवक्षाभेदेन घटत्वादिकमेव जातिरिति पटादिभेद इति चाख्यायत इति । सोऽपि वाद अतिरिक्तमभावपदार्थमपवदती-त्यन्यत्र विस्तरः ॥

विमर्शकावकाश

शून्यता वस्तुभूता नाभावभूतेति वादिनां निदानमिदम्—तत्त्व अनारोपित वस्त्विति सर्वे परिष्कुर्वन्ति । शून्य तत्त्व परमार्थ सत्य नित्य शाश्वत धर्म इत्यादिभि पदै सौगताना व्यवहार प्रथमो हेतु ।

तथा माध्यमिकवृत्तौ—

प्रपञ्चविनिवृत्येकस्वभावा या च शून्यता ।
तस्यां तु शून्यतादृष्टि रमलाया न युज्यते ॥

प्रपञ्चोपशमायैव शून्यता सोपदिश्यते ।
तस्मात्प्रपञ्चोपशम· शून्यतायां प्रयोजनम् ॥

शून्यत्वं नास्तितारूपं भवांस्तु परिकल्पयन् ।
प्रपञ्च वर्धयन्नव नच वेत्ति प्रयोजनम् ॥ (१९० पु)

इत्यादि श्रूयते । अत्र शून्यतादृष्टि नास्तितापरिकल्पना न कर्तव्येति स्पष्टमभिधानाद्वस्तुरूपैव शून्यतेति स्यादिति द्वितीयो हेतुरिति ॥

तदेतदयुक्तम्—अत्र दृष्टिरेव प्रतिषेध्या न शून्यता । सा च दृष्टिरभिनिवेशलक्षणा । सर्वाभिनिवेशप्रशमार्थोपदिष्टायां शून्यतायामपि यद्यभिनिवेश तदा देशना निष्प्रयोजना स्यात् । तस्माच्छून्यताविषयकाभिनिवेशो न कर्तव्य इत्युपदिश्यते ॥

तदिदमुच्यते बोधिचर्यावतारपञ्जिकायाम्—

मुक्तिस्तु शून्यतादृष्टेस्तदर्थांशेषभावना ।
इति तस्माच्छून्यतैव बोधिमार्ग इति स्थितम् ॥ इति ॥

शून्यतादृष्टे शून्यतादर्शनादित्यर्थ ॥ (४३८)

तथा—

सर्वसङ्कल्पहानाय शून्यताऽमृतदेशना ।
यश्च तस्यामपि ग्राहस्त्वयाऽसावपि सादितः ॥ इति । ३५९ ॥

बुद्ध भगवन्त प्रति वचनमिदम् । चरमोऽपि ग्राह त्वयैव विनाशनीय इति भाव ॥

अपि च—

शून्यता सर्वदृष्टीनां प्रोक्ता निस्सरण जिनै. ।
येषा तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ॥ ४१४ ॥

इत्याशङ्क्य—

शून्यतावासनाधानात् हीयते भाववासना ।
किञ्चिन्नास्तीति चाभ्यासात् साऽपि पश्चात्प्रहीयते ॥

इति च समाहितम् ॥

अयमर्थ अत्रैवावधेय—"एव निस्स्वभावतैव सर्वपदार्थानां निज पारमार्थिक रूपमवतिष्ठते । तदेव प्रधानपुरुषार्थरूप परम प्रयोजनम् । अत्रापि नाभिनिवेष्टव्यम् । अन्यथा भावाभिनिवेशो वा

शून्यताभिनिवेशो वा न कश्चिद्विशेष , उभयोरपि कल्पनात्मकत्वात्सांवृतमेवेति ॥ (३५८)

यथा—मानलक्षणशत्रुविजयायोपादीयमानोऽपि मानः, क्रोधलक्षणशत्रुविजयायोपादीयमानोऽपि क्रोध न मानः नापि क्रोधः, तथा सर्वाभिनिवेशविनाशायोपादीयमानोऽप्यभिनिवेश नाभिनिवेश इति भावोऽवगन्तव्य ॥ (२७५)

"तस्माच्छून्यताया इद फलम्—यत्करुणया संसारेऽवतिष्ठमानोऽपि शून्यतादर्शनात्ससारदोषैर्न लिप्यते। इदमप्रतिष्ठितनिर्वाणतारूपमपि शून्यताया फलम्" इतिचोक्तम् ॥ (४४६)

बोधिप्राप्त्यनन्तर तु तथागतत्वं फलम् । तथागतपद यथा आगत तथा गत शून्यभूत इत्यर्थमभिधत्ते । लङ्कावतारे (१८९) स्फुटमिदम् ॥

बौद्धसम्प्रदाय

सौगतसम्प्रदायस्त्वेवमुपलभ्यते लङ्कावतारे (१४४) यथा—"अत एतस्मात्कारणान्महामते मयेदमुक्तम्—याश्च रात्रिं तथागतोऽभिसम्बुद्ध या च रात्रिं परिनिर्वास्यति अत्रान्तरे एकमप्यक्षर तथागतेन नोदाहृतम्, नोदाहरिष्यति । तत्रेदमुच्यते—

यस्यां रात्र्यामधिगमः यस्यां च परिनिर्वृतिः ।
एतस्मिन्नन्तरे नास्ति मया किञ्चित्प्रकाशिम्॥" इति। लं ३२४

बोधिचर्यावतारेऽप्येवमुच्यते "तदुक्तम्—यस्यां रात्रौ तथागतोऽभिसबुद्धो बभूव, यस्या च परिनिर्वृत । अत्रान्तरे तथागतेन एकमप्यक्षर नोदाहृतम् । तत्कस्य हेतोः? नित्य समाहितो भगवान्

ये च अक्षरस्वररुतवैनेयाः सत्त्वा ते तथागतमुखात् ऊर्णाकोशात् उष्णीषात् ध्वनि निश्चरन्त शृण्वन्ति । उक्त च—

तस्मिन् ध्यानसमापन्ने चिन्तारत्नवदास्थिते ।
निस्सरन्ति यथाकामं कुड्यादिभ्योऽपि देशनाः ॥
ताभिर्विज्ञापितानर्थान्सर्वान् जानन्ति मानवाः ।
हितानि च यथा भव्यं क्षिप्रमासादयन्ति ते ॥ इति ॥

चतुस्तवेऽप्युक्तम्—(नागार्जुन)

नोदाहृतं त्वया किञ्चिदेकमप्यक्षरं विभो ।
कृत्स्नश्च वैनेयजन. धर्मवर्षेण वर्षितः ॥ ४२० ॥

माध्यमिकवृत्तावपि—

सर्वोपलम्भोपशम. प्रपञ्चोपशमश्शिव. ।
न क्वचित्कस्यचित्कश्चित् धर्मो बुद्धेन देशितः ॥ १८४ ॥ इति ॥

लङ्कावतारे एवमप्युक्तम्—"क्वचिन्महामते बुद्धक्षेत्रे अनिमिषप्रेक्षया धर्मो देश्यते । क्वचिदिङ्गितै क्वचिद्भ्रूविक्षेपेण क्वचिन्नेत्रसञ्चारेण क्वचिदास्येन क्वचिद्विजृम्भितेन क्वचिदुत्कासनशब्देन क्वचित् क्षेत्रस्मृत्या क्वचित् स्पन्दितेनेति"। अत्रोपाख्यानानि बहूनि वर्णितानि ॥ १०५ ॥

अतएवात्रान्योन्य विवादो हीनयानमहायानयो. । तथाहि—(बोधि ४२५) "तत्र वैभाषिकादय सर्वधर्मशून्यताया· सर्वावरणविभ्रमदु खप्रहाणमसहमाना चतुरार्यसत्यदर्शनभावना च तदुपायमिच्छन्त प्राहु —

सत्यदर्शनतो मुक्तिः शून्यतादर्शनेन किम् ।
न विनाऽनेन मार्गेण बोधिरित्यागमो यतः ॥ इति ॥

आर्यसत्यचतुष्टयन्तु दु.खसमुदयमार्गनिरोधलक्षणम् । किञ्च(४३०)—

नन्वसिद्ध महायानं कथं सिद्धस्त्वदागमः ।
यस्मादुभयसिद्धोऽसौ न सिद्धोऽसौ तवादितः ॥

अयमर्थः—हीनयानवादिनः महायानाप्रामाण्य प्रथमेन पादेनापादयन्ति । तेऽपि महायानवादिनः तथैव हीनयानाप्रामाण्य द्वितीयेनापादयन्ति—कथ सिद्ध इति । केन प्रकारेण त्वदीयागमः भगवद्वचनमिति सिद्ध. । उभयवादिसिद्धत्वात्प्रमाणं हीनयानमिति पूर्वपक्षिण· प्राहु.—यस्मादिति । ततस्सिद्धान्तिनोऽपीत्थमाहुः—न सिद्ध इति । त्वदागमोऽप्यभ्युपगमात्प्रागसिद्ध एव । भवतामपि तत्प्रामाण्यमसिद्धमित्युभयवादिसिद्धत्वमसिद्धमिति भावः ॥

इदन्तर्हि साधनमस्तु गुरुपरम्परयाऽऽम्नायायात बुद्धवचनत्वेन यच्च सूत्रेऽवतरति विनये संदृश्यते धर्मता च न विलोपयति तद्बुद्धवचनम्, नान्यत् । तत्राह—

यत्प्रत्यया च तत्रास्था महायानेऽपि तां कुरु ।
अन्योभयेष्टसत्यत्वे वेदादेरपि सत्यता ॥

अन्योभयेति । आवयोर्विवादारूढत्वात् आवाभ्यामन्ये ये केचित् उभयविधदार्शनिकाः तैस्सम्मतत्वेन सत्यत्वं स्यादिति पूर्वपक्ष्याशङ्का । तत्रोत्तरं वेदादेरिति । वेदवैशेषिकादेरपि सत्यता स्यादिति ॥

अपि च—चतुर्निकायमष्टादशभेदभिन्न भगवतश्शासनम् । तत्रैकस्यैव निकायस्यानेकभेदसम्भवात स्वयूथ्यानामप्यन्योन्यं विवाद । (४३४) तथा अस्ति ह्येकभेदावस्थितानामपि सौत्रान्तिकादीनामप्यन्योन्य विवाद इति ॥

अपि च (४३५)—

शासनं भिक्षुतामूलं भिक्षुतैव च दुःस्थिता ।

इत्यप्युक्तम् । अयमर्थ·—पञ्चविधो भिक्षु· सज्ञाभिक्षु , प्रतिज्ञाभिक्षु , भिक्षणशीलो भिक्षुः, ज्ञप्तिचतुर्थकर्मणा उपसम्पन्नः भिक्षुः, भिन्नक्लेशो

भिक्षु इति। भिन्नक्लेश निवृत्तससार। दुःस्थिता शून्यतादर्शनमन्तरेणासमञ्जसा। केवलसत्यदर्शनतो न युज्यत इत्यर्थः। अत्र भिन्नक्लेश एव बोधिसत्त्व। परसमये य जीवन्मुक्त इत्युच्यते। स एव दयामयहृदय बोधिचर्यानिष्ठ। (८७) बोधिः बुद्धत्व सर्वावरणप्रहाणात् सर्वधर्मनि स्वभावताधिगम॥

न ह्यविस्मृतसम्प्रदायानामन्योन्य विवादो युक्तः। न च सर्वज्ञवचनेषु परस्पराहतिरस्ति। न च सूत्राभिधर्मविनयाना परस्परमेकवाक्यता सम्भवतीति॥

अयमत्र सिद्धान्तसार (४३१) अध्याशयसचोदनसूत्रेपि—अपि तु मैत्रेय चतुर्भि कारणै प्रतिभान सर्व बुद्धभाषित वेदितव्यम्। कतमैश्चतुर्भि—इह मैत्रेय प्रतिभानमर्थोपसहित भवति नाऽनर्थोपसहितम्। धर्मोपसहित भवति नाधर्मोपसहितम्। क्लेशप्रहायक भवति न क्लेशविवर्धकम्। निर्वाणगुणानुशससन्दर्शक भवति न ससारगुणानुशससन्दर्शकमिति॥

एतैश्चतुर्भि यस्य कस्य चिन्मैत्रेय! प्रतिभाति प्रतिभास्यति वा तत्र श्राद्धै कुलपुत्रै कुलदुहितृभिर्वा बुद्धसज्ञा उत्पादयितव्या। शास्त्रसज्ञां कृत्वा स धर्म श्रोतव्यः। तत्कस्य हेतोः? यत्किञ्चिन्मैत्रेय सुभाषित सर्व तद्बुद्धभाषितम्। तत्र मैत्रेय य इमानि प्रतिभानानि प्रतिक्षिपेत्, नैतानि बुद्धभाषितानीति तेषु चागौरवमुत्पादयेत्। पुद्गल (शास्त्र) विद्वेषेण तेन सर्व बुद्धभाषितं प्रतिभान प्रतिक्षिप्त भवति। धर्म प्रतिक्षिप्य धर्मव्यसनसवर्तनीयेन कर्मणाऽपायगामी भवति तत्र धर्मताया अविलोपनमेव सम्यग्लक्षणम्॥

उक्तञ्च—

यदर्थवद्धर्मपदोपसंहितं
त्रिधातुसंक्लेशनिवारणं वचः।
भवेच्च यच्छान्त्यनुशंसदर्शक
तदुक्तमार्षं विपरीतमन्यथा ॥ इति॥

ततश्च सूत्रविनयाभिधर्मभेदेन त्रिप्रस्थान बौद्धशास्त्र महात्मभि. प्रणीत बुद्धानुग्रहमूल बुद्धवचनाऽभिमत सर्व प्रमाणमित्युक्त भवति ॥

लङ्कावतारे—

यावत्प्रतिज्ञा क्रियते तावत्सर्व ससङ्करम्।
स्वचित्तमात्र संपश्येन्न विवाद समारभेत् ॥ २१९ ॥

तथा—

सूत्रविनयाभिधर्मेण विशुद्धि कल्पयन्ति ये।
ग्रन्थतो न तु चार्थेन न ते नैरात्म्यमाश्रिताः ॥ इति २९० ॥

अत्र वैदिका अप्यागमविषये पाञ्चरात्राद्यागमसहितासु सर्वासु भगवद्वचनत्वेन प्रतिपन्नासु एतादृशमेवाभिप्राय सूचयन्ति। यथा—पाञ्चरात्ररक्षायां श्रीमान्वेदान्ताचार्य निरूपयति—"कात्स्न्येन भगवच्छास्त्रस्य प्रामाण्य प्रागेव प्रतिपादितम्। न चात्र भगवद्व्यतिरिक्तब्रह्मादिपुरुषकृताशेषु कारणदोषस्सम्भवति। 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्' इति स्ववक्तृके शास्त्रे भगवतैव तेषामृषीणा तत्तत्पुण्यविशेषानुसारेण नित्येऽपि वेदे सूत्रकाण्डमन्त्रकृत्ववत् सहिताकर्तृत्वम्याधिकारतया समर्पितत्वात्। यथा च व्यासोक्ते महाभारते वैशम्पायनसहिताभेद.। एवमत्रापीति न सङ्कटं किञ्चित्" इति ॥

अत्र सौगतागमविषये कौमारिल श्लोकवार्तिक न्यायरत्नाकरश्च—

(८७) इतश्च तदागमस्याप्रामाण्यमित्याह—

रागादिरहिते चास्मिन् निर्व्यापारे व्यवस्थिते ।
देशनाऽन्यप्रणीतैव स्याद्दते प्रत्यवेक्षणात ॥
सान्निध्यमात्रतस्तस्य पुंसश्चिन्तामणेरिव ।
निस्सरन्ति यथाकाम कुड्यादिभ्योऽपि देशनाः ॥
एवमाद्युच्यमानन्तु श्रद्दधानस्य शोभते ।
कुड्यादिनिस्सृतत्वाच्च नाश्वासो देशनासु न ॥
किन्तु बुद्धप्रणीतास्स्यु किमु कैश्चिद्दृगात्मभिः ।
अदृश्यैर्विप्रलम्भार्थं पिशाचादिभिरीरिता ॥ इति ॥

लाभपूजाख्यातिरागनिमित्त हि आगमप्रणयन स्वयूथ्यस्पर्धानिमित्त वा प्रक्षीणरागादिदोषस्य बुद्धस्य न सम्भवति । निर्व्यापारश्चाय नासावर्थ-प्रतिपादनाय शब्द समुच्चारयितु शक्नोति । कथम् ? प्रत्यवेक्षणपर्यायस्य विकल्पस्यासम्भवात् । अस्येद साधन अनेन च शब्देन इद प्रतिपादयितु शक्यमिति यावन्न विकल्प्यते न तावद्वाक्यप्रणयन सम्भवति । नचाय विकल्पो निर्विकल्पकेन प्रत्यक्षेणाखिल जगदध्यक्षयतो बुद्धस्यास्ति । तस्मादन्येन केन चित्प्रणीतो देशनाधर्मोपदेश इत्यप्रामाण्यमिति । तस्मि-न्निर्व्यापारेऽपि तत्सन्निधिमात्रेणैव कुड्यादिभ्योपि देशना निस्सरन्तीति चेत् श्रद्दधानस्योच्यमान शोभते नास्माकमित्याह—सान्निध्येति सार्धेन । श्रद्दधान प्रत्युच्यमानमित्यर्थ । कुड्यादिनिस्सृतासु च बुद्धप्रभावकृतत्व न निर्णेतु शक्यम् । अन्यथापि सम्भवादित्याह—कुड्यादीति सार्धेन । ततश्च न प्रामाण्याध्यवसाय सम्भवतीति ॥

स्वप्रकाशविचार

ये तु स्वयूथ्या चित्तमेव वस्तुसत् स्वप्नादिषु तथा प्रतिभासते इति मन्यन्ते । तेऽपि यथावसरमग्रे स्वसंवेदननिराकराणान्निराकरिष्यन्ते इत्युक्तम् । (बो. ३७१) तद्यथा—इयमत्र योगाचाराणामाशङ्का—

(३९० पु बो) यदा सर्व जगन्मायात्मकतया स्वभावशून्यमुपगत मध्यमकवादिभि मायास्वभावसवृतिग्राहिणी बुद्धिरपि भवता नास्ति बाह्यवत्, तदा माया केनोपलभ्यते ग्राहकवस्त्वभावात् । यस्य पुन चित्तमेव परमार्थसत् बाह्यरूपतया भ्रान्त तथा प्रतीयते न तस्याय दोष इति ॥

अत्रोच्यते—स्वभावशून्यमेव सर्व जगत् यदा युक्तित· प्रतिपादित तदा क कस्य स्वभाव वस्तुत इति कस्य केन वेदन स्यात्। उक्त च भगवता—"सर्वे धर्मा शून्या शून्यतालक्षण चित्तम् । सर्वे धर्मा विविक्ता· विविक्ततालक्षण चित्तम्" इति । "चित्त चित्त न पश्यति" इति च ॥

न च्छिनत्ति यथाऽऽत्मानमसिधारा तथा मनः ।
अङ्गुल्यग्रं यथाऽऽत्मानं नात्मना स्प्रष्टुमर्हति ॥

इति ॥

पुनश्शङ्का समाधान च—

आत्मभावं यथा दीपः सप्रकाशयतीति चेत् ।
नैव प्रकाश्यते दीप· यस्मान्न तमसा वृतः ॥

विद्यमानस्य वस्तुन यदावरण तस्यापनयन प्रकाशनम् । नैत दीपेऽस्तीति ॥

पुनश्शङ्का—

न हि स्फटिकवन्नील नीलत्वेऽन्यमपेक्षते ।
तथा किञ्चित्परापेक्षं अनपेक्षं च दृश्यते ॥ इति ॥

समाधानम्—

अनीलत्वेन तन्नीलं कुर्यादात्मानमात्मना ॥

अय भाव.—नीलस्यापि नीलत्वे सापेक्षतैव नीलभाव प्रति स्वहेतुप्रत्ययापेक्षत्वात् । अन्यथा तत् अनीलमेव स्वहेतोरुत्पद्येत । पुनस्तद्भावे

परनिरपेक्ष स्वयमेव नीलमात्मान कुर्यात्। न चैतदस्ति, स्वात्मनि क्रिया-विरोधात्। इति ॥

यदुच्यते (३९६)—

विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते।
इयमेवात्मसंवित्तिः अस्य या जडभिन्नता ॥

अत्रोच्यते—

क्रियाकारकभेदेन न स्वसंवित्तिरस्य तु।
एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः ॥ इति ॥

अय भाव –क्रियाकारकभेदेन व्यवहारप्रसिद्ध शब्दार्थमधिगम्य दूषणमुक्त. स्वसवेदनशब्दस्य तदर्थाभिधायित्वात्। यदि पुनर्दोषभयात् लोकप्रसिद्धः शब्दार्थ परित्यज्यते तदा लोकत एव बाधेति ॥

वस्तुतस्तु—हेतुप्रत्ययोपजनितस्य प्रतिबिम्बस्येव नि.स्वभावत्वात् तत्त्वतो निजस्वभावाभावात् गगनोत्पलकल्पम्यात्मसवेदन नोचित शून्यवादिनाम्। वस्तुवादिना तु सवेदन क्रियेति कारकभेदोऽवर्जनीय इति दूषण दुरुद्धरम् ॥

किञ्च (३९७)—

दीप. प्रकाशत इति ज्ञात्वा ज्ञानेन कथ्यते।
बुद्धिः प्रकाशत इति ज्ञात्वेदं केन कथ्यते ॥
प्रकाशा वाऽप्रकाशा वा यदा दृष्टा न केनचित्।
वन्ध्यादुहितृलीलेव कथ्यमानाऽपि सा मुधा ॥

तेन ज्ञानसवेदनाभावे अर्थानधिगमादयो दोषा नि स्वभाववादिनो नावतरन्वि। लोकव्यवहारस्तु सांवृतसर्वाभ्युपगमनिबन्धनस्समुपपद्यत एवेति ॥

अनक्षर धर्म

बुद्धस्य मौनममौन वाऽस्तु । विकल्पाविषयतया परमार्थभूताया-श्शून्यताया देशयितुमशक्यत्वात् । शून्यतालक्षण तत्त्वमशेषसावृतव्यव-हाररहितस्वभाव परमार्थसत्य कथ शक्यते समुपदेष्टुमित्यत्राह—

अनक्षरस्य धर्मस्य श्रुतिः का देशना च का ।
श्रूयते देश्यते चार्थ समारोपादनक्षरः ॥ वो ३६५ ॥

अत व्यवहारसत्य एव स्थित्वा परमार्थो देश्यते । परमार्थदेशनावग-माच्च परमार्थाधिगमो भवति । तस्मात्तदुपायत्वात् । तदुक्त शास्त्रे—

व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाण नाधिगम्यते ॥
उपायभूत व्यवहारसत्यम् ।
उपेयभूत परमार्थसत्यम् ॥ इति ३७२ ॥

उपदेशप्रकारस्तु दृष्टान्तद्वारेण सवृतिमुपादाय वक्तव्य । यदाह-शास्त्रवित्—

विकल्पित यत्तिमिरप्रभावात्
केशादिरूप वितथ तदेव ।
येनात्मना पश्यति शुद्धदृष्टिः
तत्तत्त्वमित्येवमिहाप्यवेहि ॥ इति ॥ ३६५ ॥

अयमर्थ —(३६३) यद्यपि सर्वप्रपञ्चविनिर्मुक्तस्वभाव परमार्थ-सत्यम् । अतस्सर्वोपाधिशून्यत्वात्कथ कयाचित् कल्पनया पश्येत् कल्प-नासमतिक्रान्तस्वरूपञ्च शब्दानामविषय. । विकल्पजन्मानो हि शब्दा विकल्पधियामविषये न प्रवर्तितुमुत्सहन्ते । तथापि भाजनश्रोतृजनानुग्रहार्थ सवृत्या निदर्शनोपदेश किंचिदभिधीयते ॥

यथा—तिमिरप्रभावात्तैमिरिक सर्वमाकाशदेश केशोण्डुकमण्डित-मितस्ततो मुख्य विक्षिपन्नपि पश्यति। तथा कुर्वन्तमवेत्याऽतैमिरिक किमय करोतीति तत्समीपमुपगम्य तदुपलब्धकेशप्रणिहितलोचनोऽपि न केशाकृतिमुपलभते, नापि तत्केशाधिकरणान् भावाभावादिविशेषान् परिकल्पयति ॥

यदा पुनरसौ तैमिरिकोऽतैमिरिकाय स्वाभिप्राय प्रकाशयति केशानिह पश्यामीति तदा तद्विकल्पापसरणाय तस्मै यथाभूतमसौ ब्रवीति नात्र केशास्सन्तीति तैमिरिकोपलब्धानुसारेण प्रतिषेधपरमेव वचनमाह। न च तेन तथा प्रतिपादयताऽपि कस्यचित्प्रतिषेध कृतो भवति, विधान वा। तच्च केशाना तत्व यत्तैमिरिक पश्यति तन्नातैमिरिक ॥

एवमविद्यातिमिरोपघातात् अतत्त्वदृशो बाला यदेतत् स्कन्ध धात्वायतनादिस्वरूपमुपलभन्ते तदेतेषा सावृत रूपम्। तानि स्कन्धादीन्येव स्वभावेन निरस्तसमस्ताविद्यावासना बुद्धा भगवन्त पश्यन्त्यतैमिरिकोपलब्धकेशदर्शनन्यायेन ॥ इति ॥

इदमत्रावधेयम् - बुद्ध "नैकमप्यक्षर प्रोवाच" इत्ययमतिवादस्स्यात्, यत तच्छिष्यप्रशिष्यप्रणीतानां प्रबन्धानां विविधाना बुद्धानुग्रहमूलताप्रकाशनेन बुद्धवचनतासम्पादनमेव हेतुदर्शन स्पष्ट प्रतीयते। वस्तुतस्तु—बुद्धाभिप्रायो वा तदीयानां महतामभिप्रायो वा न खलु केवलं वक्तृवैलक्षण्यमात्रेण परिग्रहमर्हति। किं तु विषयवैलक्षण्येनेति सुप्रसिद्ध विदुषाम्। तदुक्त न्यायपरिशुद्धौ—

यथालोक यथावेद लौकिके वैदिकेऽपिवा।
यो वक्ता स परिग्राह्य प्राक्तनोऽद्यतनोऽपिवा ॥
कणान्या भक्षयेत्काम माहिषाणि दधीनि वा।
युक्तियुक्तन्तु गृह्णीमः न तु तद्वाक्यगौरवात् ॥ इति ॥

तथा संविदसिद्धौ—

हन्त ब्रह्मोपदेशोऽयं श्रद्दधानेषु शोभते ।
वयमश्रद्दधानास्सो ये युक्तिं प्रार्थयामहे ॥ इति च ॥

तस्माद्बुद्धः प्रथम सर्वं क्षणिक दुःख स्वलक्षण शून्यमिति सामान्यतः कैश्चित्सूत्रै समुपदिदेशेति सम्भावयाम, यथोपनिषत्सु—"अथात आदेशो नेतिनेति" इति। अत एव कानिचित्सूत्राणि "इद प्रत्ययफलम्, उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्यसमुत्पादानुलोमता" इत्यादीनि बुद्धसूत्रत्वेन प्रसिद्धानि सर्वदर्शनसंग्रहे । अनूदितानि चेतरै कुमारिलादिभिस्तन्त्रवार्तिकादौ । ततश्च तच्छिष्या स्वस्वासनामधिकारलक्षणामनुरुध्य परिग्रहपरिष्कारादिकमकुर्वन् ॥

एव समुपदिष्ट शून्यत्वमेव केचिद्गगनकुसुमतुल्य निस्स्वभावत्वम्, अन्ये दुर्निरूपत्वम्, इतरे नेरात्म्यम्, अपरे विज्ञप्तिमात्रम्, परे प्रतीत्यसमुत्पादमात्रम्, इत्येवप्रकारेण निरवोचन्। अत एव शून्यतत्त्वविषये अधुनातनानां विचित्रम्याभिप्रायम्यावकाश। सर्वानपि प्रबन्धान् प्राय सम्यक्समवधानेन परिशीलयता विपश्चितामिदमतिरोहितम् । निस्स्वभावतालक्षणशून्यवादिनस्तु सर्वानपि परिष्कारान् स्वसिद्धान्त एवान्तर्भावयन्ति, प्रक्रियाभेदमात्रमित्यभिप्रयन्ति ॥

एव बुद्धस्य साक्षादेवोपदेष्टृत्वं सर्वदर्शनसङ्ग्रहकर्ताऽपीत्थमनुवदति—"यद्यपि भगवान् बुद्ध एक एव बोधयिता, तथापि बौद्धाना बुद्धिभेदाच्चातुर्विध्यम्। यथा गतोऽस्तमर्क इत्युक्ते जारचौरानूचानादय स्वेष्टानुसारेणाभिसरणहरणसदाचरणादिसमय बुध्यन्ते । तथात्रैव भिक्षुपादप्रसरणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्थायित्वानुकूलवेदनीय-

त्वानुगतत्वसर्वसत्यत्वभ्रमव्यावर्तनेन सर्वशून्यतायामेव पर्यवसानम्" इति ॥

बुद्धस्य सर्वदा समाधिस्थित्या मौनकल्पनमपि शून्यताया एव स्थिरीकरणार्थोऽतिवादो माहायानिकानामित्यपि सम्भावयाम । मौनेनैव तत्त्वोपदेशनमपि अवचनेनैव प्रवचनपर्यायमुपनिषत्स्वपि दृश्यते ॥

यथा बाष्कलिबाध्वसवादे—"स होवाचाधीहि भो इति । स तूष्णी बभूव । त ह द्वितीये तृतीये वा वचन उवाच । ब्रूम खलु त्व न विजानासि । उपशान्तोऽयमात्मा" इति । अयमर्थ -- स बाष्कलि बाध्व प्रार्थयामासाधीहीति । द्वितीये तृतीये वा प्रश्ने इत्यर्थ । उपशान्त इति । निरस्तसमस्तविशेष इत्यर्थ । तस्मादवचनेनैव प्रोवाचेत्यर्थः । "यतो वाचो निवर्तन्ते" इत्यपि श्रूयते ॥ (श. सू. भा. ३-२-१७)

तथा विद्वद्भिरप्यनुसन्धीयते—

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौन व्याख्यानं शिष्यास्तु छिन्नसंशया. ॥

इति । स्तोत्रमप्येव पठ्यते दशश्लोक्यन्ते—

न चैकं तदन्यद्द्वितीयं कुतस्स्यात्
न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्ततत्त्वं ब्रवीमि ॥ इति ॥

शून्यतोपदेश

बुद्धया विवेच्यमानानां स्वभावो नाऽवधार्यते ।
तस्मादनभिलप्यास्ते निस्स्वभावेन देशिताः ॥

इति लङ्कावतारे (११६) निस्स्वभावलक्षणशून्यता समुपदिष्टा ॥

इदं वस्तु बलायातं यद्वदन्ति विपश्चित.।
यथायथाऽर्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा ॥ इति ॥ सर्व॥

विविच्यन्ते न क्वचिदपि पक्षे व्यवतिष्ठन्ते इत्यर्थः । इय सर्वात्मना दुर्निरूपत्वलक्षणा शून्यता । भामत्यादिषु सर्वेष्वपि प्रबन्धेषु माध्यमिक-मतनिरासावसरे समुदाहृतमिद वचनम् ॥

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्व माध्यमिका विदु. ॥ इति बो. ३५८॥

इदं सत्त्वासत्त्वादिकोटिचतुष्टयविलक्षण शून्यत्वम् । अत्रासत्पदार्थः शून्यवादिसम्मत तुच्छलक्षणो नाऽभाव । अपि तु नैयायिकादिसम्मत प्रागभावादिविभागविमक्त सप्तम पदार्थ । अन्यथा असत्त्वस्यापि प्रतिक्षेपादसद्वादविरोधप्रसङ्ग । निरूपितमिद प्रागेव ॥

एव शून्यताया बहुभि प्रकारै निरूपणस्य निदानमिद स्यादित्युल्लिखाम —प्रपञ्चोऽय बहुभि प्रकारैस्तैस्तैर्वादिभिर्निरूपितोऽस्ति तत्र सर्वेणापि प्रकारेण शून्यतायामेव पर्यवसानमिति निरूपणाय शून्य-ताप्रकारभेदावकाश इति ॥

माध्यमिकवृत्तौ—

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थ एतत्तत्त्वस्य लक्षणम् ॥
अनिरोधमनुत्पादमनुच्छेदमशाश्वतम् ।
अनेकार्थमनानार्थमनागममनिर्गमम् ॥
यः प्रतीत्यसमुत्पादः प्रपञ्चोपशमाशिव. ।
देशयामास सम्बुद्धः तं वन्दे वदतां वरम् ॥ इति ॥

लङ्कावतारे—

तथता शून्यता कोटी निर्वाणं धर्मधातुकम् ।
अनुत्पादश्च धर्माणां स्वभावः पारमार्थिकः ॥

अथ वैचित्र्यसस्थान विकल्पो यदि जायते ।
आकाशे शशशृङ्गे च अर्थाभासं भविष्यति ॥ ३३६ ॥

स्वप्न केशोण्डुकं माया गन्धर्वमृगतृष्णिका ।
अहेतुकाऽपि दृश्यन्ते तथा लोकविचित्रता ॥ २०० ॥

आकाशं शशशृङ्गञ्च वन्ध्यायाः पुत्र एव च ।
असन्तश्चाभिलप्यन्ते तथा भावेषु कल्पना ॥ २०१ ॥

वासनाहेतुको लोकः नासन्न सदसत्क्वचित् ।
ये पश्यन्ति विमुच्यन्ते धर्मनैरात्म्यकोविदाः ॥ ३२२ ॥

अलातचक्र गन्धर्व प्रतिश्रुत्कासमोद्भवाः ।
अद्वया वितथा शून्या भूतकोटिश्च धर्मता ॥
निर्विकल्पश्च देशोमि ह्येत निष्पन्नलक्षणा. ॥ २८७ ॥

अनुत्पादश्च तथता भूतकोटिश्च शून्यता ।
रूपस्य नामान्येतानि अभाव न विकल्पयेत् ॥ ३४९ ॥

स्वप्नं केशोण्डुक माया गन्धर्व मृगतृष्णिका ।
सर्वदृष्टिप्रहाणञ्च तदनुत्पादलक्षणम् ॥ २०२ ॥
अस्वभावा अनुत्पन्ना. प्रकृत्या गगनोपमा. ॥ २०३ ॥

गन्धर्वनगरमायापुरुषवत् । तद्यथा—कश्चिद्गन्धर्वनगरे बालजातीय. मायापुरुषसत्त्वसार्थ विचित्र प्रविशन्त निर्गच्छन्त वा कल्पयेत् अमी प्रविष्टा अमी निर्गता । न च तत्र कश्चित्प्रविष्ट न वा निर्गत ॥ (१०९)

बोधिचर्यावतारे—

निःस्वभावा अमी भावाः तत्त्वत. स्वपरोदिताः ।
एकानेकस्वभावेन वियोगाद्वियदब्जवत् ॥ ३१८ ॥

प्रायेण सौगतप्रबन्धेषु शब्दशुद्धिचिन्ता न चिन्तनीया

एवञ्च न निरोधोऽस्ति न च भावोऽस्ति तत्त्वतः ।
अजातमनिरुद्धं च तस्मात्सर्वमिदं जगत् ॥
स्वप्नोपमास्तु गतयः विचारे कदळीसमाः ।
निर्वृतानिर्वृतानाञ्च न विशेषोऽस्ति वस्तुतः ॥ ५८८ ॥

आकाशदृष्टान्त

एव शून्यरूपतत्त्वस्याकाशो दृष्टान्तीक्रियते प्रायेण बौद्धप्रबन्धेष्वित्याकाशस्वरूप तदभिमत निरूपणीयमिति प्रक्रम । तत्र लङ्कावतारे—"तद्यथा, महामते आकाशं न नित्य नाऽनित्य नित्यानित्यव्युदासात् । एकत्वान्यत्वोभयत्वानुभयत्व नित्यत्वानित्यत्व दोषैरवचनीयम् । पुनरपर महामते शश हय खरोष्ट्र मण्डूक सर्प मक्षिका मीन विषाणतुल्य स्यादनुत्पादादनित्यत्वात्" इति ॥ (२१७)

तद्यथा—महामते आकाश सङ्ख्यालक्षणातीत, अथच विकल्प्यते एवमाकाशमिति । एवमेव महामते स्कन्धा सङ्ख्यालक्षणगमनातीता भावाभावविवर्जिता चतुष्कोटिरहिता. सङ्ख्यागणनानिर्देशेन बालै । न त्वार्यै । आर्यैः पुनर्महामते मायाविचित्ररूपाकृतिवत् अन्यानन्यवर्जिता प्रज्ञाप्यन्ते स्वप्नबिम्बपुरुषवत् । (१२५) एवं शून्यानुत्पादस्वाभाव्य सर्वधर्माणां प्रत्यवगन्तव्यम् । इति ॥ (१८८)

भगवानाह—असतामपि महामते भावानामभिलाप क्रियते । यदुत—शशविषाण कूर्मरोम वन्ध्यापुत्रादीनां लोके दृष्टोऽभिलाप । तेन च महामते न भावा नाभावा अभिलप्यन्ते ॥ इति ॥ (१०४)

बोधिचर्यावतारेऽपि—

षट्केण युगपद्योगात्परमाणोष्षडंशता ।
षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ॥

परमाणवोऽपि पुनरणीयांस भागम. तथैव निरूप्यमाणा. निरात्मकतया नभ.स्वभावता प्रतिपद्यन्ते । अतो निष्कृष्यमाण निस्स्वभावतया आकाश शून्यमेव ॥ (५०३)

यथाऽऽकाश प्रज्ञप्तिसन्मात्रमसत् न क्वचिदर्थक्रियायां समर्थं तथा ससार नि:स्वभावो ह्याकाश ॥ ४०९ ॥

अपिच—अत एवचानुत्पन्नानिरुद्धस्वभावतया निष्प्रपञ्चत्वात्सर्व-धर्मा विमोक्षाभिमुखा. धर्मधातुनिर्याता. आकाशधातुपर्यवसाना अप्र-ज्ञप्तिका अव्यवहारा अनभिलप्या अनभिलपनीया इत्युच्यन्ते ॥ ५२७ ॥

यथा आकाश मनागत मगत मकृत मविकृत मनभिसस्कृत मस्थित मसस्थित मव्यवस्थित मनुत्पन्न मनिरुद्धमेव सुभूते सर्वे धर्मा अनागता अगता इत्यादि ॥ प्रज्ञापारमिता २९७ ॥

अत एव तदविषयस्सर्वकल्पनाना यद्भावाभाव स्वपरभाव सत्या-सत्य शाश्वतोच्छेद नित्याऽनित्य मुखदु ख शुच्यशुच्यात्मानात्म शून्याशून्यैकत्वान्यत्वोत्पादनिरोधादयो दोषा तत्त्वस्य न सम्भवन्ति अमीषा सावृतत्वात् ॥ बो ३६६ ॥

निरीहा वशिकाः शून्याः मायावत्प्रत्ययोद्भवा ।
सर्वे धर्मास्त्वया नाथ निस्स्वभावा. प्रकाशिताः ॥ इति ४८९ ॥

अत्र प्रायेण शून्यतावगमायाकाशमुदाह्रियते अभाव एवाकाश इति तेषा हृदयम् । एतादृशसस्कारनिरोधायैव "आकाशवत्सर्वगतश्च नित्य" इति वेदान्तवाक्यावतार । अत एवाचार्यबादरायणोऽपि "आकाशे चाविशेषात्" इति सूत्रेणाकाशस्य तुच्छतां निराचकार ॥ इति ॥

अविद्या.

अथाविद्यानिरूपणम्, बोधिचर्यावतारे —

"यथा हि माया हस्त्याकारतया तदाकारशून्याऽपि मन्त्रौषधप्रभावात् इदम्प्रत्ययतया तत्त्वरहितापि प्रकाशते तथा अमी अपि क्लेशाः विपर्यासनिमित्ता अयोनिश मनसिकारसमुद्भूता इदम्प्रत्ययतामात्रतः निस्तत्त्वा एव प्रकाशन्ते ॥ ९० ॥

एतदुक्त भवति—सर्व एवामी आध्यात्मिका बाह्याश्च भावा स्वभावद्वयमाविभ्रत समुपजायन्ते । यदुत—सावृतिक पारमार्थिक च । तत्रैक अविद्यातिमिरावृतबुद्धिलोचनानामतथाभूतदर्शिना पृथग्जनाना मृषादर्शनविषयतया समादर्शितात्मकसत्ताकम् । अन्यत्प्रविचयाञ्जनशलाकोद्घातिताविद्यापटलसम्यज्ज्ञाननयनाना तत्त्वविदामार्याणां सम्यग्दर्शनविषयतया उपस्थितस्वरूपम् । यदाह —

सम्यङ्मृषादर्शनलब्धभाव
रूपद्वय विभ्रति सर्वभावा.।
सम्यग्दृशां यो विषयस्स तत्त्वं
मृषादृशां सवृतिसत्यमुक्तम् ॥ ३६१ ॥

अविद्या च सवृति । विकल्पश्च सर्व एवायमविद्यास्वभाव ॥ ३६६ ॥

तत्त्वेऽप्रतिपत्ति मिथ्याप्रतिपत्ति अज्ञानमविद्या । एवमविद्यायां सत्यां त्रिविधा सम्कारा ॥ इत्यादि ॥ शालिस्तम्बसूत्रे ४७९ ॥

तत्राऽविद्या कतमा एतेषामेव षण्णा धातूनां यैकसज्ञा पिण्डसज्ञा, नित्यसज्ञा, ध्रुवसज्ञा, शाश्वतसज्ञा, सुखसज्ञा, आत्मसज्ञा, सत्त्वसेज्ञा, जीवसज्ञा, जन्तुसज्ञा, मनुष्यसज्ञा, मानवसंज्ञा, अहङ्कारममकारसज्ञा । एवमादि विविधमज्ञानमुच्यतेऽविद्या ॥

एवमविद्यायां सत्यां विषयेषु रागद्वेषमोहा । अमी अविद्याप्रत्यया-स्संस्कारा ॥ इत्यादि ॥ ३८८ ॥

सव्रियते आव्रियते यथाभूतपरिज्ञान स्वभाववरणादावृतप्रकाशनाच्चानयेति सवृति । अविद्या मोहो विपर्यास इति पर्याया । अविद्या असत्पदार्थस्वरूपारोपिका स्वभावदर्शनावरणात्मिका च सती सवृतिरुपपद्यते । उक्त च—

अभूतं ज्ञापयत्यर्थं भूतमावृत्य वर्तते ।
अविद्या जायमानेव कामलातङ्कवृत्तिवत् ॥

तदुपदर्शित च प्रतीत्यसमुत्पन्न वस्तुरूप च सवृतिरुच्यते ॥ इति ३५२ ॥

नित्यशब्द भगवन्! काऽभिहित । भगवानाह, भ्रान्तौ । यस्मादिय महामते भ्रान्ति आर्याणामपि ख्यायते अविपर्यासत । तद्यथा—मृगतृष्णाऽलातचक्रकेशोण्डुकगन्धर्वनगरमायास्वप्नप्रतिबिम्बाक्षिपुरुषा लोके अविद्वद्भिर्विकल्प्यन्ते न तु विद्वद्भि । न च पुन न ख्यायन्ते सा भ्रान्ति , भावाभावविवर्जितत्वात् ॥ इति ॥ लङ्का १०६ ॥

महामतिराह—भ्रन्तिर्भगवन् विद्यते नेति । भगवानाह—मायावन्महामते न लक्षणाभिनिवेशतो भ्रान्तिर्विद्यते । यदि पुनर्महामते भ्रान्ति लक्षणाभिनिवेशेन विद्यते अव्यावृत्त एव महामते भावाभिनिवेशस्स्यात् । प्रतीत्यसमुत्पादवत तीर्थकरकारणोत्पादवत् ॥ इति ॥ ल १०८ ॥

अनेन विज्ञायते प्रतीत्यसमुत्पादवादः शून्यवादस्य विरुद्धः आर्यसत्यचतुष्टये समुदयेऽन्तर्गत इति ॥

प्रमाणम्

कल्पना कल्पितं चेति द्वयमन्योन्यमिश्रितम् ।
यथाप्रसिद्धमाश्रित्य विचारस्सर्व उच्यते ॥

विचारितेन तु यदा विचारेण विचार्यते ।
तदाऽनवस्था तस्यापि विचारस्य विचारणात् ॥ ५३४ ॥

यदि ज्ञानवशादर्थ· ज्ञानास्तित्वे तु का गतिः ।
अथ ज्ञेयवशात् ज्ञानं ज्ञेयास्तित्वे तु का गतिः ॥ ५३६ ॥

अथान्योन्यवशात्सत्त्वमभावः स्यात् द्वयोरपि ।
पिता चेन्न विना पुत्रात् कुतः पुत्रस्य संभवः ॥ बो ५३७ ॥

शङ्कते—

अङ्कुरो जायते बीजात् बीज तेनैव सूच्यते ।
ज्ञेयात् ज्ञानेन जातेन तत्सत्ता किं न गम्यते ॥ ५३८ ॥

समाधत्ते—

अङ्कुरादन्यतो ज्ञानात् बीजमस्तीति गम्यते ।
ज्ञानास्तित्वं कुतो ज्ञात ज्ञेय यत्तेन गम्यते ॥ ५३९ ॥

तस्माद्वास्तविकपक्षे ज्ञानज्ञेयासिद्धे विचार कर्तुमशक्य· । काल्पनिक-पक्षे तु यथाप्रासिद्धि व्यवहारमाश्रित्य शक्यत इति निश्चयः ॥

किंच—

प्रत्यक्षमपि रूपादि प्रसिद्ध्या न प्रमाणत· ।
अशुच्यादिषु शुच्यादिप्रसिद्धिरिव सा मृषा ॥ ६७४ ॥

प्रसिद्ध्या रूढ्या लोकप्रवादेन न प्रमाणत । साव्यवहारिकप्रमाण-त्वात्प्रत्यक्षादीनाम् । तदधिगत सावृतमेव रूपादि । यदाह—

इन्द्रियैरुपलब्ध यत तत्तत्त्वेन भवेद्यदि ।
जातास्तत्त्वविदो बाला· तत्त्वज्ञानेन किं तदा ॥ ३७५ ॥

इति । अनेन वचनेन तत्त्वज्ञान लोकोत्तरविषयकमेवेत्यभिप्रायोऽवगम्यते ॥

तथाऽत्रैव—(बो. ३६७ पु.)

पितापुत्रसमागमाख्ये ग्रन्थे सांवृतपरमार्थयोस्स्वरूपमेव निरूप्यते—एतावच्च ज्ञेयम् । यदुत—सवृति परमार्थश्च । तच्च भगवता शून्यत सुसदृष्ट सुविदित सुसाक्षात्कृत तेन सर्वज्ञ इत्युच्यते । तत्र संवृति लोकप्रचारत तथागतेन दृष्टा । य पुन परमार्थत सोऽनभिलप्य अनाज्ञेय अपरिज्ञेय अविज्ञेय अदेशित अप्रकाशित यावदक्रिय अकरण यावन्नलाभ नालाभ न सुख नासुख न यशो नायश न रूप नारूपं प्रत्यन्तमितममस्तसावृतवस्तुविशेषमशेषोपाधिविमुक्त अनन्तवस्तुविस्तरव्यापिज्ञानालोकावभासितान्तरात्मना भगवता परमार्थसत्यमिति विदितम् । तदेतदार्याणामेव स्वसविदितस्वभावतया प्रत्यात्मवेद्यमतस्तदेवात्र प्रमाणम् । सवृतिसत्य तु लोकव्यवहारमाश्रित्य प्रकाशितम् । तदेव विभागत सत्यद्वयपरिज्ञानात् अविपरीत धर्मप्रचय उपजायते । तथाचोक्तम्—

न बाधते ज्ञानमतैमिराणां
यथोपलब्धं तिमिरेक्षणानाम् ।
तथा मलज्ञाननिरस्कृतानां
धियाऽस्ति बाधा न धियोऽमलायाः ॥ इति ३६९ ॥

एव सांवृतप्रमाणेनापि शून्यता सिद्धा भवतीति समर्थयितु शङ्कते—

प्रमाणमप्रमाणं चेत् ननु तत्प्रमितं मृषा ।
तत्त्वतश्शून्यता तस्माद्भावानां नोपलभ्यते ॥ बो ५७१ ॥

समाधत्ते—

कल्पितं भावमस्पृष्ट्वा तदभावो न गृह्यते ।
तस्माद्भावो मृषा यो हि तस्याभावः स्फुटं मृषा ॥ इति ॥

असत्स्वभावो य तस्याभाव मृषैव । एव भावाभावयो परिकल्पितरूपत्वे सर्वधर्मनिस्स्वभावतैवावतिष्ठते । यथा—

तस्मात्स्वप्ने सुते नष्टे स नास्तीति विकल्पना ।
तद्भावकल्पनोत्पादं निबध्नाति मृषा च सा ॥ ५७२ ॥

तद्भावेति । तद्भावः तस्य सुतस्य अस्तित्व तस्य कल्पना सत्त्व-समारोप । तस्योत्पाद उन्मज्जनमित्यर्थ । स्वप्ने उत्पन्नविनष्टे सुते सति पुत्रो नास्तीति कल्पना पुत्रोन्मज्जन निषेधति यतो मृषा च सा इति । तथा च अप्रमाणप्रमिताऽपि नि.स्वभावलक्षणशून्यता सत्स्वभावतां नापादयतीति भाव ॥

एतत्सर्व हृदि निधाय आत्मतत्त्वविवेके उदयनाचार्य एवमाह—(६७ पु.) "लोकव्यवहारसिद्धमिति चेत् सिद्धमेव तर्हि, न ह्यन्यतोऽपि किञ्चित्सिद्ध्यति" इति ॥

नैरात्म्यम्

तदुक्तमाचार्यपादैः—

यः पश्यत्यात्मानं तस्यात्राहमिति शाश्वत. स्नेहः ।
स्नेहात्सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ॥

गुणदर्शी परितृषन् ममेति तत्साधनान्युपादत्ते ।
तेनात्माभिनिवेशो यावत्तावत्तु संसार. ॥

आत्मनि सति परसंज्ञा स्वपरविभागात्परिग्रहद्वेषौ ।
अनयोस्संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥ इति । बो ४९२ ॥

तथा—

सन्तानस्समुदायश्च पङ्क्तिसेनादिवन्मृषा ।
यस्य दु.खं स नास्त्यस्मात् कस्य तत्खं भविष्यति ॥

सन्तानो नाम न कश्चिदेक· परमार्थः, किन्तर्हि कार्यकारणभावप्रवृत्त-क्षणपरम्पराप्रवाहरूप एवायम् । ततो व्यतिरिक्तस्यानुपलम्भात् । तेषा-मेव क्षणानामेकपदेन प्रतिपादनाय सङ्केतः कृतः । प्रज्ञप्तिसन्नेवायम् ।

एव समुदायोऽपि न समुदायिभ्य. वस्तुसन्नेको वर्तते, तत्त्वान्यत्वविकल्पस्तु अवयविविचारवन्नेय ॥ (३३४)

इति ॥ तथा—

अतीतानागतं चित्तं नाह तद्धि न विद्यते ।
अथोत्पन्नमह चित्तं नष्टेऽस्मिन्नास्त्यह पुन ॥ ४८३ ॥
यथैव कदलीस्तम्भ. न कश्चिद्भागश कृत ।
तथाहमप्यसकृत. मृग्यमाणो विचारत. ॥ ४८४ ॥
पुद्गलस्सन्ततिस्स्कन्धा. प्रत्यया अणवस्तथा ।
प्रधानमीश्वरः कर्ता चित्तमात्र वदाम्यहम् ॥ ४८५ ॥

इति ॥ तथा—

यद्ध खजननं वस्तु त्रासस्तस्मात्प्रजायताम् ।
शून्यता दु.खशमनी तत. किं जायते भयम् ॥ ४८८ ॥
यतस्ततो वाऽस्तु भय यद्यहं नाम किञ्चन ।
अहमेव न किञ्चिच्चेद्भयं कस्य भविष्यति ॥
नास्त्यह न भविष्यामि न मेऽस्ति न भविष्यति ।
इति बालस्य सत्रास पण्डितस्य भयक्षय. ॥ इति ४८९ ॥

लङ्कावतारेऽपि –

पुनरपर महामते चतुर्विध निर्वाण, यदुत —भावस्वभावाभावनिर्वाणम् , लक्षणविचित्रभावाभावनिर्वाणम् स्वलक्षणभावाभावावबोधनिर्वाणम् , स्कन्धाना स्वसामान्यलक्षणसन्ततिप्रबन्धव्युच्छेदनिर्वाणम् । एतन्महामते चतुर्विध तीर्थकराणां निर्वाणम् । न मत्प्रवचने । तत्र पुन विकल्पितस्य मनोविज्ञानस्य व्यावृत्ति निर्वाणमित्युच्यते ॥ (१२६)

नाहं निर्वामि भावेन क्रियया लक्षणेन च ।
विकल्पहेतुविज्ञाने निर्वृते निर्वृतो ह्यहम् ॥ इति १२७ ॥

न सन्नासन्न सदसत् यदालोकं प्रपश्यति ।
तदा व्यावर्तते चित्तं नैरात्म्य चाधिगच्छति ॥ १५२ ॥

धर्मपुद्गलनैरात्म्यावबोधात् महामते आवरणद्वयपरिज्ञानाच्च बुद्धानां भगवतां बुद्धता भवति ॥ इति १४० ॥

तथागत एव मोक्षशब्देन देश्यते, यतो विमोक्षात्तथागतो नान्यो नानन्य । यत्सर्वप्रमाणविनिवृत्त तद्वाङ्मात्रम्, यद्वाङ्मात्र तदनुत्पन्नम् । यदनुत्पन्न तदनिरुद्धम् । यदनिरुद्ध तदाकाशसमम् । आकाश च न कार्य न कारणम् । यच्च न कार्य न कारणम्, तन्निरालम्ब्यम्, तत्सर्वप्रमाणातीतम् । यत्सर्वप्रमाणातीतम्, स तथागत ॥ इति १८९ ॥

सुगतशब्दोऽप्येव व्याख्यायते—"सु प्रशस्त सर्वधर्मनि स्वभावतातत्त्व गता अधिगता. सुगता इति" बोधिचर्यावतारपञ्जिका ॥ २५ ॥

प्रतीत्यसमुत्पाद

सर्वास्तिवादिसौत्रान्तिक सिद्धान्तानुसारेणार्यसत्याभिधानानि चत्वारि तत्त्वानि उपदिष्टानि दु ख समुदयो निरोध मार्गश्चेति । दु ख प्रसिद्धम् । समुदय दु खकारण वक्ष्यते । निरोध· समुदयविनाश विमलज्ञानोदयलक्षणमुक्तिपर्यन्त । मार्ग· तत्त्वज्ञानमिति ॥

समुदय एव प्रतीत्यसमुत्पाद इत्युच्यते । स हि द्विविध·—प्रत्ययोपनिबन्धन हेतूपनिबन्धनश्चेति । आद्योऽयमनेन सूत्रेणोपदिष्ट "इद प्रत्ययफलम्" इति भगवता । तदर्थस्तु—इद कार्य ये अन्ये हेतव प्रत्ययन्ते गच्छन्ति तेषामयमानाना हेतूना भाव प्रत्ययत्व कारणसमवाय तन्मात्रम्य फल न चेतनस्य कस्यचिदिति । यथा बीजादङ्कुर· षण्णा धातूना समवायाज्जायते । ते च धातव पृथिवीजलतेजोगगनऋत्वाख्या· । एतानि सहकारिकारणानि ॥

द्वितीयोऽपि सूत्रेणोपदिष्ट । तथाहि "उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषा धर्माणा धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्यसमुत्पादानुलोमता" इति ॥

अयमर्थ — तथागतानां बुद्धाना मते धर्माणा कार्यकारणरूपाणा या धर्मता कार्यकारणरूपा एषा उत्पादादनुत्पादाद्वा स्थिता । यस्मिन् सति यदुत्पद्यते तत्तस्य कारणस्य कार्यमिति धर्मतेत्यस्य विवरणम् । धर्मस्य कार्यस्य कारणानतिक्रमेण स्थिति. । स्वार्थिकस्तल्प्रत्यय । धर्मस्य कारणस्य कार्य प्रति नियामकता ॥

नन्वय कार्यकारणभावश्चेतनमन्तरेण न सभवतीत्यत उक्त— प्रतीत्येति । कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्मता उत्पादादनुत्पादाद्वा धर्माणा स्थिता । नचात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति सूत्रार्थ ॥

स द्वितीय हेतूपनिबन्धनो यथा—बीजादङ्कुरोऽङ्कुरात्काण्ड काण्डान्नाळो नाळाद्गर्भ ततश्शूक शूकात्पुष्प तत फलम् । नचात्र बाह्ये समुदाये कारण बीजादि कार्यमङ्कुरादि वा चेतयते अहमङ्कुर निर्वर्तयामि अह बीजेन वा निर्वर्तित इति । एवमाध्यात्मिकेऽपि कारणद्वयमवगन्तव्यम् ॥

अनेन प्रतीत्यसमुत्पादनिरूपणेन प्रत्ययलक्षण हकारिकारण हेतुलक्षणमुपादानकारण चेति द्वयमभ्युपगतम् । बुद्धिमत्कर्तृलक्षण निमित्तकारणमपलपितम् । अयमेव प्रतीत्यसमुत्पादवादे विशेष यच्चेतनपदार्थ आत्माख्यो धातुर्नास्तीति । अयमेव धर्मात्मवाद इत्यवगम्यते ॥

एतादृश प्रतीत्यसमुत्पादवाद माहायानिका शून्यवादयन्ति । तथाहि (बो ४१७)—

यः प्रतीत्यसमुत्पाद. शून्यता सैव ते मता ।
भाव स्वतन्त्रो नास्तीति सिंहनादस्तवातुल. ॥

इत्युच्यते । एतदर्थमेव माध्यमिकवृत्तिप्रवृत्तिरपि ॥

एव सर्वधर्माणा हेतुप्रत्ययाधीनत्वनिरूपणेन स्वतन्त्रचेतननिराकरणेन च निर्व्यापाराणा सर्वधर्माणा पारतन्त्र्यमुपदर्शितम् । तदुच्यते (बो १८६)—

एव परवश सर्व गद्वश सोऽपि चावश. ।
निर्वाणवदचेष्टेषु भावेष्वेवं क कुप्येत ॥ इति ॥

ततोऽविद्यादिप्रत्ययबलात् उत्तरोत्तर कार्यप्रवाहः सस्कारादिरूप प्रवर्तते पूर्वपूर्वनिवृत्तौ निवर्तते ॥ इति १८८ ॥

लङ्कावतारसूत्रेऽपि (१०३)—तीर्थकरा अपि भगवन् कारणत उत्पत्ति वर्णयन्ति प्रधानेश्वरपुरुषकालाणुप्रत्ययेभ्य भावानामुत्पत्तय । किंतु भगवता प्रत्ययपर्यायान्तरेण उत्पत्तिर्वर्ण्यते भावानाम् । नच सिद्धान्तविशेषान्तरम् । सदसतो हि भगवन् तीर्थकरा अप्युत्पत्ति वर्णयन्ति भूत्वा च विनाश प्रत्ययैर्भावानाम् । यदप्युक्त भगवताऽविद्याप्रत्ययास्सस्कारा यावज्जरामरणमिति अहेतुवादव्यपदेश एष भगवताऽनुवर्णितो न सहेतुवाद । युगपत् व्यवस्थितानामेतद्भवत्यस्मिन् सतीद भवतीति । तीर्थकरव्यपदेश एव भगवन् विशिष्यते । न त्वदीयम् । तत्कस्य हेतो ? तीर्थकराणा हि कारणमप्रतीत्यसमुत्पन्न कार्यमभिनिर्वर्तयति । तव तु भगवन् कारणमपि कार्यापेक्ष कार्यमपि कारणापेक्षम् । हेतुप्रत्ययसङ्करश्च एवमन्योन्यानवस्था प्रसज्यते ॥

भगवानाह—न महामते ममाहेतुककारणवाद , हेतुप्रत्ययसकरश्च प्रसज्यते अस्मिन् सतीद भवतीति ब्रुवत ग्राह्यग्राहकाभावात्

स्वचित्तदृश्यमात्रावबोधात् । ये तु महामते ग्राह्यग्राहकाभिनिविष्टाः स्वचित्तदृश्यमात्र नावबुध्यन्ते तेषामेष दोषः । न तु मम प्रतीत्य कारण-व्यपदेश कुर्वत इति ॥

तथा---पुनरपर महामते नवविधा परिणामवादिना तीर्थकराणां परिणामदृष्टिर्भवति । यदुत—संस्थानपरिणाम· । लक्षणपरिणाम· । हेतुपरि-णाम । युक्तिपरिणाम । दृष्टिपरिणाम । उत्पादपरिणाम । भाव-परिणाम । प्रत्ययाभिव्यक्तिपरिणाम· । क्रियाभिव्यक्तिपरिणाम । एता महामते परिणामदृष्टयः । यास्सन्धाय सर्वतीर्थकरा सदसत्पक्षोत्पादपरि-णामवादिनो भवन्ति इति ॥ (१५८)

तथा--न च तार्किका अनादिकालभावाभावप्रपञ्चवासितमतयः एव प्रजानन्ति आत्मात्मीयलक्षणग्राहाभिनिवेशाविष्टा खचित्तदृश्यमात्रा-नवबोधात् ज्ञान ज्ञेय प्रति विकल्पयन्ति ॥ (१७०)

तथा—

कदळीस्वप्नमायाभं लोकं पश्येद्विकल्पितम् ।
रागो न विद्यते द्वेषो मोहश्चापि न पुद्गलः ॥
तृष्णया ह्युदिताः स्कन्धाः विद्यन्ते स्वप्नसन्निभाः ।
प्रत्यात्मधर्मस्थितितां संधाय कथितं मया ।
तैश्च बुद्धैर्मया चैव न यत्किंचिद्विशेषितम् ॥ इति ॥ ३२४ ॥

अत्र धर्मपुद्गलनैरात्म्य स्पष्टमुक्तम् । तथा धर्मनित्यतामप्यन्यथ-यति—

पुनरपर महामते अस्त्यसौ पर्यायः, येन नित्यस्तथागतस्स्यात् । तत्कस्य हेतो ? यदुत—अभिसमयाधिगमज्ञाननित्यत्वात् नित्यस्तथा-गत । अभिसमयाधिगमज्ञान हि महामते नित्य तथागतानमनुत्पादाद्वा

स्थितैवैषा धर्मता धर्मनियामकता धर्मस्थितिता सर्वश्रावकप्रत्येकबुद्ध-तीर्थकराभिसमयेषु। न तु गगने धर्मस्थितिर्भवति इति ॥ (२१८)

अनेन सदर्भेण नित्य किंचित्तत्त्वमस्तीत्युक्त प्रतीयते। तच्च ज्ञान-रूपमिति च। सर्वशून्यवादे एतन्नसंभवतीति च प्रोक्तम्। गगने इत्यस्य सर्वशून्यसिद्धान्ते इत्यर्थ.। अत्रास्त्यसौ पर्याय इत्यनेन नायं परमसिद्धान्त इति स्फुटमुक्त भवति ॥

अयं च सन्दर्भः कुमारिलेन सम्यगवलोकित इति विज्ञायते, यतः तन्त्रवार्तिके वेदनित्यत्वप्रसङ्गे सौगतागमनित्यताप्रतिक्षेपसमये इत्थ लिखितमस्ति (१६९ पु.) "कन्यावरणार्थागतमूर्खवरगोत्रप्रश्नोत्तरवत् ॥

यदेव भवतां गोत्रं तदस्माकमपीतिवत्।
आहुः स्वागमनित्यत्वं परवाक्यानुकारिणः ॥
अस्मदीयमिदं वाक्यं भवतामिति चोदिताः।
जल्पन्त्यस्माकमेवैतत् श्रुत्वा मीमांसकैर्हृतम् ॥
तत्र शाक्यैः प्रसिद्धाऽपि सर्वक्षणिकवादिता।
त्यज्यते वेदसिद्धान्तात् जल्पद्भिर्नित्यमागमम् ॥
धर्मस्तेनोपदिष्टोऽयमनित्यं सर्वसंस्कृतम्।
क्षणिकाः सर्वसंस्काराः अस्थिराणां कुतः क्रियाः ॥
बुद्धिबोध्यं त्रयादन्यत्संस्कृतं क्षणिकं च तत्।

तथा—शब्देऽपि बुद्धेर्नियमान्नाभिव्यक्ति द्वेधाऽपि दोषात् इत्येवमादिभि· सर्वदा सर्वपदार्थसम्बन्धानित्यत्वप्रतिपाथनात् तद्विपरीत-मागमनित्यत्वमभ्युपगम्यमान लोकोपहासास्पदमेव भवेत् ॥

व्यवहारनित्यताशब्दश्च क्रियानित्यत्वपर्याय., तद्यस्य शब्दार्थ-सम्बन्धानित्यत्व तस्य तदाश्रयव्यवहारनित्यत्व किमाधार भविष्यतीत्य-तिदुस्सम्पादम् ॥

न च शब्दार्थसम्बन्धकूटस्थत्वमनिच्छताम् ।
नित्यताव्यवहारस्य निराधाराऽवकल्पते ॥
शब्दादिषु विनश्यत्सु व्यवहारः क्व वर्तताम् ।
स्थितैषा धर्मतेत्येतत् अर्थशून्यमतो वचः ॥
एषेत्यपि न निर्देष्टुं शक्या क्षणविनाशिनी ।
किमुत स्थितया साकमेषेत्यस्यैकवाक्यता ॥

तेनानित्यशब्दवादिनामागमनित्यत्वमनुपपन्नम्" इति ॥

अनेन सन्दर्भेण "उत्पादाद्वा अनुत्पादाद्वा स्थितैवैषा धर्माणां धर्मता धर्मस्थितिता" इति प्रागुदाहृतं सूत्र नित्यतत्त्वोपदेशपरमित्यवगम्यते, यथायथ तत्र तत्र उपयुज्यते इत्यप्यवगम्यते ॥

"शब्देऽपि बुद्धेर्नियमात्" इति शाक्यग्रन्थस्यायमर्थ —कश्चिदेव शब्दः केन चिदेव श्रोत्रेण युज्यते इति द्विविधो बुद्धिनियमो दृश्यते । स च विषयसस्कारपक्षे सुप्तस्थस्य पाटलिपुत्रेऽप्युपलब्धिप्रसङ्गान्न युज्यते । इन्द्रियसंस्कारपक्षे श्रोत्रेण सर्वगतेन तत्समानदेशस्यान्यस्याप्युपलब्धिप्रसङ्गान्न युज्यते । एवं द्वेधाऽपि दोषात् शब्देऽभिर्व्यक्तिर्न साधीयसीति ॥

पुद्गलात्मा

लङ्कावतारे (३५४–३६० पु.)—

साङ्ख्या वैशेषिका नग्नाः तार्किका ईश्वरोदिताः ।
सदसत्पक्षपतिताः विविक्तार्थविवर्जिताः ॥
इतस्ततः प्रधावन्ति ह्यात्मवादच्चिकीर्षया ।
प्रत्यात्मगतिगम्याश्च ह्यात्मा वै शुद्धिलक्षणः ॥
गर्भस्तथागतस्यादौ तार्किकाणामगोचर ।
कान्तिर्यथा सुवर्णस्य जातरूपाश्च शर्कराः ॥

परिकर्मेण पश्यन्ति सत्त्वं स्कन्धालयैस्तथा ॥
निधयो मणयश्चापि पृथिव्यामुदकं यथा ।
विद्यमाना न दृश्यन्ते तथा स्कन्धेषु पुद्गलम् ॥

यथा हि गर्भो गर्भिण्यां विद्यते न च दृश्यते ।
आत्मा हि तद्वत् स्कन्धेषु ह्ययुक्तिज्ञो न पश्यति ॥

अनित्यतां च भावेषु शून्यतां च यथा बुधाः ।
विद्यमानां न पश्यन्ति तथा स्कन्धेषु पुद्गलम् ॥

नैरात्म्यवादिनोऽभाष्याः भिक्षुकर्माणि वर्जयेत् ।
बाधका बुद्धधर्माणां सदसत्पक्षदृष्टयः ॥

तीर्थ्यदोषैर्विनिर्मुक्तं नैरात्म्यवनदाहकम् ।
जाज्वलत्यात्मवादोऽयं युगान्ताग्निरिवोत्थितः ॥

पौराणिकमिदं वर्त्म अहं ते च तथागताः ।
त्रिभिस्सहस्रैस्सूत्राणां निर्वाणमिति देशिकाः ॥ इति ॥

कार्यकारणभावापलाप

प्रतीत्यसमुत्पादवाद शून्यवादेऽन्तर्भावयितुं कार्यकारणभावापलाप· बोधिचर्यावतारे—

भावानां निःस्वभावानां न सत्ता विद्यते यत ।
सतीदमस्मिन् भवतीत्येतन्नैवोपपद्यते ॥ २३ ॥

अन्यतो नापि चायातं न तिष्ठति न गच्छति ।
मायातः को विशेषोऽस्य यन्मूढैस्सत्यतः कृतम् ॥

मायया निर्मितं यच्च हेतुभिर्यच्च निर्मितम् ।
आयाति तत्कुतः कुत्र याति चेति निरूप्यताम् ॥ ५८० ॥

यदन्यसन्निधानेन दृष्टं न तदभावतः ।
प्रतिबिम्बसमे तस्मिन् कृत्रिमे सत्यता कथम् ॥ ५८३ ॥

न स्वतो नापिपरतः न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥

एकानेकस्वभावविचारणयाऽपि सर्वभावानां स्वभावविकलत्वात् न मत्स्वभावत्वम् ॥ (३५७)

चतुस्तवेऽप्युक्तम्—

निरुद्धाद्वाऽनिरुद्धाद्वा बीजाद्ङ्कुरसम्भव· ।
अतस्त्वया जगदिदं परिकल्पसमुद्भवम् ॥
परिज्ञातमसद्भूतमनुत्पन्नं न नश्यति ।
नित्यस्य संसृतिर्नास्ति कस्य वा निर्वृतिर्भवेत् ॥
मायागजप्रकाशत्वात् आदिशान्त प्रयत्नतः ।
यः प्रतीत्यसमुत्पादः शून्यता सैव ते मता ॥
तथाविधश्च सद्धर्मः तत्समश्च तथागत· ।
तत्तत्त्वं परमार्थोऽपि तथता द्रव्यमिष्यते ॥
भूतं तदविसंवादि तद्बोधाद्बुद्ध उच्यते ॥ इति ॥ ५३३ ॥

एव प्रतीत्यसमुत्पादवादलक्षण· धर्मात्मवाद पौराणिक पुद्गलात्मवादश्च माध्यमिकै शून्यवादलक्षणे नैरात्म्यवादेऽन्तर्भावित । अत एव "धर्मपुद्गलनैरात्म्यम्" इति सौगतदर्शन न्यायवार्तिकतात्पर्यटीकाया आत्मज्ञानप्रकरणेऽनूद्यते ॥

एव धर्मात्मवादे पुद्गलात्मवादे च शून्यवादपर्यवसिते सति विज्ञानात्मवादस्यावकाश एव न स्यादिति मत्वा विज्ञानात्मवादिना वसुबन्धुना मतद्वयमेतत् विज्ञानात्मवादे पर्यवसित करोति प्रज्ञप्तिमात्रतासिद्धौ—

तथा पुद्गलनैरात्म्यप्रवेशो ह्यन्यथा पुनः ।
देशना धर्मनैरात्म्यप्रवेश· कल्पितात्मना ॥

इति । सर्वथा विज्ञप्तिनैरात्म्य नास्तीत्यस्य पद्यस्य तात्पर्यार्थ ॥

विरोधपरिहार

अत्र सर्वेषामपि वादानामधिकारिभेदेन विरोधपरिहार· शून्यतायां पर्यवसानं चोच्यते। अधिकारिणस्तु—सर्वबुद्ध बोधिसत्त्व प्रत्येकबुद्ध· अर्थश्रावक· पृथग्जनश्चेति पञ्चप्रकाराः। अत्र सर्वबुद्धयानमेव महायानम्। प्रत्येकबुद्धश्रावकयानादीनि हीनयानानीति बोधिचर्यावतारे (२६) स्पष्टीभवति॥

तथा—प्रज्ञापारमिताऽप्येव स्तूयते (४३०)—

बुद्धै प्रत्येकबुद्धैश्च श्रावकैश्च निषेविता।
मार्गस्त्वमेकामोक्षस्य नास्त्यन्य इति निश्चयः॥ इति॥

लङ्कावतारेऽपि—

देवयानं ब्रह्मयानं श्रावकीयं तथैव च।
तथागतं च प्रत्येकं यानानीति वदाम्यहम्॥
यानानां नास्ति वै निष्ठा यावच्चित्तं प्रवर्तते।
चित्ते तु वै परावृत्ते न यानं नच यायिनः॥ इति॥ १३४॥

तथा—

पञ्च धर्माः त्रिस्वभावाः विज्ञानान्यष्ट चैव हि।
द्वे नैरात्म्ये भवेत्कृत्स्नः महायानपरिग्रहः॥ इति॥ २२९॥

तथा—नागार्जुनधर्मपदेऽपि 'श्रावकयान प्रत्येकबुद्धयान महायानमिति यानानि त्रीणि" इति निरूपितानि। अत्र माहायानिका एव शून्यवादिन· माध्यमिकाः॥

यद्यप्यत्र कैश्चिद्वैदिकैः माहायानिकपदं निरालम्बनवादित्वेन प्रसिद्धेषु बाह्यार्थशून्यवादिषु विज्ञानवादिषु प्रयुज्यते। यथा—शाबरभाष्ये वनवादे "यद्येव प्रत्युक्तस्स माहायानिकः पक्षः" इति॥

प्रकरणपञ्चिकायां शालिकनाथेन तत्त्वालोके "तस्मादेषोऽपि माहायानिकपक्षप्रवेशो ब्रह्मवादिनां मोह एव" इति ॥

पञ्चपादिकायां प्रथमवर्णके "अतस्स एव माहायानिकपक्ष समर्थित." (२५ पु) इति ॥

शास्त्रदीपिकाया सम्बन्धाक्षेपपरिहारे "तस्माद्वरमस्मात् मायावादान्माहायानिकवाद" इति ॥

तथापि बाह्यार्थविचारः सर्वशून्यवादिनां माध्यमिकानां बाह्यार्थशून्यवादिना योगाचाराणा च समानः । यत· माध्यमिकनिरूपित मार्ग एव योगाचारैरुररीकृतः । तदेतत् प्रज्ञप्तिमात्रतासिद्ध्यादिषु प्रबन्धेषु श्लोकवार्तिकादिषु च विस्पष्टम् । तस्मात् बाह्यार्थनिरासप्रस्तावे माहायानिकपदप्रयोग. न विरुद्ध्यते ॥

अपि च बोधिचर्यावतारपञ्चिकायां (३८९) सर्वशून्यवादिमाहायानिकविषये माध्यमिकपद प्रयुक्तमस्ति, अतो माध्यमिकास्सर्वशून्यवादिनो माहायानिका विज्ञानवादिनस्तु बाह्यार्थमात्रशून्यवादिन इति विवेक । प्रकृतमनुसराम ॥

लङ्कावतारे—

चित्राचार्यो यथा काश्चित् चित्रान्तेवासिकोऽपि वा ।
चित्रार्थं नामयेत् रङ्गान् देशयामि तथा ह्यहम् ॥
रङ्गे न विद्यते चित्रं न भूमौ न च भाजने ।
सत्त्वानां कर्षणार्थाय रङ्गैश्चित्रं विकल्प्यते ॥
विचित्रा हि यथा माया दृश्यते न च विद्यते ।
देशनाऽपि तथा चित्रा देश्यते व्यभिचारिणी ॥
देशना हि यदन्यस्य तदन्यस्याप्यदेशना ।
आतुरे आतुरे यद्वत् भिषग्द्रव्यं प्रयच्छति ॥ ४८ ॥

तथा—"तत्र त्रिविध ज्ञान स्वसामान्यलक्षणावधारकं उत्पाद-व्ययावधारक अनुत्पादानिरोधावधारक चेति" इति (ल. १७७)

तथा —

नयो हि द्विविधो मह्यं सिद्धान्तो देशना च वै ।
इमां देशेमि बालानां सिद्धान्त योगिनामहम् ॥ इति लं १७२ ॥

तथा—

वैद्या यथाऽऽतुरवशात्क्रियाभेदं प्रकुर्वते ।
न तु शास्त्रस्य भेदोऽस्ति दोषभेदात्तु भिद्यते ॥
तथाहं सर्वसत्त्वानां क्लेशदोषैः प्रदूषितम् ।
इन्द्रियाणां बलं ज्ञात्वा नयं देशेमि प्राणिनाम् ॥ लं २०४ ॥

तथा बोधिचर्यावतारे (१४६)—

हीनोत्कृष्टेषु धर्मेषु समं गौरवमाचरेत् ।
नोदारधर्मपात्रं च हीने धर्मे नियोजयेत् ॥
न चाचारं परित्यज्य सूत्रमन्त्रै. प्रलोभयेत् ॥

बोधिचित्तविवरणे (सर्वदर्शनसङ्ग्रहे)—

देशना लोकनाथानां सत्त्वाशयवशानुगाः ।
भिद्यन्ते बहुधा लोके उपायैः बहुभिः किल ॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः ।
भिन्ना हि देशनाः भिन्ना शून्यताद्वयलक्षणा ॥ इति ॥

तथात्रैव बोधिचर्यावतारे (३७६)—

लोकावतरणार्थं च भावा नाथेन देशिताः ।
तत्त्वतः क्षणिकानैते संवृत्या चेद्विरुध्यते ॥

अयमर्थ —लोकाना भावाभिनिवेशिना स्कन्धादिदेशनावैनेयाना आपाततश्शून्यतादेशनानधिकृतानां शून्यतायामवतरणार्थं सुकुमारोपक्रमेण सत्त्वाशयवेदिना नाथेन नरकादिदु.खात् सत्त्वान् परित्राय-

माणेन अभ्युदयनिःश्रेयससुख प्रापयता प्रकाशिताः क्षणिका भावाः। सवृत्या क्षणिकत्वं चेत् परमार्थतः स्थिरतेति स्यात्, तच्च विरुध्यते। तस्माल्लोकावतारायैव क्षणिकत्वाद्युपदेश इति ॥

एवमधिकारिभेदेन शास्त्रविभाग· वैदिकैरप्युपगतः। भगवद्गीता—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तस्समाचरन् ॥

इति। माण्डूक्यकारिकाऽपि—

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा।
उपायस्सोऽवताराय नास्ति भेदः कथञ्चन ॥

इति। तथा शाङ्करं बृहदारण्यकभाष्यम् (४—१-२०) "तस्मात्पुरुषमतिवैचित्र्यमपेक्ष्य साध्यसाधनसम्बन्धविशेषान् अनेकधा उपदिशति। तत्र पुरुषा स्वयमेव यथारुचि साधनविशेषेषु प्रवर्तन्ते। शास्त्र तु सवितृप्रदीपादिवदुदास्ते एव। तथा कस्यचित्परोऽपि पुरुषार्थ अपुरुषार्थवदवभासते। यस्य यथाऽवभास स तथारूप पुरुषार्थं पश्यति। तदनुरूपाणि च साधनान्युपादित्सते। स्वविषयशूराणि हि प्रमाणानि श्रोत्रादिवत्" इति ॥

प्रज्ञापारमिता

सा च प्रज्ञा द्विविधा—हेतुभूता, फलभूता च। फलभूता तु सर्वाकारोपेतसर्वधर्मशून्यत्वाधिगमस्वभावा। तथाहि—विपर्याससञ्जिन· असत्सत्त्वसमारोपाभिनिवेशवशादात्मीयग्रहप्रवृत्तेः अयोनिश मनसिकारप्रसूतः रागादिक्लेशगणस्समुत्पद्यते। तस्मात्कर्म ततो जन्म ततश्च व्याधिजरामरणशोकपरिदेवदु·खदौर्मनस्योपायासाश्च प्रजायन्ते। एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति। तदेवमनुलोमाकारं

प्रतीत्यसमुत्पादं सम्यक्प्रज्ञया व्यवलोकयत· पुनस्तमेव निरात्मकम-स्वामिक मायामरीचिगन्धर्वनगरस्वप्नप्रबिम्बादिसमानाकारतया परमार्थतो निःस्वभाव पश्यतो यथाभूतपरिज्ञानात् तद्विपक्षात्मतया मोहस्वभावमविद्या भवाङ्ग निवर्तते ॥

अविद्यानिरोधात्तत्प्रत्ययास्संस्कारा निरुद्धयन्ते । एवं पूर्वपूर्वस्य कारणभूतस्य निरोधादुत्तरोत्तरकार्यभूतस्य निरोधो वेदितव्य· । याव-ज्जातिनिरोधाज्जरादिशोका निरुद्धयन्ते । एवमस्य महतो दुःखस्कन्धस्य निरोधो भवति ॥

तदेवं प्रज्ञया स्वप्नमायादिस्वभाव सस्कृत प्रत्यवेक्षमाणस्य सर्व-धर्माणां निस्स्वभावतया प्रतिपत्ते परमार्थाधिगमात्सवासननिश्शेषदोष-राशिनिवृत्तिर्भवतीति सर्वदुःखोपशमहेतु प्रज्ञा उपपद्यते ॥ (बो. ३४९)

हेतुभूता तु यथावस्थितप्रतीत्यसमुत्पन्नवस्तुप्रविचयलक्षणा । तथा च युक्त्यागमाभ्यां विचारयत· अविपरीतवस्तुतत्त्वप्रविचयस्समुत्पद्यते । तदुपदर्शयितु सत्यद्वयव्यवस्थामाह—

संवृतिः परमार्थश्च सत्यद्वयमिदं मतम् ।
बुद्धेरगोचरस्तत्त्वं बुद्धिस्संवृतिरुच्यते ॥ ३५२ ॥

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ॥
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ बो. ३६१ ॥

संवृतिः परमार्थश्च तृतीयं नास्ति हेतुकम् ।
कल्पितं संवृतिर्ह्युक्ता तच्चेदादर्शगोचरम् ॥ लं १३१ ॥

मोहस्वभावावरणाद्धि संवृतिः
सत्यं तया ख्याति यदेव कृत्रिमम् ।
जगाद तत्संवृतिसत्यमित्यसौ
मुनिः पदार्थं कृतकं च संवृतिम् ॥

विनोपघातेन यदिन्द्रियाणां
षण्णामपि ग्राह्यमवैति लोकः ।
सत्यं हि तल्लोकत एव शेषं
विकल्पितं लोकत एव मिथ्या ॥ इति । बो. ३५३ ॥

सवृतिः कथं सत्यमित्युच्यत इति चेल्लोकाध्यवसायतः । लोक एव हि संवृतिसत्यमिह प्रतिपन्नः । तदनुवृत्त्या भगवद्भिरपि संवृतिसत्यमुच्यते । अतएव लोकसंवृतिसत्यमिति शास्त्रेऽपि विशेष उक्त. ॥

परमार्थ —अकृत्रिम वस्तुरूप यदभिगमात्सर्वावृतिवासनानुसन्धिक्लेशप्रहाणं भवति । सर्वधर्माणां निःस्वभावता शून्यता तथता भूतकोटि. धर्मधातुरित्यादिपर्याया । तस्मात्स्वप्नमायाप्रतिबिम्बादिवदिदं प्रत्ययतामात्रमेव अविचारमनोहरमित्यर्थतत्त्वम् । किमिह दु खहेतुना भावाभिनिवेशेन प्रयोजनमिति ॥

अथ इतरा पारमिताः धर्मपदे षड्विधा प्रोक्ता —"दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता च" इति । पारमितापदार्थ पारप्राप्तिः सिद्धिरिति फलितार्थ । व्युत्पत्तिस्त्वेव स्यात्—परम एव पारम प्रज्ञाया पारम· प्रज्ञातिशय सोऽस्तीति प्रज्ञापारमी तस्य भाव. पारमितेति । पारमितापद कर्मपर तस्य पर्यायो विनयपदमिति अष्टसाहस्रिकोपाद्घाते लिखितमस्ति। तदा भाषापद स्यादित्यवधारयाम ॥

एते दानादय सस्कृत्य सम्भृता अपि प्रज्ञामन्तरेण सौगतपदाधिगमहेतवो न भवन्ति नापि पारमिताव्यपदेश लभन्ते । प्रज्ञाकृतपरिशुद्धिभाज पुनरव्याहतोदारप्रवृत्तितया तदनुकूलमनुवर्तमाना तद्धेतुभावमधिगच्छन्ति पारमितापदञ्च लभन्ते। तस्मात् प्रज्ञैव केवला न सम्यक्सबोधिसाधनम्। किन्तु दानादिपरिकर. प्रज्ञार्थ इति सिद्धम् ॥ बो. ३४५

शमथपदवाच्यं ध्यानमपि यथाभूतज्ञानजननशक्तम्। तस्मात्समाहितो यथाभूत जानातीत्युक्तवान्मुनि । एतदपि धर्मसङ्गीतावुक्तम्– "समाहितचेतसो यथाभूतदर्शनं भवति। यथाभूतदर्शिनः बोधिसत्त्वस्य सत्त्वेषु महाकरुणा प्रवर्तते इदं मया समाधिसुख सर्वसत्त्वानां निष्पादयितव्यमिति। स तया महाकरुणया संचोद्यमानोऽधिशीलमधिचित्तमधिप्रज्ञ च आनुपूर्व्याऽनुत्तरां सम्यक्सबोधिमभिसंबुध्यते" इति ॥ (बो. ३४८)

दानादयः वस्तुत· निस्स्वभावा अपि परमार्थतत्त्वाधिगमाय सर्वसत्त्वेषु करुणायमानैः बोधिसत्त्वैरुपादीयन्ते। अन्यथा परमार्थाधिगमायोगात्। ततो दानादिषु प्रवृत्तिरनिवारिता ॥ (बो. ३७२)

बौद्धधर्म

सौगतानां अनुष्ठानक्रमः बोधिचर्यावतारीयः ॥

उद्यमः कर्तव्यः—

न क्लेशा विषयेषु नेन्द्रियगणे नाप्यन्तराले स्थिताः
नातोन्यत्र कुह स्थिताः पुनरिमे मज्जन्ति कृत्स्नं जगत्।
मायैवेयमतो विमुञ्च हृदय त्रासं भजस्वोद्यम
प्रज्ञार्थं किमकाण्ड एव नरकेष्वात्मानमावाधसे ॥ ८९ पु ॥

मानुष्यं नावमासाद्य तर दुःखमहानदीम् ॥
मूढ कालो न निद्रयाः इयं नौर्दुर्लभा पुनः ॥ २५० ॥
क्षणसंपदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी।
यदि नात्र विचिन्त्यते हितं पुनरप्येष समागमः कुतः ॥ ९ पु॥
अव्यापारसुखास्वाद निद्रापाश्रयतृष्णया।
संसारदुःखानुद्वेगादालस्यमुपजायते ॥ २४४ ॥
स्वयूथ्यान् मार्यमाणांस्त्वं क्रमेणैव हि पश्यसि।
तथापि निद्रां यास्येव चण्डालमहिषो यथा ॥ २४६ ॥

तस्मादुत्सङ्गगे सर्पे यथोत्तिष्ठति सत्वरम्।
निद्रालस्यागमे तद्वत् प्रतिकुर्वीत सत्वरम् ॥ २८१ ॥
कायेनैव पठिष्यामि वाक्पाठेन तु किं भवेत्।
चिकित्सापाठमात्रेण रोगिणः किं भविष्यति ॥ १६६ ॥
परात्मसमतामादौ भावयेदेवमादरात्।
समदुःखसुखास्सर्वे पालनीया इहात्मवत् ॥ ३२७ ॥

हस्तादिभेदेन बहुप्रकारः
कायो यथैकः परिपालनीयः।
तथा जगद्भिन्नमभिन्नदुःख-
सुखात्मकं सर्वमिदं तथैव ॥ ३२८ ॥

यदा मम परेषां च तुल्यमेव सुख प्रियम्।
तदाऽऽत्मनः को विशेषः येनात्रैव सुखोद्यमः ॥ इति। ३३० ॥

अपराधः क्ष्मापयितव्यः—

"सर्वापत्तय (अपराधा) बोधिसत्त्वेन पञ्चत्रिंशतां बुद्धानामन्तिके भगवतां रात्रिन्दिवमेकाकिना देशयितव्या। तत्रेयं देशना—अहमेवंनामा बुद्धं शरण गच्छामीत्यारभ्य यावत्सङ्घ शरणं गच्छामि। नमश्शाक्यमुनये तथागतायार्हते सम्यक्सम्बुद्धाय नमो वज्रप्रमर्दिने इत्यारभ्य यावत् उपैमि सर्वान् शरण कृताञ्जलि" इति ॥ (१५३)

अनेकदोषदुष्टेन मया पापेन नायकाः।
यत्कृतं दारुणं पापं तत्सर्वं देशयाम्यहम् ॥ ५९ ॥
मया बालेन मूढेन यत्किञ्चित्पापमार्जितम्।
प्रकृत्या यच्च सावद्यं प्रज्ञप्त्याऽवद्यमेव च ॥
तत्सर्वं देशयाम्येषः नाथानामग्रतः स्थितः।
कृताञ्जलिः दुःखभीतः प्रणिपत्य पुनः पुनः ॥
नाभद्रकमिदं नाथाः प्रकर्तव्यं पुनर्मया।
बोधिसत्त्वत्वबुद्धत्वमनुमोदे च तायिनाम् ॥ ७२ ॥

तायः स्वदृष्टमार्गोक्तिः, तद्विद्यते येषामिति । अथवा--तायः सन्तानार्थ· । आसंसारमप्रतिष्ठितनिर्वाणतयाऽवस्थितानामित्यर्थः । एत एव बोधिसत्त्वाः ॥

एवं सर्वमिदं कृत्वा यन्मया साधितं शुभम् ।
तेन स्यां सर्वसत्त्वानां सर्वदुःखप्रशान्तिकृत् ॥ ७७ ॥

बहूनामेकदुःखेन यदि दुःखं निगच्छति ।
उत्पाद्यमेव तद्दुःखं सदयेन परात्मनोः ॥ ३३८ ॥

जगद्दुःखहरे दुःखे प्रीतिरेवात्र युज्यते ।
दुःखानां विनिवृत्तिर्हि सुखमित्येव निर्णयः ॥ २१० ॥

चित्त दमयितव्यम्—

लाभा नश्यन्तु मे कामं सत्कारः कायजीवितम् ।
नश्यत्वन्यत्तु कुशलं मा तु चित्तं कदाचन ॥ १०७ ॥

यदर्थमेव जीवामि तदेव यदि नश्यति ।
कि तेन जीवितेनापि केवलाशुभकारिणा ॥ २०२ ॥

तस्मात्सर्वसत्त्वेषु मैत्रचित्त मया निक्षेप्तव्यम् । अन्तशो दग्धस्थूणायामपि प्रतिघ चित्तं नोत्पादयितव्यम् ॥ (१९७)

भूमिं छादयितुं सर्वो कुतश्चर्म भविष्यति ।
उपानच्चर्ममात्रेण च्छन्ना भवति मेदिनी ॥ १०२ ॥

दुःखं हन्तुं सुखं प्राप्तुं ते भ्रमन्ति मुधाऽम्बरे ।
यैरेतद्धर्मसर्वस्वं चित्तं गुह्यं न भावितम् ॥ १०४ ॥

लब्ध्वाऽपि सुबहून् लाभान् चिरं भुक्त्वा सुखान्यपि ।
रिक्तहस्तश्च नग्नश्च यास्यामि मुषितो यथा ॥ २०१ ॥

बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्ज्वा समंततः ।
भयमस्तं गतं सर्वं कृत्स्नं कल्याणमागतम् ॥ ९६ ॥

अपकार· परिहर्तव्यः—

आर्यरत्नराशावपि–" परिभुञ्जता चैव मनसिकार उत्पादयितव्य । सन्त्यस्मिन् काये अशीतिकृमिकुलसहस्राणि। तान्यनेनैवौजसा सुख विहरन्तु । इदानी चैषामामिषेण सङ्ग्रह करिष्यामि । बोधिप्राप्तश्च पुन धर्मेण सङ्ग्रह करिष्यामीति विस्तर." इति ॥ (१४०)

तत्र चैकस्यापि प्राणिनोऽपकारे महात्मनां बहूना भगवतामपकार —

येषां सुखे यान्ति सुखं मुनीन्द्राः
येषां व्यथाया प्रविशन्ति मन्युम् ।
तत्तोषणात्सर्वमुनीन्द्रतुष्टिः
तत्रापकारेऽपकृत मुनीनाम् ॥ २३६ ॥
आदीप्तकायस्य यथा समन्तात्
न सर्वकामैरपि सौमनस्यम् ।
सत्त्वव्यथायामपि तद्वदेव
न प्रीत्युपायोऽस्ति दयामयानाम् ॥ २३७ ॥
आत्मीकृतं सर्वमिदं जगत्तैः
कृपात्मभिर्नैव हि संशयोऽस्ति ।
दृश्यन्त एते ननु सत्त्वरूपाः
त एव नाथाः किमनादरोऽत्र ॥ २३९ ॥
तस्मान्मया यज्जनदुःखदेन
दुःखं कृतं सर्वमहाकृपाणाम् ।
तदद्य पापं प्रति देशयामि
यत्खेदिताः तन्मुनयः क्षमन्ताम् ॥ २३८ ॥

शान्तिः सम्पादयितव्या—

मयाऽपि पूर्वं सत्त्वानामीदृश्येव व्यथा कृता ।
तस्मान्मे युक्तमेवैतत् सत्त्वोपद्रवकारिणः ॥ १९२ ॥

मत्कर्मचोदिता एव जाता मय्यपकारिणः ।
येन यास्यन्ति नरकान् मयैवामी हता ननु ॥
मामाश्रित्य तु यान्त्येते नरकान् दीर्घवेदनान् ।
अहमेवापकार्येषां ममैते चोपकारिणः ।
कस्माद्विपर्ययं कृत्वा खल चेतः प्रकुप्यसि ॥ १९५ ॥
पुण्यविघ्नः कृतोऽनेनेत्यत्र कोपो न युज्यते ।
क्षान्त्या समं तपो नास्ति नन्वेतत्तदुपस्थितम् ॥
यथाऽहमात्मदोषेण न करोमि क्षमामिह ।
मयैवात्र कृतो विघ्नः पुण्यहेतावुपस्थिते ॥ २२६ ॥
यो हि येन विना नास्ति यस्मिंश्च सति विद्यते ।
स एव कारणं तस्य स कथं विघ्न उच्यते ॥ २२७ ॥
अश्रमोपार्जितस्तस्मात् गृहे निधिरिवोत्थितः ।
बोधिचर्यासहायत्वात् स्पृहणीयो रिपुर्मम । ॥ २२८ ॥
अपकाराशयोऽस्येति शत्रुर्यदि न पूज्यते ।
अन्यथा मे कथं क्षान्तिः भिषजीव हितोद्यते ॥
तदुष्टाशयमेवातः प्रतीत्योत्पद्यते क्षमा ।
स एवातः क्षमाहेतुः पूज्यस्सद्धर्मवन्मया ॥ २३० ॥
प्रतिमास्तूपसद्धर्मनाशकाक्रोशकेषु च ।
न युज्यते मम द्वेषः बुद्धादीनां न हि व्यथा ॥

वितथाभिनिवेशप्रसूतात्मग्राहनिवृत्ते अभिष्वङ्गाभावान्न व्यथा दौर्मनस्यमिति भाव । यथा परसमये देवगुरुद्विजातिमातापितृप्रभृतीनामर्थे पाप कुर्वतोऽपि न दोष इति मत न तथेहाभिमतमित्युक्त भवति॥ (२०४)

तस्मादमित्रं मित्रं वा दृष्ट्वाऽप्यन्याय्यकारिणम् ।
ईदृशाः प्रत्यया अस्येत्येवं मत्वा सुखी भवेत् ॥ इति । १८८ ॥

आत्मा समर्पयितव्यः—

न प्राप्तं भगवत्पूजामहोत्सवसुखं मया ।
न कृता शासने कारा दरिद्राशा न पूरिता ॥

भीतेभ्यो नाभयं दत्तं आर्ता न सुखिनः कृताः ।
दुःखाय केवलं मातुः गतोऽहं गर्भशल्यताम् ॥ २६३ ॥

एवं बुध्वा परार्थेषु भवेत्सततमुत्थितः ।
निषिद्धमप्यनुज्ञातं कृपालोरर्थदर्शिनः ॥ १२८ ॥

यथाऽऽमुखीकृतश्चात्मा ममायं सर्वदेहिनाम् ।
घ्नन्तु निन्दन्तु वा नित्यमाकिरन्तु च पांसुभिः ॥

क्रीडन्तु मम कायेन हसन्तु विलसन्तु च ।
दत्त एभ्यो मया कायः चिन्तया किं ममानया ॥

कारयन्तु च कर्माणि यानि तेषां सुखावहम् ।
अनर्थः कस्यचिन्मा भूत् मामालम्ब्य कदाचन ॥

अनाथानामहं नाथः सार्थवाहश्च यायिनाम् ।
पारेप्सूनां च नौभूतः सेतुस्संक्रम एवच ॥

दीपार्थिनामहं दीपः शय्या शय्यार्थिनामहम् ।
दासार्थिनामहं दासः भवेयं सर्वदेहिनाम् ॥

चिन्तामणिः भद्रघटः सिद्धविद्या महौषधिः ।
भवेयं कल्पवृक्षश्च कामधेनुश्च देहिनाम् ॥

पृथिव्यादीनि भूतानि निश्शेषाकाशवासिनाम् ।
सत्त्वानामप्रमेयाणां यथा भोग्यान्यनेकधा ॥

एवमाकाशनिष्ठस्य सत्त्वधातोरनेकधा ।
भवेयमुपजीव्योऽहं यावत्सर्वे न निर्वृताः ॥ ८२ ॥

सुखार्थं क्रियते कर्म तथापि स्यान्न वा सुखम् ।
कर्मैव तु सुखं यस्य निष्कर्मा स सुखी कथम् ॥ २७७ ॥

तथागताराधनमेतदेव स्वार्थस्य संसाधनमेतदेव ।
लोकस्य दुःखापहमेतदेव तस्मान्ममास्तु व्रतमेतदेव ॥ २४० ॥

जीवन्नेव विमोक्तव्यः—

निर्वातुकामांश्च जिनान् याचयामि कृताञ्जलिः ।
कल्पाननन्तान् तिष्ठन्तु मा भूदन्धमिदं जगत् ॥ ७६ ॥

आकाशस्य स्थितिर्यावद्यावदप्यवनेः स्थितिः ।
तावन्मम स्थितिः भूयाल्लोकपापानि निघ्नतः ॥ ३७ ॥

परिभोगाय सत्त्वानामात्मभावादि दीयते ।
अरक्षिते कुतो भोगः किं दत्तं यन्न भुज्यते ॥

तस्मात्सत्त्वोपभोगार्थमात्मभावादि पालयेत् ।
कल्याणमित्रानुत्सर्गात् सूत्राणां च सदेक्षणात् ॥ ९५ ॥

पुण्येन कायस्सुखितः पाण्डित्येन मनस्सुखम् ।
तिष्ठन् परार्थ संसारे कृपालुः केन खिद्यते ॥ २५९ ॥

आस्तां भविष्यद्बुद्धत्वं सत्त्वाराधनसम्भवम् ।
इहैव सौभाग्ययशस्सौस्थित्यं किं न पश्यसि ॥

तुष्टः किं नृपतिर्दद्यात् यद्बुद्धत्वसमं भवेत् ।
यत्सत्त्वसौमनस्यैन कृतेन ह्यनुभूयते ॥

प्रासादिकत्वमारोग्यं प्रामोद्यं चिरजीवितम् ।
चक्रवर्तिसुखं स्फीतं शान्तः प्राप्नोति संसरन् ॥ २४२ ॥

बोधिचित्ताद्धि यत्पुण्यं तच्च रूपि भवेद्यदि ।
आकाशधातुं संपूर्य भूयश्चोत्तरि तद्भवेत् । इति ॥ ३२ ॥

एवं पुण्यं सम्पाद्य पापं क्षपयित्वा विद्ययाऽविद्यां विनाश्य निर्वृत· भवेदिति सिद्धान्तः ॥

एवं शून्येषु धर्मेषु किं लब्धं किं हृतं भवेत् ।
सत्कृतः परिभूतो वा केन कस्संभविष्यति ॥ इति । बो ५९०॥

एवं शून्यवादलक्षण महायानं सर्ववादप्रतिपक्षभूतं निरूपितम् । अस्य च वादस्य नागार्जुन एव प्रवक्तेति लङ्कावतारगाथिकाया सूच्यते(२८६)—

निश्चितास्तीर्थवादानां महायानमनिश्चितम् ।
सत्त्वाश्रयप्रवृत्तोऽयं कुदृष्टीनामनास्पदम् ॥

प्रत्यात्मवेद्यमानं मे तार्किकाणामगोचरम् ।
पश्चात्काले गते नाथे ब्रूहि कोऽयं धरिष्यति ॥

निर्वृते सुगते पश्चात्कालोऽतीतो भविष्यति ।
महामते निबोधत्वं यो नेत्री धारयिष्यति ॥

दक्षिणापथवेदल्यां भिक्षुः श्रीमान् महायशाः ।
नागाह्वयस्स नाम्ना तु सदसत्पक्षदारकः ॥

प्रकाश्य लोके मद्यानं महायानमनुत्तमम् ।
आसाद्य भूमिं मुदितां यास्यतेऽसौ सुखावतीम् ॥

इति । भविष्यपुराणवादिद प्रकरणमिति सुधियो विभावयन्ति ॥

एवं सौगतसिद्धान्तरीतयः संप्रकाशिताः ।
लक्ष्मीपुरं श्रीनिवासविपश्चिच्चक्रवर्तिना ॥

इति दर्शनोदये शून्यतादर्शन परिच्छेदः प्रथम

सत्यतादर्शनम्.

स्वभाववाद

ब्रह्मसत्यजगान्मिथ्या सिद्धान्तोऽथ विचिन्त्यते ।
तदुपोद्घातरूपेण कांश्चिद्वादान् विविञ्चमहे ॥

अत्र प्रथम लोकायत स्वभाववाद । स हि स्वाभाविकपरिणामवादापरपर्याय स्थूलदृष्टया लोकप्रसिद्ध इति लोकायत बार्हस्पत्य चार्वाकादिपदैः व्यपदिश्यते । तत्र हीमानि बार्हस्पत्यसूत्राणि भास्करभाष्ये (१९६) समुदाहृतानि—"अथ लोकायतम् । पृथिव्यप्तेजोवायुरिति तत्त्वानि । तत्समुदाये शरीरेन्द्रियविषयसज्ञा । तेभ्यश्चैतन्य किण्वादिभ्यो मदशक्तिवत् विज्ञानम्" इति ॥

तथा—"लोकायतमेव शास्त्रम् । यत्र प्रत्यक्षमेव प्रमाणम् । अर्थकामौ पुरुषार्थौ । भूतान्येव चेतयन्ते । नास्ति परलोक· । मृत्युरेवापवर्गः" इति तत्सिद्धान्तस्वरूपं प्रबोधचन्द्रोदये निरूपितम् ॥

अपि च—

नित्यसत्त्वा भवन्त्येके नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः ॥
अग्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः ।
केनेदं चित्रितं तस्मात् तत्स्वभावो नियामकः ॥

इति न्यायकुसुमाञ्जलिप्रथमस्तबकटीकायामुदाहृतम् ॥

तथा बोधिचर्यावतारपञ्जिकायामप्येवमुदाहृतमस्ति (५४१)—

सर्वहेतुनिराशंसं भावानां जन्म वर्ण्यते ।
स्वभाववादिभिः ते च नाहुः स्वमपि कारणम् ॥

राजीवकेसरादीनां वैचित्र्यं कः करोति हि ।
मयूरचन्द्रिकादिर्वा विचित्रः केन निर्मितः ॥
यथैव कण्टकादीनां तैक्ष्ण्यादिकमहेतुकम् ।
कादाचित्कतया तद्वत् दुःखादीनामहेतुता ॥

इति । सर्वस्याप्यस्य मूल गौतमीय न्यायसूत्रम् " अनिमित्ततो भावोत्पत्ति· कण्टकतैक्ष्ण्यादिवत् " इति । (४–१–२२) विस्तरस्त्वस्य पुरस्तात् कार्यकारणभावविचारे भविष्यति । अत्रापि किंचिदुच्यते— " प्रत्यक्षपरिकलितोपादानशक्तिलक्षणवस्तुस्वभावेनैव परिणामपरम्परा - दर्शनात् स्वभाववाद । तत्र च नियतचेतनादिनिमित्तादर्शनात् निरपेक्ष-वाद । नियतनियामकादर्शनात् यदृच्छावाद· । अप्रार्थितानि अवि-ज्ञातान्येव कार्याण्यनुभूयन्त इति प्रसङ्गवादोऽनुषङ्गवादो वा । देश-स्वभाववत्कालस्वभावकल्पना कदाचिद्वाद· । एवमादीना सर्वेष-वादानां समाहार अकस्माद्वाद इत्याकस्मिकतावादिनो लौका-यता ॥

प्रयत्नवाद

अत्र स्वभाववादे—

स्वप्रवृत्त्यादिनैष्फल्यं शास्त्रादेरप्यनुत्थितिः ।
आलस्यं देशकालादिनियतेरव्यवस्थितः ॥

इत्यादिदोषेण तमेत वादं केवलेर्ष्यासूयादिरूपदु·खप्रदं अपुरुषार्थपर्यवसा-यिनं पुरुषकारानवकाशप्रद आलस्याधायक अनिर्मोक्षप्रद निःस्वभाववाद-लक्षणेन रागादिक्लेशनिवृत्तिहेतुना नैरात्म्यवादापरपर्यायेण पुरुषकार-रूपभावनासाध्यसम्यग्दर्शनफलेन शून्यवादरूपेण प्रयत्नवादेन सौगता निराचक्रुः ॥

तद्वादस्वरूप पूर्वं प्रपञ्चेनोपपादित्तमपि प्रसङ्गात्किंचिदुच्यते । तेषामिय प्रतिज्ञा आर्यलङ्कावतारे (११६ पु.)—

बुद्धया विवेच्यमानानां स्वभावो नावधार्यते ।
अतो निराभिलप्यास्ते निःस्वभावाश्च देशिताः ॥

इति । अनूदितश्चायमर्थ· अक्षपादेनापि न्यायसूत्रे—"बुद्धयाविवेचनात्तु भावानां याथात्म्यानुपलब्धिः । तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत्तदनुपलब्धि." (४-२-२६) इति ॥

भाष्यं तस्येदं वात्स्यायनीयम्—यथा अय तन्तुरयं तन्तुरिति प्रत्येक तन्तुषु विवेच्यमानेषु यथा नार्थान्तर किंचिदुपलभ्यते यत्पटबुद्धेर्विषयः स्यात् याथात्म्यानुपलब्धे· । असति विषये पटबुद्धिर्भवन्ती मिथ्याबुद्धिर्भवति । एव सर्वत्रेति ॥

तथा—"स्वप्नविषयाभिमानवदय प्रमाणप्रमेयाभिमानः । मायागन्धर्वनगरमृगतृष्णिकावद्वा" ॥ (४-२-३२)

भा—यथा स्वप्ने न विषयास्सन्ति अथचाभिमानो भवति । एवं न प्रमाणानि प्रमेयाणि च सन्ति । अथच प्रमाणप्रमेयाभिमानो भवति इति ॥

एते भ्रान्तिवादिन । भ्रमलक्षणं किमपि ज्ञानान्तरमस्तीति वदन्ति । प्रयोजनं त्वस्य प्रागेव निरूपितम् । अग्रेऽपि निरूप्यते । सोऽयं निःस्वभाववादलक्षणः प्रथवादः प्रथममेव विस्तरेण निरूपितः ॥

परिष्कृतस्वभाववाद

अज्ञानात् बन्ध. ज्ञानान्मोक्ष इति सर्वदार्शनिकानां सामान्यतो व्यपदेशः । तत्र किं नामाज्ञान किं नाम च ज्ञानमिति विचारे

प्रवृत्ते अविद्या भ्रान्तिः आरोपः अध्यासः मिथ्याप्रत्यय· इत्यादिभि· पदैः व्यपदेश्य स्वप्नमायागन्धर्वनगरमृगतृष्णिकादिप्रत्ययतुल्यः कश्चित्प्रत्ययः अज्ञानम् । तन्निवर्तकः विद्या प्रमा तत्त्वज्ञान निश्चय. सम्यग्दर्शनं इत्यादिभि पदै व्यपदेश्य पृथिवीगिरिसरित्समुद्रसूर्यचन्द्राग्निदारागारकेदारपशुपुत्रहिरण्यादिप्रत्ययतुल्य कश्चित्प्रत्यय. ज्ञानमिति प्रायः इदानींतनास्सर्वेऽपि दार्शनिका व्यवहरन्ति ॥

पुरा खलु सौगता एवमध्यगच्छन्- ये तु विद्यादिपदव्यपदेश्या प्रत्यया. तेऽपि विवेच्यमाना. अविद्यादिपदव्यपदेश्यप्रत्ययतुल्या एव भवितुमर्हन्ति । ततश्च सर्वे प्रत्यया परमार्थत मिथ्याप्रत्यया एवेति ॥

अत्र साङ्ख्या.-- एव प्रत्ययानां सर्वेषां मिथ्यात्वे अयथार्थत्वे प्रपञ्चश्शून्य एवेति सिद्धयतीति प्रत्यवस्थिता. अविद्यादिपदव्यपदेश्य भ्रमलक्षणमज्ञानमेव प्रथममपलपन्ति स्म ॥

तथाहि—ज्ञान नाम अन्त करणपरिणाम । अज्ञान नाम अपरिणतमन्तःकरणम् । स एवाविवेक अभिमान इत्यप्युच्यते ॥

विवेको नाम प्रकृतिपुरुषान्यताख्याति । चेतनाचेतनभेदज्ञानमित्यर्थ । स चान्तःकरणपरिणाम एव । परिणतमन्तःकरणमिति यावत् एवचाज्ञानलक्षणभ्रमात्मकपरिणामस्यैवाभावात् तद्विषयत्वस्यावस्तुत्वप्रयोजकस्य मूलत एव च्छेदात् प्रपञ्चस्सत्य एव, स्वरूपेण ज्ञायमानत्वात् । ततश्च विवेकख्यात्यभावेनैव बन्ध । सत्यामन्यताख्यातौ मुक्तिरिति सिद्धान्तः ॥

तदेतन्मतमभिसन्धाय वात्स्यायनो न्यायभाष्ये एवमाह—(४-२-१) " मिथ्याज्ञान वै खलु मोहः । न तत्त्वज्ञानस्यानुत्पत्ति मात्रम् । तच्च मिथ्याज्ञानं यत्र विषये प्रवर्तमानं ससारबीज भवति

स विषयस्तत्त्वतो ज्ञेय इति । किंपुनस्तन्मिथ्याज्ञानम् ? अनात्मन्यात्मग्रहः अहमस्मीति मोह· अहंकारश्च " इति ॥

तथाचाहोदयनाचार्योऽपि न्यायकुसुमाञ्जलौ साङ्ख्यसिद्धान्तानुवादसन्दर्भे—" भेदाग्रहाच्च निष्क्रियेऽपि तस्मिन् पुरुषे कर्तृत्वाभिमानः तस्मिन्नचेतने चेतनत्वाभिमान· " इति । अत्राभिमानशब्दप्रयोगोऽपि भेदाग्रहलक्षणाख्यातिवादपरिभाषानिबन्धनः । स्पष्टमेतत् शास्त्रदीपिकायां तर्कपादे प्राभाकरमतानुवादावसरे । एतद्दृष्ट्वैव " मिथ्याज्ञाननिमित्तस्सत्यानृते मिथुनीकृत्याहमिद ममेदमिति नैसर्गिको लोकव्यवहारः " इत्यध्यासभाष्य शाङ्कर प्रवृत्तम् । शेषमुत्तरत्र स्फुटीभविष्यति ॥

एव च प्रपञ्चशून्यवादमूलभूताऽविद्यैव प्रथमं स्वरूपतस्साङ्ख्यैरपाकृता । अत एव साङ्ख्या प्रथमे अख्यातिवादिनः । तदनुयायिन· प्रभाकरमीमांसका इति विवेकोऽवधार्य । शून्यवादस्य साक्षात्प्रतिपक्षभूतः परमार्थवाद· साङ्ख्यसिद्धान्त एवेति सर्वप्रकारेण प्राङ्निरूपितम् ॥

अत्रापि पुनरुच्यते—सर्वमसदिति सौगता सदिति साङ्ख्या· । एवमनित्य नित्य, क्षणिक स्थिर, निस्स्वभाव सुखादिस्वभावं, असत्कार्य सत्कार्यं, परतन्त्र, स्वतन्त्र असत्य, सत्य, अभावात्मक भावात्मकमित्यादि ॥

अत एव लोकेऽपि विरोधोदाहरणाय सुगतकपिलयोरेवादर· । यथा—

सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा ।
तावुभौ यदि सर्वज्ञौ मतिभेदः कथं तयोः ॥ इति ॥

ततश्चार्हतपातञ्जलकौमारिलादय. माध्यस्थ्यमशिश्रयन्निति प्राक्सूचितम् । इदमत्र प्रकाश्यते—स्वरूपेणैव सर्वमसदिति सौगताः प्राहुः । स्वरूपेणैव सर्वं सदिति साङ्ख्या· । एते पुन. सर्वे स्वरूपेण सत् पररूपेणासदिति कथयन्ति—

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते किंचिद्रूप कैश्चित्कदा चन ॥ इति ॥
(श्लोकवा. ४७६)

दूषिता साधिता वाऽपि न च तत्र बलाबलम् ।
कदाचिन्निश्चितं कैश्चित्तस्मान्मध्यस्थता वरम् ॥ इति ॥
(श्लोकवा. ६३३)

नैयायिकादयस्तु—वस्तु न द्व्यात्मकम्. भावः स्वरूपेणैव वस्तुभूत । अभावोऽपि स्वरूपेणैव वस्तुभूत इति विभज्य निरूपयन्ति । अत्रान्यरूपेणासत्त्व घटादे व्यधिकरणधर्मावच्छिन्नाभावो भवति । स हि अनेकान्तवादिमतरीत्या निष्पन्नः । अत एव नव्यनैयायिकैः नोपगम्यते इति तत्त्वम् ॥

ततश्च नैयायिकादिमते स्वभाववाद प्रयत्नवाद च परिष्कर्तुं भाव अभावं नित्य अनित्य चेत्येवंरूपेण विभज्य विलक्षण पन्था समाश्रित इत्यवगम्यते । इदमपर विलक्षण माध्यस्थ्यम् । एव सर्वेऽप्येकान्तवादिनो दार्शनिका परस्परविलक्षणमाध्यस्थ्यनिष्ठा इति निर्णय ॥

एतादृशानामभिप्रायाणामनादित्वस्य प्राङ्निरूपितत्वात् विचारावकाशाय पौर्वापर्यकथनमात्रेण वैदिकादिसिद्धान्ता व्याकुलीकृता इति नार्हन्ति शङ्कितु सुमनस ॥

ततश्चैकान्तवादोऽनेकान्तवादश्चेति द्वैविध्यमवगतं भवति । तत्र न्यायवैशेषिकप्राभाकरादीनामैकान्त्यमभिमतम् । पातञ्जलार्हतभाट्टादीनामनैकान्त्यमभिमतम् ॥

पातञ्जलमनैकान्त्यमेव विज्ञायते—(१-६) "प्रमाणविपर्ययविकल्पनिद्रास्मृतय " इति सूत्रं ज्ञानविभागपरम् । एतेन—न्यायवाद, शून्यवाद, विज्ञानवाद, साङ्ख्यवाद, वेदान्तवादा· स्वीकृता इति विज्ञायते ॥

तथा—(३-१३) " अयमदोष· एकान्तानभ्युपगमात् । तदेतत्त्रैलोक्य व्यक्तेरपैति नित्यत्वप्रतिषेधात् । अपेतमप्यस्ति विनाशप्रतिषेधात् । ससर्गाच्चास्य सौक्ष्म्य सौक्ष्म्याच्चानुपलब्धि " इति व्यासदेवभाष्यम् ॥

अत्रेत्थ तत्त्ववैशारदी—न त्वैकान्तिकी नित्यतामातिष्ठामहे । किंतु तदेतत् त्रैलोक्यं न तु द्रव्यमात्रं व्यक्तेः अर्थक्रियाकारिणोरूपादपैति । प्रतिषेधात् प्रमाणेन । यदिह घटो व्यक्तेर्नापेयात् कपालशर्करावूर्णादिष्वपि व्यक्तो घट इति पूर्ववदुपलब्द्धयर्थक्रिये कुर्यात् । तस्मादनित्य त्रैलोक्यम् ॥

अस्तुतर्ह्यनित्यमेव उपलब्ध्यर्थक्रियारहितत्वेन गगनाराविन्दवत् तुच्छत्वादित्यत आह—अपेतमप्यस्ति । नात्यन्ततुच्छता । नाशप्रतिषेधात् प्रमाणेन । तथाहि—यत्तुच्छ न तत्कदाचिदापि उपलब्ध्यर्थक्रिये करोति यथा गगनाराविन्दम् । तस्मात् कथंचिन्नित्यं परिणामीति सिद्ध भवति ससर्गात् स्वकारणे लयात् सौक्ष्म्य दर्शनानर्हत्वम् । ततश्च नानुपलब्धिरिति ॥

एवं–पुरुषार्थलक्षण स्वभाव एव जगतः प्रवर्तक इति साङ्ख्याः। पुण्यापुण्यलक्षण कर्म निमित्तपदवाच्य प्रवर्तकमिति वैदिकाः। ईश्वरो निरपेक्ष प्रवर्तक इति शैवाद्यागमिका । पातञ्जलसिद्धान्ते तु पुरुषार्थ उद्देश्यतया प्रवर्तक. । निमित्तं प्रतिबन्धकनिरासकतया प्रवर्तकम् । ईश्वरः पुनस्सापेक्ष एवैतदुभय समीकृत्य प्रवर्तक इत्यभ्युपगम्यते। ततश्च सर्वसमाहारः पातञ्जलदर्शनमिति स्पष्टम् ॥

वेदान्तवादः

अतः पर अद्ययावत् स्वभाववादनि स्वभाववादयोरेव परिष्काराः । तत्र बादरायणीयवेदान्तवादोदयचिन्ता—यत एवमनुश्रूयते तन्त्रवार्तिके स्मृत्यधिकरणान्ते—(८१पु)

"याश्चैता प्रधानपुरुषेश्वरपरमाणुकारणप्रक्रिया सृष्टिप्रलयादिरूपेण प्रतीता तास्सर्वा मन्त्रार्थवादविज्ञानादेव दृश्यमानसूक्ष्मस्थूलद्रव्यप्रकृतिविकारभावदर्शनेन द्रष्टव्या । प्रयोजनं च स्वर्गयागाद्युत्पाद्योत्पादकविभागज्ञानम् । सर्गप्रलयोपवर्णनमपि दैवपुरुषकारभावप्रभावप्रविभागदर्शनार्थम् । सर्वत्रैव हि तद्बलेन प्रवर्तते तदुपरमे च उपरमतीति ॥

विज्ञानमात्र क्षणभङ्गनैरात्म्यवादानामपि उपनिषत्प्रभवत्व विषयेष्वात्यन्तिक राग निवर्तयितुमित्युपपन्न सर्वेषां प्रामाण्यम्" इति ॥

तदिद जगदनादिवादिना जैमिनिप्रभृतीना सिद्धान्तरहस्यम् । एवविधे ह्यभिप्राये कदाचिदाचार्यबादरायणात्प्राग्जगति प्रसृते सति बादरायणीयमुत्तरमीमांसादर्शन किमर्थ प्रवृत्तमिति विचारयितुमवकाशस्सम्पद्यते ॥

तत्रेदमादाववधारणीयम् —औपनिषद दर्शन प्राधान्येन नैरात्म्यवादस्य निराकरणार्थमेव प्रवृत्तम् । अत एवाध्यात्मशास्त्रमित्येतस्य

प्रसिद्धि. । तस्य तु नैरात्म्यशास्त्रमिति । ततश्चात्मनि कस्मिंश्चित्सिद्धे भेदाभेदतदुभयताद्विलक्षणवादलक्षणस्य कोलाहलस्यावसर इति विदितमेवैतत् ॥

न हि खलु न्यायवैशेषिकादिशास्त्रवत् प्रमाणप्रमेयपरिशोधनार्थमिदं शारीरक शास्त्र प्रवृत्तम् । अपितु जगत्कारणीभूतब्रह्मस्वरूपनिरूपणार्थम् । यत प्राङ्निरूपिततन्त्रवार्तिकलेखनानुरोधेन सर्वेषा दर्शनानामुपनिषत्प्रभवत्वविज्ञाने सर्वोऽपि दार्शनिको विद्वान् स्वकीयमेव दर्शनमुपनिषदां तात्पर्यभूमिरिति कृत्वा स्वस्वसिद्धान्त एव औपनिषदसिद्धान्त इति प्रतिष्ठापयेत् । ततश्चाव्यवस्थादोष. ॥

एतादृशदोषपरिजिहीर्षयैव भगवान् बादरायण. सर्वोपनिषत्तात्पर्यनिर्णयाय विचाररूप शारीरकमीमांसाशास्त्र बहो कालाद्विविधप्रस्थानप्रस्थितमेकमुखेन प्रवर्तयामास । एव सत्यपि तस्मिन्नेव ब्रह्मकारणत्वसिद्धान्ते मतिभेदा. महतामप्याचार्याणा भाष्यकाराणा समुल्लसन्तीति स एवाव्यवस्थादोषो दुरात्मा समुज्जीवतीति सरलहृदया केचित् खिद्यन्ते । केचित्पुनर्मध्यस्थमनसः लोकपर्यायवृत्तान्तचिन्ताचतुराः—

महतामपि केषांचिदतिवादाः पृथग्विधाः ।
तत्तदर्थप्रशंसादितत्परत्वादबाधिताः ॥

इति विद्वन्मूर्धन्यवेदान्ताचार्योक्तरीत्या यथासप्रदाय समादधति साधवः ॥

सर्वेषामपि दार्शनिकाना स्वस्व दर्शनमौपनिषदीकर्तुमापाततोऽवकाशप्रदानान्युपनिषद्वाक्यानि प्रदर्शयिष्याम.—"अस्तीत्येके नायमस्तीति चैके" (कठ १-२०) इति वाक्य चार्वाकदर्शनस्यावकाशं ददाति । "विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति

न प्रेत्य संज्ञाऽस्ति" (बृ ६-५-१३) इति वाक्य पूर्वस्य विज्ञानवादस्य च। "असद्वा इदमग्र आसीत्, अथात आदेशो नेति नेति" इत्यादि वाक्यं शून्यवादस्य। (तै. २-७) (बृ. ४-३-६)

साङ्ख्यादिदर्शनानां तु वाक्यानि सूत्राणां विषयवाक्यान्येव प्रसिद्धानीति दिक् ॥

अत एव वेदान्तशास्त्रं बौद्धशास्त्रमेवेत्यभिप्रायसूचक प्रबोधचन्द्रोदयेऽपि (२-४) पद्यमिद पठ्यते—

प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥ इति ॥

एकत्ववाद

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

इति वाक्यपदीये (१-१) भर्तृहरिणा विवर्तवादस्सूचित। तथा तत्रैवाष्टमे पद्ये—

तस्यार्थवादरूपाणि निश्चित्य स्वविकल्पजाः।
एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः ॥

इत्येकत्ववाद द्वैतवादश्च प्रदूषित। अनेन व्यवहारेण तत्त्वविषये प्राचीनसमये एकत्ववाद द्वैतवाद इति व्यवहार आसीदिति विज्ञायते। ततश्च विवर्तवादापेक्षया एकत्ववादो विलक्षण भवितुमर्हतीत्यन्वीक्ष्यते। तथाच एकत्ववाद एकतत्त्वपरिणामवादस्स्यात्। अयमेव वादः महाभाष्ये (१-१-१) "यस्मिन् परिणम्यमाने तत्त्व न विहन्यते तदपि नित्यमित्येकं दर्शनम्" इत्यनूदितम्। पातञ्जलसूत्रेऽपि व्यासदेवीयभाष्ये (४-३३) इद वाक्यं दृश्यते। व्याख्यातं चेद

वाचस्पतिमिश्रेण न्यायवार्तिकतात्पर्यटीकायामेवम्—(४-१-१९) "ब्रह्मैव हि प्रपञ्चरूपेण परिणमते मृत्तिकेव घटशरावोदञ्चनप्रभृतिभावेन । नचैव नित्यत्वव्याघातः, परिणामेऽपि तत्त्वाविघातात्, तल्लक्षणत्वाच्च नित्यताया " इति ॥

सोऽय वाद एकतत्त्वलक्षण· वात्स्यायनीयन्यायभाष्ये (४-१-४०) अनूदित " सर्वमेक सदविशेषात् " इति । प्रायेणाय वाद· निरुपाधिकनिषेधप्रतिपक्षतया प्रवृत्तो निरुपाधिकविधिवाद· । " सदेव सोम्येदम् " इति श्रुतिरप्यत्र मान स्यात् ॥

एतमपि सदेकतत्त्ववादं वाक्यपद्यां (३-३४) विवर्तवादसोदरीकृत पश्याम.—

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिः असत्या व्यक्तयो मताः ॥
सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥ इति ।

एष एव सर्वानुगतसामान्यात्मकसल्लक्षणब्रह्मवादः मण्डनमिश्रपरिगृहीत इति विज्ञायते । तथाहि ब्रह्मसिद्धौ—

एकस्यैवास्तु महिमा यन्नानेव प्रकाशते ।
लाघवान्न तु भिन्नानां यच्चकास्त्यप्यभिन्नवत् ॥ इति ।

इद पद्य न्यायमकरन्दे आनन्दबोधाचार्य ब्रह्मसिद्धिरित्याह ॥

तदेतन्मत प्रकरणपञ्चिकाया तत्त्वालोके (१५२ पु) एवमनूदितम्—" यदपि कैश्चित् प्रमेयविकल्पेन सामान्यमेव तत्त्वमिति स्थापयित्वा सत्ताया महासामान्यरूपत्वात् सन्मात्रमेव वस्तु " इति ॥

अयमेव ग्रन्थभागः न्यायमकरन्दे (२९० पुटे) अनूद्य---"तदपि न सत्कल्पम्" इत्यादिना दूषितः। अत एव आनन्दगिरिणापि बृहदारण्यकभाष्ये (२-१-१) "निर्लुठितसामान्यविशेषभावम्" इति ब्रह्म निरूपितम् ॥

एवं मण्डनमिश्रीयाद्वैतसिद्धान्तात् शांकराद्वैतसिद्धान्ते भावाद्वैतमभावाद्वैत जीवाश्रितमज्ञानं ब्रह्माश्रितामित्यादय· भूयांसो भेदास्समुपलभ्यन्ते। तत्र विस्तरभिया इदमेक मुख्यमुदाहरणम्—अद्वैततत्त्वसाक्षात्कारः चरमदेहावसानसमये ध्याननियोगादिना जायत इति मण्डनमिश्रीय. सिद्धान्त इति ज्ञायते। स एवेदानी ज्ञानानुत्पत्तिपक्ष इति व्यवह्रियते। परिशुद्धान्त करणस्य महावाक्यार्थश्रवणादेव यदा कदा वा जायत इति शाङ्करसिद्धान्त । एष एव बाधितानुवृत्तिपक्ष. । अत्र पक्षे तत्त्वसाक्षात्कारे जातेऽपि भेदज्ञान छिन्नमूलमपि मात्रयाऽनुवर्तते इत्युच्यते। तत्र प्रथम पक्ष. जीवन्मुक्तो नास्तीति वाद·। द्वितीयस्तु अस्तीति वाद । प्रथमपक्षे तत्त्वसाक्षात्कारवत उपदेष्टुरभावात् सम्प्रदायो नामान्धपरम्परैव स्यात्। द्वितीयपक्षे सम्प्रदायशुद्धिरिति विभागः। सम्प्रदायो नाम शिष्याचार्यसम्बन्धस्याविच्छेदेन शास्त्रप्राप्ति. ॥

अत्र प्रमाणमिद शांकरं शारीरकभाष्य—(४-१-१५) "ननु वस्तुबलेनैवायमकर्त्रात्मबोधः कर्माणि क्षपयन् कथ कानि चित् क्षपयेत् कानिचिच्चोपेक्षेत। नहि समाऽनेऽग्निबीजसम्पर्के केषांचित् बीजशक्तिः क्षीयते केषांचिन्न क्षीयत इति शक्यमङ्गीकर्तुमिति ॥

उच्यते—न हि तावदनाश्रित्यारब्धकार्यं कर्माशय ज्ञानोत्पत्ति रुपपद्यते। आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले

प्रतिबन्धासम्भवात् भवति वेगक्षयप्रतिपालनम् अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति । बाधितमपि मिथ्याज्ञानं द्विचन्द्रादिज्ञानवत् संस्कारवशात्किञ्चित्कालमनुवर्तत एव ॥

अपिच नैवात्र विवदितव्यम्—ब्रह्मविद कंचित्कालं शरीरं ध्रियते न ध्रियत इति । कथं ह्येकस्य हृदयप्रत्यय ब्रह्मवेदन देहधारणं चापरेण प्रतिक्षेप्तुं शक्यते । श्रुतिस्मृतिषु च स्थितप्रज्ञनिर्देशेन एतदेव निरुच्यते । तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयो. विद्यासामर्थ्यात् क्षय इति निर्णयः" इति ॥

अत्र मण्डनमिश्राभिप्रायेण स्थितप्रज्ञ. साधक इत्यर्थः । शङ्कराचार्याभिप्रायेण स्थितप्रज्ञ· सिद्धः जीवन्मुक्त इत्यर्थः । अधिक भामतीकल्पतर्वोः द्रष्टव्यम् । तस्मात्तत्त्वदर्शिन एवोपदेष्टृतेति भावः ॥

अतएवेत्थ लिख्यते पञ्चपादिकायां—(२० पु) "ब्रह्मविदामेकपुण्डरीकस्य ज्ञानप्रवर्तनप्रयोजनकृतशरीरपरिग्रहस्य भगवतो भाष्यकारस्य मतमागमयितव्यम्" इति ॥

विशिष्टाद्वैतसिद्धान्तेऽपि परभक्तिरूपसाक्षात्कारस्य चरमदेहावसानसमय एवाभ्युपगमात् सम्प्रदायसिद्धि. कथमिति यद्यपि शङ्का समुदेति । तथापि निष्पन्नसमाधीनामपि प्रारब्धशेषाभ्युपगमात् सहजसाक्षात्कारवतो भगवतः, तादृशानामेव नित्यसूरीणां, प्रयत्नजसाक्षात्कारवतां मुक्तानां च जगदनुग्रहायानेकविधावताराभ्युपगमाच्च उपदेष्टृतोपपत्ते सिध्यति सम्प्रदायपरिशुद्धिरित्यल प्रसक्तानुप्रसक्तया ॥

अथात्मैकत्वसिद्धान्ते उपदेष्टा उपदेशः उपदेशफल च कथमिति शङ्कायां बृहदारण्यकभाष्ये भाषितमेवम्—(४-१-२०) "यदुक्तं

ब्रह्मात्मैकत्वे यस्मा उपदेशो यस्य च उपदेशग्रहणफलं तदभावादेकत्वोपदेशानर्थक्यमिति । तदपि न—अनेककारकसाध्यत्वात्क्रियाणां कश्चोद्यो भवति । एकस्मिन् ब्रह्मणि निरुपाधिके नोपदेशो नोपदेष्टा नोपदेशग्रहणफलम् । तस्मादुपनिषदां चानर्थक्यमित्येतदभ्युपगतमेव । अथानेकविषयानर्थक्य चोद्यते ? न—स्वतोऽभ्युपगमविरोधादात्मवादिनाम्" इति ॥

न्यायमकरन्दे (३३१ पु)—"किन्तु विधूताखिलभेदमेकमेव चैतन्यमनाद्यविद्याविनिर्मितगुरुशिष्यविभाग काल्पनिकगुरुपरिच्छेदजनितविद्याविनिवर्त्यनिश्शेषाविद्य मुच्यते" इति दृश्यते ॥

सिद्धान्तबिन्दौ मधुसूदनसरस्वतीवाक्यमिदम् (११७)—"अत्र जीव एव स्वाज्ञानवशात् जगदुपादान निमित्त च । दृश्य सर्वं प्रातीतिकम् । देहभेदाच्च जीवभेदभ्रान्ति । एकस्यैव च स्वकल्पितगुरुशास्त्राद्युपबृंहितश्रवणमननादिदार्ढ्यात् आत्मसाक्षात्कारे सति मोक्ष । शुकादीनां मोक्षश्रवणमर्थवाद" इति ॥

गौडपादकारिका(२-३२)यामपि परमार्थदशादृष्ट्या एवमुच्यते—

न निरोधो न चोत्पत्तिः न बद्धो न च साधकः ।
न मुमुक्षुः न वै मुक्त इत्येषा परमार्थता ॥ इति ॥

द्वैतवाद

साङ्ख्ययोगवैशेषिकादिभि. अनेकपदार्थवादिभिः बहुविधाः पदार्था निरूपिताः । प्रायस्सर्वैरपीदमुच्यते—प्रपञ्चस्य सत्यत्वेऽपि तत्सम्बन्धो बन्धः सम्बन्धविलयो मोक्ष इति ॥

अत एव न्यायमकरन्दे (३०३ पृ.)—"न खलु सम्बन्धो नाम सम्बन्धिभ्यामतिरिक्तः तन्मात्रो वा निपुणनिरूपणपदवीमधिरोहति" इति लिखितम्। निपुणनिरूपणपदवीमधिरोहतीत्येवैतेषामनुभव ॥

अत्रेदं—साङ्ख्यरहस्यम्—दृग्दृश्यभावलक्षणप्रकृतिदर्शनमेव बन्ध। पुनरदर्शनमेव मोक्ष इति। तथाहि—न हि पुरुष एव स्वभावतो विषयसम्बन्धी, अनिर्मोक्षप्रसङ्गात्। नापि प्रकृतिरेव स्वभावतः पुरुषससर्गवती, तस्या अपि नित्यत्वेनानिर्मोक्षप्रसङ्गात्। नापि शब्दादिविषयरूपस्य जगतः आत्मनश्च साक्षात्सम्बन्धः, दृष्टत्वादृष्टत्वव्यवस्थानुपपत्ते। नापि श्रोत्रादीन्द्रियद्वारा, मनसि विषयान्तरव्याप्तेऽपि विज्ञानोदयप्रसङ्गात्। नापीन्द्रियमनोद्वारा, स्वप्नदशायां वराहोऽहं व्याघ्रोऽहमित्याद्यभिमानवत नरस्य नरत्वे सन्निकृष्टेऽपि नरोऽहमित्यभिमानविरहात्। अतो नियतविषयाभिमानव्यापारोऽहङ्कारोऽङ्गीकर्तव्य। नाप्यहङ्कारपर्यन्तव्यापारेण। सुषुप्तयवस्थायां प्रागुक्तसकलव्यापारविगमेऽपि श्वासप्रश्वासौपयिकप्रयत्नलक्षणव्यापारानुपपत्ते। तस्माद्यदेतास्ववस्थासु सव्यापारमेकमनुवर्तते यदाश्रया सर्वाऽपि वासना तदन्तःकरण बुद्धिलक्षणमाश्रित्य घटादिर्विषयः पुरुषस्योपधानी भवति अनुभवगोचरो भूत्वा संसारमावहतीति यावत् ॥

ततश्च आलोचनाख्यः निर्विकल्पकपदवाच्यः व्यापार इन्द्रियाणाम्। विकल्पो मनसः। अभिमानोऽहङ्कारस्य। प्रयत्नलक्षणोऽध्यवसायो बुद्धेरिति श्रोत्रादीनि बाह्येन्द्रियाणि मनोहङ्कारबुद्धिरूपाण्यन्तःकरणानि च स्वीकर्तव्यानि ॥

पुरुषबुद्ध्योः भेदाग्रहात् निष्क्रिये निरतिशये पुष्करपलाशवन्निर्लेपेऽपि पूरुषे कर्तृत्वाभिमानः। तस्मिन्नचेतनेऽपि बुद्धितत्त्वे चेत-

नाभिमान । ततश्च सा बुद्धि घटमिममह करोमीत्याद्यनुभवादश-त्रयवती भवति । पुरुषोपराग विषयोपराग. व्यापारावेशश्चेति त्रयोंऽशाः। तत्र अहमित्यश पुरुषोपराग दर्पणस्येव मुखोपरागोऽतात्त्विक । इद-मित्यश घटादिर्विषयोपराग· नि श्वासाभिहतस्य दर्पणस्येव मलिनिमा तात्त्विक इन्द्रियद्वारा घटाकारेण परिणाम । एतदुभयायत्तो व्यापारा-वेशपदवाच्यः प्रयत्नाध्यवसायः ॥

एव रूपांशत्रयवती बुद्धिपदाभिधेया । बुद्धेर्विषयोपरागलक्षणः घटाकारबुद्धिपरिणाम घटादिना सम्बन्धरूप ज्ञानपदाभिधेय । तेन सह य पुरुषोपरागस्य सम्बन्ध. सैवोपलब्धिपदाभिधेया दर्पणप्रतिबिम्बितस्य मुखस्य दर्पणमलिनिम्ना मलिनिमेव अतात्त्विक । ततश्च बुद्धि. ज्ञान उपलब्धिश्चेत्यर्थान्तरम् ॥

तत्र सत्त्वपुरुषान्यताख्यात्या बुद्धिपुरुषविवेकलक्षणया तत्त्वज्ञान-रूपया विवेकाभावनिबन्धनसर्वसम्बन्धपरिलोपे मुक्तो भवतीति । एव प्रपञ्चसत्यतावादेषु सर्वेष्वनुसन्धेय ससर्गविलय एव मोक्ष इति ॥

इदमत्रावधेयम्—मोक्षसाधनीभूत ज्ञान भावनाबलज प्रत्यक्ष-विशेषरूपमिति केषाञ्चिदभिप्राय । विपरीतवासनानिवृत्त्यनन्तरकालीनं शास्त्रजनितमेव ज्ञानमित्यन्येषामाशय । शास्त्रजनितमेव ज्ञान भावना-बलेन प्रत्यक्षसमानाकार स्मृतिरूपेमेव भवारम्भस्य निष्कृतिरित्यपरेषां सिद्धान्तः ॥

तत्राद्यस्य पक्षस्य पातञ्जला प्रवर्तका· । द्वितीयस्य साङ्ख्याः । तृतीयस्य वाक्यकारा ब्रह्मनन्द्यादयः । तदुक्त महाभारते शान्तौ नारायणीये—" प्रत्यक्षसाधना योगाः साङ्ख्याश्शास्त्रविनिश्चया " इति ।

इदं च वचनं पाञ्चरात्राधिकरणश्रुतप्रकाशिकायामुदाहृत्य निरुक्तरीत्या व्याख्यातम्। "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष" इति वाक्यकार-वाक्यम् (श्रीभाष्ये १-१-१) समुदाहृतम्॥

इदम्पुनरत्रावधेयम्—परमात्मसेवालक्षणया भक्त्या ज्ञानरूपया ये मोक्ष परमात्मप्रसादेन साधयन्ति, तेषा सिद्धान्ते तादृश साक्षात्काररूप ज्ञान मोक्षदशाया यावत्काल फलरूपतया निरतिशयप्रियरूपमनुवर्तते। अयं ससम्बोधमुक्तिवाद॥

साङ्ख्यादीना प्रपञ्चस्य सत्यतावादिना, सौगतादीना शून्यतावा-दिनां, मिथ्यात्ववादिनामौपनिषदाना च मोक्षसाधन ज्ञान सम्बन्ध वा सबन्धिन वा सर्व विनाश्य स्वय विनश्यतीत्येष निस्सम्बोधमुक्तिवाद इति विशेषोऽवगन्तव्य॥

द्वैतैकत्ववाद

सोऽय द्वैतैकत्ववाद भर्तृप्रपञ्च भर्तृमित्र ब्रह्मदत्तादिभि प्रव-र्तितः बृहदारण्यकभाष्ये शाङ्करेऽनूदितो दृश्यते। तथाहि (५-८-१२)—

"अत्र केचिदाचक्षते—परस्य महासमुद्रस्थानीयस्य ब्रह्मणोऽक्ष-रस्य अप्रचलितस्वरूपस्य ईषत्प्रचलितावस्था अन्तर्यामी। अत्यन्तप्रच-लितावस्था क्षेत्रज्ञः, यस्तं न वेदान्तर्यामिणम्। तथाऽन्या पञ्चा-वस्थाः कल्पयन्ति। तथाचाष्टावस्था। (पिण्डो जाति विराट् सूत्र दैव-मित्येव महाभूतसस्थानलक्षणाः पञ्चावस्था., अव्याकृत साक्षी क्षेत्रज्ञ-श्चेत्यष्टावस्थाः) अन्ये त्वक्षरस्य शक्तय एता इति वदन्ति अनन्त-शक्तिमदक्षरमिति। अन्ये त्वक्षरस्य विकारा इति वदन्ति। एता असत्याः सर्वाः कल्पनाः, भेदस्तूपाधिकृत इति ब्रूम." इति॥

सोऽय वाद जरन्मायावाद इत्यनूद्यते नवीनै । एतेषु जरन्मायावादिषु केचित् ध्याननियोगवादिन । केचित्तु निष्प्रपञ्चीकरणनियोगवादिन इति विभागोऽपि श्रीभाष्ये समन्वयाधिकरणे परिदृश्यते । विस्तरस्तु तत्रैवानुसधेय. ॥

भास्करभाष्ये तु (८३) "अन्ये प्राहु —अपहतपाप्मादिरूपमात्मतत्त्वं कर्तव्य श्रवणमननादिनियोगानुष्ठानेन । स च नियोग अपञ्चप्रविलापनमापादयतीति श्रुतिसिद्धमेवेति । तदपेशलम् — यदुत्प्रेक्षितमात्मना तत्सर्व नियोगमस्तके अध्यारोप्य व्यवह्रियते" इति ॥

अपरेऽपि भास्करभाष्ये एते विशेषा —

एकस्यैकत्वमस्तीति प्रमाणादेव गम्यते ।
नानात्वं तस्य तत्पूर्व कस्माद्भेदोऽपि नेष्यते ॥

यत्प्रमाणैः परिच्छिन्नमविरुद्धं हि तत्तथा ।
वस्तुजातं गवाश्वादि भिन्नाभिन्न प्रतीयते ॥

प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते ।
विरोधे चाविरोधे च प्रमाणं कारणं मतम् ॥

एकरूपं प्रतीतत्वात् द्विरूपं तत्तथेष्यताम् ।
एकरूपं भवेदेकमिति नेश्वरभाषितम् ॥ १६ पु ॥

अतो भिन्नाभिन्न ब्रह्मेति स्थितम् । अपि च—

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥

इति । भामत्यां समन्वयनये श्लोकोऽयमुदाहृत । तथा—

नरभेदात् न हि ज्ञेया वस्तुनस्सदसत्यता ।
न हि रूपमनन्धानां सत्यमन्धेष्वसद्भवेत् ॥

न हि द्विचन्द्रः प्रागासीत् पश्चान्नास्तीति युज्यते ।
द्विचन्द्रज्ञानतुल्यत्वं प्रत्यक्षादेस्त्वयोच्यते ॥ १७ ॥ इत्यादि ॥

तथा—(७५) "जीवानां परस्पर भेद एव। परमात्मना चाभेद. फेनतरङ्गादीनामिव । तेन च बन्धमोक्षव्यवस्था" इति ॥

तथा (१६२) "तत्त्वमसीति श्रुते· भिन्नाभिन्नो जीव । स्वाभाविक नित्यसिद्धमभिन्न रूपम् । इतरदौपाधिक प्रवाहनित्यमिति विवेकः" इति ॥

तथा—(३९) "तस्मात्तदशभूतस्य अविद्याकामकर्मयोगात्ससारित्वम्" इति ॥

तथा—(१०५) "तदनन्यत्वमित्यत्र च अस्माभिरुक्त शक्तिविक्षेपलक्षणः परिणाम इति । ईश्वरस्य द्वे शक्ती भवत भोग्यशक्तिरेका भोक्तृशक्तिरपरा । भोग्यशक्तिश्च सा आकाशादिरूपेण परिणामोपपत्ते । भोक्तृशक्तिस्सा चेतना जीवरूपेणावतिष्ठते" इति ॥

तथा—(१६०) "एकमेव वस्तु, न धर्मधर्मिभेदेन स्वरूपभेदः न हि गुणरहित द्रव्यमस्ति। द्रव्यरहितो वा गुण इति स्थिति. " इति ॥

तथा (१६६)—

ब्रह्माप्येति प्रपञ्चोऽयं रूपं हित्वा तु वैकृतम् ।
जहाति कठिनावस्थां जलधौ लवणं यथा ॥

चेतने चेतनं क्षिप्तमभेदाच्चेतनो भवेत् ।
रुमायां वस्तु विन्यस्तं तत्सर्व लवणं भवेत् ॥ इति ।

अपि च शब्दैकसमधिगम्ये वस्तुनि यथाशब्द प्रत्येतव्यमिति सर्वो भार श्रुतिशिरसि समारोप्यतेऽस्मिन् पक्षे । अत्रैव भाष्ये (२२१)

"न पुरुषकल्पनामनुरुध्यामहे। किं तु निर्दोषश्रुतिनिर्गतां वाणीमुदीक्षामहे" इत्यस्ति ॥

तथा—(२०८) "कर्म च केन द्वारेण मोक्षं प्रत्युपकरोतीति चेत् को जानीयात् मातृतुल्या हि श्रुतिराह" इति ॥

तथा—(१४०) "निरवयवस्य कथमंश? आगमादवगमात्" इति ॥

तथा—(२०७) "तमेतं वेदानुवचनेनेति श्रुते ज्ञानं प्रत्यपवर्गसिद्धौ यज्ञादयः तृतीयया विभक्त्याऽङ्गत्वेन प्रयाजादिवद्विधीयन्ते" इति ॥

तथा—(२४७) "मुक्तानां सर्वशक्तित्वात् सत्यसंकल्पत्वात् निर्माणशरीरेषु भोगसंपत्तिः तत्साधनभूतानि च मनांसि प्रादुर्भवन्ति। दर्शयति च शास्त्रम्—स एकधा भवतीत्यादि" इति ॥ अलं प्रसक्तानुप्रसक्तया ॥

इदमेव भेदाभेददर्शनं प्राचीनैः बहुधा निरूपितमित्यवधारयामः। यथा कात्यायनकारिका सर्वार्थसिद्धयुदाहृता (३--२८)—

ईश्वराव्याकृतप्राणैर्विराट् सिन्धुरिवोर्मिभिः।
यत्प्रनृत्यदिवाभाति तस्मै सद्ब्रह्मणे नमः ॥ इति।

तथा—(३-३०) "अन्ये तु भेदाभेदवादिन आहुः निष्कलचिदानन्दजलधिः अपारस्वानन्दानुभवप्रीतिजनितनानाविकार एव स्वल्पमंश जडरूपं संकल्प्य तमेवाजडेन चिदंशान्तरेण संयोज्यानन्तविचित्रसुखदुःखानुभवभागिनं कृत्वा तद्दर्शनेन प्रीयते" इति ॥

एतादृशमेव पन्थानमनतिभिदुरमाश्रित्य यादवप्रकाशाचार्यादयोऽपि भाष्याण्यभाषन्त । श्रीमान् रामानुजाचार्योऽप्यस्यैव मार्गस्य अदूरविप्रकर्षेण प्रक्रियाभेदेन प्रवर्तक इति स्पष्टमग्रे भविष्यति ॥

ब्रह्मसत्यजगन्मिथ्यासिद्धान्तविशुश्रुत्सया ।
जगत्सत्यत्वसिद्धान्ते सप्त वादा निरूपिताः ॥

लक्ष्मीपुरंश्रीनिवासविपश्चिच्चक्रवर्तिना ।
महामहोपाध्यायेन रत्नेन च विपश्चिताम् ॥

इति दर्शनोदये सत्यतापरिच्छेदो द्वितीय

प्रपञ्चमिथ्यात्वदर्शनम्.

अद्वैतवाद

अथ प्रपञ्चमिथ्यात्वसिद्धान्तः बहुविश्रुतः ।
तत्स्वरूप सुविशदं प्रपञ्चेन विचिन्त्यते ॥

एकत्ववादो नामैकमेव तत्त्वम्, कार्य कारणं चैकमेव इत्यभिप्रायसार । यथा साङ्ख्यसिद्धान्त । अद्वैतवादस्तु न तादृश । अपितु द्वैतलक्षणभेदस्य निषेधमात्ररूप ऐक्यानभ्युपगमात् । सोऽयं वाद अनन्यत्व तादात्म्यमित्यादिपदैर्व्यवह्रियते । अत एव "तस्मात्कारणस्यात्मभूता शक्ति । शक्तेरात्मभूत कार्यम् । अतस्तादात्म्यमुपगन्तव्यम्" इति (२-१-१८) शारीरके भाषितम् । अत्र तादात्म्य न स्वरूपैक्य, नापि भेदाभेद , अपितु अनन्यत्वम् । बृहदारण्यकभाष्येऽप्येव निर्णयो दृश्यते—(२- १—२०) " आत्मनो याथात्म्य क्रियाकारकफलभेदादिशून्यमत्यन्तमद्वैतम् " इति ॥

तथा—अनन्यत्वसूत्रभामती " न खलु अनन्यत्वमित्यभेद ब्रूम कि तु भेद व्यासेधाम । ततश्च नाभेदाश्रयदोषप्रसग. । किन्त्वभेद व्यासेदद्भि. वैशेषिकादिभिरस्मासु साहायकमेवाचरित भवति " इति स्पष्टमुच्यते ॥

न्यायमकरन्देऽपि (३०२ पु) "न हि वय भेदप्रपञ्चस्य तत्त्वतश्चिदात्माभेद वर्णयाम । किंतु न भिन्नो नाप्यभिन्न नापि भिन्नाभिन्नः । अनाद्यविद्याविलसितम्" इति ॥

वेदान्ताचार्यैश्च सर्वार्थसिद्धौ (४-२२) बाह्याद्वैत भिद्यमानापह्नवरूपम् । वेदान्ताद्वैत भेदापह्नवरूपमित्यभिहितम् ॥

तथाच प्रपञ्चविषये अद्वैतवाद इत्येव व्यवहारस्समुचितः। जीव-ब्रह्मविषये तु एकत्ववाद इति व्यक्तमेव। अत एवैवमभाषि—"आत्मै-कत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इत्यध्यासभाष्यान्ते॥

अतएव आरम्भणाधिकरणे द्वैतैकत्वसिद्धान्तदूषणावसरे शारी-रकभाष्ये—"नन्वेकत्वैकान्तवादिना नानात्वाभावात्" इति पर-प्रक्रियासूचनायैकत्वैकान्तपदमेवोपात्तम्, नाद्वैतपदमिति रहस्यम्। सूत्र-कृताऽप्याचार्यबादरायणेन अभेदादिपदमपहाय अनन्यत्वपदमेव प्रयुक्त-मित्यपि वदन्ति॥

एतादृशोऽद्वैतवादलक्षणोऽनन्यत्ववाद अपूर्व विजातीय परि-ष्कार इति न मन्तु मर्हन्ति सन्त, यत व्याकरणाचार्यसप्रदायप्रवचन-कर्तृभिः वररुच्याचार्यै अनन्यत्ववादोऽनेकान्तवाद एव भवति इति निरूपितमस्ति। एव निरूपणस्य प्रसक्तये "अनन्यत्ववाद एकत्ववादो वा भेदनिषेधमात्रवादो वा एकान्तलक्षण एव स्यात् इति केषांचिदभिप्रायः प्रागासीदिति निर्णीयते। तथाहि सति एतादृश अनन्यत्ववाद ससारेऽस्मिन् प्रचलितपूर्व इति समुल्लिख्यते॥

तथाहि—व्याकरणमहाभाष्ये प्रथमपादे नवमाह्निके (२३९) "सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्, अनन्यत्वाच्च। अनेकान्तो ह्यनन्यत्वकर" इति वार्तिक प्रवृत्तमस्ति। तस्येद पातञ्जल महा-भाष्यम्—"सवर्णेण्ग्रहणमपरिभाष्यम्। कुत आकृतिग्रहणात् अव-र्णाकृतिरुपदिष्टा सर्वमवर्णकुल ग्रहीष्यति। तथेवर्णाकृतिरुवर्णाकृति। ननु चान्याऽऽकृतिरकारस्यान्याऽऽकृतिराकारस्य च? अनन्यत्वात्। अनन्याऽऽकृतिरकारस्याऽकारस्य च। अनेकान्तो ह्यनन्यत्वकर.। यो ह्यनेकान्तेन भेद नासावन्यत्व करोति। तद्यथा—न यो गोश्च

शोश्च भेद सोऽन्यत्वं न करोति । यस्तु खलु गोश्चाश्वस्य च भेदः सोऽन्यत्व करोति" इति ॥

अत्रात्यन्तभेद एवान्यतापादक इत्युक्त भवति । अन्यतानिषेधस्तु अनन्यत्वलक्षण. अनेकान्तवाद एवेत्यभिप्राय । एवं लेखन तुरीयकोटिलक्षणमद्वैतवादमपि प्रतिरुणद्धीति पूर्वपक्षरूपया प्रतियोगिनिरूपण दृष्टया समुत्प्रेक्ष्यते । एकान्तवादे तु अभेदानन्यत्वयो न कश्चिद्विशेष इति भेदैकान्तवादस्य प्रतियोगितया समर्पण न सहृदयहृदयङ्गम भवतीति विमृशन्ति विद्वास ॥

एव तत्त्वान्यत्वाभ्या दुर्निरूपत्वलक्षणा युक्ति शून्यवादिभि वस्तुन स्वरूपेणापलापे ब्रह्मास्त्रीकृता । सैषैव युक्ति अपलापमसहमानै विलक्षणमार्गावलम्बनाय हेतूकृतेत्युत्तरत्र विस्तर ॥

विवर्तवाद

प्राचीनप्रबन्धेषु परामृश्यमानेषु विवर्तपद परिणामपर, विवर्तपरिणामपदयो· पर्यायता चेत्यवगम्यते। यथा शारीरकभाष्ये—रचनानुपपत्तिसूत्रे "प्रधानमचेतन चेतनस्य पुरुषार्थ साधयितु स्वभावभेदेनैव विचित्रेण विकारात्मना विवर्तते" इति परिणामवादिसाख्यसमयानुवादसमये विवर्तपद प्रयुक्तमस्ति ॥

बोधिचर्यावतारेऽपि सांङ्ख्यमतानुवादे—(५६२ पु) "एव किल प्रधानात् कार्यरूपेण जगद्विवर्त प्रवर्तते" इत्यस्ति ॥

एव तत्रैव औपनिषदमतोपन्याससमये—(४'५५) "उपनिषद्वादिनस्तु समस्तप्राणिसन्तानान्तर्गतमेकमेव व्यापि नित्य च ज्ञानमिच्छन्ति । तद्विवर्तरूपतया सकलमिद क्षितिजलपवनहुताशनादिक

जगदवभासते । तत्स्वभाव एव चात्मा । न बाह्य किमप्यवयविपरमाण्वादिक ग्राह्य प्रमाणसिद्धमस्ति । आह च—

नित्यो ज्ञानविवर्तोऽय क्षितितेजोजलादिकः ।
आत्मातदात्मकश्चेति सङ्गिरन्तेऽपरे पुनः ॥

ग्राह्यलक्षणसंयुक्तं न किञ्चिदिह विद्यते ।
विज्ञानपरिणामोऽयं तस्मात्सर्वं परीक्ष्यते ॥

इति । अत्र सर्वं विज्ञानलक्षणात्मपरिणाम । स एव ज्ञानविवर्त इत्युच्यते । स्वतन्त्र किमपि वस्तु नास्तीति ग्राह्यलक्षणेत्यादिनोच्यते ॥

एष एव खलु प्राचीनो वेदान्तसिद्धान्त. सल्लक्षणब्रह्मपरिणामप्रपञ्च इति । अत एव हि भर्तृप्रपञ्चादिभि ब्रह्मैवाव्याकृताद्यष्टावस्थापत्त्या प्रपञ्चो भवतीत्यभिधीयते । तत्र हि सिद्धान्ते भ्रमविषयीभूत रज्जुसर्पादिकमपि तदानीतन कश्चित्पारमार्थिक दोषघटितसामग्रीनिबन्धन. परिणामविशेष इति तन्मार्गगामिनि भास्करभाष्ये विलक्षणसत्ख्यातिनि रूपणेनावधार्यते । दर्पणादिषु मुखादिप्रतिबिम्बमपि तात्कालिक· परिणाम इत्येव ते प्रतिपेदिरे । अय प्रतिबिम्बोदयसिद्धान्त कुमारिलेन श्लोकवार्तिकेऽप्यनूद्य निराकृतोऽस्ति ॥

ततश्च विवर्तपद परिणामपद च पर्यायभूत परमार्थभूतानेकवस्तु प्रतिपादकमिति व्यतिकरेण प्रयोगात् प्राचीनोऽयमौपनिषद सर्वं सदिति वाद साङ्ख्यसिद्धान्तानुयायी ॥

तस्य चैतस्य वादस्य प्रतिपक्षभूतो वादः सर्वमसदिति वादः । असल्लक्षणाभावात्मकशून्योपादानवाद । तस्मिन् हि वादे विवर्तपद परिणामपदं च भ्रान्तिसिद्धतुच्छरूपवस्तुपरमित्येव तेषां व्युत्पत्ति. । रज्जु-

सर्पशुक्तिरूप्यप्रतिबिम्बकृत्रिमादिशब्दजात सर्व तुच्छलक्षणनिरुपाधिक-शून्यपरमित्येव तेषां व्यवहार. । प्रपञ्चोऽस्य प्रागेव कृत ॥

विवर्तवादपरिणामवादौ मिथो विलक्षणौ रुचिभेदेन प्राचीनै· प्रथमै विद्वद्भि वैयाकरणै· परिगृहीतौ । तावेतौ वादौ सौगतवासनया वा साङ्ख्यानुयायिवेदान्तवासनया वा तेषामागताविति शक्यते तर्कयितुम् । यद्वा सर्वाभिप्रायानादितावादिनामस्माक किमनया चिन्तया ॥

तथा हि—(वाक्य ३४७) प्रतिभावाक्यार्थवादिन. वार्ताक्षौदम्बरायणादय । तेषां शब्दार्थासम्पर्शवादोऽभिमत शब्दः अर्थ सम्बन्धश्च कल्पित विकल्प इति तेषामभिप्राय । तदुच्यते—

विकल्पयोनयश्शब्दा· विकल्पाः शब्दयोनयः ।
कार्यकारणता तेषा नार्थ शब्दा· स्पृशन्त्यमी ॥ इति ।

व्यवहारस्तु लोके प्रातिभ वैज्ञानिक सावृत इति ते वदन्ति ! अत एवैतान् शाब्दिकसौगता इति सर्वार्थसिद्धयदौ वैदिका व्यवहरन्ति । शाबरे भाष्ये सम्बन्धाक्षेपवादे वाक्यार्थवादे च एतेषा मत सूचितमस्ति ॥

सोऽयमौदुम्बरायणः यास्केनापि निरुक्ते निरुक्तग्रन्थानारभ्यत्वशङ्काकर्तृत्वेन समुल्लिखितः । अयमतस्सर्वशून्यवादी । तस्य प्रतिपक्षतयाऽवस्थितश्शाकटायन. स्फोटवादी । शब्दतत्त्वमात्रस्य पारमार्थ्यमयमङ्गीकरोति । तन्मतमाश्रित्य औदुम्बरायणसिद्धान्त निराकृत्य निरुक्तग्रन्थारम्भ समर्थयति यास्क', शाकटायनमपि प्रमाणत्वेन समुल्लिखति । ततश्च वैयाकरणा. प्रथमे विद्वांस सर्वशून्यवादिनो वार्ताक्षौदुम्बरायणादीन् स्फोटवादेन निराचक्कुर्यथा वेदान्तिनो ब्रह्मवादेन शून्यवादिनो माध्यमिकादीन् ॥

वार्तिककृता वररुचिनाऽपि सर्वानित्यतावादमूल शब्दार्थासम्पर्श-वादलक्षण प्रतिभावाद शब्दशास्त्रानारम्भशङ्कामूलभूत निराकर्तुं "सिद्धे शब्दार्थसम्बन्धे" इति वार्तिक प्रणीतम् । तदेतद्वार्तिक "शब्दे अर्थे सम्बन्धे च नित्ये" इति पतञ्जलिनाऽपि महाभाष्ये व्याख्यातम् । अमुमेवार्थ भर्तृहरि वाक्यपद्यामेव सदृब्धवान्—

नित्याश्शब्दार्थसम्बन्धा. समाम्नाता महर्षिभिः ।
सूत्राणा सानुतन्त्राणां भाष्याणां च प्रणेतृभि. ॥ इति ॥१-२३॥

जैमिन्यादयोऽपि वेदव्याख्यानरूपपूर्वमीमासाशास्त्रानारभ्यत्व-शङ्काहेतुभूतप्रतिभावादाद्यपनोदनायैव एवमसूत्रयन् "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध." इत्यादि । तत्र हि वर्णा एव कूटस्थनित्याः अकारादयः शब्द । आकृतिरेव गोत्वादिरर्थ । सम्बन्धस्तु स्वाभाविक इति औदुम्बरायणमत शून्यवाद शाकटायनमत स्फोटवाद च निराकृतवन्त. ॥

एष एव हि स्फोटवादः विवर्तवादरूप परिणामविलक्षण वाक्यपद्यारम्भे वैयाकरणदर्शनप्रवचनकर्त्रा भर्तृहरिणा समाश्रित प्रतिज्ञातश्च—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत. ॥ इति ॥

स च भर्तृहरि चन्द्राचार्यशिष्यस्य वसुरातस्य शिष्य । एतेषा सम्प्रदायस्त्वेव वाक्यपद्यामवगम्यते (२-४८४)

प्रायेण संक्षेपरुचीन् अल्पविद्यापरिग्रहान् ।
संप्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते ॥
कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥

अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात् ।
तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः ॥
बीजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः ।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकर्मुके ॥
यः पतञ्जलिशिष्येभ्यः भ्रष्टो व्याकरणागमः ।
कालेन स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः ॥
न्यायप्रस्थानमार्गास्तानभ्यस्य स्वं च दर्शनम् ।
प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः ॥

इति । अत्र सग्रहो नाम व्याडिना प्रणीत सग्रहनामको ग्रन्थ । तमनुसृत्यैव पतञ्जलि महाभाष्य प्रणीतवान् । तथा सग्रहनामक व्याकरणागममनुसृत्य चन्द्राचार्यवसुरातादिभिः पुनस्सग्रह कृत । तैस्य-सग्रह वाक्यपदीनामा प्रबन्ध इत्यर्थ ॥ इति ॥

अस्मिश्च व्याकरणदर्शने शब्दात्मकस्फोटपर्याय वा अर्थात्मक-भावलक्षणसत्तापर्याय वा ज्ञानात्मकचित्पर्याय वा ब्रह्म प्रपञ्चस्य मूल-कारणमिति मतभेदो विज्ञायते । तस्य च ब्रह्मण कारणत्व परिणाम-लक्षणविकाराश्रयत्वरूपमिति वार्ष्यायणिसिद्धान्त । तमेत सिद्धान्त वार्ष्यायणिनामसकीर्तनपूर्वक यास्क एव निरुक्तप्रारम्भे षड्भावविकार-निरूपणेन निरूपितवान् । सोऽय परिणामवाद । विवर्तवादस्तु भर्तृहरिणा स्वीकृतः । प्रत्यासापरपर्यायाध्यासरूपाविद्यावाद औदुम्बरायणसम्मत. ॥

अत एव विवर्तवादस्य वैयाकरणा प्रथमप्रवर्तका इति सूच-यितुं संक्षेपशारीकारम्भे सर्वज्ञात्ममुनिरित्थ स्तौति —

औत्पत्तिकी शक्तिरशेषवस्तु
प्रकाशने कार्यवशेन यस्याः ।

विज्ञायते विश्वविवर्तहेतोः
नमामितां वाचमचिन्त्यरूपाम् ॥ इति ॥

मतभेदेन त्रिविध वैयाकरणदर्शनं स्फोटसिद्ध्यादिप्रबन्धप्रणेत्रा मण्डनमिश्रेण विधिविवेकनामके प्रबन्धे समुल्लिखित पश्याम । तथाहि—(२८७ पृ) "एकस्य शब्दात्मन. प्रत्यासात्परिणामाद्विवर्तात्" इति ॥

अत्रेत्थ वाचस्पतिमिश्रीया न्यायकणिकाख्या व्याख्या "प्रत्यास अध्यास । यथा—स्वच्छधवले लाक्षारसावसेकतिरस्कृतधवलिम्नि स्थवीयसि स्फटिकमणौ तनीयस्तया लाक्षालक्षणद्रव्याग्रहणात् लाक्षागुणारोपेण अरुणः स्फटिकमणिरिति मतिरध्यास । तथा नानापदार्थेषु तिरस्कृतभेदेषु तस्य स्फोटात्मनः तात्त्विकमेकत्वमारोप्य एको वाक्यार्थस्ससर्गात्मेति । समूहिषु च किंशुकादिषु तिरस्कृतभेदेषु वनमिति वा समूह इति वा पदस्य तात्त्विकमेकत्वमारोप्य एकत्वबुद्धिः । एव शशविषाणादिषु असद्भूतेषु शशविषाणमित्यादिपदगतसत्त्वाध्यारोपेण प्रतीतिरिति प्रत्यासार्थ ॥

परिणामोऽपि यथा—एक सुवर्णतत्त्व कटकमकुटकर्णिकाङ्गुलीयादिभेदेन विपरिणमते तथा शब्दतत्त्वमपि नानापदार्थरूपेणेति । एतस्मिश्च दर्शने भेदाना कथचित् पदतत्त्वात् भिन्नानां पारमार्थिकत्वम् । एव स्फुरणमात्रेण चास्य पक्षस्योपन्यास ॥

विवर्तस्तु यथा—मुखमेक अनेकेषु मणिकृपाणदर्पणादिषु सद्भूतेषु विवर्तमान तच्छायापत्तौ विभिन्नवर्णपरिमाणदेश चकास्ति । न तु तत्र तत्त्वतो भिन्नवर्णपरिणामदेशानि मुखानि सन्ति । एवमनाद्यविद्यावासनोपघातवशात् पदतत्त्वमेक अनेकपदार्थात्मना प्रथते । नतु पदार्था ततो विभिद्यमानात्मानः परमार्थतस्सन्तीति । एते प्रत्यास-

परिणाम–विवर्ताः मतभेदेन मन्तव्या इति" इति। अत्र विभिद्यमानात्मान इति पदेन भेदनिषेध एव विवर्त इति स्फुटमुक्तं भवति॥

एवं भेदमवधार्यैव न्यायवार्तिकतात्पर्यटीकायां (४-१ १९= ४१७ पु) "मा भूदय प्रपञ्चश्शून्योपादानः। अपितु ब्रह्मोपादानो भविष्यति। ब्रह्मैव हि प्रपञ्चरूपेण परिणमते मृत्तिकेव घटशरावादश्चेन-प्रभृतिभावेन। नचैवं नित्यत्वव्याघात, परिणामेऽपि तत्त्वाविघातात्, तल्लक्षणत्वाच्च नित्यताया। यदाह—(महाभाष्यं १-१-१) यस्मिन् तत्त्व न विहन्यते तदपि नित्यमित्येक दर्शनम्" इति। अपर च—ब्रह्मैवानिर्वचनीयानाद्यविद्योपधानात् नामरूपप्रपञ्चभेदेन विवर्तते मुखमिव एकमनेकमणिकृपाणादिभेदात् नैकविधप्रतिबिम्बभेदेन" इति॥

अनेन संदर्भेण विवर्तवादपरिणामवादयोर्भेद उक्तः। भामत्यां तु—परिणामशब्दोऽपि विवर्तपर एवेति सिद्धान्तितः। (१-४-२७) ततश्च वाचस्पतिमिश्राणां मते अद्वैते अविद्यावादमायावादभ्रान्तिवाद-विवर्तवादसवृतिवादानमैक्याभिप्रायेण विवर्तवाद मनिर्वचनीयापरपर्यायं विक्षेपशक्तिविलासं प्रधानीकृत्य व्यवहारः प्रवर्तत इतिनिर्णयः। यतश्च तैः भामत्यामादावन्ते चैवमभिहितम्—

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोऽवनयः।
यतश्चाभूद्विश्वं चरमचरमुच्चावचभिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम्॥ इति॥

यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः।
यन्न्याययोगसाङ्ख्यानां वेदान्तानां निबन्धनैः॥
समचैषं महत्पुण्यं तत्फलं पुष्कलं मया।
समर्पितमथैतेन प्रीयतां परमेश्वरः॥ इति॥

एवं च प्राचीनो विवर्तवाद· विश्वापह्नवलक्षण । नवीन· पुनः अनिर्वचनीयद्वारेण तादृश एवेति विवेकोऽवगन्तव्य. ॥

विवरणग्रन्थे तु विवर्तपरिणामविवेक. एव दृश्यते—(२१२ पु) "एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीतासत्यानेकरूपावभासः विवर्तः । एकस्य पूर्वरूपपरित्यागेन सत्यरूपान्तरापत्ति परिणाम " इति ॥

भास्करभाष्ये तु परिणामपदार्थ एव निरूपित. (९६)—

अप्रच्युतस्वभावस्य शक्तिविक्षेपलक्षणः ।
परिणामः यथा तन्तुनाभस्य पटतन्तुवत् ॥ इति ॥

अत्र पूर्वरूपस्य परित्यागो नास्तीति गम्यते । एष एव प्राचीन· पारिणामवादः भर्तृप्रपञ्चादिसम्मतस्स्यात् ॥

एव च विवर्तवादो नाम निरन्वयोदयविनाशार्हवस्तुवादः । परिणामवादस्तु—सान्वयोदयविनाशार्हवस्तुवाद । सान्वयनिरन्वयविवेकस्त्वयम्, सर्वार्थसिद्धौ (१-३१)—

स निरन्वयनाशस्स्यात् धर्मो धर्म्यपि वा पुनः ।
पूर्वसङ्गतभावो वा यद्भावे नानुवर्तते ॥
उत्पत्तिश्च तथाभूता निरन्वयसमुद्भवा ।
तावुभौ सर्वभावानां नियताविति सौगताः ॥ इति ॥

श्रीशकराचार्यैस्तु परिणामवाद. अपरमार्थभूत. व्यवहारव्यवस्थया सूत्रकृताऽऽचार्यबादरायणेनैव सूत्रितः । परमार्थावस्थया तु अद्वैतवादलक्षणोऽनन्यत्ववाद· सूत्रित इति भाष्यते आरम्भणाधिकरणे । तमेतं भेदनिषेधलक्षणमनन्यत्ववादमेव विवर्तवाद इति वाचस्पतिमिश्रा निरूपयन्ति । तत्राचार्यस्य कारणदृष्टि. प्रधानभूता । मिश्रस्य तु कार्यदृष्टिः प्रधानभूता इति विवेकः ॥

एव च विवर्तवाद भेदनिषेधलक्षण· अनन्यतावादरूपः परिणाम-वादनिषेधवादयो मध्यमावस्थारूप अधिकारिभेदतात्पर्येण निरूपित इति सक्षेपशारीरिके स्पष्टमवगम्यते । तथा हि—

आरम्भवादः कणभक्षपक्षः
संघातवादस्तु भदन्तपक्षः ।
सांख्यादिपक्ष परिणामवादः
वेदान्तवादस्तु विवर्तपक्षः ॥ २-६३ ॥

विकारवादं कपिलादिपक्षं
उपेत्यवादेन तु सूत्रकारः ।
श्रुतिश्च संजल्पति पूर्वभूमौ
स्थिता विवर्तप्रतिपादनाय ॥

अभेदिनस्सावयवस्य सत्य-
विचित्ररूपान्तरदर्शकत्वम् ।
वदन्ति धीराः परिणाममस्या
वसुन्धराया इव सस्यसृष्टिम् ॥

अभेदिनो निर्विकृतेरनेक-
मृषास्वरूपान्तरदर्शकत्वम् ।
विवर्तशब्दार्थ इह प्रसिद्धः
तरङ्गभेदादिव चन्द्रभेदः ॥

आरोपदृष्टिरुदिता परिणामदृष्टिः
द्वैतोपशान्तिरपवादकदृष्टिरन्या ।
मध्ये विवर्तविषया द्वयमिश्रदृष्टिः
व्यामिश्रदृष्टिरधरोत्तरभूमिभावात् ॥ ८२ ॥

कृपणधीः परिणाममपेक्षते
क्षपितकल्मषधीस्तु विवर्तनाम् ।
स्थिरमतिः पुरुषः पुनरीक्षते
व्यपगतद्वितयं परमं पदम् ॥ ८९ ॥

इति । एतेन सर्वेषां शास्त्रकाराणां कथंचित्समन्वये तात्पर्यमित्यवगम्यते। तत्र प्राधान्याप्राधान्यसूचने परं दृष्टिः । अत एव गौडपादाचार्यस्योत्तमाधिकारिकमुख्यपक्षनिरूपण एव तात्पर्यमित्यवधार्यते ॥

विवरणादिप्रबन्धपरामर्शे—मायाविद्यादिपदवाच्यमावरणशक्तिविलासमज्ञानं प्रधानीकृत्य विचारः प्रवृत्त इति विज्ञायते । अत्र सत्तात्रैविध्यं व्यवहारसौकर्याय निरूपितम् । अत्र व्यावहारिकं सत्त्वं अर्थक्रियाकारित्वलक्षणम् । तेन च प्रपञ्चस्यासत्त्वलक्षणशून्यतावादात् महद्वैलक्षण्यमभिप्रेतं भवति ॥

ततः इष्टसिद्धिन्यायमकरन्दखण्डनखाद्यादिप्रबन्धेषु युक्तिप्राधान्येन अनिर्वचनीयवाद एव बहुधा विचार्य प्रतिष्ठापित. । ततः परमपि अद्वैतसिद्धिब्रह्मानन्दीयादिप्रबन्धेषु अनिर्वचनीयत्वलक्षणं मिथ्यात्वं कर्कशतर्कपरिष्कारै समर्थितम् ॥

एवं प्रबन्धप्रणेतृणां प्रयत्न युक्त एवेत्युत्पश्यामः, यतः भाष्यकारैरेवमुच्यते—"दृष्टसामान्येनादृष्टमर्थं समर्थयन्ती युक्तिरनुभवस्य सन्निकृष्यते । विप्रतृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात् । अनुभवावसानं च ब्रह्मविज्ञानमविद्याया निवर्तक मोक्षसाधन च दृष्टफलतया इष्यते" इति ॥ (२—१—४)

अनेन भाष्येण पूर्वपक्षगतेनापि युक्तेः श्रुत्यपेक्षयाऽभ्यर्हितत्वमुक्त विज्ञायते । श्रुतेरेव युक्त्यपेक्षया प्राधान्यं बहुवारमुक्तम् । एवं च विभागोऽत्रावधेयः—ब्रह्मस्वरूपं श्रुत्येकसमधिगम्यमित्यत्र न विवाद. । प्रपञ्चमिथ्यात्वं ज्ञानैकनिवर्त्यत्वं ज्ञानस्यैव मोक्षहेतुत्वमित्यादिकं श्रुत्यपेक्षया युक्तयैव प्रतिपाद्यमानं हृदयारूढं भवतीति युक्तेः प्राधान्यम् । तथाच ब्रह्म सत्यं जगन्मिथ्या इत्यंशद्वये द्वितीयो युक्त्यवलम्बनः । प्रथ-

मस्तु सत्यरूपब्रह्मलक्षण श्रुत्यैकावलम्बन इति । तदुच्यते "तस्माच्छब्दमूलैवातीन्द्रिययाथात्म्योपलब्धिरिति" । इति ॥ (२-१-२७)

असद्वाद

शास्त्रदीपिकायां तु सम्बन्धाक्षेपपरिहारे आत्मपरिणामवादनिरूपणप्रकरणे-- "ये च पुनः प्रपञ्चविषया असत्त्ववादा अविद्यावादा भ्रान्तिवादा मायावादाश्च । ते सर्वे प्रपञ्चस्यानित्यत्वादौपचारिका." इति लिखितमस्ति । तेन विज्ञायते प्रपञ्चविषये पृथगेवैते स्वतन्त्रा वादाः प्रबन्धभेदेन आसन्निति । अधुना पुनरद्वैतसिद्धान्तदृष्ट्या मीमांसायां कृतायामेतद्वादचतुष्टयमपि विश्वापवादाय परिष्कृतमित्यवधारयामः ॥

तत्राविद्यावादभ्रान्तिवादयोरैक्यं व्यक्तमेव अविद्याध्यासयोरभेदात् भ्रान्तिलक्षणाध्यासस्य अविद्याकार्यत्वाद्वा । मायावादोऽप्यविद्यामाययोरैक्ये मायाया अविद्यामूलत्वेऽपि वा भ्रान्तिवाद एवान्तर्भूतः। प्रपञ्चयते च पुरस्तात् ॥

असद्वादस्तु माध्यमिकसम्मतः भामत्यामुदाहृत·—

इदं वस्तुबलायातं यद्वदन्ति विपश्चितः ।
यथायथाऽर्थाश्चिन्त्यन्ते विवेच्यन्ते तथातथा ॥ इति ॥

न क्वचिदपि पक्षे व्यवतिष्ठते इत्यर्थश्च प्रोक्त· । (२-२-३१) तथाच विचारासहत्ववाद एव असद्वाद इति फलति । अत एवोच्यते—

पदार्थानां स्वतोरूपं न किंचिद्व्यवतिष्ठते ।
यथायथा निरूप्यन्ते विशीर्यन्ते तथातथा ॥ इति च ॥

तथाच विचारासहत्वलक्षणमनिर्वचनीयत्वमेवासद्वादश्चेत् प्रपञ्चविषये सोऽप्यङ्गीकृत एव । पञ्चम्यां कोटौ विश्रान्तिरेवासद्वादश्चेत्तुरीयायां कोटौ विश्रान्तिरनिर्वचनीयवाद इति भिदा ॥

अथ पुन·—

बुध्या विवेच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः ॥

इत्यार्यालङ्कावतारादिषु दृश्यमान· निरुपाख्यनिरुपाधिकत्वभावाभावाद्य परपर्याय· तुच्छ एवासत्पदार्थश्चेत् कार्यदृष्ट्या प्रपञ्चविषये सोऽङ्गीकृत एव । तथाहि—प्रपञ्चे कार्यदृष्टि कारणदृष्टिश्चेति द्वयी गतिरवधार्यते । कारणदृष्ट्या तत्त्वान्यत्वाभ्यां दुर्निरूपत्वम् । अत· कारणदृष्टिः कार्यस्य दुर्निरूपत्वे पर्यवस्यति परिशिनष्टि कारणम् । कार्यदृष्टिस्तु— "स्वरूपेणानुपाख्यत्वात्" इत्यारम्भणाधिकरणभाष्यात् "ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसान·" इति प्रकृतैतावत्वसूत्रभाष्याच्चाभाव एव पर्यवस्यति । तथा—"न ह्यात्मव्यतिरेकेण किंचिदस्त्यन्यत् । यद्यस्ति न तद्विदित स्यात् । न त्वन्यदस्ति । आत्मैव तु सर्वम्" इति बृहदारण्यके भाषिततत्वाच्चाभावलक्षणो निषेध एव ॥

तथापि सौगतसम्मतोऽसत्पदार्थ निरधिकरणकनिष्प्रतियोगिकनिषेधलक्षण । औपनिषदसम्मतस्तु सोपाधिक । तदुच्यते मण्डनमिश्रेण ब्रह्मसिद्धौ—

लब्धरूपे क्वचित्किंचित्तादृगेव निषिध्यते ।
विधानमन्तरेणातो न निषेधस्य संभवः ॥ इति ॥

प्रपञ्चितं चैतत् प्रागेव सौगतसिद्धान्तोदयेऽभावनिरूपणे (२१) । प्रकृते साधिकरणको निषेध एव असत्पदार्थ· । सौगतसम्मतासत्त्वानभ्युपगम एव तन्मतदूषणम् । स्वस्वोपलम्भ एव सर्वेषां प्रमाणम् ॥

इदमत्रावधेयम्—असद्वाद· सामान्यनिषेधलक्षणः । अनिर्वचनीयवादः यावद्विशेषनिषेधलक्षण इत्यनयोरविशेषेऽपि भावपर्यवसायित्वाभावपर्यवसायित्वाभ्या परकीयासत्त्ववादात् विशेषः सारार्थ इति ॥

अविद्यावाद

अविद्यावादोऽपि त्रिविधो विज्ञायते। शैववैष्णवाद्यागमेषु परमेश्वरस्य द्वे शक्ती जडाजडात्मिके स्तः। तत्र जडशक्त्या वियदादिप्रपञ्चपरिणामः। अजडशक्त्या ब्रह्मादिस्तम्बपर्यन्तचेतनपरिणाम। तदेतत् शक्तिद्वय ज्ञानशक्तिक्रियाशक्तिरूपमिति चेतनाचेतनरूपमिति परापरप्रकृतिरूपमित्येवप्रकारै व्यवहारै· व्यवहरन्ति बहुष्वागमादिषु प्रबन्धेषु सुधिय·। एतदेवानूद्यते सक्षेपशारीरके (३-२२८)—

चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते
सत्यैवास्य जडाऽपरा भगवतः शक्तिस्त्वविद्योच्यते।
संसर्गाच्च मिथस्तयोर्भगवतश्शक्तयोर्जगज्जायतेऽ
चिच्छक्त्या सविकारया भगवताश्चिच्छक्तिरुद्रिच्यते॥

इति। एव प्रमाणेष्वनेकेषु सत्स्वपि सर्वशास्त्रसारभूताया भगवद्गीतायां परिदृश्यमान मानमेकमुपदर्शयामः—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
अपरेयमितस्त्वन्यां प्रकृति विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

अत्र मे मदीया मच्छेषभूता प्रकृतिरित्यर्थ.॥

तत्र स्वतन्त्रां जडशक्तिमविद्यात्मिका केवलमाश्रित्य चार्वाका भूतवादिन आसन्। विद्यारूपामजडशक्तिं केवलमाश्रित्य जीवपरिणामब्रह्मपरिणामवादिनो वेदान्तिनो वाऽऽसन्। वादिनो हैरण्यगर्भा वा सङ्ख्याास्तु शक्तिद्वयं स्वतन्त्रमङ्गीकृत्य जगद्व्यवहार निरवहन्। आगमिकास्तु परमेश्वरपरतन्त्र शक्तिद्वयमिच्छन्तीत्ययमेको विचारः। ततश्चाविद्याशब्द. विद्याशब्दप्रति पक्षभूत. निरुक्तया शिक्षया जडशक्तिपर इति कश्चिन्निष्कर्षः॥

अजडशक्तिलक्षणायां चितिशक्तिरूपायां विद्यायामेव ख्याति-भ्रान्तिभेदेन द्वैविध्यमुपगम्य समीचीनसामग्र्या सम्पद्यमानां विद्यां दोषघटितसामग्र्या सम्पद्यमानामविद्यामाहु.—"इन्द्रियदोषात्संस्कार-दोषाच्चाविद्या। तद्दुष्ट ज्ञानम्। अदुष्ट विद्या" इति वैशेषिका. (९-२-१०) सूत्रयन्ति। प्रत्यक्षलैङ्गिकस्मृत्यार्षभेदेन विद्या सशयविप-र्ययस्वप्नाध्यवसायभेदेन चाविद्यां चतुर्धा विभजन्ते॥

न्यायसूत्रकारोऽपि "तेषां मोह· पापीयान् नामूढस्येतरोत्पत्ते.। विद्याविद्याद्वैविध्यात्संशयः" (४-१-६. ४-२-४) इत्यादिना सूत्रेण विद्याविद्ययो· स्वरूपमनुकीर्तयति। तत्र भाष्यमिदम्—"सदसतोरुप-लम्भात् विद्या द्विविधा। सदसतोरनुपलम्भादविद्याऽपि द्विविधा" इति। अत्राविद्याऽभावरूपेत्यापाततः प्रतीयते। तथाप्यनुपलम्भपदेन यथावदनुप-लम्भार्थविवक्षया नानुपपत्तिः॥

तथा प्रज्ञाकरेणापि (३४२) "अविद्या मोहः विपर्यास इति पर्याया। अविद्या हि असत्पदार्थस्वरूपारोपिका स्वभावदर्शनावरणा-त्मिका च सती सवृतिरुच्यते" इति पञ्चितम्। प्राय· पातञ्जलकौमा-रिलप्रभृतिभिरयं वैशेषिकनैयायिकादिसम्मत एव मार्ग बहुधा क्षुण्णः॥

न्यायमकरन्देऽपि (१०२) "स्वप्रत्ययासादितादृष्टान्तसिद्ध-स्वभावभेदं विज्ञानमेव असतः प्रकाशनम्। तथाचास्यासत्प्रकाशन-शक्तिरेवाविद्येति गीयते" इति प्रागुक्त एवार्थः अनूदितः। अत्र स्व-प्रत्ययः स्वकारणमित्यर्थः॥

न्यायमञ्जर्यामपि—(२४) "यथोक्तं सांव्यवहारिकस्यैवेतत् प्रमाणस्य लक्षणमुक्तम्। वस्तुतस्तु—अनाद्यविद्यावासनारोपितग्राह्यग्रा-

हकादिभेदप्रपञ्चं ज्ञानमात्रमेवेदमिति किं प्राप्यते को वा प्रापयति" इति सौगताभिप्राय. सम्यगनूदितः ॥

एवमविद्यापदस्य मतभेदेन अनेकार्थत्वे सति क्वचित् अध्यास-भाष्ये भ्रमपरत्व क्वचित्प्रपञ्चकारणप्रकरणे शक्तिपरत्वं क्वचिच्च विद्या-विनाश्यनिरूपणप्रकरणे अनिर्वचनीयपरत्वमित्येव बहुधाऽभिप्रेत्याचार्येण प्रयुक्तमिदमविद्यापदम् । ततश्चाविद्यापदार्थ· यथासन्दर्भं विनियोजित इत्यवधार्यते । अविद्या क्वचिद्दोषस्थाने विनिवेश्य भ्रान्ति तज्जन्यामि-त्यपि नवीना निरूपयन्ति । एवमविद्या आच्छादिका विक्षेपिका चेति विभज्यते । तत्र स्वरूपत स्वभावतश्चेति केचिद्वदन्ति । आकारभेदा-दित्यन्ये । अवस्थाभेदादित्यपरे । शक्तिभेदादितीतरे । "अविद्या च सवृति विकल्पश्च सर्व एवायमविद्याम्वभाव" इति बाह्या आहु । माण्डूक्यकारिका (४ -'१७) भाष्ये सवृतिपदमविद्यापरत्वेनाचार्यै व्याख्यायते । विस्तरस्तु अत्रैव (४८) अविद्याविचारे द्रष्टव्य । ततश्च सर्वविधस्यापि निरूपणस्य मूलभूतेयमविद्या कल्पवृक्षस्थानीयेत्यद्वैत-विदामभिप्रायः ॥

तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।
अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः ॥

इति स्मृतिरपि विवरणे (२०७) समुदाहृता ॥

एवमाविद्यापद पुण्यपापलक्षणकर्मपरमिति वैष्णवादिपुराणेभ्योऽ-वगम्यते । उपनिषत्सु विद्यालक्षणब्रह्मज्ञानस्य सहकारितया वा विरोधि-तया वा यज्ञयागादिकर्मपरतया प्रयोग अविद्यापदस्य दृश्यते । तस्मा-दविद्यावादो विद्यावादादपि महत्तर इत्यवधेयम् । "नह्येकविंशतिविध·

दुःखव्यतिरिक्ताऽविद्या नाम" इत्यात्मतत्त्वविवेके औदयन वचनम् ॥ (१३०)

अत्र प्रसङ्गात् अविद्यावादवाक्यार्थविषयकं श्रीवात्स्यवरदाचार्य-प्रणीतं तत्त्वसारगत श्रुतप्रकाशिकाचार्यादिभिरुदाहृत पद्यमिदमवधार्यताम्—

स्वरूपानादित्वस्वपरघटने दुर्घटनता
प्रवाहानादित्वं पुनरिति चतस्रो हि गतयः ।
असत्याविद्याया गदितुमनवस्थापरिहृतौ
मतास्त्वेतास्तुल्या· स्फुटमसदधिष्ठानसरणौ ॥ इति ॥

कुमारिलेन तु सोऽयमविद्यावाद श्लोकवार्तिके सम्बन्धाक्षेपपरिहारवादे एवमुल्लिखितोऽस्ति—

स्वयं च शुद्धरूपत्वादसत्त्वाच्चान्यवस्तुनः ।
स्वप्नादिवदविद्यायाः प्रवृत्तिस्तस्य किंकृता ॥
अन्येनोपप्लवेऽभीष्टे द्वैतवाद· प्रसज्यते ।
स्वाभाविकीमविद्यां तु नोच्छेत्तुं कश्चिदर्हति ॥

इति । शास्त्रदीपिकायामविद्यादूषणमेव कृतम्—"अथाविद्याकृतोऽयं प्रपञ्च इति । का पुनरियमविद्या ? किं भ्रान्तिः किं वा भ्रान्तिज्ञानकारणभूतं वस्त्वन्तरम् ? यदि भ्रान्ति· ? सा कस्य ? न ब्रह्मण·, तस्य स्वच्छविद्यारूपत्वात् । भ्रान्त्यसम्भवादेव च तत्कारणभूतं वस्त्वन्तरमप्यनुपपन्नमेव" इति सम्बन्धाक्षेपपरिहारवादे ॥

तथा कुमारिलेन श्लोकवार्तिके मोक्षस्वरूपादिकमप्येवमुक्तम्—

ज्ञानं मोक्षनिमित्तं च गम्यते नेन्द्रियादिना ।
आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ॥
तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते ।
न ह्यभावात्मकं मुक्त्वा मोक्षनित्यत्वकारणम् ॥

न च क्रियायाः कर्त्र्याश्चिदभावः फलमिष्यते ।
तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये ॥
उत्तरप्रचयाभावाद्देहो नोत्पद्यते पुनः ।
तदभावे न कश्चिद्धि हेतुस्तत्रावतिष्ठते ॥

इत्यादि ॥

शालिकनाथोऽपि तत्त्वालोकेऽमुमर्थमाह—"आत्यन्तिकस्तु देहोच्छेद निश्शेषधर्माधर्मपरिक्षयनिबन्धन मोक्ष" इति ॥

एतत्सर्वमभिप्रेत्य (१-१-४) शारीरकभाष्ये—"शरीरसम्बन्धस्य धर्माधर्मयो तत्कृतत्वस्य च इतरेतराश्रयत्वात् अन्धपरम्परैवैषाऽनादित्व कल्पना" इति भाषितम्। परिणामलक्षणस्वभाववादेऽप्य दोष । अविद्यालक्षाध्यासवादे नाय दोष इत्यभिप्राय.। अत एव सर्वत्रोच्यते—"पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वात् मोक्षशास्त्रवैयर्थ्यम्" इति ॥

मायावाद

सोऽय मायावादः विज्ञानवादिनां योगाचाराणा सिद्धान्ते प्रपञ्चविषये अभ्युपगत इति प्रतीयते । तेन मायावादः बाह्यार्थशून्यवादश्चाभिन्न इति बाह्यानामाशय· । तत्र सर्वशून्यवादिन प्रति बाह्यार्थशून्यवादी एवमाक्षिपति । यथा—"सर्व जगत् मायात्मकतया स्वभावशून्यमुपगत मध्यमकवादिभि तदा मायास्वभावसवृतिग्राहिणी बुद्धिरपि भवता नास्ति बाह्यवत्, तथाच माया केनोपलभ्यते ग्राहकवस्तुसज्ज्ञानमन्तरेण । यस्य तु विज्ञानमेव परमार्थसत् ग्राह्यरूपतया भ्रान्त तथा प्रतिभासते न तस्यायं दोष· । तदुच्यते—

यदा न भ्रान्तिरप्यस्ति माया केनोपलभ्यते ।

इति । अत्रोत्तरम्—

यदा मायैव ते नास्ति तदा किमुपलभ्यते ॥

इति । अयमर्थः—यदा मायैव ग्राह्यतया हस्त्याद्याकारप्रवृत्त्या ते विज्ञानवादिनो नास्ति विज्ञानमात्र जगदभ्युपगच्छत· बहिरर्थाभावात्। तदा किमिह प्रतिभासते । देशादिविच्छेदेन प्रतिभासो न युक्त इति भाव· ॥

अपि च—

चित्तमेव यदा माया तदा किं केन गृह्यते ।
उक्तं च लोकनाथेन चित्तं चित्तं न पश्यति ॥ इति ।

अय भावः—विज्ञानमेव ग्राह्यतया ग्राहकतया च भवतोपगत, वेदकव्यतिरिक्ता वेद्यभूता माया नाम यदा काचिन्नास्ति, तदा किं केन प्रतीयते दृश्यमन्तरेण दर्शनमपि न स्यात् दृश्यापेक्षत्वात्तस्य । ननु दर्शन विज्ञानलक्षण स्वसवेदनस्वभावतया स्वरूप संवदयत् तदभिन्न मायादिकमपि वेदयेदिति चेत्, नैतद्भद्रम्, ज्ञानस्य परमार्थतयाऽभ्युपगमे लोकानुरोधेन ज्ञेयस्यापि पारमार्थ्यमभ्युपगन्तव्यं स्यात्, सर्वशून्यवादपक्षे सर्व सावृतमुपपद्यते इति न दोष इति" ॥ (३९०)

एव बोधिचर्यावतारे योगाचारमाध्यमिककलहे दर्शनात् मायावाद· सौगतैरप्यभ्युपगतो विज्ञायते । अनूद्यते च भास्करभाष्ये (८५) "माहायानिकबौद्धगाथित मायावादम्" इति। तत्राय विशेष –नास्ति तासाधर्म्येण मायामयत्व बाह्यस्याभ्युपगम्यते विज्ञानवादिना । दृष्टनष्टस्वरूपतासाधर्म्येण मायामयत्वं सर्वस्योपेयते माध्यमिकेन । तेन च विज्ञानसत्यता सिद्धयतीति योगाचारस्याभिप्राय । माध्यमिकस्याभिप्रायस्तु सर्वस्य सांवृतता सिध्यति, दर्शनस्याप्यत्रान्तर्भावात् ॥

इद च रहस्य लङ्कावतारे प्रकाशित भवति तथाहि—(१००) "पुनरपरं महामते न माया नास्ति साधर्म्यदर्शनात्सर्वधर्माणां मायोप-

मत्व भवति । महामतिराह—किंपुनर्भगवन् विचित्रमायाभिनिवेश-लक्षणेन सर्वधर्माणां मायोपमत्वं भवति ? उत वितथाभिनिवेशलक्षणेन ? तद्यदि भगवन् विचित्रमायाभिनिवेशलक्षणेन सर्वधर्माणां मायोपमत्व भवति हन्त तर्हि भगवन् न भावा· मायोपमाः । तत्कस्य हेतो· ? रूपस्य विचित्रलक्षणाहेतुदर्शनात् । न हि भगवन् कश्चिद्धेतुरस्ति येन रूप विचित्रलक्षणाकारं ख्यायेत मायावत् । अतएव तस्मात्कारणान्न भग-वन् विचित्रमायालक्षणाभिनिवेशसाधर्म्याद्भावा· मायोपमा ॥

भगवानाह–न महामते विचित्रमायालक्षणाऽभिनिवेशसाधर्म्या-त्सर्वधर्मा मायोपमा· । किन्तर्हि महामते वितथाशुविद्युत्सदृशसाधर्म्येण सर्वधर्मा मायोपमा । तद्यथा—विद्युल्लताक्षणभङ्गदृष्टनष्टदर्शन पुन-र्बालाना ख्यायते । एवमेव महामते सर्वभावा स्वविकल्पसामान्य-लक्षणा· प्रविचयभावान्न ख्यायन्ते रूपलक्षणाभिनिवेशत· । तत्रेदमुच्यते—

न माया नास्ति साधर्म्याद्भावानां कथ्यतेऽस्तिता ।
वितथाशुविद्युत्सदृशाः तेन मायोपमास्स्मृताः ॥

इति । अय विभागः योगाचारमाध्यमिकमतभेदतस्स्यात् । इममेव मार्ग-माश्रित्य विज्ञानाद्वैतवेदान्ताद्वैतयोर्वैलक्षण्य वैदिकै प्रदर्शितमित्यग्रे प्रकाश्यते ॥

एतेन मायाशब्दस्य विचित्रत्वेन नास्तित्व वितथत्वेन दृष्टनष्ट-स्वरूपत्व चेति प्रवृत्तिद्वयमस्तीत्यवगम्यते । प्रपञ्चस्य मिथ्यात्ववादिभिः द्वितीयमङ्गीक्रियते । सत्यत्ववादिभिस्तु प्रथमे विचित्रत्वमात्रम् । मध्यस्थैः प्राचीनैस्तु यास्कप्रभृतिभिः विज्ञानवादवासनया मायापदस्य ज्ञानपरत्व-मुपगत स्यादिति वितर्क्यते । तथाहि—यास्कनिरुक्ते निघण्टुकाण्डे (३-९) "केत केतु· चेतः चित्तम् क्रतुः असुः धी· शचीः

माया। 'वयुनम् अभिख्या इत्येकादश प्रज्ञानामानि" इति पठ्यते ॥

वात्स्यायनभाष्ये तु (४-२-३५) "प्रज्ञापनीयसरूपञ्च द्रव्यमुपादाय साधनवान् परस्य मिथ्याध्यवसाय करोति सा माया" इत्युच्यते। अनेनापि मिथ्याध्यवसाय· मायाशब्दार्थ इत्युक्त भवति। अत्रापि ज्ञानत्वमेव प्रवृत्तिनिमित्तमिति सूचितम् ॥

गौडपादकारिकाभाष्ये श्रीशाङ्करे (४-५८)—"माया नाम वस्तु तर्हि। नैवम्, सा च माया न विद्यते। मायेत्यविद्यमानस्याख्येत्यभिप्रायः" इति दृश्यते ॥

तथा(३-२४)—"इन्द्रो मायाभिरित्यभूतार्थप्रतिपादकेन मायाशब्देन व्यपदेशात्। ननु प्रज्ञावचनो मायाशब्दः? सत्यम्, इन्द्रियप्रज्ञाया अविद्यात्वेन मायात्वाभ्युपगमाददोष" इति चोच्यते ॥

भगवद्गीताभाष्ये श्रीरामानुजीये(४-६)—"आत्ममायया आत्मीयया मायया" "माया वयुनम्" इति ज्ञानपर्यायोऽत्र मायाशब्दः। तथाचाभियुक्तप्रयोग 'मायया सतत वेत्ति प्राणिनाञ्च शुभाशुभम्' इति। आत्मीयेन ज्ञानेन सङ्कल्पेनेत्यर्थ' इति ॥

श्रीभाष्ये (१-१-१)—प्रमाणानुपपत्तिप्रकरणे—"मायाशब्दस्य मिथ्यापर्यायत्वेन अनिर्वचनीयवाचित्वमिति चेत्, तदपि नास्ति। न हि सर्वत्र मायाशब्दो मिथ्याविषय· आसुरराक्षसास्त्रादिषु सत्येष्वेव मायाशब्दप्रयोगात्, यथोक्त (विष्णुपुराणे प्रह्लादचरिते)—

तेन मायासहस्रं तच्छम्बरस्याशुगामिना।
बालस्य रक्षता देहमेकैकश्येन सूदितम ॥ इति।

अतो मायाशब्दः विचित्रार्थसर्गकराभिधायी। प्रकृतेश्च मायाशब्दाभि-

धानं विचित्रार्थसर्गकरत्वादेव" इति। एतेन यथायथ शब्दान् व्याकुर्वन्तीति निर्णय· ॥

प्रकृते मायाविद्ययोरैक्ये वा मायाया अविद्यातुल्यत्वे वा अविद्याकल्पितत्वे वा न कश्चिद्विशेषः, तद्वा तादृग्वा न कश्चिद्विशेष इति न्यायात्। परं तु प्रपञ्चस्य निवृत्त्युपपत्तये प्रक्रियामात्रमिति निर्णयः। तदनूद्यते यामुनाचार्यै. आत्मसिद्धौ (१९ पु)—

शुद्धतत्त्वं प्रपञ्चस्य न हेतुरनिवृत्तितः।
ज्ञातृज्ञेयविभागस्य मायैव जननी ततः॥ इति।

अध्यासवाद

एवविधस्वभाववादपरिष्कारेषु सर्वेष्वपि जगत्सत्यतावादापरपर्यायेषु दर्शनेषु अन्तत परिणामवादपर्यवसायिषु प्रयत्नवादलक्षणपुरुषकारस्यावकाशाभावेन आत्यन्तिकदु·खोपशमलक्षण. मोक्ष. नैवावकाश लब्धुमर्हति। तदर्थ नि·स्वभाववादसमाश्रयण तु शून्यवादपर्यवसायि भवत् वृश्चिकभयात्पलायमानस्याशीविषमुखनिपातमनुकरोति। तस्मात् मार्गान्तरमाश्रयितव्यम्। तदेतन्मार्गान्तरम्—प्रथम तावत्सूत्रभाष्येऽध्यासो निरूपितः। यथा "युष्मदस्मत्प्रत्ययगोचरयो विषयविषयिणो तमः प्रकाशवद्विरुद्धस्वभावयोः इतरेतरभावानुपपत्तौ सिद्धाया तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यास तद्विपर्येण विषयिण तद्धर्माणा च विषयेऽध्यासः मिथ्येति भवितु युक्तम्॥

तथापि अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मा श्चाध्यस्य इतरेराविवेकेन अत्यन्तविवक्तयोः धर्मधर्मिणो· मिथ्याज्ञाननिमित्त सत्यानृते मिथुनीकृत्य अहमिद ममेदमिति नैसर्गिको लोकव्यवहार·" इति॥

अयमत्राभिप्राय·--प्रपञ्चसत्यतावादिना सर्वेषां सिद्धान्तेषु आत्मा सत्यः प्रपञ्चोऽपि सत्य·, अनयोः सम्बन्धेन संसारः । सम्बन्धविलये मोक्ष इत्यभिप्राय. । अत्र तु सम्बन्धस्य सम्बन्धिनश्च परमार्थस्य निरन्वयेन शम सम्पादयितु विद्यया न शक्यत इत्यविद्यया सम्बन्धस्सम्बन्धी चापारमार्थिक इति प्रसाधयितु अविद्यालक्षण· भ्रान्तिपदवाच्योऽध्यासः प्रथम समर्थनीय. ॥

तत्र साङ्ख्याः भ्रान्तिलक्षण ज्ञानरूपमविद्यापदवाच्य वस्त्वेव नास्ति । भ्रान्तिसामग्र्यैव भ्रान्तिकार्यसिद्धिरित्यभ्युपगच्छन्ति । तन्मतमभिप्रेत्य शङ्का—युष्मदस्मदिति । इतरेतरभावलक्षणे तादात्म्ये सत्येव मृदय घट तन्तुरय पट इति प्रत्यय. । इद रजत अय सर्प इत्यादय· विशिष्टप्रत्ययाः न सन्त्येव, अससर्गाग्रहात्तथाऽभिमान इति भावः ॥

अबाधितसार्वलौकिकानुभवेन वस्तुतस्तादात्म्याभावेऽपि कल्पित तादात्म्यनिबन्धनविभ्रमोदयस्सिध्यतीति तथापीत्यादिसमाधानभाष्याभिप्रायः । तत्र साङ्ख्येतरसर्वदार्शनिकानां सम्मतिरुच्यते—"तमेवलक्षणमध्यास पण्डिता प्रमाणकुशला अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारण विद्यामाहु·" इति। तथा माण्डूक्यकारिकाभाष्येऽपि (३–५) "सर्ववादिभिरप्यविद्याकृतव्यवहाराभ्युपगमात् परमार्थेऽनभ्युपगमाच्च "इति लिख्यते ॥

अयमेव भ्रान्तिवादः, अध्यासो मिथ्याप्रत्ययरूप इति हि भाषितम् । एव भाषणस्य मूलम्—"अनित्याशुचिदु.खानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति पातञ्जल सूत्रम् । तथा—"दु खजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग" इति न्यायसूत्रं च ॥

अत्र भाष्ये प्रमाणकुशला इति पद मूलकोशेषु न दृश्यते । पञ्चपादिकाटीकायामुपात्तमस्ति । तेन च पदेन कणादाक्षपादवात्स्यायन शबरादयोऽभिप्रेता· जरन्मायावादिनश्च । यत तै· सर्वत्राविद्यालक्षण· मिथ्याप्रत्यय प्रतिपादितोऽस्ति ॥

तथा हि वात्स्यायनभाष्ये—(४—२-३५) "स्थाणौ पुरुषोऽयमिति व्यवसायः मिथ्योपलब्धि । अतस्मिन् तदिति ज्ञानम् । स्थाणौ स्थाणुरिति व्यवसाय तत्त्वज्ञानम् । तत्त्वज्ञानेन च मिथ्योपलब्धिर्निवर्तते" इति स्फुटमस्ति । तथा मायागन्धर्वनगरमृगतृष्णिकानामपि या बुद्धय अतस्मिन् तदिति व्यवसाया तत्राप्यनेनैव कल्पेन मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात्" इत्यध्यास निरूपित· ॥

तथा शाबरभाष्ये—"यो हि जनित्वा प्रध्वसते नैतदेवमिति स मिथ्याप्रत्यय·" इति चोदनासूत्रे । "बाधक हि यत्र ज्ञानमुत्पद्यते नैतदेवम्मिथ्याज्ञनमिति तदन्यसम्प्रयोगे । इन्द्रियार्थसनिकर्षो हि सम्यज्ज्ञानस्य हेतु· । असति तस्मिन् मिथ्याज्ञानम् । तदुभयगतो दोषो मिथ्याज्ञानस्य हेतु" इत्यौत्पत्तिकसूत्रे । एव सर्वत्र ॥

ततश्चैते सर्वे भ्रान्तिज्ञानवादिन अन्यथाख्यातिविपरीतख्यात्यनिर्वचनीयख्यातिवादिनो वा । एव सर्वमतानुसारेणाविद्यालक्षणोऽध्यासस्साधितः । विद्यया चाविद्यानिवृत्तौ अविद्या तत्कार्य सर्वमेकहेलया निवर्तत इति भाव· ॥

एवमभिप्रायस्य पूर्वपक्षतया प्रतिपक्षभूतोऽभिप्रायः साङ्ख्यसिद्धान्त इति प्राक्सूचितम् । (७९) तस्येदमुपव्याख्यानम्—यद्यपि साङ्ख्याः स्वभाववादस्थापनेन नि स्वभाववाद निराचक्रुः । तथापि संसारलक्षणस्य प्रपञ्चस्य परमार्थस्य सम्बन्धरूप बन्धमविवेकनिबन्धन-

माहुः । अविवेको नामाख्यातिः भेदाग्रहः । स हि ख्यातिरूपेणापारिणतमन्तःकरणमेव । एतादृशेनाविवेकेन संसारे सति अन्ततः प्रकृतिरूपस्याविवेकस्य निरन्वयविनाशासम्भवादनिर्मोक्षप्रसङ्गः तदवस्थ एव । तस्मान्निरन्वयविनाशार्हः अन्धकारवदविद्यारूपो भ्रान्त्यध्यासादिपदवाच्यः भ्रमः निरूपितः । स चाध्यासः अनिर्वचनीयख्यातिरित्याधुनिकानां परिष्कारः । मूलतत्त्वं तु साङ्ख्यमतप्रतिपक्षभाव एव । तथा अज्ञानमविद्या वा भावरूपमेव न त्वभावरूपमिति विवरणकारादिसिद्धान्तस्यापि साङ्ख्यदृष्टिरेव मूलमिति विदांकुर्वन्तु ॥

अनिर्वचनीयवादः.

एवं च शाङ्करसिद्धान्तं जिज्ञासमानैः विमर्शकवरैः कार्यकारणभावविषये प्रथमं साङ्ख्यवैशेषिकार्हतसौगतसिद्धान्तान् क्रमेण चतसृषु दिक्षु निक्षिप्य मध्ये शाङ्करमततत्त्वं जिज्ञासितव्यम् । तथाहि—अभिव्यक्तिवादिनः खलु साङ्ख्याः कार्यकारणयोरत्यन्तमभेदेन कार्यं कारण तत्त्वेन सुनिरूपमाहुः । आरम्भवादिनो वैशेषिकाः कार्यकारणयोरत्यन्तभेदाभ्युपगमेन कारणादन्यत्वेनैव सुनिरूपमाहुः । आर्हताः कौमारिलाः जरदौपनिषदाः भर्तृप्रपञ्चादयः नव्यौपनिषदा भास्करयादवप्रकाशादयश्च तत्त्वं तदन्यत्वं च समुच्चित्य प्रतीतिबलेन विरोधं परित्यज्य भिन्नाभिन्नं कार्यस्वरूपं निरूपयन्ति । सर्वत्र तत्र विरोधमभ्युपगम्य सौगताः कार्यकारणं सर्वं निरभिलप्यं निस्स्वभावमिति च निरुपाधिकेऽभावे पारिशेषयन्ति ॥

एतस्सकलमतकटाक्षेण सर्वत्र विरोधमभ्युपगम्य कारणीभूतब्रह्मापेक्षया तत्त्वतदन्यत्वाभ्यां दुर्निरूपमित्यभ्यासेन सूत्रभाष्ये भाषितम् ॥

आरम्भणाधिकरणे—"सर्वज्ञस्येश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये ससारप्रपञ्चबीजभूते सर्वेश्वरस्य माया शक्ति प्रकृतिरिति श्रुतिस्मृतिभिरभिलप्येते। ताभ्यामन्यस्सर्वज्ञः ईश्वर.। एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वर भवति" इति भाषितमस्ति॥

तथा (२-१-२७ सूत्रे)—"अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदत्व प्रतिपद्यते. पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते" इति॥

तथा (१-४-३ सू.)—"अव्यक्ता हि सा माया, तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्" इति च॥

तथा—(२-२-१७) भामती—"तस्मादुपपत्त्यनुभवाभ्या न कारणस्य कार्यादन्यत्व, किंतु कारणस्यैवायमनिर्वाच्य परिणामभेद। तस्मात्कारणादनतिरेकात् किं केन सम्बद्धम्" इति॥

अयमत्राभिसन्धि—कार्यावस्था न कारणात्मिका। नाप्यन्यात्मिका। नोभयात्मिका। नापि शून्या। किंतु विलक्षणा। अत्र अनातिरिक्तत्व अनन्यत्व अनिर्वचनीयत्व तादात्म्यमित्यादिकं पर्यायपदम्॥

तत्रोभयात्मकमित्यन्वयदृष्टि। अनुभयात्मकमिति व्यतिरेकदृष्टिः। आद्या दृष्टिरनेकान्तवाद. स्याद्वाद इति गीयते। द्वितीया तु अनिर्वचनीयवाद इति॥

सैषा व्यतिरेकदृष्टि "नान्तःप्रज्ञ न बहि प्रज्ञ नोभयतःप्रज्ञम्" इत्यादिश्रुतिसिद्धा। शाबरे भाष्ये आत्मवादे यथा—"केन पुनरु-

पायेनायमन्यस्मै कथ्यत इति । तत्राप्युपाये ब्राह्मणं भवति । स एष नेतिनेत्यात्मेति होवाचेति । असावेवरूप इति न शक्यते निदर्शयितु, यच्च पर· दश्यति तत्प्रतिषेध तस्योपदेशोपायः । शरीर परः पश्यति तेनात्मोपदिश्यते, शरीर नात्मा, अस्ति शरीरादन्य इति । स आत्मेति शरीरप्रतिषेधेनोपदिश्यते । तथा प्राणादयो नात्मानः तत्प्रतिषेधेन तेभ्योऽन्य उपदिश्यके । तथा परस्थास्सुस्वदु·खादय· परेण लिङ्गैरुपलभ्यन्ते । तेऽपि नात्मान इति तत्प्रतिषेधेनान्य उपदिश्यते" इति ॥

सैषा व्यतिरेकदृष्टिरेव सूत्रकाराभिप्रेतेत्याह—भाष्ये (२-१-१४) "सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह । व्यवहाराभिप्रायेण तु स्याल्लोकवदिति महासमुद्रस्थानीयतां ब्रह्मणः कथयति । अप्रत्याख्याय हि कार्यप्रपञ्च परिणामप्रक्रियां चाश्रयति सगुणेषूपासने षूपयोक्ष्यते इति" । इति ॥

तथा—एतादृशीमेव व्यतिरेकदृष्टिमवलम्ब्य व्याकरणाचार्यो वररुचि नित्यस्य सर्वस्य शब्दस्य स्वत एव सिद्धत्वात् व्याकरणशास्त्रेण किं प्रयोजनमिति शङ्का कृत्वा एव समाहितवान् (१-१-४) "यदि तर्हि-नित्याश्शब्दा किमर्थ शास्त्रमिति चेत्—निवर्तकत्वात्सिद्धम्" इति । असाधुतालक्षणदोषनिवर्तकत्वज्ञापनेन शास्त्रप्रयोजन सिद्धमिति तदर्थः ॥

इयमेव व्यतिरेकदृष्टिलक्षणा युक्तिः ब्रह्मणः नित्यस्य निर्विशेषस्य स्वतस्सिद्धस्य शास्त्राविषयतया उपनिषल्लक्षण वेदान्तशास्त्र व्यर्थमिति शङ्कायामपि समाधानायोपात्ता समन्वयाधिकरणे—"अविषयत्वे ब्रह्मण· शास्त्रयोनित्वानुपपत्तिरिति चेन्न—अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य । न हि शास्त्रमिदतया विषयीभूतं ब्रह्म प्रतिपिपादयिषति । किं

तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनाभेदमपनयति । तथा च शास्त्र—यस्यामतामिति" ॥

तथा माण्डूक्यकारिकाया वैतथ्यप्रकरणे (३२) "न निरोधो न चोत्पत्ति" इतिश्लोकभाष्ये एव दृश्यते—"तस्मिन्निर्विशेष एवात्मनि सुखित्वादयो विशेषा· कल्पिता· । यत्तु असुखित्वादिशास्त्रं, आत्मनस्तत्सुखित्वादिनिवृत्त्यर्थमेवेति सिद्धम् । सिद्ध तु निवर्तकत्वात् इत्यागमविदा सूत्रम्" इति ॥

अत्रानन्दगिरीया टीकेयम्—उक्तेऽर्थे द्रमिडाचार्यसम्मतिमाह—सिद्ध त्विति । ब्रह्मणि पदानां व्युत्पत्त्यभावेऽपि सिद्धमेव शास्त्रपामाण्यम्, अभावबोधनव्युत्पन्ननञ्पदससृष्टैः स्थूलादिव्युत्पन्नपदै स्वाभाविकद्वैताभावबोधनेन अध्यस्तनिवर्तकत्वादिति सूत्रार्थः इति ॥

एतेन विज्ञायते व्यतिरेकदृष्टिरिय बहो कालात् बहुभिरूरीकृतेति । एतामेव हि सरणिं समाश्रित्य समन्वयसूत्रे "इद तु पारमार्थिक कूटस्थ नित्य व्योमवत्सर्वव्यापि सर्वविक्रियारहित नित्यतृप्त निरवयव स्वयज्योतिस्स्वभावम्" इति भाषितम् ॥

तदर्थस्तु— मिथ्यात्वस्य विकार्यत्वस्य उत्पाद्यत्वस्य आप्यत्वस्य सस्कार्यत्वस्य दु·खित्वस्य सातिशयत्वस्य जडत्वस्य च व्यावृत्तिलक्षण इति सप्रदाय· ॥

तथैव भामत्यामपि "अयमभिसधिः—कूटस्थो हि कार्यजननस्वभावो वा स्यादतत्स्वभावो वा। स चेत्कार्यजननस्वभाव ततो यावदेनन-कार्यं कर्तव्यं तावत्सहसैव कुर्यात् । समर्थस्य क्षेपायोगात् । अतत्स्वभावत्वे तु न कदाचिदपि कुर्यात् ॥

यद्युच्येत समर्थोऽपि क्रमवत्सहकारिसचिवः क्रमेण कार्याणि करोतीति । तदयुक्तम् । विकल्पासहत्वात् । किमस्य सहकारिणः कचिदुपकारमादधाति न वा? अनाधाने अनुपकारितया सहकारिणो-नापेक्ष्येरन्। आधानेऽपि भिन्नमभिन्न वा उपकारमादध्युः? अभेदे तदेवा-हितमिति कौटस्थ्य व्याहन्येन । भेदे तूपकारस्य तस्मिन् सति कार्यस्य भावात् असति चाभावात् सत्यपि कूटस्थे कार्यानुत्पादात् अन्वयव्यति-रेकाभ्यामुपकार एव कार्यकारी न भाव इति नार्थक्रियाकारी भावः। तदुक्तम्—

वर्षातपाभ्यां किं व्योम्नः चर्मण्यस्ति तयोः फलम् ।
चर्मोपमश्चेत्सोऽनित्य. खतुल्यश्चेदसत्फलः ॥ इति ॥

एव कूटस्थस्य कारणत्वासभव· क्षणवादिभिराशङ्कित । तस्योत्तर तत्रैव "स्थिरो हि भावः क्रमवत्सहकारिसमवधानात् क्रमेण कार्याणि करोति । न चानुपकारिणस्सहकारिण. । न चास्य सहकारिभिराधीय-मानो ह्युपकार· न भिन्नो नाप्यभिन्न कित्वनिर्वाच्य एव । अनिर्वाच्याच्च कार्यमनिर्वाच्यमेव जायते। नचैतावता स्थिरस्याकारणत्व तदुपादानत्वा-त्कार्यस्य । तथाच श्रुति —मृत्तिकेत्येव सत्यम्, इति ॥ (२-२-२६)

एव आत्मव्यतिरिक्तस्य सर्वस्यापारमार्थ्यलक्षणासद्रूपाभावरूपत्वे अध्यासलक्षणायां भ्रान्तौ च सत्यां जीवेश्वरादिव्यवस्था प्रमाणप्रमेय-प्रमातृप्रमादिव्यवस्था लौकिकवैदिकव्यवहारविषयभूता कथमुपपद्यता-मित्याशङ्कायाम्—व्यवहाराविरोधाय शास्त्रार्थोपपत्तये च अवस्थाद्वय ब्रह्मणोऽङ्गीकृतम् । अत्रेद प्रमाणम् "द्विरूप हि ब्रह्मावगम्यते नाम-रूपविकारभेदोपाधिविशिष्ट तद्विपरीत च सर्वोपाधिविवर्जितम्" इति (१-१-११) शारीरकभाष्यम् ॥

तथा—"परमेश्वराधीना त्वियमस्माभि· प्रागवस्था जगतोऽभ्युपगम्यते। न स्वतन्त्रा। सा चावश्यमभ्युपगन्तव्या। अर्थवतीह सा। न हि तया विना परमेश्वरस्य स्रष्टृत्व सिद्धयति। शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्ते। मुक्ताना च पुनरनुत्पत्ति·, विद्यया तस्या बीजशक्तेर्विनाशात्। अविद्यात्मिका हि सा बीजशक्ति· अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्ति। यस्यां स्वरूपप्रतिबोधरहिताश्शेरते संसारिणो जीवा.। सा चाकाशाक्षरमायादिशब्दै श्रूयते। अव्यक्ता हि सा माया तत्त्वान्यत्वाभ्यां निरूपणस्याशक्यत्वात्" इत्यादि च॥ (१—४—३)

अस्याश्च व्यवहारावस्थाया उपपादनप्रकाराः क्रियमाणा विद्वद्भिः विविधा विज्ञायन्ते। अतो व्यवहारप्रक्रिया यथायथोपयते तथातथाऽस्तु प्रकारभेद· नाभिनिवेशार्हः। ब्रह्मव्यतिरिक्तस्य सर्वस्य विचारानन्तरकालीनवाक्यार्थज्ञाननिवर्त्यत्व पर सिषाधयिषितामिति रहस्यम्। अत एव व्यावहारिकप्रपञ्चविषये विचित्रा वादा· प्रवर्तन्ते यथाबल विपाश्चिताम्। अत्रानेकेषूदाहरणेषु सत्स्वपि विस्तराभिया एकमुदाहरणमुपदर्शयाम। सिद्धान्तबिन्दौ (११२ पु)—

जीवात्मविषये आभासवाद प्रतिबिम्बवाद अवच्छेदवाद. एकजीववादश्चेति चत्वार पक्षा। प्रथम सुरेश्वराचार्यसम्मत प्रतिबिम्ब स्वरूपतो मिथ्येति वाद। द्वितीय. विवरणकारसक्षेपशारीरककारयोरभिमत प्रतिबिम्ब स्वरूपतस्सत्य प्रतिबिम्बत्वेनासत्यमिति वाद·। तृतीय अवच्छेदवादो वाचस्पतिमिश्रसिद्धान्तः। तुरीय· एकजीववाद· दृष्टिसृष्टिवाद· मुख्यो वेदान्तासिद्धान्त इति पक्षा· ॥

एतेषामुपव्याख्यानम्—तत्र प्रथम पक्ष —अज्ञानोपहित आत्मा अज्ञानतादात्म्यापन्नस्वचिदाभासाविवेकात् अन्तर्यामी साक्षी जगत्कारण-

मिति कथ्यते । बुद्ध्युपहित आत्मा तत्तादात्म्यापन्नस्वचिदाभासाविवेकात् जीवः कर्ता भोक्ता प्रमातेति कथ्यते । प्रतिदेह बुद्धि (अहकार) भेदात् तद्गतचिदाभासभेदेन तदविविक्त चैतन्यमपि भिन्नमिव प्रतीयते । अज्ञानस्य तु सर्वत्राभिन्नत्वात् तद्गतचिदाभासभेदाभावात् तदविविक्तसाक्षिचैतन्यस्य न कदाचिदपि भेदभानमिति । प्रतिबिम्बमसत्यमिति पक्षः ॥

व्याख्यानम्—स्वचिदाभास प्रतिबिम्ब. । अन्तर्यामी प्रेरकस्सर्वेषाम् । साक्षी सर्वव्यवहारहेतुभूतज्ञानस्वरूप· । अज्ञानप्रतिबिम्बत्व साक्षित्वम् । स्वरूपतो मिथ्याभूत प्रतिबिम्बमिति यावत् । शुद्धचैतन्यरूपस्यात्मनः आभासो बन्ध· तन्निवृत्ति· मोक्ष इति सिद्धान्तः ॥

द्वितीय·—अज्ञानोपहित बिम्बचैतन्यमीश्वरः । अन्तःकरणतत्सस्कारावच्छिन्नज्ञानप्रतिबिम्बित चैतन्य जीव इति विवरणकारमतम् ॥

अज्ञानप्रतिबिम्बित चैतन्यमीश्वर । बुद्धिप्रतिबिम्बित चैतन्यं जीव । अज्ञानोपहित बिम्बचैतन्यं शुद्धमिति सक्षेपशाररिककारमतम् । अनयो· पक्षयो. बुद्धिभेदाज्जीवभेद । प्रतिबिम्ब सत्यमिति पक्ष. ॥

तृतीय·—अज्ञानविषयीकृत चैतन्यमीश्वर । अज्ञानाश्रयीभूतं चैतन्यं जीव इति वाचस्पतिमिश्रमतम् । अत्राज्ञानभेदात् जीवभेद· । प्रतिजीवं च प्रपञ्चभेद. । जीवस्यैव स्वाज्ञानोपहिततया जगदुपादानत्वम् । प्रत्यभिज्ञा चापि साद्दश्यात् । ईश्वरस्य सर्वाधिष्ठातृत्वेन कारणत्वोपचार ॥

चतुर्थस्तु—अज्ञानोपहित बिम्बचैतन्यमीश्वर. । अज्ञानप्रतिबिम्बचैतन्य जीव इति वा, अज्ञानानुपहित शुद्धचैतन्यमीश्वरः, अज्ञानो-

पहित जीव इति वा पक्ष एकजीववादः । अत्र जीव एव स्वाज्ञान-वशात् जगदुपादान निमित्त च । दृश्य सर्व प्रातीतिकम् । देहभेदा-ज्जीवभेदभ्रान्ति । इति ॥

एव यथाकथचित् सृष्टयादिव्यवहारव्यवस्थाया सत्यां प्रति-षेधस्य प्रतिषेध्यप्रसक्तिमात्रे दृष्टिरिति विचित्रा वादा· । तदुक्तम् , वार्तिके—(३-४-४०२)—

यया यया भवेत्पुंसः व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता ॥ इति ॥

एव मार्गाणां विचित्रत्वेऽपि परमार्थदृष्ट्या व्यवहारविप्लवशङ्कान-वसरः, यत एव भाषित शारीरके (३-२-४)—"प्राक्तु ब्रह्मात्मदर्शनात् वियदादिप्रपञ्च व्यवस्थितरूपो भवति । सन्ध्याश्रयस्तु प्रपञ्च प्रतिदिन बाध्यते इत्यतो वैशेषिकमिद सन्ध्यस्य मायामयत्वमुदितम्" इति । अत्र दर्शनपदप्रयोगात्तदारम्भभूतविचारकालीनविज्ञानमात्रेण व्यवस्था-विप्लवस्य नावकाशलाभ ॥

तुरीयकोटिविश्रान्ति

सत्त्वे न मिथ्या शून्यत्वे दुर्निरूपं प्रकाशनम् ।
सदसद्भ्यामनिर्वाच्यां तामविद्यां प्रचक्षते ॥
सत्त्वे न भ्रान्तिबाधौ स्तो नासत्त्वे ख्यातिभाधने ।
सदसद्भ्यामनिर्वाख्याऽविद्या वेद्यैस्सह भ्रमः ॥

इति विभ्रमविवेकेष्टसिद्धयाद्युक्तरीत्या चतुर्थी कोटिरविद्या । तन्मय च जगत् चतुर्थकोटौ विश्रान्तामिति कश्चिन्निष्कर्ष । तस्येदमुपव्याख्यानम्—

यथा सुखदु·खतदुभयतद्विलक्षणा उदासीनावस्था ।
रागद्वेषतदुभयतद्विलक्षणावस्था उपेक्षा ।

शीतोष्णतदुभयतद्विलक्षणोऽनुष्णाशीतः स्पर्श· ।
भूतभविष्यत्तदुभयतद्विलक्षणः वर्तमान. काल· ।
सचितागामितदुभयतद्विलक्षण प्रारब्ध कर्म ।
चेतनाचेतनतदुभयतद्विलक्षण परमेश्वर ।
उत्पत्तिविनाशतदुभयतद्विलक्षणा स्थिति ।

इत्यादय· तुरीयकोटिस्थिता पदार्था तैस्तैर्वादिभिराद्रियन्ते तथा प्रपञ्चस्वरूपमपि न सत् नासत् नोभयम्, किन्तूभयविलक्षणमित्युक्तौ को दोष । अत एव प्रतिकक्षिभिरेवमुच्यते सर्वार्थसिद्धौ (३-४८) "न ह्यनुष्णाशीतवद्वृति , कोऽन्तरम्यात्यन्तमनुपलम्भात्" इति । एव तुरीयकक्ष्याया निक्षेपस्येदमेव प्रयोजनम्, यत् विद्याविरोधित्वेन विद्ययोपशम इत्येको मार्ग ॥

सोऽय पक्ष नैयायिकैरप्यनूदित इत्यवधार्यते। यथा–न्यायदर्शने गौतम तुरीयाध्याये फलपरीक्षाप्रकरणे एवमसूत्रयत्---"नासत् न सत् न सदसत् सदसतोर्वैधर्म्यात्" इति ॥ (४-१-४८)

अस्यायमर्थ स्वरसत सम्पद्यते । यथा उत्पत्तिव्ययधर्मक परिदृश्यमानमिद कार्य न सत् नाप्यसत् नोभय च । तत्र हेतु सर्वत्र, सदसतोर्वैधर्म्यादिति । सदसतोर्विरुद्धत्वेन प्रतीतेरित्यर्थ । एव पक्षत्रयप्रत्याख्यानेन तुरीय पक्षः सदसदनिर्वचनीयनामक पूर्वपक्षिणोऽभिप्रेत इति शक्यते वक्तुम् ॥

एव पूर्वपक्ष सूत्रयित्वा सिद्धान्तमेव सूत्रयामास—"प्रागुत्पत्तेरुत्पत्तिधर्मकमसदित्यद्धा" इति । अनेन सूत्रेण कार्यस्योत्पत्ते प्रागसत्त्वपक्षः अङ्गीकृत इति सिद्धः ॥

अत्र पूर्वपक्षमतरीत्या कार्य सदसद्विलक्षण दुर्निरूपानिर्वचनीयाद्यपरपर्यायमिति सिद्धे सति इदानी कार्यस्य मिथ्यात्ववादिभि मिथ्यात्वं परिष्कुर्वद्भि सदसद्विलक्षणतापक्ष एव परिगृह्यते इत्यवधार्यते । ततश्च सोऽयमभिप्रायोऽनादिरिति सिद्ध्यति । प्रपञ्चविषये एष तुरीयकोटिविश्रान्तिपक्ष । माध्यमिकपक्षस्तु सर्वस्मिन्नपि विषये पञ्चमकोटिविश्रान्तिरिति विवेक । ततश्च अलीकवाद एष इति गीयते । स तु शून्यवाद इति ॥

एव परमार्थ ब्रह्मरूप तत्त्वमपि कोटिचतुष्टयविलक्षणमुच्यते । ताश्च कोटय विलक्षणा. । यथोच्यते—

अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चलाऽथिरोभयाभावैः आवृणोत्येव बालिश. ।
कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सदाऽऽवृतः ।
भगवानाभिरस्पृष्टो येन दृष्टस्स सर्वदृक् ॥ ४ ८४ ॥

इति माण्डूक्यकारिका । अत्र चलत्व स्थिरत्व उभयत्व अनुभयत्वं च कोटय आपातत प्रतीयन्ते। यासा ग्रहै कोटीनामभिनिवेशैरित्यर्थः ॥

अविश्रान्ति

अथाविश्रान्तिपक्ष । अयमेव वाचस्पतिमिश्रसिद्धान्त. । तथा हि—नसत् नासत् नापि सदसत् नचैव सदसद्विलक्षणम्, इति वाचस्पतिमिश्रेण ब्रह्मतत्त्वसमीक्षायामुक्तमित्यानन्दबोधाचार्य प्रमाणमालाया कथयति । अनूद्यमानो ग्रन्थभागस्त्वेष —"नचैतादृशमुभयवैलक्षण्यमपि तात्त्विकमभ्युपगच्छाम , येन प्रसज्ज्येम विरोधम्। वैलक्षण्यवाचोयुक्तिर्हि प्रतियोगिनिरूपणात् यौक्तिकत्वप्रकटनफला । न त्वेवरूपताया सामञ्जस्यसम्पादनायेत्यवोचाम । न हि स्वरूपत एवातात्त्विकस्य

तात्त्विकं किमपि रूपं भवति। अत एवोक्तमाचार्यवाचस्पतिना ब्रह्मतत्त्वसमीक्षायाम्—

सदसदुभयानुभयादिप्रकारैरनिर्वचनीयत्वमेव ह्यविद्याया अविद्यात्वमिति । सा चाधिष्ठानविद्याविरोधादविद्येति गीयते । तदेकार्थतया चाज्ञानमिति । प्रमाण पुनरत्र विवादपदमनिर्वाच्य बाध्यत्वात् यदुक्तसाध्य न भवति तदुक्तसाधन न भवति यथाऽऽत्मा । एतदेवोपजीव्यप्रतीतिबाधान्यथानुपपत्तिः प्रवृत्तिबाधान्यथानुपपत्तिश्चेत्यर्थापत्तिद्वयमपि तद्वादिन प्रत्यभिधातव्यमिति" इति ॥

एव प्रमाणमालायामेवान्यत्रेत्थमुच्यते—"परस्परविरुद्धाना निषेधेऽपि विधाविव समुच्चयविरोध गीर्वाणैरप्यवारणीय । एतेन चतुष्कोटिविनिर्मुक्तो भेद इति परास्तम् । सदसद्विलक्षणत्वाभ्युपगमोऽप्येव जडस्यानुपपन्न इति चेत्सत्यम् । तात्त्विकत्वे तथैव । अत एव तत्त्वतो युक्त्या निश्चित्य वक्तुमशक्यत्वात् अनिर्वचनीयमेव जडमुच्यते । सदसद्वैलक्षण्यादिवाचोयुक्तिरपि तत्तद्रूपनिरूपणासहिष्णुत्वमात्रप्रकटनाय। न तु तद्विरहसमुच्चयात्मनो रूपान्तरस्य तात्त्विकत्वप्रकटनायेति न किंचनास्माक दुष्यतीति" इति ॥

अत्र विश्रान्तिपक्षे शून्यवादसत्यवादयो माध्यस्थ्येन प्रपञ्चस्य स्थिति । स एव मायावाद. मायाविद्ययोरैक्यपक्षश्चेति सूच्यते । अविश्रान्ति पक्षे तु स्वरूपतः परमार्थत प्रतिषेध एव । ततश्चानिर्वचनीयत्वलक्षण दुर्निरूपतावाद द्विविधस्सम्पन्न । तत्रैको माध्यस्थ्यरूप । द्वितीयः अपलापलक्षणप्रत्याख्यानरूप । द्वयोरपि सामञ्जस्य कारणदृष्टिकार्यदृष्टिरूपाभ्यां ब्रह्मदृष्टिप्रपञ्चदृष्टिभ्यां अस्माभिरध्यवसित प्रागेव निरूपितम् ॥

ततश्च टीकाकारविवरणकारादीनां मार्ग· कारणदृष्टिप्रधान । वार्तिककारभामतीकारादीनां मार्ग कार्यदृष्टिप्रधान । एव सत्यो खलू-भयविधयो दृष्टयो शारीरकभाष्ये परिदृश्यमानानि सर्वाणि वाक्यानि सङ्गतानि भवन्तीत्यद्वैतसिद्धान्तसारार्थ । अयमत्रसग्रह —

सर्वान् प्रबन्धानालोच्य विचार्य च पुनःपुनः ।
मार्गद्वयं सुनिष्पन्नमद्वैताचार्यसंमते ॥

तुरीयकोटौ स्थित्वैका विचारस्य व्यवस्थिति· ।
दुर्निरूपत्वसिद्धान्ते स्थित्वैवान्या व्यवस्थितिः ॥

सर्वथा निर्विशेषस्य परिशेषोऽभिसहित· ।
भावस्य न त्वभावस्येत्येष सिद्धान्तसंग्रह· ॥

इति । आरोपदृष्टि अपवाददृष्टि मध्यस्थदृष्टिश्चेति सक्षेपशारीरकवि-भाग· प्राङ्निरूपितोऽप्यस्य प्रपञ्च इति सक्षेप ॥

दुर्निरूपत्वोद्देश

न सतः कारणापेक्षा व्योमादेरिव युज्यते ।
कार्यस्यासभवी हेतु खपुष्पादेरिवासत· ॥

कार्यकारणभावापलापकारिकेयम् । अयमर्थ —यदि कार्य कारकव्यापारात्पूर्वमस्ति तदा पूर्वसिद्धगगनादिवत् किमपि कार्य न स्यात् । अथ तदा नास्ति तथापि खपुष्पवन् न कार्य, नचासतस्सत्त्वापादनसम्भव । न हि नील शिलिपसहस्रेणापि पीतीकर्तु शक्यमिति । तथा—

कार्यत्वं कारणत्वञ्च सम्बन्धस्सोऽसतां कुतः ।
सच्चेत्कारणवैयर्थ्यमसच्चेदनवस्थितिः ॥

कुर्वत्कार्यमकुर्वद्वा कारण तत्कुतो भवेत् ।
कुर्वच्चेदनवस्थानमकुर्वत्त्वव्यवस्थिति· ॥

किञ्च कारणात्कार्यं भिन्नमभिन्नं वा ? आद्ये गवाश्वयोरिव कार्यकारणता न स्यात्। अनन्तरे कथं सिद्धस्य साध्यता ? तथा—भावस्य कूटस्थस्य कारणत्वं न सम्भवतीत्यत्र—

वर्षातपाभ्यां किं व्योम्नः चर्मण्यास्ति तयोः फलम्।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः ॥ इति ॥

अयमर्थः—कूटस्थो हि कार्यजननस्वभावो वा स्यादतत्स्वभावो वा ? स चेत्कार्यजननस्वभावः ततो यावदनेन कार्यं कर्तव्यं तावत्सहसैव कुर्यात्, समर्थस्य क्षेपायोगात्। अतत्स्वभावत्वे तु न कदाचिदपि कुर्यात्। यद्युच्येत समर्थोऽपि क्रमवत्सहकारिसचिव क्रमेण कार्याणि करोतीति। तदयुक्तम्—विकल्पासहत्वात्। किमस्य सहकारिण कञ्चिदुपकारमादधति न वा ? अनाधानेऽनुपकारितया सहकारिणो नापेक्ष्येरन्। आधानेऽपि भिन्नमभिन्नं वा ? उपकारमादध्यु ? अभेदे तदेवाहितमिति कौटस्थ्यं व्याहन्येत। भेदे तूपकारस्य तस्मिन् सति कार्यस्य भावात् असति चाभावात् सत्यपि कूटस्थे कार्याऽनुत्पादात् अन्वयव्यतिरेकाभ्यामुपकार एव कार्यकारी न भाव इति नार्थक्रियाकारी भाव। एव कूटस्थस्य नित्यस्य कारणत्वासम्भव क्षणवादिभिरुपपादितः ॥

तथा—गुणकर्मसामान्यादिपदार्थन्तरापह्नवेऽप्येतादृश्येव युक्ति श्लोकवार्तिके प्रत्यक्षे (१४० श्लोक)—

जात्याद्यर्थान्तरं यस्मादतद्रूपेऽपि वस्तुनि।
भवत्यध्यस्य धीः तस्मात् मृगतृष्णादिभिस्समा ॥

इति। अत्र व्यक्तिभ्यः अन्यत्वानन्यत्वाभ्यां निरूपयितुमशक्यत्वमेव गुणकर्मजात्याद्यपह्नवे युक्तिः सौगतसम्मताऽनूदिता ॥

तथा वाक्याधिकरणे (७ श्लोके)—

वाक्यवाक्यार्थयोर्नापि वस्तुत्वमुपपद्यते ।
स्पष्टं पदतदर्थाभ्यां अन्यानन्यानिरूपणात् ॥

इत्येषैव युक्ति वाक्यवाक्यार्थयोरपह्नवेऽनूदिता ॥

तथा—योगाचारसिद्धान्ते बाह्यर्थापह्नवेऽप्यभिधीयमाना युक्तिस्सूत्रभाष्ये श्रीशाङ्करेऽनूदिता। (२-२-२८) यथा—"बुध्यारूढेन रूपेणान्त स्थ एव प्रमाणप्रमेयफलव्यवहार सर्व उपपद्यतेऽसत्यपि बाह्येऽर्थे, बुध्यारोहमन्तरेण प्रमाणादिव्यवहाराऽनवतारात् ॥

कथं पुनरवगम्यतेऽन्त स्थ एवाय सर्वो व्यवहार न विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति ? तदसम्भवादित्याह । स हि बाह्योऽर्थोऽभ्युपगम्यमान परमाणवो वा स्यु तत्समूहा वा स्तम्भादय । तत्र न तावत्परमाणव स्तम्भादिप्रत्ययपरिच्छेद्या भवितुमर्हन्ति, परमाण्वाभास ज्ञानानुपपत्ते । नापि तत्समूहा स्तम्भादय., तेषा परमाणुभ्योऽन्यत्वानन्यत्वाभ्या निरूपयितुमशक्यत्वात् । एव जात्यादीन्यपि प्रत्याचक्षीत" इति ॥

एताद्दशैरुदाहरणै अन्यत्वानन्यत्वाभ्या निरूपयितुमशक्यत्वमेवापलापयुक्ति. ब्रह्मास्त्रस्थानीया सौगतानामिति स्पष्टमवगत भवति ॥

अत्र कौमारिलादीनामेव समाधानम्--वनवादे श्लोकवार्तिके (६३२)—

तस्मादत्यन्तभिन्नत्वं न स्यादवयवैस्सह ।
कैश्चिदव्यतिरिक्तत्वं कैश्चिच्च व्यतिरिक्तता ॥
दूषिता साधिता वाऽपि न च तत्र वलावलम् ।
कदाचिन्निश्चितं कैश्चित् तस्मान्मध्यस्थता वरम् ॥
ततोऽन्यानन्यते तस्य स्तो न स्तश्चेति कीर्त्यते ॥ इति ।

तत्रैवोपमानवादे (४४३)—

न हि शक्त्यात्मना किञ्चिदसत् जन्म प्रपद्यते ।
धर्माणां न च नानात्वमस्ति चावान्तरस्थितिः ॥ इति ।

तत्रैव शून्यवादे (२९७)—

अत्यन्तभिन्नताऽस्माभिः नैव कस्य चिदिष्यते ।
सर्वं हि वस्तु रूपेण भिद्यते न परस्परम् ॥ इति ।

एवमन्यत्रापि द्रष्टव्यम् ॥

एवञ्च कारणापेक्षया आश्रयापेक्षया वा भेदाभेदरूपाभ्यामन्यत्वानन्यत्वाभ्यां दुर्निरूपत्वेन सौगतैरपह्नवे आपादिते भेदाभेदयोरविरोधेन तादात्म्यमभ्युपगम्य कुमारिलादिभि अपलापमपाकृत्य सर्वस्य सत्त्व प्रसाधितम् । श्रीशङ्कराचार्यै पुन ब्रह्ममात्रपरिशेषाय व्यतिरिक्तस्य सर्वस्य निरन्वयोपशमाय च प्रपञ्चस्वरूपस्य कारणापेक्षया तत्त्वान्यत्वाभ्यां दुर्निरूपत्वात् अनन्यत्वाद्वैतापरपर्याय विलक्षण तादात्म्यमुररीकृत्य भ्रान्तिसिद्ध अविद्यात्मक मायामय अनिर्वचनीय अनृत मिथ्या बाध्य अळीक अन्यद्वा यत्किञ्चिदुच्यमान तादृशसर्वात्मकत्वेऽपि नापलापः, अपि तु निरन्वयो विनाश । विनाशात्पर ब्रह्म केवल परिशिष्यते इति प्रसाधितमित्यद्वैतसिद्धान्त ॥

एवञ्च तादात्म्यमितिपदस्य स्वरूपैक्यमिति भेदवादिसम्मतोऽर्थ । भेदाभेद इति अनेकान्तवादिसम्मतोऽर्थ । अनन्यत्वमद्वैतमिति च श्रीशङ्कराचार्यसम्मतोऽर्थ । पारतन्त्र्यपराकाष्ठेति श्रीरामानुजाचार्यसम्मतोऽर्थ इति विशेष ॥

इदमत्रावधारणीयम्—अद्वैतसिद्धान्ते प्रधानभूता युक्तिरेषा सर्वैरनुसृतेति विज्ञायते, या खलु तैस्तैर्वादिभि यस्य येन येन रूपेण

निरूपणेऽनुपपत्तिरुद्भाव्यते, तस्य तेन तेन रूपेण निरूपणीयत्वस्य परित्यागमात्रम्। सैषा व्यतिरेकदृष्टिः प्रागेव सूचिता। तच्च कुत्र विश्राम्यतीति चेत्केवले दुर्निरूपत्वे। तदपि कुत्र विश्राम्यतीति चेत् बाध्यत्वे तदपि निर्विशेषे भावरूपे ब्रह्मणीति हृदयम् ॥

एव स्थिताया वस्तुगतौ खण्डनकृता श्रीहर्षेण वितण्डाकथामालक्ष्य दुर्निरूपत्वोद्देशः एव प्रदर्शित। यथा—"अथ सर्वासत्त्वे सदसत्पक्षदोषाणामप्यसत्त्वात् अनिर्वचनीयताऽप्यसती स्यादिति चेत्, न वयमेव पर्यनुयोज्या, साऽपि कृत्स्नप्रपञ्चपरसर्वशब्दाभिधेयमध्यविनिविष्टैव। परस्यैव तु व्यवस्थया एव पर्यवस्यति निर्वचनप्रतिक्षेपादानिर्वचनीयत्वम्। विधिनिषेधयोरेकतरनिरासस्येतरपर्यवसितायास्तेनाभ्युपेतत्वात्। तत परकीयरीत्येदमुच्यते अनिर्वचनीयत्व विश्वस्य पर्यवस्यतीति ॥

वस्तुतस्तु वयं प्रपञ्चसत्यत्वव्यवस्थापनाविनिवृत्ताः स्वतस्सिद्धे चिदात्मनि ब्रह्मतत्त्वे केवल भरमवलम्ब्य चरितार्थास्सुखमास्महे। ये तु स्वपरिकल्पितसाधनदूषणव्यवस्थया विचारमवतार्य तत्त्व निर्णेतुमिच्छन्ति तान् प्रति ब्रूम कृपया तेषां भ्रान्तिमपनेतु तेऽपि कृतार्था भवन्त्विति न साध्वीयं भवतां विचारव्यवस्था भवत्कल्पितव्यवस्थयैव व्याहतत्वादिति। अत एवास्मदुपन्यस्यमानदूषणस्थितिविषया पर्यनुयोगाः निरवकाशाः त्वद्व्यवस्थयैव त्वद्व्यवस्थाया व्याहत्युपन्यासात्" इति ॥

अनेन सन्दर्भेण स्वपक्षस्थापनाहीनां परपक्षविदलनमात्रावसानां वितण्डामाश्रित्यानिर्वचनीयत्वस्य उद्देशः परानुग्रह इति सूचितो भवति। तस्यैव स्वप्रयोजनत्वात् तस्यैव स्वपक्षत्वसम्भवात् नेयं वितण्डा कथा भवतीति वात्स्यायनभाष्ये व्यक्तमुक्तम् ॥

सौगतसाङ्कर्यनिरास

अथ सर्वेषां वेदान्तानां ब्रह्म सत्य जगन्मिथ्या इति तात्पर्यवर्णनरूपस्याद्वैतसिद्धान्तस्य साक्षात्प्रतिपक्षभूत दर्शन सौगतदर्शनम्। तत्र माध्यमिकदर्शनभूतम्सर्वशून्यवाद ब्रह्म सत्यमित्यशेन निराचिकीर्षित·। जगन्मिथ्येत्यशेन बाह्यार्थशून्यवादरूप· विज्ञानवाद निराचिकीर्षित। अतस्तदुभयवैलक्षण्य निरूपणीयम्। तत्र सर्वशून्यवादवैलक्षण्यमेवम्—यादृश शून्यत्व निरुपाधिकाभावलक्षण सौगतसम्मत न हि खलु तादृशं शून्यत्वमद्वैतसम्मतम्। अपि तु सोपाधिक साधिकरणक निषेधलक्षण ब्रह्मपर्यवसानफलम्। तदुच्यते ब्रह्मसिद्धौ श्रीमता मण्डनमिश्रेण—

लब्धरूपे क्वचित्कञ्चित्तादृगेव निषिध्यते।
विधानमन्तरेणातो न निषेधस्य सम्भवः॥ इति।

निरधिकरणक निष्प्रतियोगिकश्चाभावो नास्तीत्यर्थ॥

तथा शारीरकभाष्ये (३-२-२२) "तस्मात् ब्रह्मावसानोऽय प्रतिषेधः नाभावावसान इत्यध्यवस्याम" इति। तत्रैव "तस्मात् ब्रह्मणः रूपप्रपञ्च प्रतिषेधति परिशिनष्टि ब्रह्मेत्यवगन्तव्यम्" इति। तत्रैव "कल्पितरूपप्रत्याख्यानेन ब्रह्मस्वरूपावेदनमिति निर्णीयते" इति च॥

शून्यवादनिराकरणप्रकरणे (२-२-३१)—"न ह्यय सर्वप्रमाणसिद्धो लोकव्यवहार अन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम्, अपवादाभावे उत्सर्गप्रसिद्धेः" इति॥

गौडपादकरिकाभाष्ये (२-३२) "तथा च सत्यद्वैतस्य वस्तुत्वे प्रमाणाभावात्, शून्यवादप्रसङ्ग·, द्वैतस्य चाभावात्, न—रज्जुसर्पादिकल्पनाया निरास्पदत्वानुपपत्तिरित्युक्तमेतत्" इति॥

पञ्चपादिकायां (१२ पु) "नाप्यध्यस्तमसदेव, तथात्वे प्रतिभासायोगात्। ननु सर्वमेवेदमसदिति भवतो मतम्[1] क एव माह। अनिर्वचनीयानाद्यविद्यात्मकमित्युद्घोषितमस्माभि। अथ पुनर्विद्योदये अविद्याया निरुपाख्यत्वमङ्गीकृत्यासत्त्वमुच्येत काममभिधीयताम्" इत्यस्ति॥

भामत्याम् (२-२-३१) "अपि चारोपित निषेधनीयम्। आरोपश्च तत्त्वाधिष्ठानो दृष्ट, यथा शुक्तिकादिषु रजतादे.। न चेदस्ति किञ्चित्तत्त्व कस्य कस्मिन्नारोप। तस्मान्निष्प्रपञ्चं परमार्थसत् ब्रह्म अनिर्वाच्यप्रपञ्चात्मनाऽऽरोप्यते। तच्च तत्त्व व्यवस्थाप्य अतात्विकत्वेन साव्यवहारिकत्व प्रमाणाना बाधकेनोपपाद्यते इति युक्तमुत्पश्याम" इति॥

अवैदिकदर्शनसग्रहे गङ्गाधरवाजपेयिनिर्णयोऽयम्—"विचारासहत्वलक्षणशून्यतैव तत्त्वम्" इति शून्यवादसिद्धान्त निरूपितः। अत्र अद्वैतसिद्धान्ते तु विचारासहत्वलक्षणशून्यतयाऽन्यत्तत्व निर्धार्यते इति शून्यतैव तत्त्वमिति पदेन सूचितमिति हृदयम्॥

न्यायमकरन्दे आनन्दबोधैरेवमुच्यते—(२९२ पु) "न हि निषेधवाक्येषु कस्य चिदात्यन्तिको निषेध। किन्तु किञ्चित्कचित्" इति॥

श्रीहर्षस्तु खण्डने एव लिखति प्रथमपरिच्छेदे "एवञ्च सति सौगतब्रह्मवादिनो को विशेष इति चेदय विशेषः, यदादिम· सर्वमेवानिर्वचनीय वर्णयति, यदुक्त भगवता लङ्कावतारे (११६)—

बुध्या विवेच्यमानाना स्वभावो नावधार्यते।
अतो निरभिलप्यास्ते नि·स्वभावाश्च वर्णिताः॥ इति॥

विज्ञानव्यतिरिक्त पुनरिद विश्व सत्त्वासत्त्वाभ्यामनिर्वचनीयं ब्रह्मवादिनस्सागिरन्ते, इति । तथा—तदेतत्संवृतिसत्यमिति गीयते" इति ॥

तथा काशीपुस्तके (१०६८ पुटे)—

गुरुर्धियमभावस्य स्थानेस्थानेऽभिषिक्तवान् ।
प्रसिद्ध एव लोकेऽस्मिन् बुद्धबन्धुः प्रभाकरः ॥

इति पद्य पठितमस्ति । अभावस्य ज्ञानरूपत्वे भावस्यापि तथा प्रसङ्गाद्विज्ञानवादान्त पातस्यादित्यभिप्राय । एव शून्यवादवैलक्षण्यमिति दिक्॥

अथ विज्ञानवादवैलक्षण्य प्रदर्श्यते—विज्ञानवादिना मिथ्या जागरितोपलब्धिः उपलब्धित्वात् स्वप्नोपलब्धिवदित्यनुमानरूपायां युक्तावुक्तायां "वैधर्म्याच्च न स्वप्नादिवत् (२-२-२९)" इत्याचार्येण बादरायणेन युक्तिः प्रदूषिता । वैधर्म्य च बाधकप्रत्ययलक्षणम् । ततश्चानुमानस्योपाधिरुक्तो भवति । यत्रयत्रोपलब्धौ मिथ्यात्व तत्रतत्र बाधकप्रत्यय वर्तते, गगनतलमालिन्याद्युपलब्धिष्वपि यौक्तिको बाधकप्रत्ययो वर्तत इति साध्यव्यापकत्वम् । व्यवहारदशायां जागरितोपलब्धीनामबाधितत्वात् पक्षे साधनाव्यापकत्व च इति बाधकप्रत्ययस्योपाधेस्सत्त्वादनुमानरूपमुपलब्धित्व दुष्टमिति विज्ञनवाद प्रदूषित इति प्रथम वैलक्षण्य शारीरकभाष्यसम्मतम् ॥

तथाऽत्रैवाधिकरणे "साक्षिणोऽवगन्तु स्वयसिद्धतामुपक्षिपता स्वय प्रथते विज्ञानमित्येष एव मम पक्षः त्वया वाचोयुक्त्यन्तरेणाश्रित इति चेन्न—विज्ञानस्य उत्पत्तिध्वसानेकत्वादिविशेषवत्त्वाभ्युपगमात् अत प्रदीपवद्विज्ञानस्यापि व्यतिरिक्तावगम्यत्वमस्माभि प्रसाधितम्" इति भाषितमस्ति ॥

गौडपादकारिकाभाष्ये (४-९९) ज्ञानज्ञेयज्ञातृभेदरहित पर-

मार्थतत्त्वमद्वयमेतन्न बुद्धेन भाषितम् । यद्यपि बाह्यार्थनिराकरण ज्ञानमात्रकल्पना चाद्वयवस्तुसामप्यिमुक्तम् । इदन्तु परमार्थतत्त्वमद्वैत वेदान्तेष्वेव विज्ञेयमित्यर्थ " इति । अत्रानन्दगिरि.—" सौगतमेव भवताऽपि सगृहीतमित्याशङ्क्याह— ज्ञानमिति ॥

इम सदर्भ मनसि कृत्वा आत्मसिद्ध्यादौ यामुनाचार्यादिभि " अतो वासनाभिधानसमनन्तरप्रत्ययसामर्थ्यादनाद्यविद्यावशाच्च समारोपितावास्तवग्राह्यग्राहकविकल्पोल्लेखिनी स्वयप्रकाशा संविदेव परमार्थसती । सैवात्मेति प्रकटा. प्रच्छन्नाश्च " इत्यादय वाक्यविशेषा प्रयुज्यन्ते ॥

अत्रात्मनो निर्विशेषत्वात् क्षणिकत्वानेकत्वादिविरुद्धानित्यत्वैकत्वाद्यभावात् को विशेष इत्याशङ्कायामिद समाधानवाक्य भवितुमर्हति । यदेतत् पञ्चपादिकाया (४ पु) " आत्मनो निर्धर्मकत्वेऽपि आनन्दो विषयानुभव नित्यत्वमिति सन्ति धर्मा , अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते " इति ॥

तत्रैव (२५ पुटे) ननु नीलादिविषयोऽपि चेदपरोक्षस्वभावः नीलात्मिका सविदित्युक्त स्यात् । अतस्स एव माहायानिकपक्षस्समर्थित. । मैव—परस्परव्यावृत्तौ नीलपीताववभासेते । अपरोक्षता तु न तथा, एकरूपावगमात् विच्छेदावभासेऽप्यतो न तत्स्वभावा " इति ॥

तत्रैव (२८ पु.) " तदेवमहकर्तु सदैकरूपावगमात् स्थायित्वेऽप्यर्थक्रियासम्भवान्न नीलस्य स्वगतापरोक्षत्वमात्रेण माहायानिकपक्षस्समर्थ्यते " इति ॥

अत्रेत्थ विवरणम् (७३ पु.) " अस्ति च महान् सिद्धान्तभेद. क्षणिकाद्विज्ञानाद्भेदेन अर्थक्रियासामर्थ्यसत्त्वशून्य विषयमाहुर्विज्ञानवा-

दिनः । तत्त्वदर्शिनस्तु अद्वितीयात्सवेदनादभेदेऽपि विषयस्य भेदेन अर्थक्रियासामर्थ्यसत्त्व स्थायित्व चाऽबाधितमस्तीति वदन्ति" इति ॥

तत्रैव (८४ पु) "यत्किञ्चित्साधर्म्यमात्रेण सिद्धान्तसाङ्कर्ये मन्त्रार्थवादेतिहासपुराणप्रामाण्यानभ्युपगमात् देवतास्वर्गेश्वरमोक्षानभ्युपगमात् क्षणिकप्रमाणसबन्धस्य क्षणिकस्यैव सत्त्वाऽभ्युपगमात् लोकायतबौद्धाशद्वयपरिणत प्राभाकरः । भेदाभेदाभ्युपगमात् मन्त्राद्यप्रामाण्याच्च लोकायतक्षपणकाशद्वयपारिणतो बार्तिककार ॥

यस्तु कश्चित् क्षपणकपादावनतशिरोबिम्ब तत्त्वदर्शनतन्निष्ठपरमहसप्रद्वेषतीव्रवायुविक्षिप्तविवेकविज्ञानलव· स्वपरपक्षगुणदोषविभागदूरीकृतविज्ञान· भेदाभेदाभ्या बन्धमोक्षादिसङ्करमिव कुर्वन् दुर्जनरमणीयां वाच जल्पति सुगतविज्ञानवादसमानोऽय वेदान्तवाद इति, स सप्रदायश्रवणपरिचयशून्यतया दर्शनविवेकमनवबुध्यमान नापवाद्य· । किन्तु शोचनीय इत्युपेक्षणीयो विद्वद्भि" इति ॥

(१६) "अत्र कश्चित् भेदाभेदाभ्यां सर्वसकरवादी वेदार्थगहनसप्रदायहीन· दुर्जनरमणीया वाच जल्पति" इति ॥

(१७) "अन्यथा सर्वसकरवादितया क्षपणकशिष्यता चिरकालसमुपार्जिता बाध्येत" इति ॥

(९९) "कर्तृत्वभोक्तृत्वरागद्वेषसुखदु खादयोऽप्यात्मनि स्वयं प्रकाशा इति बौद्धप्राभाकरा कल्पयन्ति" इति ॥

(१६२) "अत्र सर्वसङ्करवादी पुरस्तात् यज्ञोपवीतत्यागस्यानिर्दिष्टत्वात् ब्राह्मण· कथ अयज्ञोपवीतीति प्रश्नस्य प्रसङ्गाभावात् प्रक्षिप्तमिदं वाक्यमिति जल्पति तस्य तत्त्वदर्शनतन्निष्ठपरमहसपरिव्राजकद्वेष एवापराध्यति" इति ॥

(२२३) "अत्र सर्वसङ्करवादी न निर्गुण द्रव्यमस्तीति जल्पति . . . . तस्मात् तत्त्वज्ञानप्रद्वेषमात्रमेतत् न निर्गुणं ब्रह्मेति" इति ॥

(२२६) "तस्मान्मन्दमतिसतोषमात्रप्रयोजनतया बहुवेणुभार-पीडितचेतसाऽय भेदाभेदपक्ष समादीयते" इति ॥ अत्र बहुवेणुपदेन त्रिदण्ड विवक्षितम् ॥

यस्तु इत्यादय· ग्रन्था एते भास्करभाष्य हृदि निधाय प्रवृत्ता·। यतस्तदीयभाष्ये एव वाक्यान्युपलभ्यन्ते (४९ पु) 'केचित्तु श्रुत्यर्थ-माचार्योक्ति च पृष्ठत कृत्वा मायामात्र स्वबुद्धया कल्पयित्वा अन्यदेव दर्शन रचयन्ति। (८५ पु.) विगीत छिन्नमूल माहायानिकबौद्धगाथितं मायावाद व्यावर्णयन्तो लोकान् व्यामोहयन्ति" इति (१२४ पु.) ये तु बौद्धमतावलम्बिनो मायावादिनः तेऽप्यनेनैव न्यायेन सूत्रकोरण निरस्ता वेदितव्या" इत्यादय वाक्यविशेषा· दृश्यन्ते ॥

एतमेव पन्थानमवलम्ब्य यादवप्रकाशाचार्योऽपि एव लिखति। यथा—

वेदोऽनृतो बुद्धकृतागमोऽनृतः
प्रामाण्यमेतस्य च तस्य चानृतम्।
बोद्धाऽनृतो बुद्धिफले तथाऽनृते
यूयं च बौद्धाश्च समानसंसदः ॥ इति ॥

इद हि वचन श्रुतप्रकाशिकायां महासिद्धान्ते शास्त्रप्राबल्यविचारोपस-हारे, शतदूषण्यां च चतुर्दशे वादे यादवप्रकाशवाक्यमित्युदाहृतमस्ति॥

तथैव रामानुजाचार्येणापि श्रभाष्ये (२-२-२७) "एवं रूपेण सकर्मकेण सकर्तृकेन ज्ञाधात्वर्थेन सर्वलोकसाक्षिकमपरोक्षमवभासमाने-

नैव ज्ञानमात्रमेव परमार्थ इति साधयन्तः सर्वलोकोपहासोपकरणं भवन्तीति वेदवादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतर प्रपञ्चितम्" इति भाषितमित्यलमनया प्रसक्तानुप्रसक्तया ॥

"अथ एव प्रपञ्चस्य परमार्थसत्त्वाभावेऽप्यर्थक्रियाकारित्वलक्षणं सत्त्वमभ्युपगत विवरणकारै" इति (११८ पु) न्यायमकरन्दे कथितम् ॥

सक्षेपशारीरके तु परिणामवाद एव साङ्कर्यमुक्त्वा अद्वैतमते साङ्कर्यमेव परिहृतमस्ति। यथा ब्रह्मपरिणामवादे सौगतमतसाङ्कर्यमापद्यते, विज्ञानस्यैवमाकारश्चतुर्विध इति हि तन्मतम्, तदेतदाह—

मातृप्रमाणमिति मेय विभागभिन्नं
ब्रह्मैव चेद्भवति तत्र च वर्णयामः।
कूटस्थताऽपहृतिरेकरसत्वहानिः
शाक्यैश्च सन्धिरिति दूषणमन्यदत्र ॥ इति। १-११७ ॥

ब्रह्मविवर्तवादेऽपि ब्रह्मव्यतिरिक्तस्य सर्वस्यापलापात्सौगतसाङ्कर्य स्पष्टमेवेत्याशङ्क्यते—

ननु शाक्यभिक्षुसमयेन समः
प्रतिभात्ययं च भवतस्समयः।
यदि बाह्यवस्तु वितथं नु कथं
समयाविमौ न सदृशौ भवतः ॥ २-२५ ॥
यदि बोध एव परमार्थवपुः
न तु बोध्यमित्यभिमतं भवति।
ननु चाश्रितं भवति बुद्धमुनेः
मतमेव कृत्स्नमिह मस्करिभिः ॥ २-२६ ॥

समाधयिते—

ननु मातृमानविषयावगतीः
अपरस्परं प्रति विभागवतीः।

उपयन् भदन्तमुनिना सदृशः
कथमेष वैदिकमुनिर्भवति ॥ २-२७ ॥

विशदयति—

परमात्मसंश्रयतमोजनितं
प्रविभक्तमेव तु परस्परत ।
स्थिरमभ्युपेतमिह नस्समये
ननु मातृमानविषयप्रभृति ॥ २-२८ ॥

मिथ्यात्वाभ्युपगमात् असत्त्वानभ्युपगमात्, स्थिरत्वाभ्युपगमात् क्षणिकत्वानभ्युपगमात्, लेशतोऽपि न साम्यमिति भावः ॥

भामत्यां तु (२--२--२८) "एव च न सिद्धसाधनम्, न हि ब्रह्मवादिनो नीलाद्याकारां वित्तिमभ्युपगच्छन्ति, किन्तु अनिर्वचनीय नीलादीति" इति वैलक्षण्यमुक्तम् ॥

न्यायमकरन्दे (३०५ पु.) "न हि वय नीलाद्याकारा वित्तिमभ्युपगच्छाम, येन माहायानिकपक्षानुप्रवेश । किन्तु अनाद्य विद्याविक्रीडितमलीकनिर्भासमाकार प्रपञ्चमाचक्ष्महे" इति ॥

तथा तत्रैव (१२९) "न खलु नभ स्थलकमलायमान प्रपञ्चमाचक्ष्महे, येनायमाश्रयो न स्यात्" इति ॥

तत्रैव (६१ पु.) "प्रतिभासमानाकारस्य बहिरपलापे विज्ञानाकार एवायमाश्रित स्यात् । तथा च माहायानिकपक्षानुप्रवेशो दुर्निवार स्यात्" इत्यप्युक्तम् ॥

ततश्च बाह्यार्थस्यापलापो नास्तीति निर्णय । विद्योदयादनन्तर ब्रह्मव्यतिरिक्तस्य सर्वस्य असत्त्वलक्षणमपलपनमिष्टमेवेति प्रागेवोक्तम् ॥ (१३९)

तत्रैव (२९५ पु.) "तस्मादेषोऽपि माहायानिकपक्षानुप्रवेशो ब्रह्मवादिनां मोह एव। कथमात्यन्तिकमसन्तमविद्याऽपि दर्शयितुमलम्" इति॥

प्रकरणपञ्चिकाया तत्त्वालोके "तस्मादित्यादि, मोह एव" इत्यन्त वाक्यमस्ति । तदेवानूद्यते मकरन्दे ॥

एवञ्च (१०८)—"अनाद्यविद्याविनिर्मितालीकाकारविज्ञानविकल्पोदयमन्तरेणाखिलसामर्थ्यविरहिण असतः तत्र प्रकाशगोचरभावानिरूपणात् । तथा च शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति तद्विदः" इति दर्शनात्,

सत्त्वे न भ्रान्तिबाधौ स्तः नासत्त्वे ख्यातिबाधने ।
सदसद्भ्यामनिर्वाच्याऽविद्या वेद्यैस्सह भ्रमः ॥

इतीष्टसिद्धौ वेद्यैस्सह भ्रमस्याविद्यारूपत्वकथनाच्च ज्ञान ज्ञेयमुभयमाविद्यात्मकमुपगम्यते वेदान्तिभि । बाह्यैस्तु ज्ञानं परमार्थं ज्ञेयमपरमार्थमित्युपगम्यते । तन्नोपपद्यत इत्यर्थस्सिद्ध्यति ॥

इन्द्रियैरुपलब्धं यत्तत्तत्त्वेन भवेद्यदि ।
जातास्तत्त्वविदो बालाः तत्त्वज्ञानेन किं तदा ॥

इति प्रागुदाहृतम् (५०) वचनम्,

अस्तित्वं सर्वभावानां यथा बालैर्विकल्प्यते ।
यदि ते स्युर्यथा दृष्टाः सर्वे स्युस्तत्त्वदर्शिनः ॥

इति लङ्कावतारवचन च (२८२) अत्रानुसन्धेयम् । अलौकिकेनैव तत्त्वदर्शनेन भवितव्यमिति सस्कार एतेषाम् । इतरेषां तु अलौकिकांशसंसृष्टेन लौकिकेनैवेति सस्कार ॥

सर्वास्तिवादिवैभाषिक–सौत्रान्तिक--मतवैलक्षण्य स्थिरत्वादिक क्षणभङ्गनिराकरणादिक च सर्वत्र सर्वै प्रतानेतमिति नास्माकमत्र निरूपणीयमधिकमस्ति ॥

इत्थं प्रपञ्चमिथ्यात्वसिद्धान्तो विशदीकृतः ।
लक्ष्मीपुरंश्रीनिवासविपश्चिच्चक्रवर्तिना ॥

इति दर्शनोदये प्रपञ्चमिथ्यात्वदर्शनपरिच्छेद तृतीय

सेश्वरमीमांसा विशिष्टाद्वैतभूमिका.

विशिष्टाद्वैतसिद्धान्तं ग्रन्थेऽस्मिन् दर्शनोदये ।
वक्ष्ये सेश्वरमीसांसाऽऽधारं प्राचां वचश्चयैः ॥

प्रतिज्ञा

अभिवन्द्य महोदारामस्मद्गुरुपरम्पराम् ।
वक्ष्ये सेश्वरमीमांसां विशिष्टाद्वैतभूमिकाम् ॥
आचार्यकृतिसंसर्गः वचोऽस्माकं पवित्रयेत् ।
जाह्नवीजलसंबन्ध· रथ्यायास्सलिलं यथा ॥
श्रीमद्रामानुजमतं श्रीबोधायनसम्मतम् ।
एष सेश्वरमीमांसासिद्धान्त इति निर्णय· ॥
पुरा सेश्वरमीमांसापक्ष एव समर्थितः ।
आचार्यजैमिनिमुखैरुपवर्षादिभिस्तथा ॥
ततश्च शबरस्वामिप्रमुखैः ग्रन्थकर्तृभि· ।
निरीश्वरीकृता सैषा मीमांसेति विनिश्चिता ॥
यतः कार्यैकनिष्ठानां व्याख्यातृणां च काचन ।
वेदोषराश्च वेदान्ता इत्युक्ति परिदृश्यते ॥
ततः कुमारिलगुरुप्रमुखैः सेश्वरीकृता ।
श्रूयतां वार्तिकारम्भे पद्यं कौमारिलं यथा ॥
प्रायेणैव हि मामांसा लोके लोकायतीकृता ।
तामास्थिकपथे कर्तु मयं यत्नः कृतस्त्विति ॥
वृत्तिकारस्तु यः पूर्वोत्तरमीमांसयोरपि ।
एष एवोपवर्षाख्य· बोधायन इति श्रुतः ॥

अयमंशः स्फोटवादे वेदान्तार्यैर्वीनिश्चितः ।
श्रीभाष्यतत्त्वटीकायां विदितं विदुषामिदम् ॥
तत्र कौमारिले ग्रन्थे तथा प्राभाकरेऽपि च ।
एष सेश्वरमीमांसापक्षः स्पष्टं प्रकाश्यते ॥
परमात्मप्राप्त्यवस्थं पुनरावृत्तिवर्जितम् ।
मोक्षं बोधायनमतं साक्षात्प्राह कुमारिलः ॥
तथा मोक्षोपायमपि ज्ञानं कर्मसमुच्चितम् ।
वृत्तिकृन्मतमेवैतत् स्वीचक्रे तन्त्रवार्तिके ॥
जीवोऽप्यात्मा श्रुतः सर्वकामाप्त्यर्हस्स्वभावतः ।
तथैवाङ्गीकृतोऽपूर्वाधिकृतौ तन्त्रवार्तिके ॥
ज्ञानैकाकारवत्त्वेन जीवानामैक्यगीरिति ।
तत्रैव स्पष्टमाख्यातं भट्टाचार्येण धीमता ॥
पुराणवचसामात्माऽद्वैतापातप्रतीतिनाम् ।
अर्थो निरूपितः प्रायः प्रकाराद्वैतसम्मतः ॥
ब्रह्मणा परमं साम्यं मुक्तानामित्यपीरितम् ।
भट्टप्रबन्धतत्त्वज्ञैः पार्थसारथिसूरिभिः ॥
स्वयं प्रकाशत्वमपि जीवानां वृत्तिकृन्मतम् ।
शाबरोऽप्यनुवादोऽत्र स्वसंवेद्य इति श्रुतः ॥
जीवात्मनो नित्यधर्मभूतैकज्ञानयोगिता ।
शब्दनित्यत्वाधिकृतौ मुक्तकण्ठं निरूपिता ॥
अन्तर्यामिब्राह्मणार्थः ग्रहसम्मार्गनिर्णये ।
परमात्मा ब्रह्म सर्वशरीरीत्यपि वर्णितः ॥
सांवृतापरपर्यायव्यावहारिकसत्यता ।
मिथ्यात्वलक्षणा सैषा प्रपञ्चस्य निवारिता ॥
असत्यतोऽपि सत्यस्य प्रतिपत्तिरपाकृता ।
निरालम्बनवादेऽत्र महतो हि निबन्धतः ॥
तथा ब्रह्मपरीणामवादोऽपि प्रतिषेधितः ।
भर्तृप्रपञ्चादिमतस्तथा भास्करसम्मतः ॥

तथाऽविद्यावादमपि प्रत्याख्याति कुमारिलः ।
स एव वादः प्रायेण संस्कृतोऽद्य प्रवर्तते ॥
भावान्तराभावमुखाः प्रमेयाश्चोररीकृताः ।
तथा प्राभाकरमतेनोपजीव्यांशनिर्णयः ॥
संस्थानजातिपक्षश्च प्रभाकरगुरोर्मतः ।
एष शालिकनाथोक्तः तथा श्रीभाष्यकृन्मतः ॥
यस्सत्ताद्वैतसिद्धान्तः श्रीमन्मण्डनसम्मतः ।
यथा शालिकनाथेन दूषितोऽनूदितस्तथा ॥
ब्राह्मणत्वादिजातीनां सन्ततिप्रभवात्मता ।
या च शालिकनाथोक्ता सैषा यामुनसम्मता ॥
सैव सेश्वरमीमांसादिष्वाचार्यैर्निरूपिता ।
निर्विकल्पाध्यक्षधीरप्यनुवृत्त्यग्रहात्मिका ।
धर्मधर्मिद्वयग्राहिणीत्यपि प्रतिपादिता ॥
* यथार्थख्यातिपक्षश्च योऽसावख्यातिलक्षणः ।
प्रपञ्चसत्यतावादिसाङ्ख्यैरङ्गीकृतः पुरा ॥
प्रभाकरैरङ्गयकारि स एव हि परिष्कृतः ।
स एवानुगताभार्गः मीमांसागुरुगौरवात् ॥
इत्थमर्था बहुविधाः मिथस्साधारणाः स्थिताः ।
विस्तरस्त्वस्य पुरतः प्रमेयः परिदृश्यताम् ॥
तथात्र संमतो मोक्षोन्यायभाष्येऽप्यनूदितः ।
परमात्मस्वरूपेऽपि संवादः परीदृश्यते ॥
कार्यकारणभावांशोऽप्यनुवादोऽवधार्यते ।
न्यायाचार्यानुवादोऽपि सिद्धान्तस्यास्य दृश्यते ॥
भक्तिमार्गो मोक्षहेतुः पातञ्जलसमादृतः ।
पर्यग्राहीह सिद्धान्ते इत्यप्यत्र प्रदर्श्यते ॥
श्रीशाङ्करानुवादाश्च सिद्धान्तांशार्थगोचराः ।
सूच्यन्ते प्रायशो मुख्याः ग्रन्थविस्तरभीतितः ॥

तथा भास्करभाष्यादिग्रन्थस्थांशाश्च सूचिताः ।
विचित्राण्युद्दयन्त्येवं दर्शनानीह भूयसा ॥
इत्थं सेश्वरमीमांसासिद्धान्ते किल भूयसाम् ।
स्यात्सधर्मत्वमित्यर्थं मुपदेष्टुमुपक्रमः ॥

तत्र केचिद्ग्रन्थकृत संप्रदायप्रसिध्यर्थं स्वीयपूर्वाचार्यप्रबन्धान् तद्वाक्यविशेषांश्च समुदाहृत्य प्रबन्धान् प्रणयन्ति । अपरे त्वेन पन्थानं नाद्रियन्ते । नैतावता तेषां प्रबन्धा स्वोत्प्रेक्षितमात्रार्था इति युक्त न मन्तुम् । प्रपञ्चेऽस्मिन् तादृशस्य प्रबन्धस्य कस्याप्यनवगमात् । अन्ततः प्राचीनच्छायामाश्रित्येव प्रवृत्ता इति विमर्शकप्रवराणामतिरोहितम् । तस्मादनुकूल प्रातिकूल वा बिम्ब समाश्रित्यैव प्रतिबिम्बावतार. । परिष्काराशस्तु सर्वत्रास्ति । कवीनामपि महतामेष एव न्यायः ॥

वृत्तिकार

तत्र प्रारम्भे श्रीभाष्ये "भगवद्बोधायनकृता विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्सचिक्षिपु. । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते" इति प्राथमिकी प्रतिज्ञा ॥

वेदार्थसग्रहे तु "भगवद्बोधायन टङ्क द्रमिड गुहदेव कपर्दि भारुचि प्रभृत्यविगीतशिष्टपरिगृहीतपुरातनवेदान्तव्याख्यानसुव्यक्तार्थश्रुतिनिकरनिदर्शितोऽय पन्थाः" इति विशिष्टाद्वैतसम्प्रदायः प्रकाशित ॥

अत्र भगवान् बोधायनाचार्य· पूर्वोत्तरभागविभक्तस्य विंशतिलक्षणस्य कृत्स्नस्य मीमासाशास्त्रस्य वृत्तिकार इति, स एवोपवर्षाचार्य इत्यपि प्रसिद्ध इति प्रदर्शयिष्यामः—तस्य चैतस्य भगवतो बोधायनाचार्यस्य सम्मतः सेश्वरमीमांसापक्ष इत्यत्र "सहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धि" इति वृत्तिकारवाक्यं श्रीभाष्योदाहृतं मुख्य प्रमाणम् ॥

स एव उपपर्षापरनामा बोधायनाचार्य इत्यत्र श्रीभाष्यतत्त्वटीकायां श्रीवेदान्ताचार्यप्रणीतायां जिज्ञासाऽधिकरणे स्फोटवादे—"अत्र ज्ञाबरं—गौरित्यत्र कश्शब्द ? गकारौकारविसर्जनीया इति भगवानुपवर्ष इति । वृत्तिकारस्य बोधायनस्यैव हि उपवर्ष इति स्यान्नाम" इति वाक्य मानम् । अत्र स्यान्नामेति निर्देशात् सभावनामात्रमिति केचिदुल्लिखन्ति । तर्हि बोधायनस्यैव हीति निर्देशोऽपरिचिन्तितस्स्यात्, नाम स्यादेवहीति योजना ॥

अपि च सौगतसिद्धान्तप्रवचनरूपेषु क्रिस्तशक द्वितीयशतके प्रवृत्तेषु मणिमेखलाप्रभृतिषु द्राविडभाषाप्रबन्धेषु कृतकोटिपदनिर्देशोऽस्ति । तथा अनन्तशयनमुद्रिते प्रपञ्चहृदयाख्यप्रबन्धे (३१ पुटे,) "तस्य विंशत्यध्यायनिबद्धस्य मीमांसाशास्त्रस्य कृतकोटिनामधेय भाष्यं बोधायनेन प्रणीतम्" इति लिखितमस्ति । स च प्रपञ्चहृदयप्रबन्ध अद्वैतसिद्धान्ताभिमानशालिना भास्करभाष्यादनन्तर प्रणीत इति स्फुट विज्ञायते । श्रीरामानुजभाष्यात्प्राग्वा पश्चाद्वेति निर्धारयितु न शक्यते । तथापि बोधायनो भगवान् वृत्तिकर्तेत्यश पर परैरप्यङ्गीकृत इति युक्त वक्तुम् ॥

"उपवर्षो हलभृति· कृतकोटिरयाचित" इति निघण्टु· त्रिकाण्डशेषे केशवनिघण्टौ च दृश्यते । तथा च बहो· कालात् उपवर्षकृतकोट्योरैक्ये कृतकोटिबोधायनयोरैक्ये च व्यवहारमवलोक्यैव भगवान् रामानुजाचार्य श्रीमान्निगमान्ताचार्यश्च पूर्वोक्तरीत्या प्रतिपादयामासतुः ॥

श्रीमान् रामानुजाजार्योऽप्येतादृशोपवर्षवृत्तिरूपाया एव बोधायन वृत्तेस्साक्षात्करणार्थ बहुविध श्रममन्वभवदिति तच्चारित्रविद्वांस· अद्यापि कथयन्ति, यस्मात् वृत्तिकारसम्मतस्य पूर्वाचार्यपरिगृहीतस्य सेश्वरमेमांसापक्षस्य प्रवचनायैवाचार्योऽसौ अवातरदिति भूयसी प्रासिद्धि· ॥

सोऽयमुपवर्षः पूर्वमीमांसाया वृत्तिकार इति औत्पत्तिकसूत्रे "वृत्तिकारस्तु अन्यथेमं ग्रन्थ वर्णयांचकार तस्य निमित्तपरीष्टिरित्येवमादिम्" इत्यादिना शाबरभाष्येण स्पष्टमवगम्यते। अत्र वृत्तिकारमतानुसारेण सूत्रत्रयमन्यथा व्याख्यातीति पार्थसारथिमिश्राद्याः आहु. ॥

अत्र वृत्तिकारमतानुसारी ग्रन्थभाग तृतीयसूत्रव्याख्यानमारभ्य "कर्मैके तत्र दर्शनात्" इत्यन्तस्य षष्ठम्य सूत्रस्य व्याख्यानप्रारम्भपर्यन्त. । आत्मवादसमाप्तयन्त इति निर्णय । तदन्तरे निरालम्बवाद. शून्यवाद अनुमानं शब्द उपमानं अर्थापत्ति अभाव. चित्राक्षेपः सम्बन्धाक्षेपः स्फोटवाद आकृतिवादः वनवाद सम्बन्धाक्षेपपरिहारः चित्राक्षेपपरिहार आत्मवाद इत्येते पञ्चदश प्रधानभूता अर्था निरूपिता ॥

भाष्यकारमतरीत्या एकसूत्रत्वेनाभिमत औत्पत्तिकसूत्र पञ्चधा प्रविभज्य वृत्तिकारमतरीत्या आत्मवादसमाप्तयन्तेन ग्रन्थेन व्याख्यातम्। तस्मात् वृत्तिग्रन्थ. आत्मवादसमाप्तयन्त इति सिद्धान्त. । ततश्चात्रोपवर्षसम्मता बहवोऽर्था शबरस्वामिनाऽनूदिता श्रीभाष्यपरिगृहीता इत्यावेदयितु ग्रन्थविभागपरिष्कारः ॥

यद्यपि मध्ये स्फोटवादे "अथ गौरित्यत्र कश्शब्द ? गकारौकारविसर्जनीया इति भगवानुपवर्ष" इति पाठो दृश्यते। तत्र पूर्ववाक्य सिद्धान्तवादिवचनम्। आस्तां तावत्सम्बन्ध शब्दस्वरूपमेव तावत्कीदृशमिति पृच्छाम इति तस्यार्थ । तस्योत्तरमिदं गकारेत्यादि द्वितीयं वाक्यम्। अत्रोपवर्ष इति पदमस्ति औपवर्षे ग्रन्थे उपवर्षग्रहणं नानुवादो भवितुमर्हतीति शङ्क्येत । तथापि बादरायणबोधायनादिग्रन्थेषु "भगवान् बादरायणः, भगवान् बोधायनः" इत्यादिनिर्देश-

वद्युज्यत इति पराशरमाधवीये पराशरप्रयुक्तपराशरपदप्रयोगसमर्थनसदर्भ-सस्कृतमतय. प्राहु । मीमासकास्तु—नाय ग्रन्थ अक्षरशः वृत्तिग्रन्थानुवाद, किंतु तन्मतेन व्याख्यानान्तरमिति व्याख्यातृभि स्फुटमभिधानात् न शङ्कावकाश इति प्राहु ॥

तथाचोपवर्षाचार्य. कृतकोट्यभिधाना पूर्वमीमासाशास्त्रस्य वृत्तिं चकारेत्यत्र न विप्रतिपत्ति । एष एवोत्तरमीमासाशास्त्रस्य शारीरकनाम्नोऽपि वृत्तिं चकारेत्यत्र प्रमाण प्रदर्शयाम । श्रीशाङ्करशारीरकभाष्ये (३ २-'१३) "एक आत्मनश्शरीरे भावात्—इह देहव्यतिरिक्तस्यात्मन सद्भावस्समर्थ्यते बन्धमोक्षाधिकारसिद्धये । न ह्यसति देहव्यतिरिक्तात्मनि परलोकफलाश्चोदना उपपद्येरन् कस्य वा ब्रह्मात्मत्वमुपदिश्येत ॥

ननु शास्त्रप्रमुख एव प्रथमे पादे शास्त्रफलोपभोगयोग्यस्य देहव्यतिरिक्तस्यात्मनः आस्तित्वमुक्तम् । सत्यमुक्त भाष्यकृता । न तु तत्रात्मास्तित्वे सूत्रमस्ति । इह तु स्वयमेव सूत्रकृता तदस्तित्व आशङ्कापूर्वक प्रतिष्ठापितम् । अत एवाचार्येण शबरस्वामिना प्रमाणलक्षणे निर्णीतम् । अत एव भगवता उपवर्षेण प्रथमे तन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युद्धार कृत । (अपकर्षस्य निवृत्तिरुद्धार) इह चेदं चोदनालक्षणेषु विचार्यमाणेषु आत्मास्तित्व विचार्यते कृत्स्नशास्त्रशेषत्वप्रतिपादनायेति" इति पाठ दृश्यते ॥

भास्करभाष्येऽपि "अत एवोपवर्षाचार्येणोक्तं प्रथमे पादे आत्मवादन्तु शारीरके वक्ष्यामः" इति च पाठ. ॥

श्रुतप्रकाशिकायां "शारीरके वक्ष्याम इति वृत्तिकारोक्तिस्तु न देहातिरेकमात्राभिप्राया । कि तु जडत्वज्ञानात्मकत्वस्थूलत्वविभुत्वाणुत्वाभिप्राया मन्तव्या" इति निर्देशोऽस्ति, तेनास्मिन् अधिकरणे श्रीभाष्यस्य

वृत्तिग्रन्थस्य चापाततः प्रतीयमानोऽननुगमः परिहृत । यतः नेदमधिरण वृत्तिकृतोऽपि देहात्मभेदसमर्थनपरमित्यभिमतमित्यभिप्रायः प्रदर्श्यते। शारीरके वक्ष्याम इति वाक्यस्य नेदमेवाधिकरण स्थलमिति भाव । अनेन सन्दर्भेण भगवानुपवर्ष कृत्स्नस्य मीमांसाशास्त्रस्य वृत्तिकार इति निर्णीतोऽयमशः ॥

शारीरकशास्त्रस्योपवर्षाचार्यवृत्तौ अथातो ब्रह्मजिज्ञासा इतिसूत्रवृत्तिः एव स्यादित्यपि तर्कयाम । यथा--"तत्राथातश्शब्दौ प्रथम एवाध्याये प्रथमसूत्रे वर्णितौ । अथेति पूर्वप्रकृतां धर्मजिज्ञासामपेक्ष्य अनन्तर ब्रह्मजिज्ञासाप्रारम्भार्थ । अत इति पूर्वानिर्दिष्टस्यैवार्थस्य हेतुतामाचष्टे ब्रह्मजिज्ञासां प्रति" इति । अय ग्रन्थ· टीकाया पञ्चपादिकायां तृतीयवर्णकेऽनूदितो दृश्यते । तथा "वृत्तात्कर्माधिगमात्" इत्यशस्यार्थस्तत्रैवानूदितोऽस्ति । "वृत्तात्कर्माधिगमादनन्तर ब्रह्मविविदिषा" इति हि वृत्तिवाक्य श्रीभाष्येऽनूदित दृश्यते । तस्माद्वृत्तिकार उपवर्षापराभिधान· बोधायनाचार्यः सेश्वरमीमासापक्ष प्राकाशयत् । तमेव पक्षमवलम्ब्य सप्रदायपरम्परया श्रीमान् रामानुजाचार्यः विशिष्टाद्वैतसिद्धान्त प्रवर्तयामासेति सिद्धान्त स्फुटीक्रियते ॥

इदमपि प्रसङ्गादत्रावधारणीयम्--उत्तरमीमांसाशास्त्रस्य शारीरकपदेन व्यवहार· बोधायनोपज्ञमित्यपि विज्ञायते । तथाहि--"सहितमेतच्छारीरक जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धि·" इति बोधायनवाक्य श्रीभाष्येऽनूदितमस्ति । "शारीरके वक्ष्याम" इत्युपवर्षवाक्य च शाङ्करेऽनूदितमस्ति । तमेव सप्रदायमवलम्ब्य "वयमस्यां शारीरकमीमासायां प्रदर्शयिष्याम·" इत्यप्यध्यासभाष्यान्ते भाषितम् ॥

तस्य पदस्य विवरण तु श्रीभाष्ये आनन्दमयनये "अत एवेदं

पर ब्रह्माधिकृत्य प्रवृत्तं शास्त्र शारीरकमित्यभियुक्तैराभिधीयते" इति भाषितम्। शारीरपद च "शारीर आत्मा" इति श्रुतौ ब्रह्म परतया श्रुतमिति सर्वसम्मतोऽर्थ । अत बोधायनवृत्ति सर्वोपजीव्येति ॥

मोक्ष

अथ चैतादृशीमाचार्योपवर्षप्रणीतां वृत्तिमवलम्ब्य पूर्वमीमासासूत्राणामाचार्यशबरस्वामिना भाष्य प्राणीयत। तस्य च भाष्यस्य सत्सु बहुषु व्याख्यानेषु श्रीमता कुमारिलभट्टाचार्येण वार्तिक व्यरचि। वार्तिक नाम—

उक्तानुक्तदुरुक्तादिचिन्ता यत्र प्रवर्तते।
ग्रन्थं तं वार्तिकं प्राहुः ग्रन्थभेदं विपश्चितः ॥

इति प्रसिद्धवार्तिकव्याख्यानारम्भेषु लिखित पश्यामः। तस्मिंश्च वार्तिके प्रथमलक्षणे प्रथमपादे श्लोकवार्तिकाभिधाने अहमर्थस्यैवात्मत्व प्रसाध्यते प्रत्यभिज्ञाप्रत्यक्षसिद्ध चार्वाकादिसकलमतनिरासपूर्वक यथाभाष्यम्। आत्मवादान्ते श्लोकोऽय च पठ्यते—

इत्याह नास्तिक्यनिराकरिष्णुः
आत्मास्तितां भाष्यकृदत्र युक्त्या।
दृढत्वमेतद्विषयश्च बोधः
प्रयाति वेदान्तनिषेवणेन ॥

इति। अत्र वेदान्ताभ्यासेन देहातिरिक्तात्मनिश्चय. दृढ. संशयविपर्ययाद्यसह भवतीत्युक्तम्। एतावता वेदान्ताना प्रामाण्याभ्युपगमस्सूचितः। प्राधान्य च ॥

वैशेषिकैस्तु युक्तिप्राधान्यवादिभिः—आत्मनि मानसप्रत्यक्षेण गृहीते अनुमानेन युक्तिलक्षणेन प्रत्ययः दृढो भवतीत्युच्यते। वैदिकैस्तु युक्त्या गृहीते आत्मनि श्रुत्या प्रत्ययो दृढो भवतीत्युच्यते। वैशेषिकसूत्र तु—"दृष्टे आत्मनि लिङ्गे एक एव दृढत्वात्प्रत्यक्षवत्प्रत्यय" (२—२-११) इति। अयमर्थ —दृष्टे मनसा गृहीते आत्मनि लिङ्गे अनुमाने सति

दृढत्वात् प्रत्यक्षवत् अप्रामाण्यादिशङ्काकलङ्करहितचाक्षुषादिप्रत्यक्षवत् प्रत्ययः भवतीति ॥

ननु वेदान्तश्रवणादिना देहातिरिक्तात्मनिश्चयदार्ढ्यकथनमात्रेण वेदान्ताना परस्मिन् ब्रह्मणि तात्पर्य अभ्युपगतमिति कथ निश्चीयते । कार्यवाक्यार्थवादिभिरेव कैश्चिन्मीमासकै जरद्वैदिकै· "वेदोषरा वेदान्ता" इत्यभिहितत्वादिति चेत्, न—तन्त्रवार्तिके (२४० पु.) व्याकरणाधिकरणे तैरेव भट्टाचार्यै स्वाभिमतस्य परपरासमागतस्य सिद्धान्तस्य एवमभिधानात् । तथाहि—

"सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते ।
पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधारणात् ॥

आत्मज्ञान हि सयोगपृथक्त्वात् क्रत्वर्थ पुरुषार्थत्वेन ज्ञायते । तेन विना परलोकसाधनेषु कर्मसु प्रवृत्तिनिवृत्त्यसम्भवात् ॥

तथा—य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्प सोऽन्वेष्टव्यस्स विजिज्ञासितव्यः । तथा—मन्तव्यो बोद्धव्यः । तथा—आत्मानमुपासीत इति कामवादलोकवाद वचनविशेषै· जिज्ञासामननसहितात्मज्ञानकेवलावबोधपर्यन्तस्पष्टात्मतत्त्वैज्ञानविधानापेक्षितवाक्यान्तरोपात्तद्विविधाभ्युदय[1] निश्रेयसरूपफलसम्बन्ध ॥

स सर्वाश्च लोकानाप्नोति । तरति शोकमात्मवित् । तथा—स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ते तेन पितृलोकेन सम्पन्नो महीयते इत्यादिना योगजन्याणिमाद्यष्टैश्वर्यफलानि वर्णितानि । तथा—स खल्वेव वर्तयन् यावदायुष ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते, इत्यपुनरावृत्त्यात्मकपरमात्मप्राप्त्यवस्थाफलवचनम्" इति ॥

[1] द्विविधस्याभ्युदयस्य नि श्रेयसस्य च इति न्यायसुधाव्याख्या ।

अत्रात्मज्ञानपदेन केवलजीवात्मज्ञानं वा, उत अन्तर्यामिपर्यन्तात्मज्ञान वा विवक्षितमिति विचारस्समुदेति । तत्र केवलकर्मकाण्डप्रामाण्यवादिनो निरीश्वरमीमासका परलोकसाधनेषु कर्मसु देहातिरिक्तात्मज्ञान विना प्रवृत्त्यसम्भवात् जीवात्मज्ञानमेव विवक्षितमिति यद्यपि प्राहुः ॥

उपनिषदामपि प्रामाण्यवादिन सेश्वरमीमासकास्तु—निखिलजगदेककारणभूत सर्वज्ञ सर्वशक्त परमकारुणिक सर्वान्तर्यामिण सर्वशरीरिण परमात्मानमभ्युपगच्छन्तीति अन्तर्यामिपर्यन्तमात्मज्ञानमेव विवक्षितमिति प्राहुरित्यभ्युपगन्तव्यम् । यतः—"य आत्माऽपहतपाप्मा" इत्यादिक छान्दोग्यवाक्यमुपादित्सतां 'स खल्वेव वर्तयन् यावदायुषम्" इति तस्या एवोपनिषद समाप्तिवाक्य च निर्दिष्टवतां "ब्रह्मलोकमभिसम्पद्यते" इत्यस्य वाक्यस्य ब्रह्मैव लोको ब्रह्मलोक इत्यर्थमभिप्रेत्य परमात्मप्राप्त्यवस्थाफलपद प्रयुक्तवता भट्टाचार्याणां विपरीताभिप्रायकल्पनमनवकाशमित्यवधेयम् ॥

ततश्चानेन व्याकरणाधिकरणवचनेन अणिमाद्यष्टैश्वर्यसिद्धि सत्यसङ्कल्पत्व सत्यकामत्व ब्रह्मलोकाभिसम्पत्तिपूर्वक अपुनरावृत्तिलक्षण परमात्मप्राप्तिरूप निश्श्रेयसपदवाच्य मोक्षस्वरूप च स्फुटमङ्गीकृतमित्यवधार्यते ॥

मोक्षसाधनम्

ततश्चात्रैव -एतेषामुपनिषद्वाक्यानामर्थवादत्वशङ्कां निराकृत्य मोक्षसाधन च ज्ञान कर्मसमुच्चितमिति स्पष्टमाह-- "अप्रकरणगतत्वेनैकान्तिकक्रतुसम्बन्धाभावाच्च नाञ्जन—खादिर—स्रुवादिफलश्रुतिवदर्थवादत्वम् । न च ज्ञानविधानेन कर्मसम्बन्धवारणम् । प्रत्याश्रमवर्णनियतानि नित्यनैमित्तिककर्माण्यपि पूर्वकृतदुरितक्षयार्थ अकरणनिमित्तानागतप्रत्यवायपरिहारार्थ च कर्तव्यानि । न च तेषां भिन्नप्रयोजनत्वात् भिन्नमार्गत्वाच्च बाध-विकल्प-परस्पराङ्गाङ्गिभावास्सम्भवन्ति" इति ॥

अनेन वचनेन समुच्चयवादोऽङ्गीकृत इति ज्ञायते । स एव हि यादवप्रकाशादिसम्मत जरन्मायावादिभर्तृप्रपञ्चमण्डनमिश्रादिसमतश्च । स्पष्टीकृत चैतत् राणकाभिधाने न्यायसुधाभिधाने च तन्त्रवार्तिकव्याख्याने सोमेश्वरभट्टाचार्येण बृहट्टीकावचनैः । यथा—

ननु निश्श्रेयसं ज्ञानात् बन्धहेतोर्न कर्मणः ।
नैकस्मादपि तत्किं तु ज्ञानकर्मसमुच्चयात् ॥
नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ॥
वैराग्यात्पक्वविज्ञान. कैवल्यं लभते नरः ।
न च ज्ञानविधानेन कर्मसम्बन्धवारणम् ॥ इति ॥

अनेन ग्रन्थेन परमात्मप्राप्तिरूपपरमपुरुषार्थं प्रति कर्मसमुच्चितमुपासनात्मक ज्ञान साधनमिति स्पष्टम् । अय सिद्धान्त श्रीमद्रामानुजसिद्धान्तादनतिभिदुरमिति सुव्यक्तमेतत्सिद्धान्तपरिश्रमशालिना विपश्चिदपश्चिमानां सारासारविवेकविदाम् ॥

आक्षेपपरिहार

ननु श्लोकवार्तिकग्रन्थे ह्येतद्विरुद्ध मतमवगम्यते । तथाहि— सबन्धाक्षेपपरिहारवादे १०२ श्लोकन —

कर्मक्षयो हि विज्ञानादित्येतच्चाप्रमाणकम् ।
फलस्याल्पस्य वा दानं राजपुत्रापराधवत् ॥
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते ।
आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ॥
विज्ञाते चास्य पारार्थ्ये याऽपि नाम फलश्रुतिः ।
साऽर्थवादो भवेदेव न स्वर्गादेः फलान्तरम् ॥
तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते ।
न ह्यभावात्मकं मुक्ता मोक्षनित्यत्वकारणम् ॥

तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये ।
उत्तरप्रचयाभावात् देहो नोत्पद्यते पुनः ॥
'मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात्प्रत्यवायजिघांसया ॥
सर्गप्रलयविज्ञानं समस्तजगदाश्रयम् ।
स्वशरीरविदां पुंसा नाधिक्येनोपयुज्यते ॥
तस्मादद्यवदेवात्र सर्गप्रलयकल्पना ।
समस्तक्षयजन्मभ्यां न सिद्ध्यत्यप्रमाणिका ॥
सर्वज्ञवन्निषेध्या च स्रष्टुः सद्भावकल्पना ।
न च धर्मादृते तस्य भवेल्लोकाद्धिशिष्टता ॥
एवं ये युक्तिभिः प्राहुः तेषां दुर्लभमुत्तरम् ।
अन्वेष्यो व्यवहारोऽय अनादिर्वेदवादिभिः ॥

इत्यादि ॥

तथा अर्थवादाधिकरणे—"क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकांक्ष्यम्" इति । तथा स्मृत्यधिकरणान्ते—"याश्चैता प्रधानपुरुषेश्वरपरमाणुकारणप्रक्रिया सृष्टिप्रलयादिरूपेण प्रतीता तास्सर्वा मन्त्रार्थवादज्ञानादेव दृश्यमानसूक्ष्मस्थूलद्रव्यप्रकृतिविकारभावदर्शनेन च द्रष्टव्याः । प्रयोजन च स्वर्गयागाद्युत्पाद्योत्पादकविभागज्ञानम् । सर्गप्रलयोपवर्णनमपि दैवपुरुषकारप्रभावप्रविभागदर्शनार्थम् । सर्वत्र हि तद्बलेन प्रवर्तते तदुपरमे च उपरमतीति" इति ॥

अत्रोच्यते— श्लोकवार्तिकग्रन्थे

एवं ये युक्तिभिः प्राहुस्तेषां दुर्लभमुत्तरम् ।
अन्वेष्यो व्यवहारोयमनादिर्वेदवादिभिः ॥

इत्युपसंहारेऽभिधानात् केवलयुक्त्याश्रयणेन जगदनादिवादेन वेदानादितास्थापनार्थ अतिवादा कृता इति स्वयमेवासूचयत् । श्रुतिशरणतायां

तु व्याकरणाधिकरणप्रोक्त एव सिद्धान्त इति परमार्थः इत्यपि सूचयामास । अतो न विरोधः ॥

एव विरोधपरिहारे स्फुटतर प्रतीयमानेऽपि सुचिराभ्यस्तसकेतवासनाबलेन कोचिदेव परिहारमार्ग कल्पयन्ति । यथा—न्यायसुधायां सोमेश्वरभट्टीयाया (३२६ पु.) व्याकरणाधिकरणे—"अत एव आत्मा ज्ञातव्य इत्येतन्मोक्षार्थ न च चोदितम्, इत्येतच्छब्दप्रयोगेण संसारिरूपात्मज्ञानस्यैव मोक्षार्थत्वनिरासेन कर्मप्रवृत्तिहेतुतोक्ता । असंसारिरूपात्मज्ञानस्य तु कर्मप्रवृत्यर्थत्वायोगात् पुरुषार्थतैव युक्तेत्याशय." इति प्रागुक्तपूर्वपक्षसमाधान दृश्यते । तथासति श्लोकवार्तिकोक्तस्य मोक्षस्वरूपस्य तत्साधनस्य च असगतत्वापत्तिः । तस्मात् अय मार्गः न वार्तिककृदाशयचिन्ताचातुर्यमूलः । अपि तु वासनाचातुर्यमूल ॥

तथा—श्लोकवार्तिकव्याख्याने सम्बन्धाक्षेपपरिहारे पार्थसारथिमिश्राणां परिहारक्रमोऽपि भट्टसोमेश्वरक्रमस्य मूलभूत । यथा—(१०२-१०४ श्लो.) "द्विविध ह्यात्मज्ञानमुपनिषत्सूपदिश्यते देहाद्विवेकज्ञान अविनाशी वा अरे अयमात्मेत्यादि । अथात्मानमुपासीतेति प्राणायामाद्यङ्गोपेतमुपासनात्मक ज्ञानमिति । उपासनात्मकस्य तु ज्ञानस्य कर्मणि पुरुषे च दृष्टप्रयोजनाभावात् अदृष्टापेक्षाया श्रुत्याद्यभावेन क्रत्वर्थत्वाभावात् वाक्यशेषोपनीताभ्युदयनिश्रेयसफलतया रात्रिसत्रवत्पुरुषार्थत्वमेवेति व्याकरणाधिकरणे वक्ष्यति" इति च ॥

परमात्मा

एव च श्रीमान् कुमारिलभट्टाचार्य सेश्वरमीमांसालक्षणविशिष्टाद्वैतसिद्धान्तवेदान्ती, न पुनरद्वैतसिद्धान्तवेदान्तीति स्पष्टमवगतमपि पुरः प्रदर्श्यमानै· अनन्यथासिद्धैः हेतुभि· विशदयितु प्रारभामहे । तत्र पर-

मात्मविषयः विचारः प्रस्तूयते—(७१४) तन्त्रवार्तिकम् (३—१—१३) "एकत्वमुक्तमेकस्य श्रुतिसयोगात्" ग्रह सम्माष्टीत्यत्र किमेकस्य ग्रहस्य सम्मार्गः, उत प्राकरणिकग्रहमात्रस्येति । तत्रोद्दिश्यमानस्य किं सख्या विवक्ष्यते उत नेति सशय ॥

ननु च वेदवाक्येषु अयुक्तोऽय विचारः । कुतः?—

प्रतीतिव्यतिरेकेण विवक्षाऽन्या न विद्यते ।
नित्यत्वाद्वेदवाक्यानां श्रुतोऽतो नाविवक्षितः ॥

यानि पुरुषप्रणीतानि तानि पुरुषविवक्षाधीनवचनत्वात् सभवत्प्रमादाभिप्रायान्तरप्रमाणान्तरगम्यार्थानि भवन्ति । तत्र प्रतीतोऽप्यर्थो वक्तुरनभिप्रेतत्वात् अविवक्षा लभेत । सा च द्वेधा विज्ञायते । यदा वक्तैव कथयति अन्यपर ममेदमभिप्रेत प्रमादेन वा । तस्मादेतावन्मात्रमिह न ग्रहीतव्यमिति । यद्वा प्रमाणान्तरवशेन अन्यथाऽर्थेऽवधारिते वक्रनपेक्षाः श्रोतार एवाभिप्रायान्तर प्रमाद चाध्यवस्यन्ति । न तु वेदवाक्येषु अभिप्रायान्तर प्रमादो वा कस्य चिदस्ति । न च वक्ता, योऽन्यथात्व कथयेत् सर्वपुरुषाणाम् "उक्त तु शब्दपूर्वत्वम्" इति केवलश्रोतृत्वाश्रयणात् । न च प्रमाणान्तरगम्योऽर्थ , यतस्तद्वशेन स्वयमेव श्रोतार अन्यथात्व प्रतिपद्येरन् । विवक्षाविवक्षे च वक्तृणां प्रत्ययविशेषाविच्छानिच्छाविशेषौ वा । तेन विवक्षितमविवक्षितमिति द्वयमप्येतत् वक्रभावादनुपपन्नम्, अत. श्रुताश्रुतयोरेव केवलयोरत्र ग्रहणाग्रहणे । नात पर किचित्कारणमस्ति ॥

उच्यते—

प्रतीतिं प्रति नैवात्र विसंवादोऽस्ति कस्य चित् ।
प्रतीतेऽपि तु सत्येषा विध्यविध्योर्विचारणा ॥
परिग्रहपरित्यागाविच्छानिच्छाफले स्थिते ।
तल्लक्षणार्थता त्वत्र स्याद्विवक्षाविवक्षयोः ॥

अथवा—

न्यायेन संप्रदायाद्वा ये मीमांसकयाज्ञिकाः ।
वेदं व्याचक्षते तेषामभिप्रायोऽयमुच्यते ॥
शब्दशक्त्यनुसारेण वाक्यार्थं गमयन्ति ये ।
तत्र यः शक्त्युपारूढः स तैर्व्याख्यातुमिष्यते ॥
यस्तु शक्त्या परित्यक्तः न व्याचिख्यास्यते स तै. ।
तेन व्याख्यातुमिष्टोऽर्थो यस्तेषां स विवक्षितः ॥
अनिष्टो यस्त्वशक्तित्वात् अविवक्षित एव स. ।
अत. पूर्वसमावृत्तव्याख्यात्रिष्टं विवक्षितम् ।
तेनोच्येत तथा तेषां त्वनिष्ट त्वविवक्षितम् ॥

तस्माद्व्याख्यातृगतमेव विवक्षिताविवक्षितत्वमुपन्यस्य विचारकरणात् वेदेऽप्यविरोध· । [यद्वा]

ऋग्वेदादिसमूहेषु क्षेत्रज्ञा ये प्रतिष्ठिता ।
तेषां वाऽयमभिप्राय. स्याद्विवक्षाविवक्षयो. ॥
महाभौतिकदेहस्था. यथाऽऽत्मानस्सचेतनाः ।
कांचिदर्थं विवक्षन्ति न विवक्षन्ति चापरम् ॥
तेषामन्तर्गताऽपीच्छा तद्वाक्यार्थविचारिभिः ।
ज्ञायते शब्दशक्त्यैव स्फुरन्तीव बहि·स्थिता ॥
देहभेदप्रकाराश्च कर्मशक्तिवशानुगा. ।
प्रकृत्यारम्भवैचित्र्यात् दृश्यन्ते परमात्मनाम् ॥
पार्थिवावयवप्राया. शेषतोयाद्यनुग्रहात् ।
जरायुजादयो देहाः दृष्टा भुवि चतुर्विधा. ॥
भूतान्तरानुबद्धेन तोयेनैव विनिर्मिताः ।
श्रूयन्ते वारुणे लोके देहाः स्वच्छाङ्गलक्षणाः ॥
अन्तरिक्षे च बहवः प्राणिनो वातनिर्मितैः ।
भ्रमन्ति लघुभि. सूक्ष्मै. देहैर्भूम्याद्यनुग्रहात् ॥
स्वर्लोके तैजसप्रायाः देहाः शुद्धप्रभान्विताः ।
आप्यायन्ते विकीर्णेन भानवीयेन तेजसा ॥

तथाच नक्षत्रेष्टिवाक्यशेषेऽभिहित "ये हि जना पुण्यकृत स्वर्ग लोकं यन्ति तेषामेतानि ज्योतीषि यन्नक्षत्राणि" इति। तथाच मनुनाऽपि स्वर्ग लोक गच्छन्नभिहित. "तेजोमूर्तिः पथर्जुना" इति॥

[1] तथा व्योमशरीरोऽपि परमात्मा श्रुतौ श्रुतः।
इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः॥
रूपस्पर्शादयो येऽपि महाभूतगुणाः स्थिताः।
प्रत्येकमात्मनां तेऽपि देहास्संभोगहेतवः॥
शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते।
[2] तदप्यधिष्ठितं सर्वमेकेन परमात्मना॥
तथर्ग्वेदादयो देहाः प्रोक्ता येऽपि पृथक्पृथक्।
भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगतास्सदा॥
तेषां चान्तर्गतेच्छानां वाक्यार्थप्रतिपादने।
विवक्षा वाऽविवक्षा वा ज्ञायते शब्दशक्तितः॥
विधिशक्त्या गृहीतं यत्तत्सर्वं हि विवक्षितम्॥
तयैव तु परित्यक्तं व्याख्येयमविवक्षितम्॥
शब्दब्रह्मात्मनोऽप्येवं सर्ववेदानुसारिणः।
विवक्षा वाऽविवक्षा वा वक्तव्या विधिशक्तितः॥
अनादिनिधनेऽप्येवं वेदे वेदार्थगोचरे।
व्याख्यान मुख्यवृत्त्याऽपि स्याद्विवक्षाविवक्षयोः॥
ततश्चेतद्वहैकत्वं किं वेदेन विवक्षितम्।
किं नेति न्यायमार्गेण विचार्य स्थापयिष्यति॥ इति॥

अनेन विचारेण एकेन परमात्मना आकाशशरीरेण वेदादिक सर्वमधिष्ठित, स शरीरी वेदादिक शरीरमिति "यस्य पृथिवी शरीरम्" इत्याद्यन्तर्यामिब्राह्मणोक्तोऽर्थ सम्यगनुसहित भट्टाचार्येणेति विज्ञायते॥

---

[1] आकाशशरीर ब्रह्म इति तैत्तिरीय वाक्यम्

[2] यस्य वेदाश्शरीरमित्याद्यन्तर्यामिब्राह्मणम्

तथा—खं ब्रह्मेति वाक्ये आकाशशरीर ब्रह्मेत्यर्थः स्वीकृतः। सामानाधिकरण्य च शरीरात्मभावनिबन्धनमिति स्फुट सूचित भवति। इदमेव परम सूक्ष्मं विशिष्टाद्वैतसिद्धान्तरहस्यम्। तदेतत् मीमासानिष्णातैरङ्गीकृतमित्यवधेयम् ॥

जीवात्मा

जीवात्मस्वरूप तु स्वाभाविकमुपनिषत्सु एव विज्ञायते—

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्।
सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः ॥

इति छान्दोग्ये सप्तमान्ते ॥

संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः।
ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानस्सर्वमेवाविशन्ति ॥
यदा पश्यः पश्यते रुक्मवर्ण कर्तारमीशं पुरुषं ब्रह्म योनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥

इति मुण्डके—(३-२-५, ३-१-३)

अमुष्मिन् स्वर्गे लोके सर्वान् कामानाप्नाऽमृतस्समभवत्सम भवत्।

इत्यैतरेये। (२-४) एवं मुक्तैश्वर्यनिरूपणप्रकरणे श्रूयमाणाना श्रुतीनामर्थं मनसि निधाय तन्त्रवार्तिके अपूर्वाधिकरणे—(३७५ पु) कुमारिलः

सर्वावाप्तिसमर्थो वा प्रकृत्याऽऽत्मा सदेष्यते।
कश्चित्तु प्रतिबन्धोऽस्य कर्मभिस्सोऽपनीयते ॥

इति सर्वकामावाप्तियोग्यतामात्मनस्स्वाभाविकीमभिहितवान् ॥

वात्सायनभाष्येऽपि (१-१-९) "तत्रात्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी" इति जीवात्मस्वरूप स्वाभाविकमुक्तं दृश्यते ॥

श्रीभाष्यादिप्रबन्धेषु बहुषु प्रदेशेषु जीवाद्वैतवादस्य प्रकाराद्वैत-परत्वेन व्यवस्थापनात् ज्ञानैकाकारतया सर्वेषामात्मनामैक्य साम्यमिति च विशिष्टाद्वैतसिद्धान्त । एषोऽप्यपूर्वाधिकरणे—(३८१ पु) "चैतन्या-त्मकत्वाद्यविभागाच्च उपनिषत्सु ऐकात्म्यव्यवहार." इति स्पष्ट निरूपित. ॥

एषोऽर्थ अनतिविशद इति अभिसधाय शास्त्रदीपिकाराया विस्तरेणोपपादित । यथा—(३२१ पु) सबन्धाक्षेपपरिहारे—"ऐका-त्म्यवादास्तर्ह्यौपनिषदा कथम्? अवैलक्षण्येनेति ब्रूम । भेदशब्दो हि वैलक्षण्यवचनोलोके प्रसिद्ध । तथाहि सुसदृशेषु वक्तारो भवन्ति नास्यास्य च कश्चिद्भेदोऽस्तीति । तथाऽऽत्मनामपि नरपशुतिर्यग्भेदश-रीरवर्तिनां शरीरसबन्धमपोह्य केवल नैजरूपेण निरूप्यमाणाना पद्मरजः-परमाणुद्वयवत् न किंचिदपि वैलक्षण्यमस्तीत्यनेनाभिप्रायेणैकत्ववादा नानात्वनिषेधवादाश्च । एतदभिप्रायमेव चैतदपि भगवद्वासुदेववचनम्—

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डितास्समदर्शिनः । इति ॥

तथैव "इन्द्रो मायाभि पुरुरूप ईयते" इति । स्वयमविलक्षणोऽ-प्यात्मा नरपश्वादिविचित्रशरीरसपर्कवशात् भ्रान्त्या स्वयमपि विलक्षण-रूपः प्रतीयते इत्यर्थ ॥

ये च मुक्ताना क्षेत्रज्ञानामीश्वरेण सहैकत्ववादा. तेऽप्यत्यन्त-साम्यात् वैलक्षण्याभावाच्च । तथा च श्रुत्यन्तरम्—

यदा पश्य. पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्म योनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परम साम्यमुपैति ॥

इतीश्वरसाम्यापत्तिमेव मुक्तस्य दर्शयति । तथा भगवता वासुदेवेनाऽप्यु-क्तम् ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च । इति ॥

यत्तु—"ममैवांऽशो जीवलोके जीवभूतस्सनातन" इति भगवद्वचन तत् स्वामिभृत्यभावपरम् । यथा खल्वमात्या राज्ञोंऽशा व्यपदिश्यन्ते तथा जीवोऽपीश्वरांश इत्युच्यते । अन्यथा जीवत्वनाशात् सनातनत्वानुपपत्तिः । यान्यपि—

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥ (वि ६-७-९६)

इत्यादीनि पुराणवचनानि, तेषामयमेवार्थ. । वैलक्षण्य आत्मनो ब्रह्मणश्च अत्यन्तमविद्यमानमेव अज्ञाननिमित्तम् । अज्ञाने विनष्टे स्वयमेव विलीयते इति । विस्पष्ट हि परापर पुरुषयोर्भेदः गीतादिषूपदर्शित —

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
उपद्रष्टाऽनुमन्ता च कर्ता भोक्ता महेश्वरः ॥
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥

इत्यलमतिदूर गत्वा ॥

अपिच शास्त्रदीपिकायामात्मवादे (३५५पुटे)—"ये त्वात्मैकत्ववादा श्रुतिषु स्मृतिषु पुराणेषु वा ते "निरञ्जन परम साम्यमुपैति, मम साधर्म्यमागता , उत्तम पुरुषस्त्वन्य ' इत्यादिभिरात्मभेदवचनै. प्रत्यक्षादिभिश्च विरोधान्नैकान्त शक्नुवन्त्यात्मैकत्व निश्चायथितुम् ॥

वचनानां हि मिथो विरोधे सिद्धवस्तुविषयत्वेन च विकल्पासभवात् प्रमाणान्तरान्निर्णय· स्यात् । तच्च प्रमाणान्तर भेद एव समर्थमित्यैकात्म्यवादानामवैलक्षण्यपरत्व पूर्वोक्तन्यायेनावगन्तव्यम् । विस्पष्ट चैतद्वायुदृष्टान्तेनोपपादनात्—(वि. पु. २-१४-३२)

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोः तथा तस्य महात्मन' ॥

इति । न हि वायुद्रव्यं सर्वत्रैकं, व्यक्तिभेदस्य स्पष्टत्वात् । अविलक्षण-स्वभावस्य तु वायो वेणुरन्ध्रकृत षड्जादिवैलक्षण्य, एवमात्मनोऽपि पशुमनुष्यादिवैलक्षण्य देहसबन्धकृत न स्वाभाविकमित्ययमेवार्थ । वायोरिति तस्येति चैकवचन सामान्याभिप्रायम् । तस्मात् प्रतिशरीरं भिन्ना एवात्मान सर्वगता नित्या । एव च बद्धमुक्तव्यवस्थाऽपि युक्त-तरा भवति" इति पार्थसारथिमिश्रव्याख्यानम् ॥

स्वयप्रकाशत्वम्

एव—जीवात्मन स्वयप्रकाशत्व अहप्रत्ययवेद्यत्व च अह-मर्थात्मसमर्थनप्रकरणे श्रीभाष्यादिषु सम्यगुपपादितम् । अयमप्यर्थ तन्त्रवार्तिके अपूर्वाधिकरणे (३७६ पुटे) "चैतन्यस्वभावस्यात्मन अहं प्रत्ययेन हि अस्तित्वमवगम्यते" इति स्पष्टमुक्त । स चार्थ "स्वस-वेद्यस्स भवति" इत्याचार्यशबरस्वामिनाऽप्युक्त ॥

बृहदारण्यकशाकरभाष्ये —(६-३-७) "प्रत्यगात्मग्राह्यतामा-त्मन अहमिति मीमासकपक्ष. प्रत्युक्तः" इत्ययमर्थ अनूदित । अत्रा-नन्दगिरि "आत्मनो ग्राह्यस्याहमिति प्रत्यगात्मनैव ग्राह्यतेति मीमां-सकमतमपि प्रत्युक्त, एकस्यैव ग्राह्यग्राहकतयो निरस्तत्वादित्याह— प्रत्यगात्मेति" इत्यवतारयामास । ततश्च मीमासकसिद्धान्ते एकस्य ग्राह्यग्राहकभावः आत्मनोऽङ्गीकृत इति सिद्धम् । इयमत्र श्रीभाष्यश्रुत-प्रकाशिकासूक्ति "दीपः प्रकाशस्वभाव स्वयमेव, प्रकाशते । अन्यानपि प्रकाशयति प्रभया । एवमात्मा चिद्रूप एव चैतन्य-गुणक इति । चिद्रूपता हि स्वयप्रकाशता । तत्रात्मा अहमर्थ प्रत्यक्त्वेनानुकूलत्वेनैकत्वेन च स्वतो भाति । तादृशस्वयप्रकाशप्रत्य

क्षेणैव धर्मधर्मिणोः ज्ञातृज्ञानयोरपि संबन्धः प्रतीयते । नियतविशेषण विशेष्यभाव सबन्ध । अहमर्थो विशेष्यतैकस्वभाव प्रकाशयति । धर्मभूतज्ञान च विशेषणतैकस्वभाव स्वात्मान प्रकाशयति । विशेषणविशेष्यभावस्य परस्परप्रतियोगिकत्व च ज्ञातृज्ञानयोस्सहावभासादेव प्रतीयते " इति ॥

" ज्ञातृत्व हि ज्ञानगुणाश्रयत्व ज्ञान चास्य नित्यस्य स्वाभाविकधर्मत्वेन नित्यम् । तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्य उदयास्तमयव्यपदेश प्रवर्तते " इति च श्रीभाष्यमत्रानुसन्धेयम् ॥

धर्मभूतज्ञानम्

अत्र कुमारिलवाक्य शब्दनित्यत्वाधिकरणम् (श्लोक ८३३)—

बुद्धीनामपि चैतन्यस्वाभाव्यात्पुरुषस्य नः ।
नित्यत्वमेकता चेष्टा भेदस्तु विषयाश्रय. ॥
स्वरूपेण यथा वह्निर्नित्य दहनकर्मकः ।
उपनीतं दहत्यर्थं दाह्यं नान्यन्न चान्यदा ॥
यथा वा दर्पणः स्वच्छः यथा च स्फटिकोऽमलः ।
यद्यन्निधीयते योग्यं तच्छाया प्रतिपद्यते ॥
तथैव नित्यचैतन्याः पुमांसो देहवृत्तयः ।
गृह्णन्ति करणानीतान् रूपादीन् धीरसौ मता ॥
तेनोपनेतृसंबन्धभङ्गित्वात् भङ्गिनी मतिः ।
एतन्मनसि कृत्वाऽऽह नित्ये एवेति भाष्यकृत् ॥ इति ॥ ४०८

तथा तन्त्रवार्तिके (३७६) " चैतन्यस्वभावस्यात्मन अहप्रत्ययेन हि अस्तित्वमात्रमवगम्यते " इत्युच्यते ॥

न्यायपरिग्रह

वेदार्थसग्रहे निवर्तकानुपपत्तिप्रकरणे—" सर्वशून्यवादिन ब्रह्मव्यतिरिक्तवस्तुमिथ्यात्ववादिनश्च स्वपक्षसाधनप्रमाणपारमार्थ्यानभ्युपगमात् अभियुक्तैः वादानधिकार एव प्रतिपादितः ॥

सर्वथा सदुपायानां वादमार्गः प्रवर्तते ।
अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः ॥

इत्युदाहृतम् । अत्र अभियुक्तपदेन कुमारिलभट्टाचार्यो हृदयस्थितः । यत. श्लोकवार्तिके निरालम्बनवादे (१२८) श्लोकोऽय पठ्यते । अनेनोदाहरणेन कुमारिले सन्निकृष्टत्व गौरव च सूच्यते ॥

श्रीभाष्ये आरम्भणाधिकरणे (२-१-१५) "यत्तु ब्रह्मणः अपारमार्थिकज्ञानगम्यत्वेऽपि पश्चात्तनबाधादर्शनात् ब्रह्म सत्यमेवेति । तदसत्—दुष्टकारणजन्यज्ञानगम्यत्वे निश्चिते सति पश्चात्तनबाधादर्शनस्यार्किंचित्करत्वात्" इत्युक्तम् । श्लोकवार्तिके हि चोदनासूत्रे (श्लो. ३८)—

दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे ।
अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत् ॥

इत्यस्ति । अयमेव श्लोक श्रीभाष्यकारस्यात्र मनसि स्थित इति युक्त वक्तुम् ॥

तथा वाक्याधिकरणे (३११ श्लोक)

जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति ।
नित्यत्वाल्लक्ष्यमाणायाः व्यक्तेः तं हि विशेषणे ॥

इति । एतद्वाक्यार्थमनुसधायैव श्रीभाष्ये (२--२--३) "कालस्य पदार्थविशेषणतयैव प्रतीतेः तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्या न च परिहर्तव्या । कालोऽस्तीति व्यवहारो व्यवहर्तृणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्यः । जात्यादयो हि द्रव्यविशेषतयैव प्रतीयन्ते इति पूर्वमेवोक्तम्" इति भाषितम् ॥

तथा—श्रीभाष्ये अविद्याप्रकरणे अनिर्वचनीयत्वानुपपत्तौ—"एतदुक्तं भवति—सर्वं हि वस्तुजात प्रतीतिव्यवस्थाप्यं, सर्वा च

प्रतीतिः सदसदाकारा । सदसदाकारायास्तु प्रतीतेः सदसद्विलक्षणं विषय इत्यभ्युपगम्यमाने सर्वं सर्वप्रतीते· विषयस्स्यात् " इति भाषितम् ॥

अत्र श्रुतप्रकाशिका—"सर्वं सर्वं प्रतीतेरिति । सदसद्विलक्षण मिति या प्रतीति· तत्रापि सदसदेव विषय स्यादित्यर्थ " इति विवृतम् । अयमत्र भावः—सद्विलक्षणत्वासद्विलक्षणत्वयो असत्त्वसत्त्वरूपत्वात् समुच्चयकोटिभिन्नतुरीयकोटेरप्रामाणिकत्वादिति । अत्रत्यो वाक्यार्थः श्लोकवार्तिके अभावपरिच्छेदीयपद्येन स्फुटीभवतीति विजानीमः । यथा—

स्वरूपपररूपाभ्यां नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते कैश्चिद्रूपं किं चित्कदाचन ॥ १२ ॥

अयमर्थ —सर्वं हि वस्तु स्वरूपतस्सद्रूप पररूपतश्चासद्रूप, यथा घटः घटरूपेण सन् पटरूपेणासन्, पटोऽप्यसद्रूपेण भावान्तरे घटादौ समवेतः तस्मिन् स्वीयामसद्रूपाकारां बुद्धि जनयति योऽय घट· स पटो नभवतीति । इह घटो नास्तीत्यत्रापि घटसयोगाभावात्मना भूतलादिबुद्धि· बोद्धव्या । भ्रान्तिज्ञाने पररूप स्वरूपेण भासते इति विशेषः । तथा च सर्वस्य च वस्तुन· सदसदात्मकत्वे सर्वस्या अपि प्रतीते सदसदाकारत्वमेवेति भाव· ॥

तथा—(२-१-१८) श्रीभाष्ये–"असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च" इति सूत्रस्थयुक्तिशब्दव्याख्यानावसरे भावान्तराभाववादस्समर्थित । "युक्तिर्हि सत्त्वासत्त्वे पदार्थधर्मावबगमयति । मृद्द्व्यस्य पृथुबुध्नोदराकारयोग घटोऽस्तीति व्यवहारहेतुः । तस्यैव तद्विरोध्यवस्थान्तरयोगः घटो नास्तीति व्यवहारहेतुः । तत्र कपालाद्यवस्थायाः तद्विरोधित्वेन सैव घटावस्थस्य नास्तीति·

व्यवहारहेतुः । न च तद्व्यतिरिक्तो घटाभावो नाम कश्चिदुपलभ्यते । न च कल्प्यते । तावतैवाभावव्यवहारोपपत्तेः" इति ॥

तथा जिज्ञासाधिकरणे महासिद्धान्तारम्भे—"जातिग्रहणेनैव भिन्न इति व्यवहारसम्भवात् पदार्थान्तरादर्शनात् अर्थान्तरवादिनाऽप्यभ्युगतत्वाच्च गोत्वादिरेव भेदः" इति च ॥

स एव हि वाद. कुमारिलहृदयस्थ इति वयं सूचयाम· । यथा । अभाववादे—

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि ॥

आत्मन स्वरूपेणावस्थान अवस्थान्तर वेत्यर्थ. ॥

निरालम्बनवादे—

भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात् ।
भ्रान्तिश्चाभावधीश्चापि चेत्थं सालम्बना मता ॥

इत्यन्यत्र विस्तर ॥

असत्यात्सत्यप्रतिपत्ति

एव असत्यात्सत्यप्रतिपत्तिरपि प्राचीनैरुदाहृता । काव्यप्रकाशव्याख्याने संकेते (४ उ) धर्मकीर्तिर्यदाह—

मणिप्रदीपप्रभयोर्मणिबुद्ध्याऽभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥ इति ॥

हरिः (I-239)—

उपायाः शिक्षमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततस्सत्यं समीहते ॥ इति ॥

एतन्मनसि कृत्त्वैव आरम्भणाधिकरणे श्रीशङ्कराचार्येणेत्थमभाषि—"कथं चासत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत । न हि रज्जुसर्पेण दष्टो म्रियते । नापि मृगतृष्णिकाम्भसा अवगाहनपाना-

दिप्रयोजन क्रियते । नैषदोष·—शङ्काविषादिनिमित्तमरणादिकार्योपलब्धे. । स्वप्नदर्शनावस्थस्य च सर्पदशनोदकस्नानादिकार्यदर्शनात् । तत्कार्यमप्यनृतमेवेति चेत् ब्रूयात्, तत्र ब्रूम —यद्यपि स्वप्नदर्शनावस्थस्य सर्पदशनोदकस्नानादिकार्यमनृतम् । तथापि तदवगति· सत्यमेव फल, प्रतिबुद्धस्याप्यबाध्यमानत्वात् । न हि स्वप्नादुत्थित स्वप्नदृष्ट सर्प दशेनोदकस्नानादिकार्य मिथ्येति मन्यमान तदवगतिमपि मिथ्येति मन्यते कश्चित् " इति ॥

अत्र ज्ञापककारकविभागमवधीर्य असत्यस्य सत्यहेतुत्वमात्रं दृष्टान्तेनोपपादितम् । तदेतदभिप्रायमवधार्य श्रीरामानुजाचार्येण जिज्ञासाधिकरणे शास्त्रप्राबल्यप्रकरणान्ते भाषितमेव—" नच वाच्य स्वाप्नस्य हस्त्यादिविज्ञानस्यासत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभाववत् अविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुभाव· न विरुद्ध इति । स्वाप्नज्ञानस्यासत्यत्वाभावात् । तत्र हि विषयाणामेव मिथ्यात्वं तेषामेव हि बाधो दृश्यते, न ज्ञानस्य । न हि मया स्वप्नवेलायामनुभूत ज्ञानमपि न विद्यते इति कस्यचिदपि प्रत्यय जायते । दर्शन तु विद्यते अर्था न सन्तीति हि बाधकप्रत्यय· ॥

मायाविनो मन्त्रौषधादिप्रभव मायामयं ज्ञान सत्यमेव प्रीतेर्भयस्य च हेतु· । रज्ज्वादौ सर्पादिविज्ञान सत्यमेव भयादिहेतु· । सत्यैवादष्टेऽपि स्वात्मनि सर्पसन्निधानाद्दष्टबुद्धिः (भयादिहेतु.) सत्यैव शङ्काविषबुद्धिर्मरणहेतुभूता ॥

रेखया वर्णप्रतिपत्तावपि नासत्यात्सत्यबुद्धि. । रेखायाः सत्यत्वात् । ननु वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुः वर्णात्मता त्वसत्या । नैवं—वर्णात्मताया असत्याया उपायत्वायोगात् । असतो निरुपाख्यस्य ह्युपायत्वं

न दृष्टम्, अनुपपन्नं च। तस्यां वर्णबुद्धिस्तु सत्यैव। एषां सवेदनानामुत्पत्तिमत्त्वादर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते ॥

न चैकरूपशब्दस्य नादविशेषेणार्थभेदबुद्धिहेतुत्वेऽपि असत्यात्सत्यप्रतिपत्ति। नानानादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैस्सह सम्बन्धग्रहणवशात् अर्थबुत्पद्धयुत्तिहेतुत्वात् ॥

अतोऽसत्याच्छास्त्रात् सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा। ननु न शास्त्रस्य गगनकुसुमवदसत्यत्व, प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात्। नैव—असति शास्त्रे अस्ति शास्त्रमिति बुद्धे मिथ्यात्वात्। यथा धूमबुद्धया गृहीतबाष्पजन्याग्निज्ञानस्य मिथ्यात्वेन तद्विषस्याग्नेरपि मिथ्यात्वम्" इति ॥

प्रकृतवाक्यार्थसर्वस्वमेव कुमारिलेन प्रकाशितम्। यथा निरालम्बवादे—

सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते।
न दृष्टा शशशृङ्गादेः सम्यज्ज्ञानादिहेतुता ॥
बाष्पादिनाऽप्यधूमेन मिथ्यावह्न्यादिबोधनम्।
तस्मादसत्यहेतोर्या परमार्थे मतिस्तव ॥
साऽप्यसत्या न सत्यं हि सत्याभासेन गम्यते।
येऽपि रेखादयो दृष्टाः वर्णानां प्रतिपादका ॥
न ते स्वेनापि रूपेण परमार्थत्ववर्जिताः।
वर्णात्मना न सत्याश्चेत् सर्वभावेष्वयं विधिः ॥
पदार्थान्तररूपेण न सत्यं किञ्चिदिष्यते। इत्यादि ॥

शङ्का—

ननु लोकप्रसिद्धेन पूर्वमेतेन हेतुना।
साध्यसिद्धिर्ममाप्यासीत् परमार्थोऽस्य नास्तिता ॥

समाधिः—

योऽधुना परमार्थेन नास्तीत्येवं प्रकाशते ।
कथं पूर्वमसावासीत् असंश्चेत्साधनं कथम् ॥

शङ्का—

उपायानां स्वरूपं हि सवृत्यात्मकमेव नः ।
तथा च सत्यतैवेष्टा स्वरूपासत्यता कथम् ॥

समाधि·—

संवृत्या यत्स्वरूपं हि तद्वाङ्मात्रनिबन्धनम् ।
हेतुत्वं परमार्थस्य प्रतिपत्तुं न शक्नुयात् ॥ इति ॥

व्यावहारिकव्यवस्था

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोके संवृतिसत्यं च सत्यं च परमार्थतः ॥

इति सौगतकारिका । एत पन्थानमेवाश्रित्य व्यावहारिकावस्था पारमार्थिकावस्था चेति विभागः—(व्यावहारिकसत्त्व, पारमार्थिकसत्त्वम्) प्रवृत्त इति शक्यते चिन्तयितुम् । स एष वाद· श्लोकवार्तिके इत्थं दूषित·—(निरालम्बवादे—२१६ पु)

संवृतेर्न तु सत्यत्वं सत्यभेदः कुतो न्वयम् ।
सत्यं चेत्संवृति· केयं मृषा चेत्सत्यता कथम् ॥
सत्यत्वं न च सामान्यं मृषार्थपरमार्थयोः ।
विरोधान्न हि वृक्षत्वं सामान्यं वृक्षसिंहयोः ॥
तुल्यार्थत्वेऽपि तेनैषां मिथ्यासंवृतिशब्दयोः ।
वञ्चनार्थ उपन्यास· लालावक्त्रासवादिवत् ॥
नास्तिक्यपरिहारार्थं संवृतिः कल्पनेति च ।
कल्पनाऽपि त्वभिन्नस्य नैव निर्वस्तुके भवेत् ॥
तस्माद्यन्नास्ति नास्त्येव यत्त्वस्ति परमार्थतः ।
तत्सत्यमन्यन्मिथ्येति न सत्यद्वयकल्पना ॥ इति ॥

"एतेन यद्धि प्रतीतं बाध्यते मृगतोयादि तदसदेवेति लौकिकी प्रसिद्धिः, न हि शशविषाणादीनां मृगतोयादीना च कश्चिद्विशेषो लोके। सोऽयं प्रपञ्चोपि बाध्यते चेत् असन्नेवेपि नानिर्वाच्य " इति शास्त्रदीपिका। तमेव सिद्धान्तमवलम्भ्य श्रीमान् रामानुजाचार्य सदसद्विलक्षणमिथ्यावाद निराचकारेति विश्वजनानिमेतत् ॥

सस्थान जाति

एव प्राभाकरमीमासकसप्रदायानुसारिण्या प्रकरणपञ्चिकायां जातिनिर्णये संस्थानरूपाऽकार एव जातिरिति निरूपितमस्ति। स एव मार्गः विशिष्टाद्वैतसम्प्रदायः। यथा—" यत्पुनरुक्तमेकभावेन मनसा समाकलयत. कालाक्षी स्वस्तिमती वा नास्ति जातिप्रतीतिरिति। तदसिद्धम्, आकारो हि सा। प्रतीते चाकारे अर्थान्तरानुसन्धानविकलतया तस्यानुवृत्तिर्नावसीयते। अनुवृत्ता च जाति, नानुवृत्तिः। अग्रहणेऽपि च धर्मस्य धर्मिणो ग्रहण नानुपपन्नम्। अत एव पिण्डान्तरसमधिगमे पूर्वाकारपरामर्शिनी मनीषा प्रत्यभिज्ञासमाख्याता उदीयते" इति (२६)। एव सत्तारूपा जातिरप्यन्यथाकृता—" तेन स्वरूपसत्तैव प्रमाणसम्बन्धयोग्यता। यस्य हि स्वरूपमस्ति तत्प्रमाणेन परिच्छिद्यते" इति (२९) ॥

इदमत्रावेधयम्—सत्त्व नाम सत्ताऽपरपर्याय महासामान्य द्रव्यगुणकर्मवृत्ति भावपदवाच्य वैशेषिकैरङ्गीकृतम्। सामान्यादिष्वपि सव्यवहारदर्शनात् तत्तद्वस्तुस्वरूपाऽपरपर्यायमपि सत्त्वपदवाच्य भवतीति प्रशस्तपादेन प्रतिपादितम्। मानसम्बन्धरूपमेव सत्त्व सर्वत्रानुगतमिति प्राभाकरैरुक्तमिति संक्षेपशारीरककारविवरणकारादिभिरनूदितमस्ति। अत एव विवरणे सौगतसाकर्यविचारावनते (८४) "क्षणि-

कप्रमाणसबन्धस्य सत्त्वाभ्युपगमात् लोकायतबौद्धांशद्वयपरिणतः प्राभाकर." इति दूषितमस्ति । इद जरत्प्राभाकरमतं स्यात् । नव्यप्राभाकरमतं तु क्षणिकत्वदोषपरीहाराय प्रमाणसबन्धार्हत्व सत्त्वमभिमतमिति प्रमाणसवन्धयोग्यतेत्यनेन पदेन प्रकटीभवति ॥

स्वरूपसत्तैवेत्यनेन पदेन मानसबन्धयोग्यत्वातिरिक्त स्वरूप सत्त्वमप्यपलपितामिति विज्ञायते । सर्वथाऽप्यतिरिक्तजातिनिराकरणवादिन एवैते । संक्षेपशारीरके तु (२ ४--९४) स्वरूपसत्त्व पृथगनूद्य मानसबन्धयोग्यतालक्षण पृथगुच्यते—

अथवा मितियोग्यताऽस्थिता निरवद्याऽस्तु समस्तवस्तुषु ।
परमात्मनि तत्प्रतीतये सकलं वेदशिरः प्रवर्तताम् ॥ इति ॥

महासामान्यरूप सत्त्व तु प्रायस्सर्वैरप्यपाक्रियते । एतद्वासनयैव कैश्चित्तार्किकैरपि महासामान्य सत्त्वमनुपगत प्रतीयते इति ॥

ब्राह्मणत्वादि

अथ जातेस्सस्थानरूपत्वे ब्राह्मणादिषु गवाश्वादिष्विव संस्थानभेदाभावान् सर्वशास्त्रविप्लव इत्याशङ्क्य ब्राह्मणत्वादिक निरूपयति—"अनयैव दिशा ब्राह्मणत्वादिजातिरपि निवारिता" इति । प्रत्यक्षा ब्राह्मणत्वादिजाति पदार्थान्तरमिति कुमारिलमतमत्रानूद्य प्रदूष्य उच्यते—"अनादौ ससारे जन्यजनकभावेन व्यवस्थितास्तावत् काश्चिदेव पुरुषसततय. सन्ति । तासामन्योन्यव्यतिकरजाताः स्त्रीपुव्यक्तय ब्राह्मणशब्दवाच्या । अनिदप्रथमतया च सतते. सर्वेषा तत्सततिपतितत्वात् सिद्धा ब्राह्मणशब्दवाच्यता । तेन सततिविशेषप्रभवत्वमेव ब्राह्मणशब्दप्रवृत्तावुपाधि ॥

के पुनस्ते सततिविशेषाः ? न ते परिगणय्य निर्देष्टु शक्यन्ते ।

किं तु लोकत एव प्रसिद्धा प्रत्येतव्या. । तथा च तज्जन्यत्वेऽवगते ब्राह्मणशब्द प्रयुञ्जते लोका । स्त्रीणामपराधसंभवात्तज्जन्यत्वं न शक्य-मवगन्तुमिति न च वाच्यम् । दृश्यादर्शनमेवाभाव इत्युक्तत्वात् । यत्र यावदुपलब्धिसामग्री तावत्या सत्यामपि यासां व्यभिचारो न दृश्यते तासां नास्त्येव व्यभिचार इति लोकप्रमाणमेतत्" इति ॥

अयमेव हि सिद्धान्त सेश्वरमीमासाया परमतभङ्गादिषु आचार्यैः अनादिव्यवहारसिद्धवारादिदृष्टान्तेन निर्णीत वेदान्ताचार्यै । विस्तरस्तु-मानमेयरहस्यवार्तिके जातिविचारे द्रष्टव्य ॥

सत्ताद्वैतविचार

प्रकरणपञ्चिकायां तत्त्वातोके—(१५४ पु) क पुनरेष मोक्ष.[१] अविद्यास्तमय इति केचित् । एकमेवाद्वितीयमसस्पृष्ट सकलोपाधि-परिशुद्ध ब्रह्म । तदनाद्यविद्यावशेन शरीरादिसद्वितीयमिव उपाधिकलु-षितावभासमान लब्धजीवव्यपदेश सत् बद्धमिव कल्प्यते । अतोऽनाद्य-विद्यैव ससार । निखिलविकल्पातीतपरिशुद्धविद्योदयात् तदस्तमय एव मोक्ष । तदिद श्रद्धाविजृम्भितमिति प्रमाणपरतन्त्रा. ॥

न खल्वद्वैत कस्यचित्प्रमाणस्य गोचर । स्यान्मतम्—प्रत्यक्ष-मेव विधिमात्रोपक्षीणव्यापार अपरिस्पृष्टान्योन्यभेद तदेकमेव तत्त्व साक्षात्करोतीति । तदसत्, सत्य विधायकमेव प्रत्यक्षम् । तत्तु विदधदपि रूप रूपतया रस रसतया विदधाति । न पुनस्सर्वमेकरूपम् । यथा रूपे तद्धारावाहिनी बुद्धि तथाभूतैव यदि रसेऽपि स्यात् तदा भवेदेव प्रत्यक्षेण साक्षात्कृतमद्वैतम् । न त्वेवमिति सर्वप्रतिपत्तृस्वसविदितम् ॥

यच्च प्रमेयविकल्पेन सामान्यमेव वस्त्विति स्थापयित्वा सत्ताया महासामान्यरूपत्वात् तावन्मात्रमेव तत्त्वमिति साधितं तदपि गगनभा-

सकल्पम् । सत्य न विशेषमात्रमेव वस्तु । सत्यं च सामान्यविशेषात्मक वस्तु नास्ति । किं तु सामान्यविशेषावन्योन्यसंबद्धौ द्वे वस्तुनी ॥

अथागमादेवाद्वैत सिध्यति । तन्न·—आगमस्य कार्यैकविषयतया सिद्धे तत्त्वे प्रामाण्यानुपपत्ते· । अपि च वाक्यार्थे आगम प्रमाणमिष्यते । स चानेकपदार्थात्मनि वाक्यार्थे धियमुपजनयन् कथमद्वैतमवभासयेत् ॥

अथेदमुच्यते—स एष नेतिनेतीति सकलोपाधिनिषेधेन नानाभूतवस्त्वन्तरापाकरणात् अद्वैतमागमेन साध्यत इति । तदप्यसारम्—यः खल्वेष इति सद्रूपतया प्रत्यवमृष्ट पदार्थः सोऽसत्त्वापादकेन नञ्+र्थे सह सबद्धुमयोग्यः । अस्ति नास्तीतिवत् । अन्वययोग्ययोश्च पदार्थयोरन्वयाभावान्न वाक्यार्थीभवनम् । तर्हि निराकृतान्येव सर्वाणि निषेधवाक्यानि? मन्द मैव परिभावय । न हि निषेधवाक्येषु कस्यचिदात्यन्तिको निषेधः । किंतु क्वचिन्निषिध्यते । अद्वैताभिमानी तु भवानात्यन्तिकमेव निषेधमभिलष्यति । सोऽयमात्मीय एव बाणो भवन्त प्रहरति ॥

लब्धरूपे क्वचित्किंचित् तादृगेव निषिध्यते ।
विधानमन्तरेणातो न निषेधस्य संभवः । इति ॥

प्रत्यक्षादिविरुद्धार्थत्वात् अद्वैतावबोधक आम्नाय न यथावस्थितो वर्णयितु न्याय्यः ॥

शास्त्रप्रत्यक्षविरोधपरिहार

यत्त्विदं प्रपञ्चेन साधित, प्रत्यक्षादिविरोधेऽप्याम्नायस्य बलीयस्त्व, तद्वशेन प्रत्यक्षादीनामेव भ्रान्तता कल्पनीयेति । तदपि मनोरथमात्रम्—प्रत्यक्षादिविरोधे पदार्थानामन्वययोग्यताविरहात् आम्नायस्यैव तद्विरोधेऽनुदयात् । अत· प्रत्यक्षादिविरोधादाम्नाये गौणी लाक्षणिकी वा वृत्तिरास्थेया ॥

तत्रानन्दश्रुतयः स्वाभाविकदुःखाभावपरतया वर्णनीयाः । लौकि-

कानन्दस्य चाल्पतया दु:खानुषक्ततया वा व्याख्येयाः। एकत्वश्रुतयश्च एकस्मिन्नायतने एकस्यैव स्वामित्वमित्येवपरा:। "इन्द्रो मायाभिः पुरुरूप ईयते" इति देहात्माभिमानेन जन्मनिजन्मनि भिन्न इव भातीत्यर्थः। "एष नेति" इति च शरीरादीनामात्मत्वनिषेधः तद्व्यतिरिक्तप्रतिपत्तिपरः। विज्ञानश्रुतयश्च चिच्छक्तियोगित्वाश्रयात् व्योमादिभ्यो विशेषापादनफलाः। सर्वात्मश्रुतयश्च सर्वस्यात्मार्थत्वात् तादर्थ्यनिमित्तोपचारात्। "आत्मनि विज्ञाते सर्वमिद विज्ञातमिति" यदुच्यते तदात्मज्ञानस्य परमपुरुषार्थमोक्षफलत्वात् अस्मिन् विज्ञाते सर्वमेव ज्ञानं निष्फलमिति दर्शयितुमित्येषा दिक् ॥

अथोच्येत—वित्तेर्भिन्नस्याप्रकाशात्मन प्रकाश एवानुपपन्न इति यद्यत्प्रकाशते तत्तत्प्रकाशादभिन्न, प्रकाशात्मक हि ब्रह्म, अतो ब्रह्मात्मक जगत् इति सिद्धमद्वैतमिति। तादिद स्वपक्षविरुद्धम्—कथमेव बुद्धिमन्तोऽभिदधति—एव हि नानाभूतानामाकाराणा प्रकाशाभेदे प्रकाशस्यापि नानाभावापत्तेः अद्वैत दूरापास्तम् ॥

अथोच्येत—विविधोऽयमाकारप्रपञ्चः अविद्याध्यासवशादवभासते इति, एतदपि स्ववचनविरुद्धम्, सदात्मा प्रकाशः तेन सहासदात्मान आकारास्तावदभिन्ना इति न घटते। तथाच सति अप्रकाशात्मानस्ते कथमिव प्रकाशेरन्। अपि च अप्रकाशात्मन एव प्रकाशः सभवतीति बाह्यार्थसिद्धावुक्तम्। अत एषोऽपि माहायानिकपक्षानुप्रवेशिनां ब्रह्मवादिनां मोह एव ॥

अपिच अत्यन्तमसन्त प्रपञ्च कथमिवाविद्या प्रकाशयितुमलम्। न खल्वसत्ख्यातिरसिद्धा। किन्त्वग्रहणरूपैवेति नयवीथ्यां साधितम्। अतो नाविद्यास्तमयो मोक्षः ॥

आत्यन्तिकस्तु देहोच्छेदः निश्शेषधर्माधर्मपरिक्षयानिबन्धनः मोक्ष इति सिद्धम् । धर्माधर्मवशीकृतो जीवस्तासुतासु योनिषु ससरति । तयोरेकान्तोच्छेदे व्यपगतदेहेन्द्रियादिनिबन्धन समुत्खातनिखिलसासारिकदुःखबन्धन मुक्त इत्युच्यते ॥

कथं पुनरशेषधर्माधर्मपरिक्षय ? न तावदुपभोगेनैव । अनादिशरीरसन्ततिसञ्चितानां भोगसमये सचीयमानाना कर्माशयानामनन्ताना क्षेप्तुमशक्ते. । उच्यते—य खलु सासारिकेभ्यो दुःखेभ्य उद्विग्नः तदनुषङ्गशबलेभ्यस्सुखेभ्यो विगतस्पृह मोक्षायोत्तिष्ठते, स तावद्बन्धहेतुभूतेभ्यो निषिद्धेभ्य. प्रत्यवायहेतुभूतेभ्यः अभ्युदयसाधनेभ्य निवर्तमान. समुत्पन्नपूर्वो धर्माधर्मौ भोगेन क्षय नयन् शमदमब्रह्मचर्यादेकाङ्गोपबृहितेन आत्मज्ञानेन "न च पुनरावर्तते" इत्यपुनरावृत्तये मोदितेन निश्शेषं कर्माशय नाशयन् मुच्येत । न चापुनरावृत्तेरर्थवादतया वर्णनम्, आत्मज्ञानस्यापरार्थत्वात् । परार्थत्वे हि पर्णमयीन्यायेन फलश्रुतिरर्थवादतया वर्ण्यते । अपरार्थ्ये तु सैवाधिकारिविशेषण रात्रिसत्रवत् । न च कर्मविधिशेषभूतमात्मज्ञानम् । तस्यापरार्थत्वात् । परार्थत्वे प्रमाणाभावात्, उपकारलक्षणशेषत्वनिराकरणात् । इत्यलमति विस्तरेण ॥ इति ॥

सन्मात्रप्रत्यक्षम्

तदेवमपाकृते स्वरूपातिरेकिणि महासामान्ये यत्स्वमनीषाविनिर्मितकुतर्कबलेन सन्मात्रविषय प्रत्यक्षमिति साधित, तदतिदूरोत्सारितम्। एतेनैव न्यायेन शब्दत्वमपि निरस्त वेदितव्यम् । न हि ककारगकारयोरेकाकारमनुगत परामृशन्ती मनीषा समुन्मिषति । योऽपि चाय शब्दः शब्द सोऽपि श्रोत्रग्रहणोपाधिबललब्धवृत्तिरिति न जातु जातिकल्पनायै विभवति । तत इदमपहास्तित, यदाहुः—"शब्दत्वमेव तत्त-

दभिव्यञ्जकध्वनिनिबन्धनथा नानावर्णरूपतया विषयीभवत् तस्यतस्यार्थस्यावगमाय कल्पत इति" इति अय स्फोटवादनिरास. ॥

निर्विकल्पकप्रत्यक्षम्

(५४) प्रमेयपारायणे तस्य च निर्विकल्पकस्य न स्वलक्षणमात्र विषय , जात्याकारावग्राहित्वस्य स्पष्टत्वात् । नापि सामान्यमात्रविषयत्वम् । भेदग्रहणस्य प्रतीतिसिद्धत्वात् । "लब्धरूपे क्वचित्किञ्चित्" इत्यादि च यदुच्यते तदितरेतराभावविषयम् , न तु वस्तुविषयम् । वस्तुभेदप्रतीत्यनन्तरकालं परस्पराभावोऽवसीयते । घटाकारविधान च वस्त्वन्तरग्रहणानपेक्षमिति अप्रतिपद्यापि वस्त्वन्तरं तद्ग्रहो नानुपपन्न ॥

तस्मात्सामान्यविशेषौ द्वे वस्तुनी प्रतिपद्यमान प्रत्यक्ष प्रथममुत्पद्यते । किन्तु वस्त्वन्तारानुसन्धानशून्यतया सामान्यविशेषरूपता न प्रतीयते ॥ इति ॥

यथार्थख्याति

प्रकरण पञ्चिकायां नयवीथ्याम् (३२ पु.)—

यथार्थ सर्वमेवेह विज्ञानमिति सिद्धये ।
प्रभाकरगुरोर्भावः समीचीनः प्रकाश्यते ॥
अत्र ब्रूमो य एवार्थः यस्यां संविदि भासते ।
वेद्यस्स एव नान्यद्धि वेद्यावेद्यस्य लक्षणम् ॥
इदं रजतमित्यत्र रजतं चावभासते ।
तदेव तेन वेद्यं स्यात् न तु शुक्तिरवेदनात् ॥
तेनान्यस्याऽन्यथाभानं प्रतीत्यैव पराहतम् ।
परस्मिन् भासमाने हि न परं भासते यतः ॥
नन्वेवं रजताभासः कथमेष धरिष्यति ।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम् ॥
शुक्तिकाया विशेषा ये रजताद्भेदहेतवः ।
ते न ज्ञाता अभिभवात् ज्ञाता सामान्यरूपता ॥

रजतव्यवहारांशे विसंवादयतो नरात् ।
बाधकप्रत्ययस्यापि बाधकत्वमतो मतम् ॥
पीतशङ्खावबोधे च पित्तस्येन्द्रियवर्तिनः ।
पीतिमा गृह्यते द्रव्यरहितोऽप्स्विव तिग्मता ॥
पित्तस्याग्रहणं सौक्ष्म्यात् प्रभायामिव तेजसः ।
मधुरे तिक्तधीरेवं व्याख्याता पित्तवार्तिनः ॥
अलातचक्रेऽलातस्य भ्रमतः सर्वतोऽद्भुतम् ।
निरन्तरं धियो जाताः चक्रबुद्धिसमा मताः ॥
कालभेदस्तु शीघ्रत्वात् धिया तासां न लक्ष्यते ।
चक्रधीव्यवहारश्च तेनास्मिन्नपि युज्यते ॥
एतेनैव प्रकारेण सर्वभ्रान्तिषु पण्डितैः ।
ऊहनीया हेतुभेदा यथार्थज्ञानसिद्धये ॥
स्थाणुर्वा पुरुषो वेति सन्देहेऽपि यदा द्वयम् ।
स्मर्यतेऽन्योन्यनिर्मुक्तं तदाऽर्थविरहः कुतः ॥
यदि चार्थं परित्यज्य काचिद्बुद्धिः प्रवर्तते ।
व्यभिचारवती स्वार्थे कथं विश्वासकारणम् ॥
विषयाव्यभिचारित्वं साधयितुं सर्वसंविदामेषा ।
निरमीयत नीतिविदा शालिकनाथेन नयवीथी ॥ इति ॥

इदमत्रावधेयम्—

अख्यातिरेषा सर्वत्र कथञ्चित्कस्य चिन्मता ।
तदेवं सति सर्वत्र सम्यगग्रहणं भ्रमः ॥
एषोऽग्रहस्त्वभावो वा ख्यात्यन्तरमथापि वा ।
नाऽद्योऽभावानुपगमान्नान्त्य· स्यात् ख्यातिरन्यथा ॥
तस्मात्सामान्यधर्मस्य ख्यातिरख्यातिरेव सा ।
स च सामान्यधर्मोऽपि तत्तदंश इतीर्यते ॥ इति ॥

एव जरत्प्राभाकरै· सुखादेः स्वयं प्रकाशत्वमङ्गीकृतामित्यव-
ाम्यते । अस्मिन् सिद्धान्ते सुखादेः ज्ञानस्वरूपत्व स्वयं प्रकाशत्वं

चाङ्गीकृतमस्ति. एव ज्ञानस्य विषयप्रकाशनवेळायां स्वयप्रकाशत्वादयो विशेषाः बहव प्रभाकरसम्मता प्रमेया· स्वीकृता. । तस्मात् अत्र शालिकनाथप्रबन्धे प्रायेण प्रतिपादितास्सर्वेऽप्यर्था· भगवता रामानुजाचार्येण सम्यगवलोकिता इति श्रीभाष्यपरिश्रमशालिनां विदितं भविष्यति । एते ह्यर्थाः प्रायेणाङ्गीकृताश्च । अत एव सेश्वरमीमांसापक्ष विशिष्टाद्वैतासिद्धान्त ॥

न्यायाचार्यसम्मति

तथाहि न्यायसूत्रम्—तदत्यन्तविमोक्षोऽपवर्ग (१-१-२२) इति। इदञ्च सूत्र "ऋणक्लेशप्रवृत्त्यनुबन्धात् अपवर्गाभाव." (४-१-५१) इति सूत्रेण वक्ष्यमाणस्य नित्यससारपक्षस्य प्रतिषेधाय प्रवृत्तम् । तस्यैतस्य भाष्ये "नित्य सुख महत्त्ववत् मोक्षे व्यज्यते, तेनाभिव्यक्तेनात्यन्त विमुक्तस्सुखी भवतीति केचिन्मन्यन्ते" इति सविशेषात्मसिद्धान्त· अनूदित । तस्मिन् सिद्धान्ते मुक्तस्य नित्या देहेन्द्रियबुद्धयश्च कल्पायितव्या इत्यप्यनूदितम् । तेन विज्ञायते विशिष्टाद्वैतसिद्धान्तसम्मतो मोक्ष वात्स्यायनीयभाष्यादपि प्राचीन. प्रसिद्धोऽभूदिति॥

यद्यप्यत्र नित्यसुखपक्ष. दु खाभावपर इति स्वमतमुक्तम्। तथाप्यन्ते "नित्य सुख भवति अथापि न भवति नास्योभयो पक्षयोः मोक्षाधिगमो विकल्पते" इति वचनेन मोक्षो नाऽसिद्ध· । तत्प्रभेदस्तु यथा सप्रदायमस्त्विति निगमनं कृतम् । न विकल्पते नाऽप्रामाणिक इत्यर्थः ॥

तथा, (४-१-२२) सूत्रभाष्यम् "आप्तकल्पश्चाय यथा पिताऽपत्यानाम् । तथा पितृभूत ईश्वरो भूतानाम् । नचात्मकल्पादन्यः कल्पस्संभवति । न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्य उप-

पादयितुम्। आगमाच्च द्रष्टा बोद्धा सर्वज्ञातेश्वर इति बुद्ध्यादिभिश्चात्मलिङ्गैर्निरुपाख्यमीश्वर प्रत्यक्षानुमानागमविषयातीतं कश्शक्त उपपादयितुम्" इति । अनेन भाष्येण निरुपाख्यलक्षणनिर्विशेषब्रह्मवादो निराक्रियते ॥

तथा (४–१–३३) सूत्रभाष्ये "अवस्थितस्योपादानस्य धर्ममात्र निवर्तते। धर्ममात्रमुपजायते। स खल्वुत्पत्तिविनाशयोर्विषय." इति स्वायभुवमतमनूदितमास्ति। तदेव प्रत्यक्षसूत्रे न्यायरत्नाकरे विवृतमस्ति। यथा–कीदृशी पुनर्जननक्रिया, यस्यां कर्तृत्वम्। उपादानकारणदशाविशेष। यदनन्तर कार्यस्य सत्ता। तस्यापि दशाविशेषस्य तत्प्राच्यवस्थैव। तत. प्रागपि तथेत्यनादिरेषाऽऽगन्तुककार्यकारणपरम्परा" इति॥

एष एव सिद्धान्त. श्रीरामानुजाचार्यसम्मत· कार्यकारणभावे इत्यारम्भणाधिकरणभाष्ये स्पष्टम्—"द्रव्यस्योत्तरोत्तरसस्थानयोग पूर्वपूर्वसस्थानसस्थितस्य विनाश, स्वावस्थस्य तूत्पत्ति। अतस्सर्वावस्थस्य द्रव्यस्य सत्त्वात् सत्कार्यवादो न विरुध्यते। अवस्थानां पृथक्प्रातिपत्तिकार्ययोगानर्हत्वात् अवस्थावत एवोत्पत्त्यादिक सर्वमिति निरवद्यम्" इति॥

उदयनाचार्यैरप्यात्मतत्त्वविवेके सेश्वरमीमांसापक्ष अनूदितोऽस्ति। (१२५ पु) वेदसप्रदायस्सर्गान्तरवेदापेक्ष एवेति सेश्वरमीमांसापक्ष" इति। उल्लिखितश्चायं ग्रन्थ शतदूषण्यां श्रीमद्भिर्वेदान्ताचार्यै शास्त्रैक्यवादे "सेश्वरमीमांसापक्षोऽपि नातीव व्युच्छिन्नः, परैरनूद्यते च" इति॥

स्वायभुवसम्मति

अस्मिन् पक्षे स्वायभुवानां सम्मति विशदयामः। पातञ्जलयोगसूत्रम्—(१-२३) ईश्वरप्रणिधानाद्वा इति। अत्र व्यासदेवभाष्यम्—"भक्तिविशेषावर्जित ईश्वरः तमनुगृह्णात्यभिध्यानमात्रेण। तदभिध्यान-

मात्रादपि योगिनः आसन्नतरस्समाधिलाभः फलं च भवतीति" इति ॥

अत्र भक्तिविशेषेण ईश्वरवशीकरणमेव सर्वफलसाधनमिति निर्णीयते । अत एवेश्वरप्रणिधान "शौचसंतोषतपस्स्वाध्यायेश्वरप्रणिधानानि नियमाः" (२–३२) इति नियमेषु निर्दिश्यते । न्यायसूत्रकारोऽप्यक्षपादः (४–२–४) "तदर्थं यमनियमाभ्यामात्मसस्कार·" इति नियमान् तदन्तर्गत चेश्वरप्रणिधान परिजग्राह । अत्र वात्स्यायनोऽपि "यमः समानमाश्रमिणां धर्मसाधनम्, नियमस्तु विशिष्टम्" इतीश्वरप्रणिधानं विशेषसाधनमित्यमन्यत । तस्मात्परमेश्वरभक्त्यवलम्बनमार्ग मोक्षसाधनीभूतः पारमार्थिक अनादिवैदिकसप्रदायसिद्ध बहुसम्मत· व्यावहारिकपारमार्थिकावस्थाद्वयवादिभिरपि प्रथममूमिकायामुपगतः । सर्वाभ्युपगताबाधितव्यावहारिकप्रक्रियाया एव शास्त्रसिद्धायाः पारमार्थिकत्वाभ्युपगमसम्भवे केयमन्याऽपारमार्थिकी काचिदन्या केनापीतरेणाऽनभ्युपगता अवस्था नामान्यत्र सस्कारादिति ॥

अद्वैतपूर्वपक्ष

अथ श्रीशङ्कराचार्यप्रबन्धेष्वपि सेश्वरमीमांसापक्षानुवादमुपदर्शयाम.. (बृ–उ–४–१–२०) पूर्वपक्षोपन्यासे—"यस्सर्वज्ञस्सर्ववित्, योऽशनायापिपासे अत्येति, असगो न हि सज्जते, एतस्य वा अक्षरस्य प्रशासने, यस्सर्वेषु भूतेषु तिष्ठन् अन्तर्याम्यमृतः, स यस्तान् पुरुषान्निरूह्यात्यक्रामत्, स वा एष महाजन आत्मा अपहतपाप्मा विजरो विमृत्यु., तत्तेजोऽसृजत, आत्मा वा इदमेक एवाग्र आसीत्, न लिप्यते लोकदु खेन बाह्य." इत्यादिश्रुतिशतेभ्य. "अह सर्वस्य प्रभवो मत्तस्सर्व प्रवर्तते" इत्यादिस्मृतिभ्यश्च परोऽस्त्यसंसारी श्रुतिस्मृतिन्यायेभ्यश्च । स च कारण जगतः ॥

तद्विपरीतश्च संसारी तस्मादहं ब्रह्मास्मीति न गृह्णीयात्। परं हि देवमीशानं निकृष्टस्संसारी आत्मत्वेन स्मरन् कथं न दोषभाक् स्यात्। तस्मान्नाहं ब्रह्मास्मीति युक्तम्। तस्मात् पुष्पोदकाञ्जलि स्तुति नमस्कार बल्युपहार स्वाध्यायध्यानयोगादिभिः आराधयिषेत" इति। तथा तत्रैव (५–५-१) "तस्माद्भिन्नावेवात्मानौ क्षेत्रज्ञपरमात्मानाविति केचिद्व्याचक्षते" इति लिखितम्। अनेन जीवेश्वरभेदः भक्तिलक्षणभगवदाराधनस्योपायत्वं च स्पष्टमुक्तम्॥

इदमेकमपरमुदाहरणम्। कारणापेक्षया कार्यस्य भेदाभेदवादे भर्तृहरिणा वाक्यपदीयेऽस्य सिद्धान्तोऽभिहितः—(२–४४१)

नानात्मकानामेकत्वं नानात्वं च विपर्यये।
सर्वात्मकत्वादर्थस्य नैरात्म्याद्वा व्यवस्थितम्॥ इति॥

अत्र ब्रह्मपरिणामवादलक्षण भेदाभेदवाद अर्थनैरात्म्यवादलक्षण शून्यवाद च श्रीशङ्कराचार्याः (बृ. उ ४-१-२०) निराकृत्य निर्विशेषब्रह्मवादं विवर्तवादरूप प्रकाशयामासु। तथा हि "स यथोर्णनाभि तन्तुनोच्चरेद्यथाऽग्ने क्षुद्रा विष्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि व्युच्चरन्ति" इति श्रूयते॥

अत्रापाततः भेदाभेदलक्षणः ब्रह्मपरिणामवादोऽवगम्यते। स इत्थमनूद्यते—"परमात्मा विकारभावमापन्नः विज्ञानात्मत्व प्रतिपेदे। स च विज्ञानात्मा परस्मादन्योऽनन्यश्च। येनान्य. तेन ससारित्वसम्बन्धी। येनानन्य. तेनाह ब्रह्मेति धारणार्हः। एव सर्वमविरुद्ध भविष्यतीति॥

तत्र विज्ञानात्मनो विकारपक्षे एता गतयः—पृथिवीद्रव्यवत् अनेकद्रव्यसमाहारस्य सावयवस्य परमात्मनः एकदेशपरिणामः विज्ञाना-

त्मा घटादिवत्। पूर्वसस्थानावस्थस्य वा परस्यैवैकदेश. विक्रियते केशोषरादिवत् । सर्व एव वा परिणमेत् क्षीरादिवत् ॥

तत्र समानजातीयानेकद्रव्यसमूहस्य कश्चिद्द्रव्यविशेषो विज्ञानात्मत्व प्रतिपद्यते यदा तदा समानजातीयत्वादेकत्वमुपचरित स्यात्। अथ नित्यायुतसिद्धावयवानुगतोऽवयवी परमात्मा । तस्य तदवस्थस्यैकदेशो विज्ञानात्मा ससारी । तदा सर्वावयवानुगतत्वात् अवयविन एवावयवगतो दोषो गुणो वेति विज्ञानात्मनस्ससारित्वदोषेण परमात्मा सम्बध्यते इतीयमप्यनिष्टा कल्पना । क्षीरवत्सर्वपरिणामपक्षे सर्वश्रुतिस्मृतिकोप इति ॥

अग्निविष्फुलिङ्गादिदृष्टान्तश्रुतेर्न दोष इति चेन्न—श्रुते. ज्ञापकत्वात् । न शास्त्रं पदार्थानन्यथाकर्तु प्रवृत्तम्, कि तर्हि यथाभूतानामज्ञातानां ज्ञापने । किचातः[1] शृण्वतो यद्भवति—यथाभूताः मूर्तामूर्तादिधर्मा लोके प्रसिद्धाः, तद्दृष्टान्तोपादानेन तदविरोध्येव वस्त्वन्तरं ज्ञापयितु प्रवृत्त शास्त्रम् । न लौकिकवस्तुविरोधिज्ञापनाय लौकिक एव दृष्टान्त उपादीयते, उपादीयमानोऽपि दृष्टान्तो निरर्थक एव स्यात् दार्ष्टान्तिकासङ्गतेः । न ह्यग्निरशीत आदित्यो न तपतीति वा दृष्टान्तशतेनापि प्रतिपादयितु शक्यते प्रमाणान्तरेणान्यथाऽवगतत्वाद्वस्तुनः । न च प्रमाण प्रमाणान्तरेण विरुध्यते" इत्यादि ॥

अत्र नित्यायुतसिद्धावयवस्थानीयांशरूपचेतनाचेतनविशिष्टांशी परमात्मा इति तुरीयगतिविकल्प एव श्रीरामानुजसिद्धान्त इत्यवधारयन्तु धीमन्तः ॥

अपि च (बृ. ४-३-६) इद वाक्यमवधार्यताम्—"तस्मात् श्रुत्यर्थकल्पनाकुशलास्सर्व एवोपनिषदर्थमन्यथा कुर्वन्ति । तथापि वेदा-

र्थश्चेत् स्यात्काम भवतु न मे द्वेषः" इत्युच्यते। एतेन सम्प्रदाया बहुविधा· अनादे. कालात् प्रचरन्तीति स्पष्टमुक्तं भवति। भूयसामेकपक्षश्च स्फुटमुक्तः॥

तथा भगवद्गीताभाष्येऽपि शाङ्करे (१८–५०) "ननु आदित्यवर्ण, भारूपः, स्वयंज्योति. इत्याकारवत्त्वमात्मनः श्रूयते" इत्याशङ्कितम्। अयमेव हि विशिष्टाद्वैतसिद्धान्तः इत्यल बहुना॥

भास्करपद्धति

अथ भास्कारभाष्यानुवादसंग्रहः—"सर्वज्ञः सर्वशक्तिः निरतिशयसुखसवेदी मुक्तो भवतीति निरवद्यम्" ॥ (२१)

"जगद्व्यापारेति। स्थितमेतत् स्वमतमविभागेन दृष्टत्वादित्यारभ्य निरवधिकमैश्वर्यमिति। ये पुनर्वेदान्ते मुक्ताः पृथगवतिष्ठन्त इति मन्यन्ते, तन्मतमभ्युपगम्य सावधिकमैश्वर्य तेषामपि प्रतिपादयितुमिदमधिकरणमिति" ॥ (२४७)

"सोऽश्नुते सर्वान् कामानिति श्रुत्या परमेश्वराधीनमेवैषामैश्वर्यं न स्वातन्त्र्यं भोगमात्रसाम्यलिङ्गात्। न शक्यते वचनशतेनापि वस्तुतत्त्वमन्यथा कर्तुम्। मनसैतान् कामान्, ब्रह्म गमयतीति च प्राप्तिपरा। न भेदप्रतिपादनपरेति मत्वाऽऽह भगवान् बादरायण.—अनावृत्तिश्शब्दादिति। परमात्मनि एकीभूता· तस्मिन् मोदन्ते इति" ॥ (२४९)

"न हि निर्गुणं वस्तु विद्यते" इति॥ (२३८)

"मुक्ताना सर्वशक्तित्वात् सत्यसंकल्पत्वात् निर्माणशरीरेषु भोग सपत्तिः। तत्साधनभूतानि च मनांसि प्रादुर्भवन्ति। दर्शयति च शास्त्रं स एकधा भवतीत्यादि" ॥ (२४७)

अत्र मुक्तावपि जीवेश्वरयो· भेदपक्ष. अभूदित· । स एव सेश्वर-मीमांसापक्षः ॥

तदेवमनादेः कालात् विदितसकलवेदतदर्थानां स्वयोगमहिम-साक्षात्कृतवेदतत्त्वार्थानां भगवत्पराशरद्वैपायनवाल्मीकिमनुयाज्ञवल्क्य-गौतमापस्तम्बकपर्दिभारुचिप्रभृतीनां वाक्यै. उपबृंहित वेदव्याख्यातृभि· जैमिनिबादरायणप्रभृतृभि· व्याख्यात. भगवद्बोधायनटङ्कद्रमिडगुहदेव-प्रभृतिभि. पूर्वाचार्यैः परिगृहीत श्रीनाथमुनियामुनमुन्यादिभि दिव्य-सूरिभिः प्रवर्तित· सोऽय सेश्वरमीमांसापक्ष एव भगवता रामानुजा-चार्येण प्रकाशितो विशिष्टाद्वैतसिद्धान्त ॥

स एष सेश्वरमीमांसासिद्धान्त· सन्मात्रब्रह्मभेदाभेदसिद्धान्तनिष्ठानां यादवप्रकाशाचार्याणा मतानुसारिभि. तत्त्वनिर्णय नीतिमाला भगव-द्गीताव्याख्यानादिप्रबन्धप्रणेतृभि श्रीमद्भिः नारायणाचार्यै. सामगाचार्य-जैमिनिसूत्राण्येव अन्यथाकृत्य प्रतिष्ठापित.। अस्माभिस्तु तेषामेव सूत्राणां व्याख्यादोषान् प्रतिक्षिप्य समीचीनोऽर्थ· प्रतिपाद्यते इति सेश्वरमीमांसा-रम्भे श्रीमद्भि· वेदान्ताचार्यैरभिहितम् ॥

अयं हि तत्रत्यो ग्रन्थभाग. —"नारायणार्यै. सूत्राणामन्यथा-करणं प्रौढिप्रकाशनमात्रम् । वयन्तु सामगाचार्यसूत्राणा व्याख्यादोष प्रतिक्षिप्य सम्यञ्चमेवार्थं प्रतिपादयिष्यामः" इति ॥

ततश्च श्रीमतामाचार्याणां सेश्वरमीमांसाप्रबन्धप्रणयन विशिष्टा-द्वैतसिद्धान्तं सेश्वरमीमांसापक्षे निक्षेप्तुमेवेति सिद्धम्। अस्माभिस्तु आचा-र्यहृदयमनुरुध्य केवलमीमांसकप्रबन्धेभ्य एव सोऽयमंशः परिपूरित इति सर्वेऽप्याचार्याः परितुष्यन्तीति सुदृढः शोभनः प्रत्ययः ॥

विलक्षणेयं मीमांसा सेश्वरा सुव्यवस्थिता ।
कालदेशदशाचिन्ताचतुराणां सुखंगमा ॥
अपूर्वग्रन्थनिर्माणप्रयत्नादपि शोभना ।
एतां प्रवृत्तिमस्माकमनुगृह्णन्तु सात्त्विकाः ॥

इति दर्शनोदये सेश्वरमीमांसापक्षनिरूपण नाम तुरीय परिच्छेद

विशिष्टाद्वैतदर्शनम्.

विशिष्टाद्वैतसिद्धान्तोदयचिन्तामिषादथ ।
विशिष्टाद्वैतसिद्धान्तपरिभाषा विलिख्यते ॥
सुखबोधाय बालानां कृतिस्संक्षेपकांक्षिणाम् ।
एषा लक्ष्मीपुरं श्रीनिवासविद्वन्मणेरिह ॥

तत्त्वविवेक .

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ (वाक्यपदी १-१)
तस्यार्थवादरूपाणि निश्चित्य स्वविकल्पजाः ।
एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः ॥ (वाक्य १-८)

इति भर्तृहरिणा वाक्यपद्यां शब्दैकतत्त्वविवर्तवादिना औपनिषद एकत्वैकान्त. ब्रह्मैकतत्त्ववाद', द्वैतैकान्तोऽनेकतत्त्ववादश्चानूद्य दूषित ॥

तत्रैकतत्त्ववादस्वरूपं बृहदारण्यकभाष्ये (५-८-१२) श्रीशकराचार्येणानूदितमस्ति । यथा "अत्र केचिदाचक्षते---परस्य महासमुद्रस्थानीयस्य ब्रह्मणोऽक्षरस्याप्रचलितस्वरूपस्य ईषत्प्रचलितावस्थाऽन्तर्यामी । अत्यन्तप्रचलितावस्था क्षेत्रज्ञ । यस्त न वेदान्तर्यामिणम् । तथाऽन्या· पञ्चावस्था· कल्पयन्ति । तथाचाष्टावस्था· । (पिण्डो जातिर्विराट् सूत्र दैवमित्येव महाभूतसंस्थानलक्षणाः पञ्चावस्था , अव्याकृत साक्षी क्षेत्रज्ञश्चेत्यष्टावस्थाः) अन्येऽक्षरस्य शक्तय एता इति वदन्ति । अनन्तशक्तिमदक्षरमिति । अन्ये त्वक्षरस्य विकारा इति वदन्ति । एता असत्यास्सर्वा· कल्पनाः । कस्तर्हि भेद एषाम् ? उपाधिकृत इति ब्रूमः" इति ॥

तत्र प्रपञ्चोऽयं ब्रह्मणः एकस्यैव वस्तुनः अवस्था विकार· शक्तिः इति मतत्रयमनूदित भवति । तत्रावस्थावादः श्रीभर्तृप्रपञ्चसिद्धान्तः । विकारवादः श्रीभास्करसिद्धान्त· । शक्तिवाद· श्रीयादवप्रकाशपरिगृहीतः । शक्तिवादः परिष्कृत· श्रीरामानुजसिद्धान्तः इत्युन्नयाम । श्रीशङ्करसम्मतस्तु सिद्धान्त· तत्रैव भाष्ये "एतास्सर्वाः कल्पना असत्या· । भेद उपाधिकृत इति ब्रूम" इति स्पुटमुक्त· ॥

तत्र शक्तिशक्तिमतोरभेदविवक्षयैकत्ववादः प्राच्यसम्मत । श्रीरामानुजाचार्यैस्तु "कार्यानुकूलमपृथक्सिद्धविशेषणं हि शक्ति·" इति शक्तिपदार्थनिर्वचनमभिप्रेत्य चेतनाचेतनेश्वरात्मकं पृथक्स्वभावं तत्त्वत्रयमङ्गीकृत्यैश्वरतत्त्वे चेतनाचेतनतत्त्वयोः निरुक्तलक्षणशक्तिरूपत्वेन पृथक्स्थितिप्रतिपत्त्यनर्हत्वलक्षणमैक्यमन्तर्भावरूपमभ्युपगम्य प्राच्यसम्मत एवैकत्ववादस्समर्थित· । ततश्च स्वनिष्ठ विशिष्ट तत्त्वमेकमित्यर्थः । पातञ्जलास्तु स्वतन्त्रतत्त्वत्रयवादिन इति विवेक· ॥

एवमस्मिन् सिद्धान्ते प्रभाप्रभावन्नयायेन चेतनाचेतनयोरीश्वरेण सम्बन्धः अशांशिभाव इति चाङ्गीकृतः । अशांशिभावस्तु एकवस्त्वेकदेशत्वं ह्यशत्वम् । विशिष्टस्यैकस्य वस्तुनः विशेषणमश एव । विशेषणविशेष्ययोरशाशित्वेऽपि स्वभाववैलक्षण्य दृश्यते न स्थितिवैलक्षण्यम् । सोऽयमशांशिभाववाद· (२–३–४५, ३–२–२८) एवमेव श्रीभाष्ये निरूपित· ॥

तथा (३–२–२६) श्रीभाष्ये अवस्थावादोऽप्यनूदित· । स च स्वरूपपरिणामः उपाधिलक्षणांशपरिणामः शक्तिपरिणामश्चेति त्रिविधस्सम्पद्यते । आद्यः भर्तृप्रपञ्चादिसम्मतः स्यात् । द्वितीयः भास्करसम्मतः । तृतीयः यादवसम्मतः । स एव सर्वानुगतसन्मात्रब्रह्मवादः

"प्रकाशाश्रयवद्वा तेजस्त्वात्" इत्यत्र (३–२–२७) श्रीभाष्ये विवृत ॥

एतमेव सत्तारूपसामान्यात्मकब्रह्मवादं मण्डनमिश्र प्रतिपादायामास । तथाहि—

एकस्यैवाऽस्तु महिमा यन्नानेव प्रकाशते ।
लाघवान्न तु भिन्नानां यच्चकास्त्यप्यभिन्नवत् ॥ इति ॥

इद पद्य न्यायमकरन्दे (२९०) आनन्दबोधविरचिते ब्रह्मसिद्धिग्रन्थस्थमित्यभिधायैव व्याख्यातम्—"यदपि कैश्चित्प्रमेयविकल्पेन सामान्यमेव वस्त्विति स्थापयित्वा सत्ताया महासामान्यरूपत्वात् सन्मात्रमेव वस्त्विति साधित तदपि न सत्कल्पम्" इति। अस्य च मूल प्रकरणपञ्चिकायां तत्त्वालोके (१५४ पुटे) अयमेवग्रन्थः परिदृश्यते ॥

तमेत सत्तामात्रब्रह्मवाद वाक्यपद्या भर्तृहरि प्रागेवान्ववादीत्—

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दाः व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥
सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्य यत्तत्र सा जातिः असत्या व्यक्तयो मताः ॥ इति च ॥

ब्रह्मणस्सर्वशब्दवाच्यत्वमप्येतन्मूलकमेव प्रोच्येत । तमेत सर्वानुगतसामान्यात्मकसल्लक्षणब्रह्मवाद श्रीशङ्कराचार्य ब्रह्मणस्सामान्यविशेषरूपतानिराकरणेन निराचकारेति सुविदितम् ॥

एव च श्रीभाष्यानुसारेण (१–४–२०) आश्मरथ्यमतावलम्बी यादवप्रकाशाचार्यः । (१–४–२१) औडुलोमि मतावलम्बी भास्कराचार्य । (१–४–२२) काशकृत्स्नमतावलम्बी आचार्यबादरायण । तदनुसारी श्रीरामानुजाचार्य इति निर्णयस्सिध्यति ॥

इदमत्रावधेयम्—यद्यपि श्रीशाङ्करसिद्धान्ते भेदाभेदविषये भेदः आविद्यक अभेद पारमार्थिक इति । श्रीभास्करसिद्धान्ते भेद औपाधिकः अभेद· स्वाभाविक इति । श्रीयादवसिद्धान्ते भेद व्यक्तिलक्षण. । अभेदः शक्तिलक्षण इत्येतन्मतत्रये भेद औपचारिक अभेदो मुख्य इति प्रतिभाति । श्रीरामानुजसिद्धान्ते तु एतद्वैपरीत्येन भेद. तत्त्वत्रयलक्षणो मुख्य । अभेदो वैशिष्ट्यलक्षण गौण इत्यभिप्रायः आपातत· प्रतीयते ॥

तथापि-- विशुद्धात् ब्रह्मणः सृष्ट्यसम्भवात् अविद्यालक्षण. अशलक्षण. शक्तिलक्षण परमार्थ अपरमार्थो वा विशेषणपदवाच्य. उपाधिः सर्वे सृष्टे प्रागङ्गीक्रियते । तथासत्येकाद्वितीयादिपदानां मुख्यो वा गौणो वा अर्थ परिगृहीतस्स्यादिति निरुपचारितैक्याभिलाषिणो विमृशन्तु । ततश्च सर्वेऽपि विशिष्टैक्यवादिन एवान्ततो भवन्तीति शक्यते प्रतिपत्तुमिति ॥

*ततश्च श्रीरामानुजाचार्यासिद्धान्ताभिप्रायेणांशविशेषणशक्तिपदानामशिविशिष्टशक्तपदानां च पर्यायत्वमङ्गीकृत्य विशेषणविशेष्ययो पृथक्स्वभावतया भेद चाभ्युपगम्य धातुत्रयवादस्समर्थितोऽपि अशेषचिदचित्प्रकार ब्रह्मैकमेव तत्त्वमित्यैक्यसिद्धान्तोऽपि समर्थित । ततश्च वैशिष्ट्यमेवैक्यम्, न सर्वस्वरूपैक्यामिति निर्णयः । स चैष सिद्धान्तो नापूर्व., अपि तु भगवत्पराशरद्वैपायनवाल्मीकिबोधायनटङ्कद्रमिडगुहदेवकपर्दिभारुचिनाथमुनियामुनमुनिप्रभृतिसम्प्रदायपरपरया समागत इति वेदार्थसग्रहादिषु अभिहितम् ॥

अपि च—कार्यकारणभावविषये—कार्यकारणयोरभेद भेद· उभय अनन्यत्वं चेति चतस्रो विधा· वादिभिरङ्गीकृताः । अत्र तु—

अवस्थाया आगन्तुकत्वमङ्गीकृत्य सूक्ष्मावस्थाविशिष्टस्य कारणस्य स्थूलावस्थाविशिष्टस्य कार्यस्य चाभेदः स्वीकृत । अवस्थयोः भेद स्वीकृत । इद लोकदृष्ट्यनुगुण पातञ्जलादिभिरभ्युपगत विलक्षण माध्यस्थ्यम् । ततश्च अवस्था विकार शक्ति अश इत्यादय शब्दा यथायथ समानार्थाः कृता इति सग्रह । चिदचिद्वस्तुनोरशक्तिशब्देन साङ्ख्ययोगव्यवहारः बहुलोऽस्ति ॥

श्रुतिसमन्वय

अस्मिन् सिद्धान्ते श्रुतिसमन्वयस्त्वेवम्—"भोक्ता भोग्य प्रेरितारं च मत्वा" इत्यादिभि श्वेताश्वतरादिभेदश्रुतिभि चिदचिदीश्वरतत्त्वानां विवेक. कृतः । "यस्य पृथिवी शरीर, यस्यात्मा शरीरम्" इत्यादिभि छान्दोग्यादिभि शरीरात्मभावलक्षणस्सम्बन्धविशेष ईश्वरापेक्षया चिदचितोरुपदिष्ट । ततश्च "सर्व खल्विद ब्रह्म, तत्त्वमसि" इत्यादीनामभेदश्रुतीना विशिष्टैक्यविषयत्वेन मुख्यता व्यवस्थापितेति निर्णय ॥

चिदचिदीश्वरात्मक तत्त्वत्रय स्वरूपत स्वभावतश्च मिथो विभिन्नम् । स्थितितस्तु चिदचित्तत्त्वद्वयमीश्वरतत्त्वादपृथक्सिद्धम् । तदपृथक्सिद्धिर्नाम तत्सत्तयैव सत्तावत्त्व तज्ज्ञाततयैव ज्ञातत्व च । ततश्च सर्वाणि ज्ञानानि ब्रह्मविदा ब्रह्मपर्यन्तानि । तथा सर्वे व्यापारा सर्वाण्यपि प्रयोजनानि । तथा सर्वेपि शब्दा ब्रह्मपर्यन्ता , अचिद्विशिष्टजीवविशिष्टपरमात्मबोधका इति निर्णय ॥

ततश्च ब्रह्मणस्सर्वात्मकत्वेन सर्वस्य तच्छरीरत्वेन च तत्त्वमसीत्यादौ तत्पदार्थस्य जगत्कारणत्वादिविशेषणविशिष्टस्य परमात्मन युष्मत्पदार्थस्य सशरीरजीवशरीरकत्वविशेषणविशिष्टस्य परमात्मनश्च विशेष्यस्य स्वरूपैक्यात् सामानाधिकरण्यमुपपद्यते । सर्वं खल्विदं ब्रह्मेत्यत्र सर्वा-

तर्यामित्वविशिष्टस्य ब्रह्मत्वविशिष्टस्य चैक्यमनुसधेयम् । "भिन्नप्रवृत्तिनेमित्ताना शब्दनामेकस्मिन्नर्थे वृत्ति सामानाधिकरण्यम्" इति समानवेभक्तिमत्त्वलक्षणस्य शब्दरूपस्य सामानाधिकरण्यस्य पूर्वविद्भद्वैयाकरणनिर्वचनम् । तदर्थेऽपि प्रकार्यद्वैते तादर्थ्यात् ताच्छब्द्यात् प्रकार्यद्वैत सामानाधिकरण्यमिति सिद्धान्त ॥

एव चाभेदश्रुतीना विशिष्टाद्वैतपदवाच्यस्य विशिष्टैक्यस्य तात्पर्यविषयत्वसमर्थनात् अस्य सिद्धान्तस्य विशिष्टाद्वैतसिद्धान्त इति व्यवहारस्समागत । तदुक्त श्रीसुदर्शनसूरिभि श्रुतदीपिकातात्पर्यदीपिकयोः श्रीवेदान्ताचार्यै पाञ्चरात्ररक्षायां पाराशर्यविजये महाचार्यैश्च "सामानाधिकरण्य विशिष्टाद्वैतविषयम्" इत्यक्षरश. ॥

तस्येदमुपव्याख्यानम्—कार्यकारणभावस्थले कार्यावस्थापन्नस्य कारणावस्थापन्नैक्य अवस्थाद्वयापन्नवस्त्वेकत्वम् । यथा मृत्पिण्डोऽयं घट', सदेवेद. ब्रह्मैवेदम् "इत्यादौ । अन्यत्र एकविशेषणविशिष्टस्यापरविशेषणविशिष्टैनैक्यम् । यथा—नीलो घटः तत्त्वमसि" इत्यादौ ॥

इयाननयोर्विशेषः—कार्यकारणभावस्थले भिन्नकालीनावस्थारूपसद्वारकविशेषणाश्रयधर्म्यैक्यम् । यथा स एवाय तरुणोऽभूदिति । अन्यत्र समानकालीनाद्वारकविशेषणाश्रयधर्म्यैक्यम्। यथा वेदवित् ब्राह्मण इति । आद्यस्थले बाल्ययौवने भिन्नकालीने शरीरद्वारा विशेषणभूते अवस्थे । अनन्तरस्थले वेदन ब्राह्मणशरीर च समकालीने अद्वारकविशेषणे । एवमुभयविधविशेषणविशिष्टयो. धर्मिणोरेकत्वमभेदश्रुत्यर्थ. । सामानाधिकरण्यतात्पर्यभूमिरिति यावत् ॥

यत्र पुनरेक तत्त्वमित्येकशब्दप्रयोगः तत्र विशिष्ट तत्त्वमित्यर्थः ।

तत्रैक्य वैशिष्ट्यरूपम् । तदुक्त न्यायसिद्धाञ्जनारम्भे "अशेषचिदचित्प्रकार ब्रह्मैकमेव तत्त्वम् । तत्र प्रकारप्रकारिणो प्रकाराणां च मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविवक्षया एकत्वव्यपदेश । तदितरनिषेधश्च" इति । अत्र विशिष्टैक्यमित्यत्र विशिष्टस्यैक्यमिति विग्रहः । वैशिष्ट्यमैक्यमिति तदर्थ ॥

एव कृत्स्नस्य चिदचिदात्मकस्य प्रपञ्चस्य ब्रह्मणश्च शरीरात्मभावस्सम्बन्ध श्रुतिभिरुक्त । स हि नियत आधाराधेयभाव नियत नियाम्यनियामकभाव नियत शेषशेषिभावो वा । तेन च सम्बन्धेन दारागारकेदारादिषु विद्यमानात्पारतन्त्र्याद्विलक्षण पारतन्त्र्य प्रतीयते । यथोक्त सहस्रनामभाष्ये कूरेशेन भूतात्मेति नामनिर्वचने---"अवरात्मनोऽपीदमेव शरीर प्रत्यात्मत्व, यत् व्याप्य साक्षात् प्रवृत्त्यादिषु नियच्छति । एव परमात्मा सर्वमिति विशेष । दारागारकेदारादिविलक्षणेन अत्यन्तपारतन्त्र्येणान्तरङ्गो हि देहस्यात्मविभूतिभाव" इति । आत्मविभूतिभाव आत्मनियाम्यत्वमित्यर्थ ॥

एव गुणसामान्यस्य गुणविशेषस्य च विधि निषेधश्च दृश्येते । तत्र गुणसामान्यनिषेधवादा गुणविशेषविधिवादानुरोधेन उत्सर्गापवाद न्यायपुरस्कारेण विहितमङ्गलगुणव्यतिरिक्तहेयगुणनिषेधपरतया वर्णिता । उत्सर्गापवादन्यायो नाम विरोधपरिहाराय शब्दोपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य सकोच । "आहवनीये जुहोति, पदे जुहोती" इत्यादिषु प्रसिद्ध ॥

तथा हेयगुणनिषेधवादानुरोधेन सामान्यविशेषन्याय छागपशुन्यायापरपर्याय स्वीकृत्य सामान्यनिषेधस्य विशेषनिषेधे पर्यवसान च प्रकाशितम् । सामान्यविशेषन्यायो नाम सशयपरिहाराय शब्दोपात्तविशेष-

विषये सामान्यशब्दस्य सकोच । यथा पशुशब्दस्य छागपरत्वमाश्रीयते । अत्र यद्यपि—

सामान्यविधिरस्पष्टस्संहियेत विशेषतः ।
स्पष्टस्य तु विशेषेण नोपसंहार इष्यते ॥

इत्युक्तया "स्त्रिय न हन्यात्, आत्रेयीं न हन्यात्" इत्यादाविव निषेधस्थले उपसहारस्य नावश्यकता । सामान्यविधे स्पष्टत्वात् । तथापि उत्सर्गापवादन्यायेन गुणसामान्यनिषेधवादानां मङ्गलगुणव्यतिरिक्तगुणनिषेधे सङ्कोचस्यावश्यकत्वे सशयपरिहाराय गुणविशेषनिषेधफलक सामान्यविशेषन्याय निषेधस्थलेऽपि प्रवर्तितुमर्हतीत्यभिप्रायः । एव श्रुतीनां मिथो विरोधस्य परिहार श्रुतिभिरेव प्रदर्शित इति नात्र कल्पनादोष इति श्रीभाष्याभिप्राय ॥

भेदसामान्यनिषेधवादाश्च भेदविशेषविधिवैयर्थ्यापत्त्या गोबलीवर्दन्यायेन विशेषव्यतिरिक्तविषया इति व्यवस्थापिता । गोबलीवर्दन्यायोनाम वैयर्थ्यपरिहाराय शब्दोपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य सङ्कोचलक्षण "गामानय बलीवर्दं चानय" इत्यादौ प्रसिद्ध. ॥

तथा—विरोधपरिहाराय उत्सर्गापवादन्यायोऽप्यत्र प्रवर्तते । प्रायेण भेदनिषेधस्थले किञ्चिदैक्य विधाय तच्छेषतयैव भेदस्य निषेधदर्शनात् विधीयमानैक्यविरोधी भेद एव प्रतिषेध्य इति न भेदसामान्यस्य प्रतिषेधसिद्धिः । तथा भेदविशेषस्यापि प्रतिषेधदर्शनात् सामान्यविशेषन्यायोऽप्यत्र प्रवर्तते । अधिक श्रीभाष्यभूषणे द्रष्टव्यम् ॥

तत्त्वनिर्वचनम

अज्ञानादिह संसारः ज्ञानान्मोक्ष इतीर्यते ।
अखिलैस्तान्त्रिकैस्तस्मात् तत्त्वज्ञानमिहादिमम् ॥

तदेतत्तत्त्वज्ञानं भक्तिप्रपत्तिलक्षणविद्याविशेषरूपस्य साक्षान्मोक्षसाधनी भूतस्य मूलकारणतया प्रथम सम्पादनीयम् । अत एव हि सकललोकोज्जीवनाय प्रवृत्तेष्वध्यात्मशास्त्रेषु सर्वेषु तत्त्वहितपुरुषार्थनिरूपणमुखेन भगवद्वैभवं प्रतिपाद्यते इति सिद्धान्त. । अनेन च तत्त्वज्ञानेन देहात्मभ्रम. स्वतन्त्रात्मभ्रमश्च सर्वानर्थमूलभूत. निवर्तते । तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्ति. सर्वतान्त्रिकसम्मता ॥

तत्त्वं नाम अनारोपितं वस्तु । परमार्थ इति यावत् । अपरमार्थत्वमारोपितत्वम् । तच्च परमार्थस्यैव रजतत्वादे स्वात्यन्ताभाववति प्रतीयमानत्वम् । तदेव मिथ्यात्वमपि । अत एव तस्यात्रासत्त्व तत्तन्निष्ठात्यन्ताभावप्रतियोगित्वरूप यथालोकमभ्युपगम्यते । अत्र रजतादिक व्यवहारयोग्य विवक्षितम् । नातो रजताशमादायातिशङ्काया आवकाश । ततश्च सत्त्व असत्वमुभयमपि वस्तुधर्मः । ताभ्यामेव सर्वव्यवहारोपपत्ते पारमार्थिकव्यावहारिकप्रातिभासिकभेदेन सत्तात्रैविध्यकल्पनमप्रकृतम् ॥

यद्धि प्रतीत बाध्यते मृगतोयादि तदसदेवेति लौकिकी प्रतीति· । न हि शशविषाणादीनां मृगतोयादीनां च कश्चिद्विशेषो लोके । ततश्चासन्मिथ्याशब्दयो पर्यायत्वमेव ॥

ततश्च लोकानुसारादेव निरुपाधिको निषेध निरुपाधिकश्च विधिर्नास्ति इदानीमत्रैव नास्तीति प्रतीते· । इदानीमिहेदमस्तीति च प्रतीतेः । न हि केवलमस्तीति वा नास्तीति वा प्रतीतिरस्ति । तथात्वे सर्वशून्यवादः सर्वैक्यवादश्च प्रसज्येयाताम् ॥

असत्पदार्थे वादिविप्रतिपत्तिस्त्वेवम्—वस्तुप्रतियोगिक· वस्त्वनुयोगिकः वस्तुभूतः कश्चित्पदार्थ इति तार्किकसिद्धान्तः ॥

वस्त्वनुयोगिकः अवस्तुप्रतियोगिकः अवस्तुभूतश्चेति निर्विशेष-ब्रह्मवादिसिद्धान्त ॥

अवस्त्वनुयोगिकः अवस्तुप्रतियोगिकोऽवस्तुभूत इति पक्ष शून्य-वादिनाम् ॥

भावादन्योऽभावो नामकश्चित्पदार्थ एव नास्तीति सर्वभाववादिनां भावान्तराभाववादिनां सिद्धान्त । तत्रापि स्वरूपमभाव इति धर्मोऽभाव इत्यादय· कल्पा· विविधा विद्यन्ते ॥

तदेतत्तत्त्व चेतनाचेतनेश्वररूपेण सामान्यत त्रिविधमपि अचित्तत्त्व चित्तत्त्व च ईश्वरतत्त्वायत्त तत्सङ्कल्पायत्तस्वरूपस्थितिप्रवृत्तिमदित्यर्थ । सर्वस्यापि वस्तुन स्वरूप स्थिति प्रवृत्तिश्चेति तिस्रो विधास्सन्ति । स्वरूप नाम असाधारणैर्धर्मैर्निरूप्यमाणो धर्मी । सैव स्वरूपसत्तेत्यु-च्यते । व्यवहारयोग्यत्वलक्षण सत्त्व तु वस्तूनां धर्म । प्राचीनैस्तु—(भास्करभाष्ये ९९)

स्वरूपमेव वस्तूनां परस्परविलक्षणम् ।
नानात्वं तत्सुसंवेद्यं भेद इत्यभिधीयते ॥
घटरूपं पटे नास्ति पटरूपं घटे न हि ।
इति देशान्तराभाव· ह्यन्योन्याभाव उच्यते ॥

इत्युच्यते । भेदप्रतीतिगोचरत्व तत्तद्वस्तुस्वरूपस्याप्यस्तीति आत्मतत्त्व-विवेके उदयनाचार्य कथयति । अत एवान्योन्याभावाद्भेद विलक्षण इति प्राचा व्यवहार· ॥

स्थितिर्नाम उक्तरूपस्य कालान्तरानुवृत्ति । सा च नित्यानित्या अनित्यानामनित्या । प्रवृत्तिर्नाम तत्तत्साध्यो व्यापार प्रवृत्ति-निवृत्तिलक्षणः । निवृत्तेरपि व्यापाररूपता सर्वसमता । तत्रेश्वरतत्त्व-

स्वरूपप्रयुक्तमधीनत्वं चेतनाचेतनयोराधेयत्वमित्युच्यते । तत्सङ्कल्प-प्रयुक्तमधीनत्व विधेयत्वमित्युच्यते ॥

तथा च चिदचित्तत्त्वयो· ईश्वरतत्त्वेऽपृथक्सिद्धिलक्षण अन्तर्भाव – प्रकारतैकस्वभावत्वमशत्व शक्तित्वं विशेषणत्वं आधेयत्व विधेयत्व शेषत्व शरीरत्वमुपादेयत्व तादात्म्य ऐक्यमद्वैतमित्यादिभि पदै प्रतिपाद्यते। सर्वथा तयोरीश्वरपारतन्त्र्यपराकाष्ठासिद्धि फलम् । अयमत्र निर्णय — आधेयत्वविधेयत्वशेषत्वादीन्यपृथक्सिद्धेरवान्तरभेदा । एतैरुपलक्षितस्य चेतनापृथक्सिद्धत्वस्य द्रव्यगतस्य शरीरपदप्रवृत्तिनिमित्तत्वमिति ॥

तत्रापीश्वरतत्त्वचेतनतत्त्वयो परस्परप्रीतिमुपाधीकृत्य पितृपुत्र-भाव· गुरुशिष्यभाव स्वामिभृत्यभावः पतिपत्नीभाव इत्यादयस्सम्बन्धा· सर्वविधबन्धुत्वलक्षणा. यथालोक बुद्ध्यारोहाय निरूप्यन्ते ॥

तच्चेद तत्त्वत्रयमपि नित्यमुच्यते । द्वयी चेय नित्यता कूटस्थ-नित्यता परिणामिनित्यता च । कूटस्थनित्यता चेतनेश्वरयो परिणामि-नित्यता अचेतनस्य । यस्मिन् परिणम्यमाने तत्त्व न विहन्यते तदपि नित्यम् । उभयत्रापि तत्त्वानभिघातान्नित्यत्वम् ॥

तत्र तत्त्वत्रये प्रथममचेतनतत्त्व निरूप्यते। अचेतन नाम ज्ञातृ-त्वरहित वस्तु। तस्य प्रवृत्तिलक्षणव्यापारसत्त्वेऽपि ज्ञातृत्वाभावात् बुद्धि-पूर्वकप्रवृत्तिर्नास्तीति कर्तृत्व भोक्तृत्व च न स्तः । तदिदमचेतन त्रिगुण काल. शुद्धसत्त्व ज्ञानमिति चतुर्विधम् ॥

त्रिगुणतत्त्वम्

त्रिगुण नाम सत्त्वरजस्तमोरूपगुणत्रयस्याश्रयभूतं शास्त्रैकसम-धिगम्य अधस्ताद्विभु द्रव्यम् । तदेव मूलप्रकृतिरित्युच्यते सर्वविकारान्

प्रकरोतीति । मायेत्यप्युच्यते विचित्रसृष्टयुपकरणत्वात् । अविद्येत्यपि विद्याविरोधित्वात् । विकार. परिणाम दशा अवस्था इत्यनर्थान्तरम् । आगन्तुक अपृथक्सिद्ध. धर्मोऽवस्था । विकाराश्रयत्वादिद द्रव्यम् । विकारपद धर्मिपरतयाऽपि प्रयुज्यते ॥

सत्त्व नाम चेतनस्य ज्ञानसुखादेहेतुभूतो गुणविशेष. । रजः रागदु.खादिहेतुर्गुण । तम. मोहालस्यनिद्रादिहेतुर्गुण । एते गुणा नियतकालेनेश्वरसकल्पेन समावस्थाश्चेन्महाप्रलय । विषमावस्थाश्चेत् सृष्टि । तथाच गुणाना साम्यावस्था प्रलय । वैषम्यावस्था सृष्टि । तस्या कालान्तरानुवृत्ति. स्थिति । प्रलयदशायामपि त्रिगुणद्रव्य सूक्ष्मसुसदृशविकारसततिमदेव वर्तते ॥

एतेषा गुणानामुद्भवाभिभवलक्षणविषमावस्थायां सत्यां महदादि-विकारप्रादुर्भाव । समावस्थगुणत्रयाश्रयभूता मूलप्रकृतिरेव अतिसूक्ष्मै. विकारविशेषै अव्यक्तमक्षर तम इति पदैरपि व्यपदिश्यते । ततश्च इदमेव द्रव्य समविकारदशायामव्यक्तम्, विषमविकारदशाया व्यक्त-मिति च गीयते ॥

तत्र व्यक्त महदादि पृथिवीपर्यन्त त्रयोविंशतिविधतत्त्वस्वरूप भवति । अव्यामपि दशाया त्रिगुणे विकाररहित प्रदेश विकारसहि-तश्च महासमुद्रे प्रचलिताप्रचलितप्रदेशाविव स्त । महदादिविकार-रहितप्रदेशेऽपि प्रलयदशायामिव सृष्टिदशायामप्यतिसूक्ष्मो विकारस-न्तान सुसदृश प्रवहत्येव ॥

अस्य च त्रिगुणस्य निरवयवत्व सावयवत्व वेति पक्षद्वयमस्ति । आद्यपक्षे प्रदेशभेदेन महदादिविकारस्वीकारेऽपि परमाण्वाकाशसस्कार-सविदात्मादिषु निरवयवेष्वपि सयोगशब्दावरणानावरणनानाविषययोग-

सुखादिप्रादेशिककार्यदृष्टान्तेन भेदाभेदवादप्रसङ्ग. परिहियते। द्वितीयपक्षे कारणत्वौपयिकसङ्घातावस्थाविशेषनिबन्धन एकत्ववाद इति सिद्धान्त ॥

एवविधेषु विषमविकारेषु प्रथमो विकार कार्यपरिणामादिपद-वाच्य महान्। इद तत्त्व मनसस्सहकारि सत् पुरुषस्याध्यवसायाख्य प्रयत्न जनयतीति बुद्धिरित्युच्यते। तथा गुणवैषम्येण सात्त्विक राजस तामस चेति त्रिधा विभज्यते ॥

तस्मादुत्पन्नो विकार अहङ्कारतत्त्वम्। एतत्सहकृतेन मनसा देहे आत्मभ्रमो जायते। अनहमि देहे अहभ्रम करोतीत्यहकार इतीद व्यपदिश्यते। इदमपि तत्त्व कारणभूतमहत्तत्त्ववत् गुणवैषम्येण त्रिविध भवति। तत्र सात्त्विकाहकारो वैकारिक इति राजसाहकारो तैजस इति तामसाहकारो भूतादिरिति च व्यवहियते। तामसाहकाराद्भूतानि जायन्त इति तस्य भूतादिरिति नाम। एव सात्त्विकाहकारादिन्द्रियाणि जायन्त इति तस्येन्द्रियादिरित्यपि नामास्ति। राजसाहकारस्तूभयोरनुग्राहकः ॥

इन्द्रियेष्वान्तर मनः एकमेव। तदेतत् सकल्पस्मृत्यादेकरण ज्ञानसामान्यस्य कारणभूतम्। तदेव अध्यवसायाभिमानचिन्तारूपस्य त्रिविधस्य ज्ञानस्य करणतया बुद्ध्यहकारचित्तशब्दैर्व्यपदिश्यते। अध्य-वसायात्मकबुद्ध्युत्पत्तौ एतत्सहकारितया महत्तत्त्वमपि बुद्धिपदव्यपदेश्य-मिति प्रागेवोक्तम्। एव च अध्यवसायपद प्रयत्ननिश्चयोभयपरमित्यवधेयम्। तत् हृदयदेशवर्ति ॥

बाह्येन्द्रियाणि दश वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि वचनादानगमनविसर्गानन्दाना करणानि, श्रोत्रत्वक्चक्षुर्जिह्वघ्राणानि पञ्च ज्ञानेन्द्रियाणि शब्दस्पर्शरूपरसगन्धग्राहकाणि। अत्र त्वक्चक्षुरु-भय यथार्ह द्रव्यग्राहकमपि भवत। श्रोत्रादिपञ्चकस्य क्रमेणाकाशादि-

भूतपञ्चकमाप्यायकं भवति । आप्यायन नाम सामर्थ्यव्यञ्जनम् । मनः-प्राणवाचां क्रमेण पृथिव्यप्तेजास्याप्यायकानि । तत्र प्राणो नाम वायुतत्त्वस्यावस्थाविशेषः । न तत्त्वान्तरम् । एतेषामिन्द्रियाणा शरीरावयवेषु तत्रतत्र विद्यमानत्वात्तत्तदवयववाचकशब्दैरेव व्यवहार । चक्षुष. श्रोत्रस्य च विषयदेश प्राप्य कार्यकारित्वात् इतरेषा तदभावात् यथायोग प्राप्यकारित्वमप्राप्यकारित्व चाभ्युपगम्यते ॥

तामसाहङ्कारात् शब्दादीनि तन्मात्राणि क्रमेण द्वारीकृत्य आकाशादिभूतपञ्चकमुत्पद्यते । तन्मात्र नाम क्षीरदध्नोर्मध्यमावस्थावत् काचित् सूक्ष्मावस्था । तथाचोद्भूतशब्दादिक भूतम्, अनुद्भूतशब्दादिक तन्मात्रमिति विभागः । अतएव तन्मात्राण्यविशेषा इति भूतानि विशेषा इतिच व्यवह्रियन्ते । आकाशादिषु शब्दादीनां गुणानामुत्तरोत्तरमुपचय. । तथाच आकाशे शब्द. । वायौ शब्दस्पर्शावित्येवमूह्यम् । तमो नाम पृथिव्या एवावस्थाविशेष । आकाशस्य नीरूपत्वेपि कालस्येव विषयस्वभावाधीन चाक्षुषत्वम् । वायु त्वगिन्द्रियग्राह्य. । तेज. प्रभाप्रभावद्भेदेन द्विविधम् । आवरणसदसद्भावाधीनसङ्कोचविकासप्रसारी तेजोविशेष. प्रभा । तद्वान् प्रभावान् । मणिरजतसुवर्णादिक पार्थिवमेव । तत्र तेजोंश. प्रभाकिरणादि. ॥

अत्र तत्त्वोत्पत्तिर्नाम तालपलाशताटङ्कन्यायेन अवस्थान्तरापत्तिरेव । न तु द्रव्यान्तरोत्पत्ति । सैषावस्थैव द्रव्यस्य स्वस्याश्रोत्पत्तिरित्युच्यते । तादृशावस्थाविशिष्ट पूर्वसिद्ध द्रव्यमेव उत्पद्यते घट इति व्यवहारार्हः । अवस्था त्वसती । अत. द्रव्याशे सत्कार्यवाद. । अवस्थांशे कारकाणामर्थवत्त्वम् । अवस्थानां धर्माणां धर्म्यपृथक्सिद्धत्वात् पृथगुत्पत्तिस्थितिप्रतिपत्तयो नेष्यन्ते ॥

एव च त्रिगुण केवल प्रकृतिं . महदहङ्कारतन्मात्राकाशवायु तेजोजलानि प्रकृतिविकृतय. । इन्द्रियाणि पृथिवी च विकृतय एव । तत्र प्रकृतिविकृतिषु त्रिगुणप्रकृताविव एकदेशे विकार । अविकृत-प्रदेशास्तु अप्रचलितसमुद्रप्रदेशा इव सदृशविकारसन्तानवन्त एव वर्तन्ते ॥

एव पृथिवीपर्यन्तानि तत्त्वानि समष्टिरित्युच्यते । एतेषामेकदेशै· पञ्चीकरणप्रक्रियया सहत्यजायमाना विकारा व्यष्टिरित्युच्यते । तत्रा-ण्डानि तदावरणानि तदन्त चतुर्दश भुवनानीत्येवमादीनि पुराणेषु व्यक्तानि ॥

तत्र मूलप्रकृतितो विकारप्रादुर्भाव प्राकृती सृष्टि । ब्रह्मणा चतुर्मुखेन क्रियमाणा सृष्टि नैमित्तिकी । प्रत्यह दृश्यमाना सृष्टिः नित्या । एव नित्यनैमित्तिकप्राकृतभेदेन सर्ग त्रिविध । प्रलयोऽपि नैमित्तिकप्राकृतात्यन्तिकभेदेन त्रिविध । यथा —

सर्वेषामेव भूतानां त्रिविध· प्रतिसञ्चर· ।
नैमित्तिक· प्राकृतिक· तथैवात्यन्तिको लय· ॥
ब्राह्मो नैमित्तिकस्तेषां कल्पान्ते प्रतिसंचरः ।
आत्यन्तिकस्तु मोक्षाख्य· प्राकृतो द्विपरार्धकः ॥

इति विष्णुपुराणम् । (६-३-२) तत्र प्रलयो नाम न स्वरूपोच्छेद । अपितु अविभागेनावस्थानम् । तदपि क्षीरे नीरम्येव नामरूपविभागा नर्हस्संसर्ग । मोक्षे त्वात्यन्तिके लये देवादिनामरूपससर्गविनाश एव । एवमचेतनतत्त्वविभाग सृष्टिप्रलयादिविचारश्च शास्त्रेण सिद्धयति । नानुमानेन । अतीन्द्रियविषयेऽनुमान नाभ्युपगम्यते मीमासकै । ततश्च पृथिव्यादीनि भूतानि प्रत्यक्षप्रमाणेनैव सिद्धानि । एकादशेन्द्रियाणि प्रकृतिमहदहकारात्मकानि त्रीणि तत्त्वानि च शास्त्रेणैव सिद्धानीति सिद्धान्त ॥

एव पूर्वावस्था विहाय विजातीयावस्थाप्राप्तिमेवोपाधीकृत्य तत्त्वान्तरव्यवहार । पृथिवीत्वावस्था मूर्तिलक्षणा काठिन्यापरपर्यायामविहायैव जायमानेषु अनन्तेषु विकारेषु तत्त्वान्तरगणना नास्ति । ततश्च पञ्चीकरणात्प्राक्समष्टिसृष्ट्यवस्थापेक्षया तत्त्वगणना । व्यष्टिसृष्ट्यवस्थापेक्षया तु आनन्त्यादपरिसङ्ख्यानम्॥

शैवदर्शने भोजदेवप्रणीते तत्त्वप्रकाशे प्रबन्धे तत्त्वव्यवस्थात्वेव कृता । यथा—

आप्रलयं यत्तिष्ठति सर्वेषां भोगदायि भूतानाम् ।
तत्तत्त्वमिति प्रोक्तं न शरीरघटादि तत्त्वमत. ॥ इति । ७३ ॥

एतेषु तत्त्वेषु प्रकृतिमहदहङ्कारपञ्चभूतानि शरीरारम्भकद्रव्याणि । इन्द्रियाणि त्वसङ्ख्यातानि आभरणप्रत्युप्तरत्नानीव प्रतिशरीरमाश्रितानि। ततश्च सर्गमारभ्य महाप्रलयपर्यन्त सूक्ष्मरूपै देहारम्भकै तत्त्वैस्सेन्द्रियैम्सपरिष्वक्त चेतन सचरति । दर्शनान्तरवत्सूक्ष्मदेहो नोपगम्यते । ततश्च एकोनविंशतितत्त्वात्मक सङ्घात भूतसूक्ष्मपदव्यपदेशार्ह. जीवस्य संसारे गमनागमनादिसाधन भवति ॥

अद्रव्याणा स्वरूपस्थितिप्रवृत्त्यादिक सर्व द्रव्यैकनिबन्धनमिति तेषा पृथक्तत्त्वत्वेन न परिगणनम् । वैशेषिकादिसम्मता सर्वेऽपि पदार्था तत्त्वत्रय एवान्तर्भवन्तीत्युत्तरत्र प्रतिपाद्यते ॥

कालतत्त्वम्

कालो नाम प्रत्यक्षसिद्ध ज्येष्ठकनिष्ठबालवृद्धचिरक्षिप्रभूतभविष्यदादिव्यवहारस्य विशेषहेतुभूत नित्यमेक विभु द्रव्यम् । क्षणदिनयुगकल्पमहाकल्पादिविभागस्तस्यैवावस्थाभेद । अपि चोपाधिभेदात् शीतकाल उष्णकाल इत्यादिव्यवहारवत् सात्त्विककाल राजसकाल तामसकालश्चेति व्यवह्रियते ॥

सर्वमपि लीलाविभूतिकार्यं कालायत्तम् । तस्मात्त्रिगुणविकारास्सर्वेऽपि कालविशेषनियता इति कालाधीना इत्युच्यन्ते । नित्यविभूतावपि कालो विभुत्वाद्व्याप्यैव वर्तते । तथापि तत्र जायमानमजायमान सर्वं परमेश्वरसङ्कल्पायत्तम् । न कालायत्तम् । कालसम्बन्धस्तु सदा पश्यन्तीत्यादिव्यवहारहेतुभूतोऽस्त्येव ॥

स च काल सर्वास्वपि प्रतीतिषु पदार्थविशेषणतया प्रतीयते । तत षडिन्द्रियवेद्य इत्युच्यते । काले रूपाभावेऽपि विशेष्ये घटादिषु रूपसत्त्वात् वस्तुस्वभावाद्वा चाक्षुषप्रत्यक्षजनने नानुपपत्ति ॥

सर्वप्रत्ययवेद्यत्व यथा—अय घट इत्यादिप्रत्ययेषु इदत्वमवभासते । तच्च वर्तमानकालसम्बन्धित्वरूपमित्येक पन्था । घटोऽस्ति पटोऽस्तीत्यादिषु सर्वत्रास्तित्व भासते । तच्च कालसम्बन्धरूपमित्यपरो मार्ग । स्वरूपसत्तातिरिक्त सत्तारूप सामान्य नाभ्युपगम्यते ॥

कालस्य परिणामोऽपि क्षणरूपेणैव । क्षणसङ्घाधीनसङ्घातेन दिनादिव्यवहारोपपत्ति । परिणामलक्षणो विकारोऽपि अवयववृद्धिह्रासादिलक्षण अवस्थान्तरापत्तिलक्षणश्चेति द्विप्रकार । आद्य त्रिगुणे । अनन्तर कालादाविति सक्षेप ॥

शुद्धसत्वम्

शुद्धसत्त्व नाम त्रिगुणद्रव्यवृत्तिसत्त्वात् विलक्षणस्य सत्त्वगुणस्याश्रयभूत शास्त्रैकसमधिगम्य उपरिष्टाद्विभु द्रव्यम्। इद चतुर्मुखादि सर्वपदापेक्षया निरतिशयभोग्यभूतस्य परमपदवाच्यस्याप्राकृतदेशस्यानन्तस्य नामधेयम् । अस्मिन् वैकुण्ठलोके विद्यमान सर्वं पदार्थजात शुद्धसत्त्वगुणवद्द्रव्यरूपत्वेन स्वप्रकाशत्वेन च शुद्धसत्त्वद्रव्य-

मित्येकतत्त्वस्त्वेन व्यवह्रियते । निरतिशयानुकूलस्वभावतया निरतिशयानन्दमित्युच्यते ॥

ज्ञानशक्तिबलैश्वर्यतेजोरूपस्य भगवतष्षाड्गुण्यस्य व्यञ्जकत्वात् षाड्गुण्यमयमिति पञ्चोपनिषन्मन्त्रप्रतिपाद्यतया पञ्चोपनिषन्मयमिति अप्राकृतपञ्चभूतात्मकतया पञ्चशक्तिमयमिति चोच्यते । वाङ्मनसापरिच्छेद्यस्वरूपस्वभाव भोग्यभोगोपकरणभोगस्थानमयं चैतत् शुद्धसत्त्वम् ॥

अत्र द्रव्ये नित्यानि शब्दादिगुणविभागवन्ति भूतानि अनित्यानि च त्रिगुणमण्डल इव सन्ति । नित्यान्येव भगवतो विग्रहभूषणायुधविमानमण्टपगोपुरपुष्करपृभृतीनि प्रचुराणि सन्तीति नित्यविभूतिरित्युच्यते मण्डलमिदम् । ऐश्वर्य हि विभूतिपदार्थ । त्रिगुणमण्डलस्य प्रवाहतो नित्यत्वेपि यथासङ्कल्प सृष्टिप्रलयादियोगात् लीलाविभूतिरित्यस्य व्यपदेश· । स्वयप्रयोजनोऽनायासव्यापारो हि लीला । तद्विषय प्रपञ्चोऽपि लीलापदव्यपदेश्यो भवति । अत एवेश्वरतत्त्वमुभयविभूतिविशिष्ट न तु दरिद्रमिति सिद्धान्त ॥

ईश्वरस्य नित्यानामनन्तादीना च देहेन्द्रियादय नित्यविभूतिद्रव्यसजातीया एव नित्या । मुक्ताना तु इच्छानुगुण नित्या अनित्या अपि । एकैकस्य बहुविधा अपि सन्ति । इच्छाया सत्या विदेहा अपि मुक्ता स्थातु योग्या । त्रिगुणद्रव्य यथा बद्धानां बन्धस्थानमधोदेशेऽनन्तपरिमाण तथा मुक्तानामिद मुक्तिस्थानमुपरिदेशेऽनन्तपरिमाणम् । शुद्धसत्त्वमयास्सर्वेऽपि नित्या अनित्याश्च पदार्थाः भगवदिच्छायत्ता न कालायत्ता । सैषा नित्यविभूतिः त्रिपाद्विभूतिरिति, लीलाविभूतिश्चैकपाद्विभूतिरिति व्यवहारोऽस्ति । उपासनार्थोऽय विभाग न पुनः समचतुर्भागविभागः ॥

भगवतः अवतारविग्रहाः शुद्धसत्त्वद्रव्यमयपरवासुदेवविग्रहांशमूलाः । भगवत इव विग्रहस्यापि व्यापित्वाद्या विचित्राश्शक्तयस्सन्ति । अत एव विश्वरूपविग्रहप्रदर्शनमपि युज्यते । लक्ष्मीविग्रहास्तु पररूपस्य वक्षःस्थले विराजमानः हरिमरतके तप्तजाम्बूनदाभ मध्यस्थनीलतोयदविद्युत्पुञ्जसदृशो यो विग्रहविशेष. तदशमूला इति निर्णय ॥

अत्रैव नित्यविभूतौ आमोदप्रमोदसम्मोदवैकुण्ठरूपा विभागाः श्रूयन्ते । अत्र पूर्वा. त्रयो विभागा प्राकृतमण्डले एवेति सिद्धान्त. । सालोक्यसामीप्यसारूप्यलाभोऽपि क्रमेण तेष्वेवेति केचित्समरसयन्ति । सायुज्य परं समानानन्दवत्त्वरूपं वैकुण्ठप्राप्तयनन्तरमिति बिशेष ॥

अप्राकृतपदार्थस्यावतारविग्रहादेः प्राकृतमण्डले, प्राकृतपदार्थस्य भूतसूक्ष्मस्य विरजानद्युत्तरभागेऽप्राकृतमण्डले चाभ्युपगमात् प्राकृताप्राकृतससर्गो नानुपपन्नः । ततश्च प्राकृतमण्डले अप्राकृतानामनन्तानां विष्णुलोकानामपि सम्भवस्य प्रामाणिकत्वे वैदिकपुत्रानयनवृत्तान्तः जयविजयवृत्तान्त शिशुपालवृत्तान्तः सर्वोऽप्येवमादिः निराक्षेप सपनीपद्यत इत्युत्पश्याम । विरोधपरिहाराख्य रहस्यमप्यस्यार्थस्यानुकूल भवति॥

ज्ञानम्

चेतनतत्त्वायेश्वरतत्त्वाय च स्वस्य परस्य च प्रकाशक विलक्षणमिदमेकमचेतन स्वतस्सिद्ध तत्त्वम् । ज्ञान सवित् बुद्धि. उपलब्धिरित्यादिपदैरेतत् व्यवह्रियते । ज्ञानत्वं नाम स्वस्य परस्य वा कस्यचित् प्रकाशकत्वम् । प्रकाशश्च व्यवहारानुगुण्यं, तदापादकत्व प्रकाशकत्वम् । नैयायिकप्रक्रियया प्रकाशपदार्थः विषयत्वरूपः मीमासकप्रक्रियया प्राकट्यरूपः । सिद्धान्ते व्यवहारप्रतिसम्बन्धित्वम् । तत्तु व्यवहारहेतुमात्रसाधारणमपि विशिष्य ज्ञानस्यैव तदापादकत्वामित्यवधेयम् ॥

इद च द्रव्यं चेतनेश्वरतत्त्वद्वयैकाश्रितं स्वरूपतो नित्यमपि विषयप्रकाशनवेलायां स्वाश्रयाय स्वय प्रकाशते । यतः घटमह जानामि पटमह जानामीत्यादिक सर्वेषामात्मसाक्षिकोऽनुभव ॥

चेतनस्येश्वरस्य च स्वरूपनिरूपकधर्मेषु अस्य प्रधानतया परिगणनात् धर्मभूतज्ञानपदेन व्यपदेश । धर्मिणोऽप्याश्रयस्य चेतनस्येश्वरस्य च स्वरूप स्वयमेव स्वव्यवहारानुगुण्यापादकमित्यभ्युपगमात ज्ञानपदव्यपदेशार्हमिति धर्मिव्यावृत्त्यर्थ च धर्मभूतामिति विशेषणम् ॥

अनेन धर्मभूतज्ञानेनैव जीवेश्वरयो ज्ञातृत्वकर्तृत्वभोक्तृत्वादयो धर्माः । स्वप्रकाशकत्वस्य ज्ञानपदप्रवृत्तिनिमित्तस्य शुद्धसत्त्वतत्त्वेऽपि स्वीकारात् जीवेश्वरधर्मभूतज्ञानशुद्धसत्त्वाना चतुर्णामपि शास्त्रेषु ज्ञानपदेन व्यवहार । सर्वज्ञविज्ञाने धीरस्तीति विज्ञाने च ज्ञानभानस्य निर्विवादतया ज्ञानस्य स्वप्रकाशकत्वम् ॥

इद च ज्ञान प्रतिपुरुषानियत सर्वगोचरस्वभाव संसारावस्थायां कर्मणा सङ्कुचित तत्तत्कर्माधीनतारतम्यवत् प्रसरणभेदाधीनप्रलयोदयव्यपदेशभाक्च । ततश्च सावयवमिद द्रव्यमिति सिद्धान्तः ॥

ज्ञानसम्बन्धश्च द्रव्येषु सयोगलक्षणः । अद्रव्येषु सयुक्ताश्रयणरूपः । भूतभविष्यद्वर्त्तुनोरपि वस्तुस्वरूपस्य नित्यत्वात् पूर्वोत्तरावस्थयोरेव प्रागभावध्वसरूपत्वात् ध्वसप्रतियोगी घट. प्रागभावप्रतियोगी घट इति प्रतीतिविषयत्वस्य न काऽप्यनुपपत्ति· । देशान्तरलोकान्तरवर्तिपदार्थेनापि निरतिशयवेगवत्तया सयोगमर्हति । स्मृतेर्विषयसम्बन्धस्तु सस्कार द्वारीकृत्य भवति ॥

प्रदीपस्वभावाधीनप्रभास्वभाववत् धर्मिस्वभावाधीनो धर्मस्यै-

तस्य तादृश स्वभासकत्वादिस्वभावः । ततश्च सर्वप्रसरणेष्वपि प्रभा-स्थानीये स्वस्मिन् प्रत्यक्ष प्रकाशात्मकमेवेदम् । प्रदीपस्थानीयो धर्मिभूत आत्माऽपि स्वसामर्थ्येनैव सदा प्रत्यक्षतयैवानुभूयते । ततश्च घटमहं साक्षात्करोमि, अनुमिनोमीत्येवानुभवोल्लेख । स्मरणलक्षणप्रसरणेष्वपि विषयांशे परोक्षत्वमात्मांशे आश्रयाशे च प्रत्यक्षत्वमित्येव निर्णय. । प्रसरणभेदाधीनभेदमाश्रित्यैव ज्ञानस्य ज्ञानान्तरवेद्यत्वव्यवहारः । एव प्रत्यक्षमनुमिति. शाब्दबोध इत्यादिव्यवहारोऽपि प्रसरणभेदनिबन्धन एव॥

तदेतदीश्वरस्य नित्याना मुक्तानां च निरतिशयविकासेन विभ्वपि सकल्पानुग्रहादिलक्षणावस्थान्तरभागपि भवति । ततश्चेद सङ्कोचविकासादियोगात् द्रव्यमिति, आत्मरूपद्रव्यैकाश्रिततया गुण इति जानातीत्यादिव्यपदेशार्हत्वात् क्रियेति च कथ्यते ॥

एतत् ज्ञानतत्त्वमेव सुखदु खेच्छाद्वेषप्रयत्नसस्काराद्यवस्थावदपि भवतीति सुखादीना न पदार्थान्तरत्वम् । अनुकूलतया वेदनीय हि सुखम् । ज्ञानमेव अनुकूलविषयविशेषित स्वयमप्यनुकूल सत् स्वप्र-काशतया सुखानुभवरूपमपि भवति । ह्री भी. धीरित्याद्यन्त.करण-वृत्तितया प्रसिद्धास्सर्वेऽप्यान्तरपदार्था ज्ञानतत्त्वस्यैवावस्थाविशेषाः । "सर्व मन एव" इत्यादिवचनमप्येतासामवस्थाना करणतया मनसः उपपद्यते ॥

एव पुण्यपापलक्षणमदृष्टमपि ईश्वरीयधर्मभूतज्ञानस्य प्रीत्यप्रीति-रूपे ये अवस्थे ते एवेति सिद्धान्त । आलकारिक सम्प्रदाये प्रसिद्धाः ये रत्यादयः स्थायिनो भावा शृङ्गारादयो रसाश्च सर्वेऽप्येतस्येव प्रसरण-भेदाः । ततश्चात्मव्यतिरिक्त मनोभिन्न सर्वमान्तर वस्तुजात धर्मभूतज्ञान-तत्त्वात्मकमिति शास्त्रतः तदनुगुणतर्कतोऽनुभवतश्च निर्णयः ॥

प्रमाणम्.

अथ धर्मभूतज्ञानावस्थाविशेषभूतं प्रमाणं निरूप्यते। अत्र प्रमाणेनैव प्रमाणनिरूपण कर्तव्यम्। अप्रमाणेन प्रमाणनिरूपणमप्रामाणिकमेव स्यात्। अतः यथा अह सत्यं वदामीति वाक्य वक्ष्यमाणवाक्यस्य सत्यतामवगमयत् स्वस्यापि सत्यतामवगमयेदेव प्रमाणनिरूपणप्रमाण स्वस्यापि प्रामाण्यं निरूपयत् प्रमाणसामान्यमपि निरूपयतीति ध्येयम्॥

प्रमाणपद प्रमाकरण प्रमाणमिति करणव्युत्पत्त्या प्रमायाः करणभूतमिन्द्रियलिङ्गादिकमाचष्टे। प्रमीयत इति प्रमाणमिति भावव्युत्पत्या इन्द्रियलिङ्गादिजन्यं ज्ञानमाचष्टे। अत उभयविधयाऽपि लक्षण मुच्यते॥

प्रामाकरणं प्रमाणम्। यथावस्थितव्यवहारानुगुण ज्ञान प्रमा। व्यवहारः हानोपादानादिरूपा लोकयात्रा। सा च प्रमा प्रत्यक्षानुमितिशाब्दभेदेन त्रिविधा। तत्करणमपि प्रत्यक्षानुमानशब्दभेदेन त्रिविधम्। अत्र प्रत्यक्षपद प्रतिगतं अक्ष यत्र इति बहुव्रीहिसमासेन प्रमायां प्रमाविषये च प्रयुज्यते। इन्द्रिये तु कर्मधारयसमासेन। तथा अनुमानपदमपि लिङ्गे तज्जन्यानुमितौ च प्रयुज्यते। तथा शब्दपदमपि॥

ज्ञानस्य प्रामाण्यमुत्पत्तौ ज्ञप्तौ चेति द्विविधम्। प्रामाण्यं नाम यथार्थावगाहित्वम्। तस्योत्पत्तिः उत्पत्तिप्रामाण्यमित्युच्यते। तस्य ज्ञान ज्ञप्तिप्रामाण्यमुच्यते। उभयमपि प्रायिकत्वात् स्वत एवोत्पद्यते ज्ञायते चेति निर्णयः। स्वशब्दार्थश्च ज्ञानोत्पादकसामग्री ज्ञानग्राहकसामग्री च॥

क्वचिदपवादे सति निरुक्तसामग्र्योः दोषसंवलने सति अप्रा-

माण्यमुत्पद्यते । अयथावस्थितव्यवहारेण च ज्ञायते । तथाच दोषाघटित-सामग्र्यपेक्षया दोषघटितसामग्र्या भिन्नत्वात् तामेव परशब्देन निर्दिश्या प्रामाण्यं परत उत्पद्यते इति व्यवहारः । उत्पन्नस्य तस्य व्यवहारबाधेन परिज्ञानात् ज्ञानग्राहकसामग्र्यात्वपरिज्ञानात्परतो ज्ञायते । इदमेव प्रामाण्याप्रामाण्ययो· स्वतस्त्व परतस्त्व चोत्पत्तौ ज्ञप्तौ चेति विभावनीयम् ॥

भ्रमो नाम सम्यगग्रहणम् । तदपि धर्मिग्रहणसाधारणधर्मग्रहण-लक्षणज्ञानद्वयात्मकम् । विभिन्नज्ञानीयविषयतयोर्निरूप्यनिरूपकभावो-पगमात्प्रवृत्त्याद्युपपत्तिः । तच्च व्यवहारानुगुण न भवति । ततश्च व्यवहाराननुगुणसाधारणधर्मग्रहण भ्रम । तदनन्तरमसाधारणधर्मग्रहणे भ्रमाधीनव्यवहारनिवृत्ति । तदेव ग्रहण बाधज्ञानामित्युच्यते । सैव निषेधबुद्धिः ॥

सोऽय विपर्ययलक्षणो भ्रम रजस्तमोमूल धर्मान्तरधर्म्यन्तर-भेदात् अन्यथाख्यातिविपरीतख्यातिभेदेन व्यवह्रियते । पीतश्शङ्ख अय सर्पः इत्यादिकमुदाहरणम् । द्वितीऽयेपि सर्पत्वाध्यास इति शक्य वक्तुम् । तथापि सर्पत्वम्य स्वरूपनिरूपकतयाऽन्तरङ्गत्वेन धर्मिवैपरीत्यव्यपदेश ॥

तथा च सर्वभ्रमेषु आरोप्यमाणस्य वस्तुनोऽश साधारणधर्म-स्वरूपोऽस्तीति सर्वं ज्ञान यथार्थमिति सिद्धान्त । स्वाम्नपदार्था अपि तत्तत्कालावसानास्तत्तत्पुरुषमात्रानुभाव्यास्तत्तत्कर्मानुगुण्येन भगवत्सङ्क-ल्पमात्रसृष्टा इति श्रुतिरेव वदति ॥

अव्यवस्थितव्यवहारकारण एकस्मिन् धर्मिणि विरुद्धानेकप्रकारक ज्ञान सशय । किसज्ञकोऽय वृक्ष इत्याकारक· अनध्यवसायपदवाच्य ज्ञानावस्थाविशेषोऽप्यस्ति । प्रायेणानेन पुरुषेण भवितव्यमित्याकारक

ऊहोऽपि कश्चिदवस्थाविशेषः । तर्करूपः ऊहस्तु प्रमाणानुग्राहकः पुरस्तादुच्यते ॥

सस्कारमात्रजन्य ज्ञान स्मृति. । तत्करणस्य सस्कारस्य प्रमाकरणत्वलक्षण प्रामाण्य नाभ्युपगम्यते । तन्मूलभूते प्रत्यक्षाद्यनुभव एवान्तर्भाव. स्वीक्रियते ॥

प्रत्यक्षम्

साक्षात्कारिप्रमा प्रत्यक्षम् । तत्करण चक्षुरादीन्द्रियम् । विषयेन्द्रियसन्निकर्ष सयोग. सयुक्ताश्रयण चेति द्विविध. । प्रत्यक्ष द्विविध—लौकिकं दिव्य चेति । आद्य चाक्षुषादिभेदेन पञ्चविधम् । मानसं नाम प्रत्यक्ष नास्ति । तद्ब्राह्यत्वेनाभिमन्यमानस्य सुखादिरूपस्य सर्वस्यान्तरस्य स्वयप्रकाशत्वाभ्युपगमात् । दिव्य योगिनाम् । नित्यमुक्तेश्वराणां सर्वविषयक ज्ञान इन्द्रियानपेक्ष सर्वदा प्रत्यक्षरूपमेव ॥

अस्मदादीना प्रत्यक्ष निर्विकल्पक सविकल्पक चेति द्विविधम् । अनुवृत्त्यविषयक निर्विकल्पकम् । अनुवृत्तिर्नाम अनेकवस्तुसम्बन्ध· । इय गौरिति ज्ञाने गोत्वस्य सास्नालाङ्गूलादिरूपस्य एकव्यक्तिसम्बन्ध एव भासते । इद प्राथमिकपिण्डग्रहणमित्युच्यते । अनुवृत्तिविषयक सविकल्पक इय च गौरित्याकारकम् । अत्र गोत्वस्येदानीतनवस्तुसम्बन्धो गृह्यते प्राग्गृहीतवस्तुसम्बन्धः सस्कारेण स्मर्यते । तथाच सस्कारसहकृतेन्द्रियजन्य ज्ञान सविकल्पकम् । तदिद द्वितीयादिपिण्डज्ञानमिति सप्रत्यवमर्शज्ञानमिति चोच्यते । अशभेदेन स्मृतित्वानुभवत्वयो प्रत्यक्षत्वानुमितित्वयो समावेश स्वीक्रियते । सस्कारानुद्बोधे जायमान ग्रहण द्वितीयादिरूपमपि निर्विकल्पकमेव ॥

योगिप्रत्यक्षे सन्निकर्षस्तु भगवत्सङ्कल्पलक्षणः धर्म एव । अर्जु-

नस्य विश्वरूपसाक्षात्कारे तत्सङ्कल्प एव दिव्यं चक्षुरित्युच्यते । भावनाबलज प्रत्यक्षं नाभ्युपगम्यते । अपि तु भावनाबलेन प्रत्यक्षसमानाकार. वैशद्यविशेषः स्मृतावपि जायते । ततश्च सापि प्रत्यक्षत्वेन व्यवहार लभते ॥

अनुमानम्

व्याप्यत्वानुसन्धानाद्व्यापकविशेषावभास. अनुमितिं अनुमानमित्यप्युच्यते । तत्करणभूतमनुमान व्याप्तिपक्षधर्मताभ्या विशिष्टतया ज्ञायमानं लिङ्गम् । निरुपाधिकसम्बन्धो व्याप्ति । उपाधिशङ्कारहित भूय अन्वयव्यतिरेकसहचारदर्शन व्याप्तिग्राहकम् । उपाधिर्नाम यावत्साधनदेशमवर्तमान· यावत्साध्यदेशवर्ती धर्म । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधीरिति तस्य परिचयोक्ति । अत उपाधिनिरूपण व्याप्तिघटित व्याप्तिनिरूपण चोपाधिघटितमित्यन्योन्याश्रयस्य नावकाश. । स चोपाधिरप्रयोजकताहेतु । अप्रयोजकता चानुकूलतर्कस्यासम्भवः ॥

तादृशोपाधिशङ्काराहित्यं च क्वचित्कारणाभावात्क्वचित्तर्काच्च सिद्ध्यति । तर्को नाम साध्याभावे विद्यमानाया साधनाभावव्याप्तेरवबोध आरोपरूपः । यदि साध्यं न स्याद्धेतुरपि न स्यादित्याकारकः ॥

पक्षधर्मता नाम पक्षसाधनयोस्सम्बन्ध· । पक्षस्तु सिषाधयिषितधर्मविशिष्टो धर्मी । तादृशधर्मसजातीयधर्मवान् सपक्षः । तादृशधर्मशून्यः विपक्ष । तथाच पक्षसपक्षवृत्तित्व विपक्षव्यावृत्तत्व च साधनस्य रूपम् । तयोरेव प्रपञ्च असत्प्रतिपक्षत्व अबाधितत्व च । तत्र सत्प्रतिपक्षत्व समबलप्रमाणान्तरोपरोधः । बाधितत्व प्रबलप्रमाणान्तरप्रतिरोध ॥

ततश्च पक्षेतरत्वं नोपाधिः । सपक्षेतरत्वं न प्रतिहेतुः । विपक्षेतरत्वं न साधनम् । अन्यथा सर्वेषामनुमानानामुच्छेदप्रसङ्गः, सर्वत्र सुलभत्वात् ॥

व्याप्ति अन्वयव्याप्तिः व्यतिरेकश्चेति द्विधा । केवलव्यतिरेकव्याप्ति अनुमानाङ्गतया नोपगम्यते । अत्यन्तातीन्द्रियविषये नानुमानमिष्यते । अस्मदाद्यैन्द्रियकविषय एव जातिव्यक्तिभेदेन विशेषतो दृष्टं सामान्यतो दृष्टमित्यनुमानद्वैविध्यम् ॥

अनुमानोद्बोधक वाक्य न्यायः । स हि प्रयोगः साधनवाक्यमिति च व्यवह्रियते । तदवयवेषु प्रतिज्ञा हेतु उदाहरण उपनयः निगमनम्, इत्येव रूपेषु पञ्चसु मृदुमध्यकठोराधियां प्रतिपाद्यानां भेदेन यथासम्भवं प्रयोग ॥

वादिप्रतिवादिवाक्यसन्तति कथा । तत्र तत्त्वबुभुत्सुकथा वादः । विजिगीषुकथा जल्पवितण्डे । सैषा कथा वादिप्रतिवादिप्राश्निकसभापत्यनुविधेयरूपपञ्चपुरुषवती । अनुविधेयो नाम विजयफलप्रतिपादयिता । तथा—कथात्रिकक्ष्या पञ्चकक्ष्या सप्तकक्ष्या वेत्यप्युच्यते । अपरथाऽनवस्थाऽव्यवस्थाच । तदा स कथाभासः । अस्यां कथायामसदुत्तरस्य जाति समा च इति व्यवहारः । तेन चासदुत्तरेणापजयलक्षणो निग्रहो भवति । हेत्वाभासपदवाच्यदुष्टहेतुप्रयोगेऽपि निग्रह । स च हेत्वाभासः अव्याप्य अपक्षधर्मश्चेति द्विविध एव । तार्किकादिभिः प्रपञ्चितास्सर्वेऽप्यत्रैवान्तर्भवन्ति ॥

शब्द

सत्पुरुषोच्चरितवाक्यजन्यं ज्ञान शब्दप्रमाणम् । निरुक्त वाक्यं करणप्रमाणम् । पुरुषे सत्त्व भ्रमप्रमादालस्यविप्रलम्भरूपदोषशून्यत्वम् ।

उच्चारणे स्वातन्त्र्यास्वातन्त्र्यभेदनिबन्धनः लौकिकवैदिकशब्दभेदः । तथाच वर्णानां पौर्वापर्यरूपे कण्ठताल्वाद्यभिघातसंयोगरूपोच्चारणाधीने आनुपूर्वीपदवाच्ये रचनाविशेषे स्वातन्त्र्यमस्वातन्त्र्य च लोकवेदव्यवहार-प्रयोजकमिति विज्ञेयम् ॥

भगवानपि सर्गादौ पूर्वपूर्वसर्गप्रवर्तितक्रमविशेषविशिष्टानेव वेदा-नुपदिशतीत्येतदेव वेदस्य नित्यत्वम् । वर्णनित्यत्वपक्षेऽप्यन्तत क्रमस्य परतन्त्रपुरुषपराधीनतया प्रवाहाविच्छेद एव वेदनित्यत्वम् । परतन्त्रपुरुष-पराधीनत्व च तज्जातीयानुपूर्वीज्ञानजन्यत्वव्याप्यज्ञानविषयत्वम् ॥

सर्वस्वतन्त्रस्य भगवत वैदिकक्रमविपर्यासे शक्तिसत्त्वेऽपि तस्य क्रमस्य नित्यसङ्कल्पसिद्धत्वात् नित्यत्वमेव । सर्वस्वातन्त्र्य च भगवत· अव्यवस्थितचित्ततारूपदोषानवकाशेन समर्थनीयम् ॥

अत्र आप्तोक्तत्व शाब्दप्रतीतेरङ्गम्, आप्तत्व च यथार्थवक्तृ-त्वम् । ततश्च वक्तु प्रकृतार्थविषयकज्ञानानुमानात् शाब्दधी निश्च-यात्मिका समुदेतीति शब्दो न स्वातन्त्र्येण पृथक्प्रमाणमिति वैशेषिका-दयः प्राहु । परे तु अनाप्तोक्तत्वज्ञान प्रतिबन्धक, तदभाव एवाङ्गमिति वक्तृज्ञानानुमान नानुमन्यन्ते ॥

तत्राव्युत्पन्नवाक्यव्यावृत्तये वृत्तिमत्त्वेन ज्ञायमानत्व वाक्यविशेषण देयम् । वृत्तिर्नाम पदपदार्थयोस्सम्बन्ध· । तद्वत्त्वेन ज्ञान च इद पद-मस्मिन्नर्थे वृत्तिमदित्याकारकम् । सैषा वृत्ति. अभिधा औपचारिकी चेति द्विप्रकारा । अभिधा साक्षात्सम्बन्ध । इतरा परपरया सम्बन्ध । अत्रोपचारपदार्थः प्रयोग·, तेन प्रवर्तते इत्यौपचारकी । सैषा लक्षणा गौणी चेति विभज्यते । शक्यसम्बन्धो लक्षणा गङ्गायां घोष इत्यादौ-गङ्गापदे । सादृश्यलक्षणगुणसम्बन्धो गौणीं सिहो देवदत्त इत्यादौ

सिंहपदे । सेय वृत्ति गोत्वादिजातिविशिष्टव्यक्तिपर्यन्ता । अपृथक्सिद्धविशेषणवाचिनां पदाना विशेष्यपर्यन्तबोधकत्वानुभवात् । ततश्च सर्वस्यापि वस्तुन· परमेश्वरापृथक्सिद्धत्त्वात् गोत्व शरीरमित्यादिभ्यो-निष्कर्षकशब्देभ्य भिन्नास्सर्वे शब्दा परमेश्वरपर्यन्ता इति वेदान्त-व्युत्पत्तिः ॥

सैषा वृत्ति· पुनर्द्विविधा स्मारकी आनुभाविकी चेति । तेनतेन-पदेन प्रथम तत्तदर्थविषयक स्मारकवृत्त्या स्मरण जायते । आसत्ति-योग्यतातात्पर्यादिन्यायपरामर्शेन तैरेव पदैरानुभाविक्या वृत्या अन्वितानु-भव· जायते । स एव शाब्दबोध ॥

तस्मदाकांक्षितासन्नयोग्यार्थान्तरसङ्गते ।
स्वार्थे पदानां व्युत्पत्तिरास्थेया सर्ववादिभिः ॥
पदजातं श्रुतं सर्वं स्मारितानान्वितार्थकम् ।
न्यायसम्पादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ॥

इति कथयन्ति ॥

निरुक्तवृत्तिग्रहस्तु व्यवहारव्याकरणादिभि । तथाहि——अम्बा तातमातुलादिपदानामादौ मात्रादिव्यवहारेण स्मारकी वृत्तिर्गृह्यते । ततो वाक्यत्वेन तेषा पदाना वृद्धव्यवहारादिना आनुभाविके वृत्तिरवगम्यते । ततस्सिद्धेऽप्यर्थे व्युत्पत्तिरस्ति । न तु कार्यरूपे प्रवृत्तिनिवृत्तिविषयभूते एवार्थे इति नियम । लिङ् लोट् तव्यप्रत्ययरूपविध्यर्थ कृतिसाध्यत्वम् । ततश्च यजेत स्वर्गकाम इत्यादौ स्वकृतिसाध्ययागकर्ता स्वर्गकाम इति प्रथमान्तमुख्यविशेष्यकः वाक्यार्थबोध ॥

प्रागुक्तरीत्या वैदिकशब्दस्य नित्यत्वापौरुषेयत्वसम्भवात्——

युगान्तेऽन्तर्हितान्वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञातास्स्वयंम्भुवा ॥

इति महर्षीणा सूक्तकाण्डमन्त्रकृत्त्वव्यवहारोऽपि सङ्गच्छते। अत्रेतिहास-पद तत्तद्वृत्तान्तमात्रपरम् ॥

स च वेदः पूर्वोत्तरभागद्वयात्मक.। तत्र भगवतः आराधन-स्वरूप पूर्वभागेनोच्यते। आराध्यस्वरूपमुत्तरभागेनोच्यते। स्मृतय. पूर्वभागोपबृहणम्। इतिहासादय उत्तरभागोपबृहणमिति चाहु.। सप्तकोटिमहामन्त्रा अप्यासशास्त्रप्रतिष्ठिताः वैदिका एव ॥

स्मृतीतिहासपुराणादिक सङ्कीर्णमन्त्रब्राह्मणार्थवादात्मकवेदैकमू-लम्। पाञ्चरात्रागमस्तु वेदान्तमूलः एकायनशाखामूलश्चेति विशेष ॥

तत्र लौकिक वाक्य भ्रमप्रमादालस्यविप्रलम्भादिपुरुषदोषाः दूषयन्ति—

नैव शब्दे स्वतो दोषाः प्रामाण्यपरिपन्थिनः।
वक्तुराशयदोषेण केषु चित्तदपोद्यते ॥

इति। निरुक्तदोषाभावे अपवादाभावादुत्सर्गसिद्ध प्रामाण्यं सर्वप्रमाणानां स्वाभाविकमिति निर्णय ॥

चेतनतत्त्वम्

इद जीवात्माख्य तत्त्व स्वतस्सर्वानुभवसिद्धम्। तथाहि— देहेन्द्रियमन.प्राणबुद्ध्यादिषु समुदाये एकदेशे वा अहमित्यात्मबुद्धि. सर्वेषां स्वस्वानुभवसिद्धा। सा भ्रमरूपा। सर्वेष्वपि भ्रमेषु विशेष्य गृह्यते। तत्र विद्यमानोऽसाधारणो धर्म न गृह्यते। एव देहात्मभ्रमेऽपि विशेष्यतया आत्मा प्रकाशते। अत आत्मस्वरूपे न विप्रतिपत्ति.। किन्तु शास्त्रेण तद्विवेक क्रियते, न त्वज्ञातमात्मस्वरूप बोध्यते। देहे-न्द्रियादिवैलक्षण्य तु स्वयप्रकाशत्व नित्यत्व नानात्व अणुत्वमनुकूलत्व प्रत्येकमेकत्व चेत्यादि। क्वचिदुच्यमान व्यापित्वमपि निरतिशयसूक्ष्म-तया सर्वाचेतनान्तःप्रवेशयोग्यतारूपव्यापित्वम्। आत्मनोऽनुकूलत्वा-

देव आत्मत्वेन भ्रमविषये देहे कस्यापि कस्यामप्यवस्थायां न प्रतिकूलतयाऽवगति ॥

स च कर्तृत्वभोक्तृत्वादिना प्रागुक्तचतुर्विधाचेतनतत्त्वविलक्षण·। चेतनत्व चैतन्यरूपधर्मभूतज्ञानाश्रयत्वम्। कर्तृत्व ज्ञानेच्छाप्रयत्नाश्रयत्वम्। भोक्तृत्व सुखदुःखाद्यनुभवरूपभोगाश्रयत्वम्। भोगायतन शरीरम्। भोगसाधनानीन्द्रियाणि। भोक्तव्या इन्द्रियार्था·। कृतहानाकृताभ्यागमस्य पुण्यपापाव्यवस्थारूपस्य प्रसङ्गात् अस्य नित्यत्त्व कूटस्थशब्दवाच्य निर्विकारत्वरूपम्। तदपि नामान्तरभजनार्हावस्थान्तरापत्तिरहितत्वम्। तथैव आधेयत्वविधेयत्वशेषत्वपारतन्त्र्यादिना परमेश्वरतत्त्वविलक्षण ॥

स हि स्वय स्वात्मानमेव स्वस्मा एव प्रकाशयति। एव प्रकाशमानत्वमेव अहंत्वलक्षण प्रत्यक्तम्। अहमिति प्रकाशदशायां अनुकूलत्वमपि सर्वदा स्वस्मिन् भासते न कदाचिदपि प्रतिकूलत्वमिति सुखरूपत्वम्। कदाचित् क्रोधाद्यावेशदशाया स्वस्यापि स्वरूप दु खरूपमिव भासेत। तदेतदौपाधिकम्, न स्वाभाविकम्। एवमेकत्वमपि सदा भासते। ततश्च प्रत्यक्तैकत्वानुकूलत्वानि आत्मस्वरूपान्तर्गतानि धर्मिभास्यानीति निर्णय·। ततश्च स्वस्य परस्य वा कस्य चित्प्रकाशकत्वरूपज्ञानपदप्रवृत्तिनिमित्तस्य सत्त्वात् ज्ञानस्वरूप. ज्ञानगुणकश्च ॥

स्वापदशायामपि प्रत्यक्तैकत्वानुकूलत्वप्रकारेण स्वानुभवोऽस्ति। स एव संस्कारस्थानापन्नः प्रबोधदशाया सुखमहमस्वाप्समिति प्रत्यवमर्शस्य हेतुर्भवति। अस्मिन् परामर्शे सुखत्वमहंत्व स्वाप पूर्वकालश्चेत्यर्थचतुष्टयमवभासते। तत्र मन्दमगच्छं मधुरमगायमित्यादिषु परामर्शेषु गमनगानसमानकालीनमान्द्यमाधुर्यभानवत् स्वापसमकालीने सुख-

त्वाहंत्वे भासेते, प्रतीतिस्वारस्यात्। ज्ञानसामान्याभावरूप स्वाप· पूर्व कालश्च प्रातश्चत्वरे गजो नास्तित्यादिपरामर्शेषु प्रातस्त्वया किं चत्वरे गजो दृष्ट इति प्रश्नानन्तरकालभाविषु यथा योग्यार्थाननुस्मरणलिङ्गेन गजाभावोऽनुमीयते चत्वरादिक सस्कारमहिम्ना भासते तथाऽत्रापि भासत· इति निर्णय· ॥

स्वापेऽहंत्वस्य भाने मामप्यहं न ज्ञातवानिति परामर्श कथमिति शङ्कायां ब्राह्मण्यादिविशिष्टदेहादिविषयोऽत्रास्मदुल्लेख इति समाधि ॥

ततश्चेद चेतनतत्त्व प्रतिस्व स्वानुभवरूपत्वात् सदा स्फुरति। अनुभवो नाम स्फुरणम्। तच्च स्फुरतो धर्म। स च नित्य। सैव भासमानता, व्यवहारानुगुण्य विषयत्वमिति यावत्। यद्यपि स· विलक्षण· विकार एव। तथापि नामान्तरभजनार्हसङ्कोचविकासरूप· विकारस्स न भवतीत्यविकारत्वस्य नानुपपत्ति। अन्यथा शरीरसयोगादिरूपविकारस्यापि परित्यागप्रसङ्गे वस्तुत्वमेव परित्यक्तव्य स्यात् ॥

अणुत्वशेषत्वनियाम्यत्वनित्यत्वकर्तृत्वज्ञातृत्वभोक्तृत्वादिरूपेण तु धर्मभूतज्ञानस्य गोचरः। तदपि ज्ञान विषयप्रकाशन वेलाया स्वाश्रयाय स्वयमपि भासत इति सिद्धान्त· ॥

अयमत्र विभागः—घटादि· परत एव परस्मा एव भासते। धर्मभूतज्ञानं नित्यविभूतिश्च स्वत परतश्च परस्मा एव भासते। आत्मा तु स्वतः परतश्च स्वस्मै भासते परत परस्मै भासते च इति। ततश्च—

प्रमाता च प्रमा चैव प्रमेयश्च भवेत्पुमान्।
प्रमा प्रमेया च बुद्धिः मेया एव घटादय·॥ इति ॥

एष चेतनतत्वभूत· जीवः बद्धो मुक्त· नित्य इति त्रिविध। आद्यः अनुवृत्तससारः। द्वितीय· निवृत्तससारः। तृतीय· अवृत्तससार·।

बद्धानामेव मुक्तत्वस्य दशाविशेषरूपत्वेऽपि नित्यानामिव मुक्तानां बद्धापेक्षयाऽत्यन्तवैषम्यसूचनाय विभज्य निर्देशः ॥

एतादृशानां बद्धाना नित्यससारिव्यपदेश्यानामनन्तानामङ्गीकारात् भगवत लीलाविभूतेर्नित्यत्व प्रवाहलक्षण केचित्समर्थयन्ति । परमेश्वरीयनिरवधिककरुणाविषयत्वरूपस्य सर्वजीवसाधारणस्य मुक्तियोग्यत्वस्याभ्युपगमात् तादृशानामेव मुक्तियोग्याना जीवानामानन्त्यात् लीलाविभूत्युच्छेदो नास्तीत्यपरे प्राहुः । स्वेच्छया लीलाविभूत्युपरतिरपि काचिल्लीलैवेति नैव लीलायास्समुच्छेद इति मध्यस्था वर्णयन्ति । एतादृशो विचार अवचनीय. दुर्निरूप इति पातञ्जलयोगभाष्ये व्यासदेवः तुरीयपादे प्राह ॥

ईश्वरतत्त्वम्

अथेश्वरतत्त्वनिरूपण सर्वतत्त्वनिरूपणफलभूतमारभ्यते । तदेतदीश्वरतत्त्व लक्ष्मीनारायणभेदेन द्विविधमपीश्वरत्वस्य द्वित्वादिवत् व्यासज्यवृत्तित्वात् एकत्रापरिसमाप्तत्वात् ईश्वरपदेन तत्त्वद्वयमपि निर्दिश्यनिरूपणात् वक्ष्यमाणविशेषरहित सर्वत्र साम्यमवधेयम् ॥

स चेश्वर चेतनाचेतनतत्त्वद्वयस्य धारक नियन्ता शेषी शरीरी सर्वकार्यकारणभूत समस्तहेयरहितः सर्वज्ञत्वसर्वशक्तत्वादिसमस्तमङ्गलगुणाश्रय· स्वेतरसमस्तवस्तुविलक्षण. सर्वविधलौकिकयुक्तयविषयभूतः सर्वशब्दवाच्य अप्राकृतदिव्यमङ्गलविग्रहसहितः शास्त्रविहितसर्वकर्मसमाराध्यः निषिद्धसर्वकर्मापराध्य सकलफलप्रद सर्वसमाश्रयणीय पितृमातृस्थानीयः मुक्तप्राप्यः सर्वैरपि प्रकारैर्निरतिशयानुकूल. परमात्मशब्दाभिधेयः लक्ष्मीनारायणात्मक पुरुषोत्तमयोषोत्तमरूपः शास्त्रैकसमधिगम्य. ॥

एष एव सूक्ष्मचिदचिद्विशिष्टवेषेण जगदारम्भे उपादानकारणम्। संकल्पविशिष्टवेषेण निमित्तकारणम्। कालाद्युपकरणविशिष्टवेषेण सहकारिकारणमिति त्रिविधमपि कारण भवति। विशिष्टवेषेणेत्यस्य वैशिष्ट्यमित्यर्थः। तादृशवैशिष्ट्यप्रयुक्त उपादानत्वादिव्यवहार इति यावत्। एव सर्वस्यापि कार्यस्येश्वरापृथक्सिद्धतया सर्वमपि कार्यमीश्वर इत्येव व्यवहार वैशिष्ट्यमूल एव ॥

वैशिष्ट्य च तत्तदवस्थतत्तद्वस्तुनियमनरूपम्। सेवावस्था साक्षात् कार्यकारणव्यवहारप्रयोजिका। तत्तद्वस्तुगता तु अव्याकृतनामरूपवत्त्वरूपा व्याकृतनामरूपवत्त्वरूपा च कारणावस्था कार्यावस्थाऽपि परपरयाऽपि कार्यकारणव्यवहारप्रयोजिका। इय सद्वारकावस्था। पूर्वत्वद्वारकावस्थेत्यवधेयम् ॥

एव साक्षाद्वा परपरया वा सर्ववस्तुसबन्धे सत्यपि सत्यसंकल्पत्वात् चेतनाचेतनयोरिव विचित्रपरिणामदु खाज्ञानादिदोषशङ्काव्यावृत्त्यर्थ निखिलहेयप्रत्यनीकत्वमुच्यते। इदमेव हीश्वरस्य नित्यनिर्लेपत्वम्। एव च सत्यसकल्पत्व निखिलहेयप्रत्यनीकत्वौपयिक, सत्यकामत्व सकलकल्याणगुणाकरत्वौपयिकम्। पुरुषोत्तमत्व चेतनाचेतनवैलक्षण्यौपयिकमिति सक्षेपः ॥

एवमीश्वरस्य सर्वकारणत्व साधारणरूप निरुपाधिकस्वातन्त्र्यमूलमिति प्राधान्येन परिगण्यते। यथा "स्वतन्त्र कर्ता" इतरितरकारणचक्रगतं कारणत्वं स्वतन्त्रकर्तृव्यापाराधीनमिति कर्तु प्राधान्यम्, तथा तस्यापि कारणत्व निरुपाधिकस्वतन्त्रपरमात्मायत्तमिति तस्य प्राधान्यम् ॥

एवमपि जीवात्मस्वातन्त्र्यस्य ईश्वरनिग्रहानुग्रहनिदानस्य नानुपपत्तिः। तथाहि—कर्तृत्व नाम ज्ञानचिकीर्षाप्रयत्नाश्रयत्वरूपम्। तत्र

प्राचीनकर्मलक्षणेश्वरसङ्कल्पवशात् साध्वसाधुक्रियाविषयकज्ञाने जाते ततस्तदनुगुणेच्छायां सत्यामपि तदनुगुणेन प्रयत्नेनावश्य भवितव्यमिति न खलु नियम. । चिकीर्षाया सत्यामपि प्रयत्नरहिता. पुरुषा. प्रत्यक्ष-मीक्ष्यन्ते । ततश्च वासनानुसारेणेच्छाया सत्यामपि साध्वसाधुविवेक-शालिन शास्त्रवश्या. पुरुषा. विवेक तिरस्कृत्य प्रवृत्ताश्चेत् तदनुगुण फल प्राप्नुवन्तीति स्वातन्त्र्यमक्षतम् ॥

एवमीश्वरस्य स्वातन्त्र्येण कारणत्वे तत्र तत्र कञ्चित्कञ्चिद्विशेष-मुपादाय प्रेरकत्वानुमन्तृत्वोदासीनत्वादिव्यवहार· शास्त्रेषु बहुधा दृश्यते ॥

तथाच सृष्टिसहारान्त प्रवेशनियमननिग्रहानुग्रहा अस्य व्या-पारा चेतनतत्त्वानुग्रहलक्षणापारकारुण्यमूला अपि वैषम्यनैर्घृण्यादिदोष-परिहाराय चेतनतत्त्वकृत कर्मापेक्ष्यैव प्रवर्तते भगवानिति सापेक्षेश्वर-वाद: आचार्यबादरायणसम्मत: । शैवाद्यागमसम्मतो निरपेक्षेश्वरवादस्तु अव्यवस्थितत्वरूपदोषमावहतीत्याचार्याभिप्राय ॥

अस्य हि सत्यत्वज्ञानत्वानन्तत्वानन्दत्वामलत्वरूपा. स्वरूपनिरू-पकधर्मा· । जगत्कारणत्वसर्वज्ञत्वसर्वशक्तत्वपराक्रमैश्वर्यादय: निरूपितस्व-रूपविशेषणभूता । स्वरूपनिरूपका नाम स्वरूपप्रयूक्तास्सततैकरूपा निर्वि-कारा इति केचित् । स्वरूपान्तर्गता इत्यपरे । सर्वज्ञत्वादयस्तु विषय-घटितरूपा· न निर्विकारा इति प्रथमपक्षमुपपादयन्ति । अत्र स्वरूप-निरूपकेषु श्रीनिवासत्वमप्यन्तर्भाव्यम् । तच्च श्रीसंश्रयण स्वरूपवत् दिव्यमङ्गलविग्रहेणापि । अत दिव्यमङ्गलविग्रह स्वरूपनिरूपकधर्म इति सम्प्रदाय ॥

ज्ञानशक्त्यादिसकलगुणपरिपूर्णस्वभावेनैवासौ सर्वान्तर्यामी सर्व-त्र परिपूर्णश्च । अस्य च अन्तर्बहिश्च सर्ववस्तुव्याप्तिर्नाम स्वाव्याप्तप्रदे-

शराहित्यम् । अणोर्जीवस्य विभो कालादेश्च अन्तर्बहिःप्रदेशाभावेऽपि नानुपपत्ति । एव भगवत्स्वरूपस्यानन्त्यात् त्रिविधपरिच्छेदराहित्यम् । नित्यत्वाद्विभुत्वाच्च कालदेशपरिच्छेदौ न स्तः । स्वरूपत स्वभावतश्च निरतिशयोत्कर्षशालित्वात् वस्त्वपकर्षरूपो वस्तुपरिच्छेदोऽपि नास्ति ॥

ईश्वरस्याघटितघटनासामर्थ्यलक्षण सर्वशक्तिमत्त्वमप्यनेकान्तवादापातरूपदोषानवकाशेन वक्तव्यम् । यथा —यद्यद्वस्तु यथायथा घटयितुमर्ह तत्तद्वस्तु तथातथा अन्यैरघटितमीश्वरेण सङ्कल्पमात्रेण घटित भवतीत्यर्थ इति । अन्यथा नीलमपि पीत भवेदित्यनेकान्तवादापात ॥

अवाप्तसमस्तकामत्वमपि सदाऽभिमतसकलभोगोपकरणसद्भावलक्षण अनवाप्तन्यनर्हकामनावत्त्वम् । अन्यथा मोक्षप्रदानपर्यन्तो जगत्सृष्ट्यादिव्यापार लीलारसलक्षण अपारकारुण्यमूल न सञ्जिष्येत । एव लीलारसार्थव्यापारेऽपि परदु खनिराकरणप्राधान्येन कृपारसानुप्रवेश । तत्राप्यपारकरुणाशालिनो राजादेश्चोरादिदण्डनमिव आज्ञातिवर्तिनो दण्डनमपि गुणदोषव्यवस्थाव्युत्पादनरूपेण लोकहितायैवेति करुणाकार्यमेव ॥

ततश्च भगवतस्सर्वोऽपि व्यापार लीलारसार्थव्यपदेशेन आश्रितानुग्रहार्थ इति सिद्धान्त । अत एव जगत्कारणत्वे सर्वरक्षकत्वमन्तर्नीतमिति रहस्यम् ॥

एव च भगवत विभूतिपारम्य परत्वम् । शीलपारम्य सुलभत्वम् । स्वरूपायत्त सर्वस्याधेयत्वम् । इच्छालक्षणसङ्कल्पायत्त सर्वस्यनियाम्यत्वलक्षण विधेयत्यम् । सङ्कल्पप्रयुक्तमेव शेषत्व यथेष्टविनियोगाहत्वलक्षणम् । पारतन्त्र्यमपि यथेष्टविनियुक्तत्वमिति सिद्धान्त ॥

एवमसावीश्वरः निरपेक्षस्वतन्त्रोऽप्याश्रितपरतन्त्र इत्युच्यते । तदिदं पारतन्त्र्य स्वेच्छावशेन स्वीक्रियमाण परमा काष्ठामापन्न स्वातन्त्र्यरूपमेव । एवमाश्रितविषये निरतिशयप्रीतियुक्तस्य निरकुशस्वतन्त्रस्येश्वर स्याभिप्रायमनुरुध्य तदीया अप्यन्योन्य शेषभूता भवन्ति । तत्र निरूपकभेदेन शेषित्व शेषत्व न विरुद्धम् । अतएवोच्यते—

अन्योन्यगुरवो विप्रा अन्योन्यातिथयस्स्मृता· ।
अन्योन्यमुपकुर्वाणास्तारयन्ति तरन्ति च ॥ इति ॥

एव शिष्याचार्ययोरपि शेषशेषिभाव परस्परमस्ति । तत्र किंचित्कारप्रकार शास्त्रबलेन नियन्त्रित । यथा- यथाहृदय यथार्ह हितोपदेशादिरूप· आचार्यकर्तव्य किञ्चित्कार । कृतज्ञत्वमुपदिष्टानामर्थानामविस्मरण यथाशक्त्यनुष्ठान यथाशक्ति यथायोग्य च शुश्रूषादिक च शिष्यकर्तव्य किञ्चित्कार ॥

तथा—यथा हितैष्याचार्य शिष्यस्य सर्वास्वप्यवस्थासु सन्मार्गमुपदिशति । एव शास्त्रवश्येन शिष्येणापि आचार्यमवलिप्तमुत्पथ प्रतिपन्न एकान्ते प्रतिबोध्य सन्मार्गप्रवर्तनेन किञ्चित्कार कर्तव्य इति विधि ॥

अवतार

स चेश्वर स्वव्यतिरिक्ताना सर्वेषा तत्त्वानामभिमानिभि अस्त्रभूषणाद्याकारदिव्यदेहपरिग्रहवद्भि नित्यसूरिभिस्सेवितेन दिव्य मङ्गलविग्रहेण रूपेण विशिष्टस्सन् परव्यूहविभवान्तर्याम्यर्चाभेदेन पञ्चविधश्श्रूयते । तत्र पररूप वैकुण्ठे तु परे लोके सदा नित्यसूरिसेव्य· नित्य दिव्यमहिषपरिजनपरिच्छदसहित दिव्यमङ्गलविग्रह मुक्तप्राप्य परवासुदेवाख्य । अत्रैव नित्योदितशान्तोदितविभाग· । परवासुदेव नित्योदित· । तत अवतीर्ण· व्यूहवासुदेव शान्तोदित ॥

ततो व्यूहवासुदेवात् सकर्षणसज्ञक द्वितीयो व्यूह प्रादुर्भवति। ततः प्रद्युम्नसज्ञक । तत अनिरुद्धसज्ञक । एते चत्वारो व्यूहा. । अवयवसस्थानविशेषविशिष्टविग्रहरूपेण विभज्य स्थित्या एतेषां व्यूह-शब्दाभिधेयत्वम् ॥

तेषु व्यूहवासुदेव समष्टिसृष्टिस्थितिसहारादौ साक्षात्स्वयमेव कारणीभवति । व्यष्टिसृष्टौ चतुर्मुख ब्रह्माण प्रद्युम्नरूपेणानुप्रविश्य तद्द्वारा कारणीभवति । व्यष्टिसहारे रुद्र सकर्षणरूपेणानुप्रविश्य कारणीभवति। व्यष्टिस्थित्यादौ तु अनिरुद्धरूपात् साक्षात् जीवव्यवधान विना विष्णु रूपो भूत्वा कारणीभवतीत्यवधेयम् ॥

परवासुदेवस्य व्यूहवासुदेवस्य च ज्ञानशक्त्यादिषाड्गुण्यप्रकाशनसाम्येनैकीकृत्य त्रयो व्यूहा इत्यपि व्यवहारोऽस्ति । ते च त्रयो व्यूहा अभिमानविशेषेण जीवमनोहकारशब्दवाच्या अपि भवन्ति । परवासुदेवरूप निरुक्तत्रितयापेक्षया तुर्यत्वेनापि व्यवह्रियते ॥

विभवो नाम—तेभ्य एव व्यूहेभ्य प्रत्येक त्रीणि त्रीणि रूपाणीति केशवादीनि द्वादश रूपाण्याविर्भवन्ति । तथा—रामकृष्णादयः पद्मनाभविद्याधिदेवादिप्रादुर्भावाश्च विभवा यथायथ व्यूहेभ्य एवाविर्भवन्ति । केषाचिज्जीवाना विग्रहविशिष्टवेषेण वा शक्तिविशिष्टवेषेण वाऽनुप्रवेशलक्षणमधिष्ठानमपि विभवभेद । देवमनुष्यादिविभूतिभि विभवपदवाच्याभिस्सहात्मान दिव्येन रूपेण तुल्यतया प्रकाशयतीति विभवपदेन व्यपदेश. ॥

अन्तर्यामिरूप तु—योगिना साक्षात्कर्तुमर्ह हृदयदेशे सन्निहितमुपासकानुग्रहार्थ अङ्गुष्ठमात्रमिति श्रुतिव्यपदेश्य पूर्वोक्तरूपविलक्षण रूपम् । दिव्यात्मस्वरूपस्य विभुन सर्वत्र सबन्धरूपा व्याप्ति. सार्वदिकी

एका । सृष्ट्यनन्तरं सर्ववस्तुषु प्रत्येक गोजठरगतवत्सवत् सर्वव्याप्तस्य ब्रह्मणः पुष्कलप्रतीत्यर्हा स्थितिरपरा । इदमेव सर्ववस्तुपरिपूर्णत्व सर्वान्तर्यामित्वम् । प्रकृतमन्तर्यामिरूप तु विग्रहविशेषविशिष्टवेषेणानुग्रहार्थ सन्निधान विलक्षणामिति ध्येयम् ॥

अर्चारूप तु—स्वयव्यक्तसैद्धदिव्यार्षप्रक्रियया भक्तजनप्रार्थनानुगुण देशकालविप्रकर्षराहित्येन भक्त्या शुद्धभावगतानां शास्त्रीयसस्कारेण भगवद्भावनावता सकलाना मनुजाना नयनविषयता गत सर्वातिशायिषाड्गुण्य सर्वसहिष्णु क्षीरनीरन्यायेन विम्बाकृतिसदृशाकृतिसहित भौतिकविग्रहेषु अनुप्रविष्ट परव्यूहविभवादिलक्षणमेव दिव्यमङ्गलविग्रहात्मक रूपम् ॥

एव सर्वेष्वपि रूपेषु स्वाभिमतानुरूपरूपसहितसहधर्मचारिणेसश्लिष्ट एव भगवान् सर्वेश्वर । सैषा सहधर्मचारिणी लक्ष्मी नारायणाख्यतत्त्ववत् षाड्गुण्यपरिपूर्णा । अस्मिन्नपि तत्त्वे सत्यत्वज्ञानत्वानन्दत्वानन्तत्वामलत्वाख्या· स्वरूपनिरूपकधर्मास्सन्ति । ब्रह्मत्वमीश्वरत्व चोभयोः पर्याप्तिसम्बन्धेन विद्यमान व्यासज्यवृत्तिर्धर्म । सैषा लक्ष्मी नारायणतत्त्वस्यापृथक्सिद्धशक्तिरूपत्वात् ब्रह्माद्वैतम् । अतएव श्रुतिष्वपि ब्रह्मैश्वरादिशब्दा तदन्तर्भावात योगेन रूढ्या च लक्ष्मीविशिष्टस्यैव नारायणस्य वाचका· । ततो विशिष्टस्यैव जगत्कारणत्वादयः सर्वे व्यापाराः । लौकिकपतिपत्नीन्यायेनैव परस्परप्रीतिमेवोद्दिश्य परस्परव्यापारा ॥

ततश्चोपायत्वमुपेयत्व चोभयोस्समानम् । मातृत्व पुरुषकारत्व पतिपारतन्त्र्यमित्यादिक, पितृत्व दण्डधरत्व श्रीवल्लभत्व सर्वशेषित्वमित्यादिक च उभयोर्नित्यसङ्कल्पेन अतिशयितानन्दायैव विभज्य व्यवस्थित रूपम् ॥

अत्र व्यूहादयस्सर्वेऽप्यवताराः शुद्धसृष्टिरित्युच्यते । लीलाविभूतिसृष्टिस्तु मिश्रसृष्टिः । सोऽयमवतार अशावेशभेदेन द्विविधः । अशावतार एव साक्षादवतार इत्युच्यते । प्रदीपाद्दीपपरम्परावत् परस्मादेव रूपात् अशेनाविर्भूत व्यूहादिरशावतार । विग्रहांश इति फलितार्थ । विग्रहस्य सङ्कोचविकासव्यापित्वादिशक्ति अचिन्त्याऽपरिमेया च । अतएव विश्वरूपादिप्रदर्शन वासुदेवविग्रहे समुपपद्यते । तथा च साक्षाद्दिव्यविग्रहपरिग्रहः साक्षादवतार. ॥

आवेशावतारस्तु समीहितकार्यकरणाय पूर्वोक्तविग्रहविशिष्टवेषेण वा शक्तिविशेषेण वा महाभागे सशरीरे जीवविशेषे अनुप्रवेश । स एव हि गौण प्रादुर्भाव इत्युच्यते । तत्र तस्य जीवविशेषस्य प्रतिष्ठार्चनादिशास्त्रविशेषोऽपि भगवदनुप्रवेशनिबन्धन । अनुप्रवेशस्य कादाचित्कत्वेपि उपलक्षणविधया भगवत एवोद्देश्यत्वम् ॥

सर्वोऽप्यवतारस्सत्य न त्वैन्द्रजालिकवेषवत् मिथ्यारूप । तत्र ज्ञानशक्त्यादिकल्याणगुणानामसङ्कोच । शुद्धसत्त्वमय एव विग्रह । स्वतन्त्रेच्छैव कारणम् । धर्मरक्षणमेव काल साधुपरित्राण फलम् । ततश्च -

स्वरूपेण स्वभावेन द्रव्येणापि च हेतुना ।
कालेन च फलेनापि ह्यवतारस्य दिव्यता ॥ इति ॥

एतादृशमवताररहस्यज्ञान महाविश्वासवता अस्मिन्नेव जन्मनि उपायपरिपूर्त्या जन्मान्तरव्यवधानमन्तरेण मोक्षसाधनमिति भागवतसिद्धान्त ॥

सावर्म्यवैधर्म्यम्

एव सर्वतत्त्वानां स्वरूपतो नित्यत्वेऽपि अचेतनतत्त्वेषु चतुर्षु स्वरूपपरिणामलक्षण नामान्तरभजनार्ह अवस्थान्तरापत्तिरूप विकारस्समास्ति । यथा—त्रिगुणे महदादिलक्षण., काले क्षणदिनादिलक्षण ,

शुद्धसत्त्वे नित्यविकाराणा नित्यत्वेऽपि विचित्रोऽनित्यो विकार·, धर्मभूतज्ञाने प्रत्यक्षपरोक्षसुखदु खादिलक्षणश्च स्वीकृत ॥

जीवात्मस्वरूपस्य ससारदशाया निर्विकारत्वेन नामान्तरभजनार्हविकारासभवेऽपि तत्स्वभावभूतस्य धर्मभूतज्ञानस्य सकोचविकासरूपविचित्रपरिणामाभ्युपगमात् तद्द्वारा प्रकृतिसबन्ध सुखदु खाद्यनुभव सृज्यत्वसहार्यत्वव्यपदेश. उत्पत्तिविनाशव्यवहारः जडपण्डितपामरादिव्यवहार सर्वोऽप्युपपद्यते ॥

ईश्वरस्वरूप तु निरुपाधिकसत्तावत् सर्वदा निर्विकारमेव । निरङ्कुशस्वातन्त्र्येण तदीय धर्मभूत ज्ञान सकल्पनिग्रहानुग्रहादिरूपनानाविधावस्थाभागपि सकोचविकासरूपविकारशून्य स्वाभाविकेन सार्वदिकेन विकासेन विशिष्टमेव प्रकाशते । जीवात्मन तद्द्वारा साक्षाच्च परमात्मन विशेषणभूतस्याचिद्द्रव्यस्यावस्थाभि अवस्थावत्त्वमभ्युपगम्यते। ततश्च अवस्थालक्षणविकाराश्रयत्वमुपपद्यत इति द्रव्यलक्षणसमन्वय ॥

एव सामान्येन त्रेधा तत्त्वविभागेऽप्यस्मिन् दर्शने त्रिंशत् तत्त्वानि । यथा—प्रकृत्यादीनि चतुर्विंशतिसख्याकानि । कालो नित्य विभूतिः धर्मभूतज्ञान जीवात्माचेति चत्वारि । लक्ष्मीः नारायणश्चेति द्वयम् । आहत्य त्रिंशत् । ईश्वरत्व व्यासज्यवृत्तिधर्म इतीश्वरपदेनोभयोस्तत्त्वयोर्व्यवहारः ॥

एतेषा साधर्म्य वैधर्म्य चैवमवधेयम्—येषा यदुक्त साधर्म्य तदितरेषा वैधर्म्यमिति सिद्धमेवैतत् । सर्वेषा तत्त्वाना स्वरूपस्थिति प्रवृत्तिमत्त्व सयोगः शक्तिः स्वभावतोऽनुकूलत्व उपादेयत्वं नित्यत्व ज्ञेयत्व वाच्यत्व पारमार्थिकत्वमित्यादिक साधर्म्यम् । अचेतनस्य प्रवृत्तिर्नाम विचित्रपरिणामार्हत्वम् ॥

नारायणव्यतिरिक्तस्य सर्वस्य निरुपाधिकशेषत्व शरीरत्व परतन्त्रत्व च साधर्म्यम् । जीवात्मनित्यविभूतिधर्मभूतज्ञानेश्वराणा स्वप्रकाशत्वरूपमजडत्वम् । अन्त प्रविश्यनियन्तृत्वरूपमात्मत्व प्रत्यक्त्व च जीवेश्वरयो । सत्त्वाश्रयत्व त्रिगुणनित्यविभूत्यो । दासत्व सर्वजीवानाम् । परिपूर्णपरब्रह्मानुभवो नित्यमुक्तेश्वराणाम् ॥

त्रिगुणकालशुद्धसत्वधर्मभूतज्ञानाना अचेतनत्व परिणामिनित्यत्व च साधर्म्यम् । सजातीयावस्थासतत्यनुच्छेदरूप प्रवाहतो नित्यत्वमपि । स्वाधिकरणकालत्वव्यापकस्वसजातीयाधिकरणकालोत्तरत्वकत्वरूप प्रवाहतोऽनादित्वमपि ॥

अद्रव्यनिरूपणम्

एव त्रैविध्येन तत्त्वविभागे कृतेऽपि त्रिगुणकालशुद्धसत्त्वधर्मभूतज्ञानजीवपरमेश्वरभेदेन षड्द्रव्यात्मक तत्त्वत्रयमिति निरूपितम् । तान्येव द्रव्याण्याश्रित्य प्रतीयमानानि द्रव्याश्रिपत्त्वैकस्वभावत्वेन गुणादिपदवाच्यान्यद्रव्याण्यपि दशधाऽभ्युपगम्यन्ते । यथा—सत्त्वरजस्तमासि शब्दस्पर्शरूपपरसगन्धा सयोगश्शक्तिरिति दशविधान्यद्रव्याणि ॥

एतेषामाश्रयद्रव्यापेक्षया भेदस्याभ्युपगमेऽपि तत्तदपृथक्सिद्धत्वलक्षणस्य यावत्सत्तमसम्बन्धानर्हत्वरूपस्यायुतसिद्धत्वस्याभ्युपगमात् स्वातन्त्र्यविरहात् तत्तद्रव्यस्वरूपनिरूपकतया तत्रतत्रान्तर्भावविवक्षया च पृथक्तत्त्वत्वेन नोपदेश ॥

तर्हि चेतनाचेतनतत्त्वयोरपि परमेश्वरायुतसिद्धत्वात्तत्परतन्त्रत्वात् तत्रैवान्तर्भावविवक्षया एकमेव तत्त्वमीश्वराख्यमितीष्यतामिति चेदिष्यत एव । अत एव चाशेषचिदचिद्विशिष्ट ब्रह्मैकमेव तत्त्वमिति सिद्धान्त. ॥

ततश्चाचेतनैकतत्त्ववादो लौकायसम्मत । चैतनैकतत्त्ववाद हैरण्यगर्भसिद्धान्त । चेतनाचेतनतत्त्वद्वयवाद साङ्ख्यसम्मत । चेतनाचेतनेश्वररूपतत्त्वत्रयवाद पातञ्जलाभिधसेश्वरसाख्यसिद्धान्त । अयमेव सिद्धन्त वेदान्तसम्मत इति श्रीभगवद्रामानुजार्यै प्रकाशित । तत्रेयान्विशेष —मिथ स्वतन्त्र तत्त्वत्रयमिति पातञ्जलाभिप्राय । पारतन्त्र्यलक्षणायुतसिद्धत्वरूपसम्बन्धविशेषणैकमेव तत्त्वमिति व्यपदेशार्ह मिथोविलक्षणस्वभाव तत्त्वत्रयमिति विशिष्टाद्वैतसिद्धान्त ॥

अथाद्रव्याणि निरूप्यन्ते । अद्रव्यसिद्धिस्तु—दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् । दर्शनेन कश्चिदर्थो गृहीत । स्पर्शनेनापि सोऽर्थो गृह्यते यमहमद्राक्ष चक्षुषा त स्पर्शनेनापि स्पृशामीति । य चास्पार्क्ष स्पर्शनेन त चक्षुषा पश्यामीति । ततश्च इन्द्रियनानात्वम्, नियतविषयाणीन्द्रियाणि, स्वविषयग्रहणलिङ्गानीन्द्रियाणि, ज्ञातुर्ज्ञानसाधनानि, गन्धादिगुणव्यतिरिक्त द्रव्य, गुणाधिककरणम्, देहेन्द्रियादिव्यतिरिक्त आत्मा इत्येते अर्था सिद्धयन्ति ॥

एव द्रव्याद्रव्यविभागस्य अद्रव्यविभागस्य च अनुभवसिद्धत्वात् संयोगरहितत्वमद्रव्यसामान्यलक्षणम् । यथार्थज्ञानसुखलाघवादिनिदान शक्त्यतिरिक्तमतीन्द्रिय सत्त्वम् । भ्रमदु खप्रवर्तकत्वादिनिदान शक्त्यविरिक्तमतीन्द्रिय रज । मोहगुरुत्वावरणादिनिदान तादृश तम । प्रकृत्यवयवा. विलक्षणा केचिदेतेषामाश्रया । एतेषा शक्तावन्तर्भावे सम्भवत्यपि शास्त्रबलेन पृथग्भाव ॥

एतैरदृष्टोपष्टब्धपुरुषभेदात् उद्भवानुद्भवसमतालक्षणावस्थाभेदेन वस्त्वेकमेव सुखाय दु खाय मोहाय च भवति । पुरुषैक्येऽपि कालभेदेनाप्येवं भवति । अत एव यज्ञ दान तपो ज्ञान धृत्याहारादिष्वपि

सात्त्विकादिभेदा· देहेन्द्रियादिमूला भवन्ति । ब्राह्मणत्वादिकमपि सत्त्वादिगुणतारतम्यमेव देहेन्द्रियादिगतमित्यवधेयम् ॥

श्रोत्रेन्द्रियग्राह्यो गुणश्शब्द· । पञ्चभूतवर्ती । सः वर्णात्मक्तो ध्वन्यात्मकश्चेति द्विविध· । वर्णा भाषाभेदेन विभिन्ना अकारादयः । अतिरिक्ता ध्वनय । सोऽय शब्द आकाशेन सह उत्पद्यते विलीयते च । ततश्चाकल्प सर्वगकाराणामेकत्वम् तालवाद्यभिव्यञ्जकभेदेन उत्पत्तिविनाशतारत्वमन्द्रत्वादयो विशेषा औपाधिका ॥

स्पार्शनेन्द्रियग्राह्यो गुण स्पर्शः । स हि शीतोष्णानुष्णाशीतभेदेन त्रिविध प्रत्यक्षसिद्ध । अमृत गरल तूलोपल गोब्राह्मणचण्डालादिस्पर्शा बहुप्रकारास्सन्ति । तत्र गोब्राह्मणचण्डालादिस्पर्शा शुद्धयशुद्धयापादकतया स्वीकृता । धर्माधर्मतारतम्याधीनसत्वादितारतम्यात् शक्तितारतम्याद्वा शुद्धयशुद्धयादिरिति पक्षे तादृशा स्पर्शभेदा नेष्यन्ते ॥

रूपरसगन्धाना स्वरूप लक्षण विभागश्चेत्यादिक प्रसिद्धमेव । अवान्तरवैचित्र्यमपि सर्वानुभवसिद्धमिति नात्र विस्तृतम् ॥

सयुक्तप्रत्ययनिमित्तं सयोग. । विभुद्रव्ययोरपि सयोग नित्य. वर्तते । अत एवेश्वरस्य सर्वद्रव्यशरीरत्वम् । दिव्यदम्पतिदिव्यात्मस्वरूपयोरपि नित्यसश्लेषः ॥

सर्वकारणाना कारणत्वनिर्वाहक· कश्चित् अद्रव्यविशेष शक्ति । तर्कागमाभ्यां तत्सिद्धि । अयस्कान्तादिष्विय विशदमुपलभ्यते । अप्रतिबद्धा सा कार्योपयोगिनीति स्वीकृता । शक्तौ शक्तिर्नास्ति । कारणानां कार्यानुगुण्यरूपतयैव तत्सिद्धे । ताश्च बहुप्रकारा –(वि.पु)

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥ इति स्मर्यते ॥

सैषा शक्तिः द्रव्येष्वेव । अद्रव्येषु क्वचित् शक्तताव्यवहारः सामानाधिकरण्यमूलक । शब्दाना वर्णरूपाणामद्रव्याणामर्थावबोधकत्वरूपा वृत्तिपदाभिधेया शक्तिस्तु क्रमविशेषविशिष्टवर्णस्वरूपमेव । परमेश्वरसकल्पविषयत्वरूपा शक्तिस्तु सर्वत्र सुलभैव ॥

एतानि सर्वाण्यप्यद्रव्याणि न स्वाश्रयद्रव्यव्यापीनि सयोगादेरन्यथोपलम्भात् । नाप्याश्रयैकदेशवर्तीनि, रूपादेरन्यथोपलम्भात् । तस्माल्लोकप्रतीत्यनुरोधेन तत्तद्वस्तुस्वभावकल्पनेन सर्व समर्थनीयम् ॥

ततश्च वैशेषिकादिसम्मतानामितरेषा गुणकर्मादिपदार्थानामत्रैवान्तर्भाव । तथाहि—तत्तद्द्रव्यस्वरूपमेव सख्या । अवयवतारतम्य परिमाणम् । पृथक्त्व भेदरूपम् । सयोगाभावो विभाग. । परत्वापरत्वे देशकालसयोगतारतम्यरूपे । गुरुत्व कठिनावयवाधिक्यम् । द्रवत्वस्नेहस्थितस्थापकवेगा. शक्तिरूपा एव । सुखदु खेच्छाद्वेषप्रयत्नभावना धर्मभूतज्ञानस्वरूपमेव । प्रोक्षणादिना व्रीह्यादिषु जायमान· सस्कार योग्यतालक्षण सत्त्वोन्मेष ॥

कर्मणस्सयोगेऽन्तर्भाव । सस्थानमेव सामान्यम् । विशेष तत्तद्द्रव्यगत व्यावर्तक असाधारणो धर्म । समवाय आश्रयस्वरूप वा आश्रितस्वरूपं वा । पूर्वपूर्वावस्था द्रव्यस्य प्रागभाव । उत्तरोत्तरावस्था ध्वस । गोत्वादि सस्थानरूपः असाधारण धर्म एव धर्मिण इतरेभ्यो भेद· । स्वस्यापि स्वयमेवेतरभेदः । अत्यन्ताभावस्तु विद्यमानपदार्थावस्थाविशेषरूप एव । एवमितरसिद्धान्तसिद्धपदार्थानामप्यन्तर्भावादिकमवधेयम् । एवविधां द्रव्याद्रव्यव्यवस्थामुपगम्य सर्वव्यवहाराणामक्लेशेन निर्वाहात् अधिककल्पनाभावात् शास्त्रमार्गापरित्यागात् एष एव सिद्धान्त स्वरस· । क्वचित् ग्रन्थेषु प्रागुक्तव्यवस्थाविरोधेन व्यव-

हारदर्शनेपि परकीयसिद्धान्तमूलकस्स व्यवहार इति सामरस्यमनुसन्धेयम् ॥

अपिचात्रान्तर्भावनिरूपणे प्रायेणैषा युक्ति पुरस्कृतेति विज्ञायते। यथा—तद्धेतोरेव तद्धेतुत्वे मध्ये किंतेनेति न्यायेनान्यथासिद्धिलक्षणन लाघवापरपर्यायेणान्तर्भाव प्रतिपाद्यत इति। एवमद्रव्याणा द्रव्यैकाश्रितत्वेन तदपृथक्सिद्धत्वलक्षणायुतसिद्ध्या द्रव्योत्पत्तिस्थितिज्ञप्तिभिरेवोत्पत्तिस्थितिज्ञप्त्युपपत्तेः पृथगुत्पत्त्यादिक नाभ्युपेयते। तत नानवस्थाऽन्योन्याश्रयादिदोषावकाश ॥

भक्ति·.

एव तत्त्वनिरूपणमावश्यकमिति विस्तृतम्। अथ हितनिरूपणं पुरुषार्थनिरूपण च सक्षेपत. क्रियते। हित नाम पुरुषार्थोपायः। पुरुषार्थश्च अभ्युदयनिश्रेयसभेदेन द्विविधः। आद्य· पशुपुत्रस्वर्गादयः अणिमादिसिद्धयश्च। निश्रेयस मोक्ष·। अभ्युदयस्य साधन सर्वेषु शास्त्रेषु प्रसिद्ध नेह निरूपणमर्हति ॥

मोक्षस्य साधन तु भक्तिः प्रपत्तिश्चेति सिद्धान्त। भक्तिर्नाम जीवपरमात्मयाधात्म्यज्ञानपूर्वक वर्णाश्रमधर्मेतिकर्तव्यताक· परमपुरुषचरणयुगळध्यानार्चनप्रणामादि अत्यर्थप्रिय। सैवोपनिषत्सु वेदनमुपासनं ब्रह्मादिद्या इत्यादिभि सामान्यपदैः उपकोसलवैश्वानरसद्विद्यादिभिश्च विशेषपदै व्यवह्रियते। अत इदमुच्यते—

वेदनं ध्यानविश्रान्तं ध्यानं श्रान्तं ध्रुवस्मृतौ।
सा च दृष्टित्वमभ्येति दृष्टिः भक्तित्वमृच्छति ॥ इति ॥

अत्र ध्यानार्चनप्रणामादय उपासनशरीरान्तर्गता। उपासन दर्शपूर्णमासयागस्थानीयम्। ध्यानादय. आग्नेयादिस्थानीया। वर्णा-

श्रमधर्मा· प्रयाजादिस्थानीयाः । ध्यानमष्टाङ्ग मानसम् । नामसङ्कीर्तन वाचिकम् । अर्चनादिक कायिकम् । एव त्रिविधमुपासनम् ॥

अनन्यप्रयोजना अनवरता निरतिशयप्रिया विशदतमप्रत्यक्षतापन्नाऽनुध्यानरूपा भक्ति मोक्षाव्यवहितप्राक्काले परभक्तिरित्युच्यते । तत· परज्ञान तत परमा भक्ति । एव परभक्तिपरज्ञानपरमभक्तिरूपावस्थात्रयवर्ती भवति भक्ति । आद्या विषयस्वभावजा साक्षात्कारेच्छात्मिका धी । द्वितीया कादाचित्क· साक्षात्कार । तृतीया निरन्तरानुबुभूषा । अनुभवस्तु विश्वानुकूलत्वप्रकारक आनन्दसुखरसादिपदवाच्य विशिष्टविषयकस्साक्षात्कार परिपूर्णपरब्रह्मानुभव । कैङ्कर्य तु भगवदाभिमत्यनुरोधिन सर्वे व्यापारा ॥

एतादृशस्य चोपासनस्य भगवद्विषयकस्य अधिकार· स्वात्मसाक्षात्कार । तस्य चोपायभूत कर्मयोग ज्ञानयोगश्चेति । कर्मयोगो नाम यागदानहोमदेवार्चनतप कृच्छ्रोपवासपुण्यतीर्थपुण्यस्थानवासप्राणायामेन्द्रियनिग्रहवेदाध्ययनतदर्थविचारादिरूपेषु एक यथारुच्यङ्गितया स्वीकृत्य नित्यनैमित्तिकानि तदङ्गतयोपसहृत्यासङ्गकर्मानुष्ठानविशेष । असङ्गत्व नाम— कर्मणि आत्मीयत्वबुद्धिफलवुद्धयोस्त्याग । अन्ततस्त्वय कर्मयोग भगवदाराधनरूपलोकोपकारपर्यवसायीत्यन्यत्र विशदीकृतम् । स च ज्ञानयोगद्वारा साक्षाद्वा ध्यानयोगनामके परिशुद्धजीवात्मोपासने रुचिमुत्पाद्य भक्तियोगाङ्गभूत आत्मावलोकननामक जीवात्मसाक्षात्कारमुत्पादयति ॥

ज्ञानयोगो नाम कर्मयोगेन परिशुद्धान्त·करणस्य परिशुद्धात्मचिन्तनम् । तदपि बहुकालमनुष्ठित ध्यानयोगमुत्पाद्यात्मावलोकन साधयति ॥

साक्षात्पक्षस्तु —प्रागुक्तकर्मयोग एव आत्मयाथात्म्यज्ञानपूर्वक-

मकर्तृत्वानुसन्धानपूर्वकं चानुष्ठितश्चेत् ज्ञानयोगव्यवधानमन्तरेण सुकर शीघ्र निष्प्रमादश्च मन् ध्यानयोगद्वाराऽऽत्मावलोकनहेतुर्भवति ॥

तदेतदात्मावलोकनमाविर्भूतापरिच्छिन्नज्ञानैकाकारभगवच्छेषतैकस्वभावात्मस्वरूपसाक्षात्कारलक्षण भगवद्व्यतिरिक्तसर्ववस्तुषु तृणवदनादरणीयतामापादयत् उभयलिङ्गे उभयविभूतिमति स्वामिन्यत्यर्थप्रियानुभवरूपा परा भक्तिमुत्पादयति ॥

तद्यथा—बाल्ये बालक्रीडाप्रसङ्गेन नरेन्द्रभवनान्निष्क्रान्तस्य मार्गाद्भ्रष्टस्य व्याधगृहीस्य पक्कणे वर्तमानस्य राजकुमारस्यातोपदेशात् आत्मनस्तथात्व मत्वा विमृशत. स्वात्मनि राजसाम्यमङ्गप्रत्यङ्गादिषु पश्यत तस्मिन् यथा पितृत्वप्रीति निरतिशया जायते एवमस्माकमपि यथोपदेश भगवच्छेषभूते स्वात्मनि तत्साम्याकारेण साक्षात्कृते प्रीतिरूपा भक्ति स्वयमेवो त्पद्यत इति ॥

सैषा भक्तिस्समग्रा भगवद्गीताया नवमे प्रतिपादिता । सहसा भक्तियोगासामर्थ्ये अभ्यासयोग. कर्तव्य· । तत्राप्यसामर्थ्ये भक्तियोगाङ्कुरभूत क्रियायोग कर्तव्य । तत्राप्यसामर्थ्ये पूर्वोक्त कर्मयोग एव तार्तीयीक कर्तव्य इति द्वादशे निरूपित । तत्राक्षरयोगोऽपि कश्चिद्दुष्कर भक्तियोगसाधनीभूतो निरूपित । एवच गीताशास्त्रे कर्मयोग ज्ञानयोग ज्ञानात्मककर्मयोग ध्यानयोग भक्तियोग क्रियायोग अभ्यासयोग अक्षरयोग इति योगाष्टक निरूपितमिति निर्णय ॥

प्रपत्ति

निरुक्तभक्तियोगाशक्तस्य किंचिज्ज्ञस्य तीव्रोद्वेगविशिष्टस्य सर्वस्य प्रपत्तावधिकार· । उपासनरूपभक्तयारम्भे तु त्रैवर्णिकानामेव पुसा स्त्रीणा चाधिकार· ॥

प्रपत्तिर्नाम—

अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
तदेकोपायताया्ञा प्रपत्तिश्शरणागति. ॥

सैषा प्रपत्तिस्सर्वकामसाधनेति सिद्धान्त । तत्सग्रहोऽयम्—

यद्येन कामकामेन न साध्यं साधनान्तरै. ।
तेन तेनाप्यते तत्तन्नयासेनैव महामुने ॥
सुदुष्करेण शोचेद्यो येनयेनेष्टहेतुना ।
स स तस्याहमेवेति चरमश्लोकसंग्रह. ॥ इति ॥

इद च प्रपदन श्रुतिषु विहित भगवच्छास्त्रेणोपबृहितम् । अत एव तस्मिन्नेव शास्त्रे दासशेषादिशब्दा प्राय. प्रयुज्यन्ते । इद भरन्यासप्रधान सत् त्वमेवोपायभूतो मे भवेति प्रार्थनानुगुण भरस्वीकारपूर्वकमुपायान्तस्थानस्थितिलक्षणमीश्वरस्य निरपेक्षोपायत्व साधयतीत्युपाय इत्युच्यते । अयमेव ह्यस्या विद्याया विशिष्यवेद्याकार । ततश्च—

इयं केवललक्ष्मीशोपायत्वप्रार्थनात्मिका ।
स्वहेतुत्वधियं रुन्धे किंपुनस्सहकारिणाम् ॥

इत्युच्यते । उपायताबुद्धिपरित्यागपूर्वकमेवानुष्ठेयत्वस्य फलसाधनत्वस्य चात्रोपदेशात् उपायत्वबुद्धिपरित्यागे कथमनुष्ठान कथ वा फलसाधनत्वमित्यादिशङ्काया नावसर. ॥

अत्रानुष्ठनात्पूर्वमुपायताज्ञान अनुष्ठानकाले परित्याग इति केचित्समादधिरे । केचिच्च पुनःप्रपदनादावुपायताबुद्धिपरित्यागः तत. प्रपदनान्तर न कर्तव्यमित्याहु ॥

प्रपत्त्यधिकारिणो जीवात्मनः परतन्त्रस्य आधेयत्व विधेयत्वं शेषत्वं चानुसन्धेयम् । तत्राधेयत्वानुसन्धानेन परमपुरुषार्थसिद्धेराश्रयभूता स्वरूपसत्ता सिध्यति । प्रवृत्तिनिवृत्तिपर्यन्तविधेयत्वानुसन्धानेन

उपायविशेषपरिग्रहयोग्यता सिध्यति । ततः कैकर्यपर्यन्तपुरुषार्थरुचि-सम्भवे शेषत्वानुसन्धानेन सर्वशेषिणस्सर्वेश्वरस्य अहं शेषो दासश्चेति प्रीत्यात्मकेन उपायोऽनुष्ठेयः । ततश्च स्वरूपभूतमाधेयत्वमुपायभूत विधेयत्व च फलदशाया शेषत्वानुसन्धानेनैव स्वरस भवतीति शेषत्व प्रधानतया परिगण्यते ॥

गुणविग्रहादिवत् लक्ष्मीरपि भगवतो विशेषणमिति विशिष्टो भगवानेक एव भक्त्या प्रपत्त्या वा प्रसन्नः प्रधानभूत उपाय इति नोपायद्वित्वप्रसङ्ग ॥

प्रपदनानुष्ठानकाले श्रिय प्रपद्य पुरुषकारस्थाने निवेश्य भगवन्त शरण व्रजेत् । सैषा श्रीः प्रजासु वात्सल्यातिशयेन पत्यौ वाल्लभ्यातिशयेन पुरुषकारतामङ्गीकरोति । श्रीशब्दार्थस्तु—

श्रीयते चाखिलैर्नित्यं श्रयते च परं पदम् ।
शृणोति भक्तार्तिरव श्रावयत्यपि तं पतिम् ॥
शृणाति निखिलान् दोषान् श्रीणाति च गुणैर्जगत् ।
उपदिष्टा इमे ह्यर्थाः श्रीशब्दस्य महर्षिभिः ॥ इति ॥
अस्ति कर्माईफलदे पत्यौ कृत्यद्वय श्रियः ।
निग्रहाद्वारणं काले सन्धुक्षणमनुग्रहे ॥ इति ॥

पुरुषकारपद पुरुषेण कर्तव्यकार्यपरमपि भगवत्समाश्रयणदशाया पुरस्कारविशिष्टवेषेण चेतनरूपाया सिद्धाया अपि साध्यत्वसम्भवात् लक्ष्म्या प्रयुज्यते । प्रपदनानुष्ठानक्रमस्तु न्यासदेशके समुपदिष्ट ॥

अहं मद्रक्षणभरो मद्रक्षणफलं तथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥
श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः ।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम् ॥

देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव ।
नित्यं निरपराधेषु कैकर्येषु नियुङ्क्ष्व माम् ॥
मां मदीयं च निखिलं चेतनाचेतनात्मकम् ।
स्वकैकर्योपकरणं वरद स्वीकुरु स्वयम् ॥

इति । अत्र—

सर्वज्ञेऽपि सदा देवे याच्ञाविज्ञापनादिभिः ।
तत्तदिष्टप्रदित्सात्मा प्रीतिरेव प्रसाध्यते ॥
तदेव चोदनोपज्ञमपूर्वं तत्त्ववेदिनाम् ।
आराध्येन्द्राद्यपायेऽपि फलदानाय तिष्ठति ॥
अकिञ्चनधुरीणस्य मज्जतः शोकसागरे ।
आत्मात्मीयभरं श्रीमानाददीत ममाच्युतः ॥

पुरुषार्थ

परिपूर्णपरब्रह्मानुभवो मोक्ष इति निर्णय । स हि अनिष्टनिवृत्ति-रिष्टप्राप्तिश्चेति द्विदल । भगवन्निग्रहनिवृत्तिरनिष्टनिवृत्तिः । सैव हि सर्वकर्मनिवृत्तिरिति बन्धान्मुक्तिरित्युच्यते । इष्टप्राप्तिस्तु स्वाभाविकज्ञान-विकासलाभः । सोऽपि ज्ञानसङ्कोचनिवृत्तिरिति यद्यप्युच्येत । तथापि तस्य यावत्कालमवस्थितिरूपा ज्ञानविकासपरपरा भावरूपैवेतीष्टप्राप्तिपदेन व्यवहारः ॥

अत्र सहजकृपोत्तम्भकभक्तिप्रपत्तिमूलकभगवत्प्रसादविशेषेणैव अनिष्टनिवृत्ति । इष्टप्राप्तिस्तु सहजसौहार्दविशेषेण यावत्काल तदनुवृत्तिः । ततश्च प्रसादविशिष्टवेषेणोपायः । सर्वाकारविशिष्टवेषेण स एवोपेय इति विभागः ॥

मोक्षे अपहतपाप्मत्वादिगुणेषु आनन्दे च परम साम्य तुला-धृतसुवर्णपाषाणयोरिव केनचिदाकारेणैव । उभयलिङ्गमुभयविभूतिविशिष्ट-

मीश्वरस्वरूप सपरिवारमीश्वरस्येव नित्याना मुक्तानामप्यनुकूत्वलक्षणानन्द-त्वेनैव भासते इति सर्व निरतिशयानन्दमित्युच्यते ॥

बद्धानां तु संसारदशायां कालदेशदशाभेदेन प्रतिकूलत्वाल्पानुकूलत्वादिना तत्तद्वस्तु भासते । सोऽयमवभास न वस्तुस्वभावाधीनः । अपि तु कर्मलक्षणभगवत्सङ्कल्पाधीन कर्मफलप्रदानप्रकारः । कर्मरूपप्रतिबन्धकनिवृत्तौ स्वाभाविक निरतिशयमानुकूल्यमाविर्भवति । सर्वेश्वरस्येच्छावैचित्र्येणैकमेव वस्तु सहजागन्तुकप्रक्रियया उपादेय त्याज्य च भवति ॥

दृश्यते हि लोकेऽपि सर्वोत्तमस्य कस्य चित् स्वामिविशेषस्य आत्मात्मीय सर्व भृत्यार्थमित्यभिप्राय । तथा उत्तमस्य भृत्यस्याप्यात्मात्मीय सर्व स्वाम्यर्थमित्यभिप्राय । एव परमात्मनोऽभिप्राय. सर्वमाश्रितार्थमिति । आश्रितस्याभिप्रायोऽपि सर्व परमात्मार्थमिति सिद्धयति । एव चोभावपि निरतिशयसौहार्देन अन्योन्योद्देशेन सकलमपि व्यापारं कुरुत । तत्र सेवालक्षण मुक्तस्य कैकर्य परार्थैकप्रवणमनस्त्वान्निरतिशयमनुकूलमिति सेवा दु खहेतुरिति कुयुक्तेर्नावसर —

स्वतश्शेषत्वकैकर्ये न कुत्राप्यसुखावहे ।
कर्मजत्वात्तथात्वस्य लोके च व्यभिचारतः ॥
महानन्दमहिम्ना च प्राग्दुःखावेक्षणादपि ।
मोहदु·खे तदा स्यातामिति मूढस्य जल्पितम् ॥
सुखस्य मोहनत्वं च तामसत्वाद्युपाधिभिः ।
सुखाय च भवेत्कापि पूर्वदुःखावमर्शनम् ॥

इति । एव पतिपत्नीभावरूपसंबन्धेन पितृपुत्रभावसबन्धेन गुरुशिष्यभावसम्बन्धेन रक्ष्यरक्षकभावसबन्धेन एवमादिना सर्वविधबन्धुत्वसबन्धेन

निरतिशय परस्पर प्रीतिविशेष रुचिभेदेन सुखग्रहणाय निरूपितश्शास्त्रेष्वित्यवधेयम् ॥

अत्र पतिपत्नीभावरूपसम्बन्धनिरूपणेन परस्परपारार्थ्यभावनाभावितसकलविधव्यापारसमाधिरनुसन्धेय । तदुच्यते कविभिः—

यदेव रोचते मह्यं तदेव कुरुते प्रिया ।
इति वेत्ति न जानाति तत्प्रियं यत्करोति सा ॥

इति । एव मुक्तव्यापारस्सर्वोऽपि परमपुरुषकैङ्कर्यरूप इत्यवधेयम् । अत एव भगवत अस्त्रभूषणादीनि वीरशृङ्गारादिरसानुबन्धीनि आश्रितैकार्थानीति सिद्धान्तः ॥

एवमन्यप्रीत्युद्देशेनैव जीवस्य प्रवृत्तावपि सा प्रीति स्वस्याप्यनुकूलैवेति स्वप्रीतिरत्रानपगता । तत. प्रयोजनोशेद्दे न चेतनप्रवृत्तेर्नानुपपत्ति । एव मुक्तस्य नित्यस्य च जगद्व्यापाराभावेऽपि गान्धर्ववेदप्रसिद्धनटसामाजिकैकरस्यवत् लीलारसैकरस्यमवधेयम् ॥

स्वयप्रयोजनानायासव्यापारो हि लीला । तस्या रसत्व तु चेतनोज्जिजीवयिषयाऽपारकरुणामूलत्वात् तादृशव्यापारस्य दयामयाना निरतिशयानन्दरूपत्वाच्च बोद्धव्यम् ॥

एवं च सति स्वात्मानुभवमात्ररूपस्य कैवल्यस्य सर्वैरप्यत्यन्त त्याज्यत्वेन तद्विषयक मीमासनमत्राफलमिति न वय विस्तृणीमहे ॥

अनुकूलतया भानमेवानन्दानुभव इति निर्णयादात्मस्वरूप सर्वदाऽनुकूलप्रकाशरूपमित्यानन्दपदव्यपदेश्य भवति । तदेतदानन्दत्व ससारदशाया मन्दमनुभूयते । धर्मभूतज्ञानगतमनुकूलविषयकत्वरूपमा-

नन्दत्वं तु संसारदशायां कर्मवैचित्र्येण अनुकूलप्रतिकूलशब्दादिविषय-भेदेन नानाविधाभिरवस्थाभि विचित्र भवति । मोक्षदशायां तु धर्मभूत ज्ञान सर्व निरतिशयानुकूलत्वेन विषयीकुर्वत्सत् धर्मिस्वरूपमपि तत्रानुकूलत्वेन विषयीकृत्य सर्वानुभवरूपमात्मानुभवरूप च भवति । परिपूर्णपर ब्रह्मानुभवरूप च भवति । सर्व साक्षात्करोति । आश्रयस्य सर्वज्ञत्वं चावहति । यावत्काल विकसदेव प्रवहति ॥

स एष मुक्तः स्वराड्भवति । स्वराट्त्व चाकर्मवश्यत्वम् । सर्वलोकसचारी भवति स्वेच्छया । न तु कर्मशक्तया । विदेह सदेहः अनेकदेहश्च भवति स्वसकल्पेन । जगदनुग्रहार्थ प्रकृतिमण्डले रामकृष्णादिवदवतरति । भगवत्कैकर्यार्थ चावतरति भरतबलभद्रादिवत् । यतो वाचो निवर्तन्ते अप्राप्यमनसा सह तादृशमानन्दमनुभवति । न च पुन कदाचिदपि कर्मवश्यो भवतीति न च पुनरावर्तते इत्युच्यते । यत अत्यर्थप्रिय ज्ञानिन लब्ध्वा भगवान्न कदाचिदप्यावर्तयति । असावपि निरतिशयानन्दरूपसविशेषणभगवद्व्यतिरिक्ते वस्तुन्यपेक्षाया असभवात् स्वय नावर्तते इति सर्व समञ्जसम् ॥

श्रीमद्रामानुजीयं मतमिह विदितं लोकवेदानुकूलं
तत्रैकं तत्त्वमिष्टं सकलचिदचिदाकारनारायणाख्यम् ।
चित्तत्त्वं जीवरूपं ह्यचिदपि विशदं सत्त्वविशात्मकं स्या
त्तत्राद्रव्य गुणत्वादृशविधमुदितं नात्र तत्त्वान्तरोक्तिः ॥
तस्मिन् भक्तिप्रपत्ती हितमिति विदितं स्वाधिकारानुरूपं
प्राप्यं तद्ब्रह्मसाम्यं निरवधिपुरुषार्थात्मकं सामरस्यम् ।
आगन्तुप्रक्रियातो यदपि बहुविधं हेयमासीत्पुरस्ता
न्मुक्तौ सौहार्दभूम्ना निखिलमिदमुपादेयमात्मानुकूलम् ॥

विशिष्टाद्वैतवेदान्तप्रक्रियेत्थं प्रकाशिता ।
कैंकर्येणानया वाचा प्रीयतां परमेश्वरः ॥

इति दर्शनोदये विशिष्टाद्वैतदर्शन नाम पञ्चम परिच्छेद

———————

शैवदर्शनम्.

पीठिका

भक्तिलक्ष्मीसमृद्धानामपरं शैवदर्शनम् ।
स्थालीपुलाकन्यायेन संक्षेपेण निरूप्यत ॥

अथ भक्तिसिद्धान्तेषु बहुषु बहुप्रकारेषु सत्स्वपि तेषां प्रपञ्चन-मत्रानादृत्य शैवदर्शन पर विरलप्रचारमिति तत्साराशो निरूप्यते ॥

तदिदं दर्शन बहुविधमुपलभ्यते—शैव पाशुपत कालामुख कापालमिति । परमशिवपारम्य सर्वत्राविशिष्टम् । तत्र नकुलीशपाशुपत-दर्शनमित्येक दर्शन सर्वदर्शनसङ्ग्रहेऽनूदितमस्ति । तत्र निरपेक्षेश्वरवादो निरूपित । तथाहि—

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥

इति । स हि वाद· जीवकृत पुण्यापुण्यलक्षण कर्मानपेक्ष्यैव ईश्वर स्वेच्छया सुखदुःखादिप्रद इति पक्ष । तमेत पक्षमाचार्यबादरायणः पूर्वपक्षतयाभिप्रेत्य परमेश्वरस्य वैषम्यनैर्घृण्यदोषस्य परिहाराय सापेक्षेश्वर-वाद समर्थयामास ॥

इदानी निरूप्यमाण शैवदर्शन तु सापेक्षमीश्वरमभ्युपगच्छति । प्रायेणेद दर्शन शैवागममूलमिति तदीयग्रन्थेभ्य एवावगम्यते ॥

एव विशिष्टाद्वैतादिदर्शनान्यपि पाञ्चरात्राद्यागममूलानीति शक्यते यद्यपि वक्तुम् । तथापि औपनिषदसिद्धान्तस्यैवोपबृहणतया-पाञ्चरात्राद्यागमानां प्रवृत्त्यभ्युपगमान्नास्त्यवकाशस्तथा वक्तुम् । शैवदर्शन तु वेदान्तवासनावद्भिः विद्वद्भिः व्याकुर्वीकृतमित्यागमनिष्ठा· स्वीयप्रबन्धेषु प्रकाशयन्ति । अत आगमैकमूलमिद दर्शनमिति प्राचामभिप्राय· । अपिचैते वेदाना पौरुषेयत्वमिच्छन्ति । वेदेषु शिवज्ञानं क्वाचित्क, आगमेनैव तत्सिद्धिरिति कथयन्ति ॥

इद च शैवदर्शनं परमशिवस्य निमित्तकारणत्वमात्रं वदति । आचार्यबादरायणेन भाष्यकारैश्चासौ वादः अनूद्य निराक्रियते औपनिषदं दर्शनमभिन्ननिमित्तोपादानवादं वदतीति ॥

एव स्थितेऽपि शिवार्कमणिदीपिकाया श्रीमताऽप्पयदीक्षितेन शैवागमानामप्याभिन्ननिमित्तोपादानवाद एव तात्पर्यमिति निरूप्यते । तदिद "सन्धिमिच्छन्ति साधव" इत्यस्य न्यायस्योदाहरण भवितुमर्हति ॥

श्रीकण्ठभाष्येऽपि (१–३–१२) "यतो विष्णुशिवयो· उपादाननिमित्तयो अवस्थाभेदमन्तरेण स्वरूपभेदो नास्ति" इति व्योमातीतवादोऽपि समरसीकृत ॥

श्वेताश्वतरोपनिषदि काल–स्वभाव–नियति–यदृच्छादिशब्दाः श्रूयन्ते । अत्र कालनियत्यादितत्त्वाभ्युपगमादनादीद दर्शनमित्येतद्दर्शननिष्ठानामाशयः ॥

प्रमेयसंग्रह

अस्मिन् दर्शने संक्षेपत· त्रिविध प्रमेयं पति पशुः पाशश्चेति । पति· परमशिव सर्वशक्तिसपन्नः । पशु पुरुष ज्ञातृत्व-

कर्तृत्वभोक्तृत्वशक्तियुक्तः परमशिवसाम्यम्वरूपयोग्य । पाश पञ्च-प्रकार इत्युपदिश्यते । ते तु प्रकारा —मल कर्म माया महामाया रोधशक्तिरिति ॥

मलः—पुरुषस्य स्वाभाविकी अनादिरशुद्धि । तदुक्तम्—

एको ह्यनेकशक्तिः दृक्क्रिययोश्छादकः मलः पुंसः ।
तुषतण्डुलवत् ज्ञेयः ताम्राश्रितकालिकावद्वा ॥

इति ॥

कर्म—क्रियते फलार्थिभिरिति धर्माधर्मात्मकम् ॥

माया—कालनियत्यादित्रिंशत्तत्त्वात्मिका ॥

महामाया—बिन्दुशिवतत्त्वादिपदवाच्या शुद्धाध्वोपादानभूता ॥

रोधशक्ति —पुरुषस्य ज्ञानशक्तिक्रियाशक्त्योराच्छादिका परमशिवीया शक्ति ॥

तत्त्वविभाग

विस्तरेण तु षट्त्रिंशत्तत्त्ववादोऽय सिद्धान्त । यथा—महा-प्रलये माया पुरुष शिव इत्यन्योन्य विभक्त तत्त्वत्रयमवशिष्यते । सृष्टिः शुद्धाध्वा कृच्छ्राध्वेति द्विविधा । कृच्छ्राध्वनि मयातत्त्व त्रिंशत्तत्त्वात्मक भवति । शुद्धाध्वनि महामायाभिधान बिन्दुपदवाच्य शिवतत्त्व शक्ति-तत्त्वसदाशिवतत्त्वेश्वरतत्त्वविद्यातत्त्वभेदेन चतुर्विधतत्त्वात्मना परिणम्य पञ्चतत्त्वात्मक भवति । तथा कृच्छ्राध्वनि त्रिंशत् तत्त्वानि शुद्धाध्वनि पञ्च तत्त्वानि पुरुषश्चैक इति षट्त्रिंत् तत्त्वानि ॥

परमशिवस्तु सर्वतत्त्वातीतः । तस्य तत्त्वगणनायां नास्ति प्रवेश । शिवतत्त्व तु अस्माद्विलक्षण जडात्मक शुद्धाध्वमूलकारणम् ॥

कृच्छ्राध्वनि त्रिंशत्तत्त्वानीमानि—माया कालो नियतिः कला विद्या रागश्चेति षट् तत्त्वानि । तत्र कालेन नियत्या च सहकृता

कला प्रकृतिमहदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपञ्चभूतभेदेन चतुर्विंशतितत्त्वात्मना परिणमते । तथा च त्रिंशत् तत्त्वानि ॥

आप्रलयं यत्तिष्ठति सर्वेषां भोगदायि भूतानाम् ।
तत् तत्त्वमिति प्रोक्त न शरीरघटादि तत्त्वमतः ॥ ७२ ॥

इति तत्त्वप्रकाशे भोजदेवः कथयति ॥

एतादृशत्रिंशत्तत्त्वात्मक पुर्यष्टकाभिधान सूक्ष्म शरीर प्रतिपुरुषमादिसर्गकाले भवति । आ च महाप्रलयात्तिष्ठति । इद तात्त्विक शरीरमित्युच्यते । स्थूल भौवन शरीरम् । आधिकारिक शरीर मन्त्रेश्वराणाम् । तत् शुद्धाध्वनिबन्धनम् । अत्रानभिव्यक्तसत्त्वादिगुणत्वात् प्रकृते. अव्यक्तमिति व्यवहार । अभिव्यक्तगुणत्वात् बुद्धयादिक व्यक्त गुणतत्त्वमिति च व्यवहार ॥

अत्र सर्वत्र सत्कार्यवादोऽभिमत. । यथोक्तम्—

शक्तिरूपेण कार्याणि तल्लीनानि महाक्षये ।
विकृतौ व्यक्तिमायाति सा कार्येण कलादिना ॥

इति सौरभेयागमवचनम् । मात्यस्यां शक्त्यात्मना प्रलये सर्व जगत् सृष्टौ व्यक्ति यातीति मायापदमपि विवृतम् ॥

ततश्च प्रागुक्तप्रमेयसङ्गहे निर्दिष्टेषु पाशपदार्थेषु पञ्चसु मलस्य पुरुषतत्त्वेऽन्तर्भावः । कर्मण. बुद्धितत्त्वे । माया महामाया पृथगेव तत्त्वभूते । रोधशक्ति· परमाशिवे इति निर्णय. ॥

अशुद्धतत्त्वनिरूपणम्

दर्शनान्तरे प्राकृताप्राकृततत्त्वविभागवत् अत्र शुद्धाशुद्धतत्त्वविभागोऽवधार्यते । मायाकार्य सर्वमशुद्धम् । महामायाकार्यं शुद्धम् । तत्र

मायापदार्थो निरुक्तः। सा हि सर्वशक्तिसमाहारात्मिका सर्वकारणावस्था वस्तुभूता ॥

कालो नाम क्षणदिनमासात्मकः प्रसिद्ध । शुद्धाध्वन्यपि काल-तत्त्व शुद्धमस्तीति केचिदाहुरघोरशिवाचार्यादय. ॥

नियतिः नियमनरूपा शक्ति । सा हि इद कारणमिदमेव कार्य जनयति नान्यत् इति नियमन, कर्मणां फलजननियमन, फलाना भोगनियमनमित्यादिरूपा शक्ति. । नियत्यभावे भोगादिव्यवस्थानुपपत्ति. । अदृष्टन्तु फलजनने कृतार्थम् । परमेश्वरस्तु तत्तत्तत्त्वद्वारैव सर्वकार्य-कारणम् । साक्षात्कारणत्वे सर्वतत्त्वाभावप्रसङ्ग· ॥

कला पुरुषस्य कर्तृशक्तिव्यञ्जिका काचिच्छक्ति· । नृणा मल कलयति व्यावर्तयतीति कला ॥

विद्या उद्बुद्धक्रियाशक्तिविशेषस्य पुरुषस्य विषयप्रकाशननिमित्त-भूता इन्द्रियादिकरणस्थानीया प्रकाशपदवाच्या ज्ञानशक्तिव्यञ्जिका शक्तिः । बुद्धितत्त्व हि सुखदु खादिरूपत्वात् ग्राह्य भवति । तस्मात् ग्रहणे करणभूता विषयावरणभङ्गकारिणीयं विद्या ॥

तथा च शब्दाद्यनुरक्तसुखदु खादिरूप बुद्धितत्त्व ज्ञानस्य साक्षाद्विषयः । शब्दादि परपरयेति विषयः द्विविधः । एवं विषयीभूत ज्ञानमपि सुखादिविषयावेदनरूपेण प्रमाण भवति । तादृशविषयवेदन-रूपेण फलमपि भवतीति द्विविधमुच्यते ॥

राग. आसक्तिः पुरुषप्रवृत्तिहेतु सामान्यत· । ज्ञानेच्छे तु विषयावच्छेदेन प्रवृत्तिहेतू । अनवच्छेदेन प्रवृत्तिहेतू राग. । इदमपि तत्त्वान्तरम् ॥

अत्र कालनियतिसहकृतयैव कलया प्रकृतिमहदहंकारादीनां चतुर्विंशतिविधतत्त्वानां समुदयः । तत्र राजसाहङ्कारात् प्रवृत्तिशीलत्वयुक्तया कर्मेन्द्रियाणामुदय इति केषांचिदाशयो विशेषांशः । एवमवकाशव्यूहनपचनसङ्गृहणधारणानि महाभूतकार्याणि । व्यूहनं नामावयवसयोजनम् ॥

शुद्धतत्त्वनिरूपणम्

तत्रादिकारण जडात्मक परिणामि शिवतत्त्वम् । तदेतत् व्यापकमेक निरवयव नित्य ज्ञानक्रियास्वभावमित्युच्यते—स्वकार्यभूतशुद्धाध्वभुवनप्राप्तानामवरमुक्तिभाजां ज्ञानक्रिये प्रकटयतीति । स एव बिन्दु । सैव ममाहाया ॥

तदेतत् परमशिवस्य परिग्रहशक्तिरित्युच्यते । परमशिवस्यानुग्रहेच्छां निमित्तीकृत्य जायमानः शान्त्यादिसुवनात्मक नादपदवाच्य· शिवतत्त्वस्य प्रथम परिणामः शक्तितत्त्वम् ॥

तत· ज्ञानक्रियाशक्ति निमित्तीकृत्य शक्तितत्त्वव्यवहितः परिणामः सदाशिवतत्त्वम् । तत्रैव स्थूलबिन्दो स्थूलनादस्य चान्तर्भाव· ॥

तत अशुद्धाध्वनि सृष्टिसहारादीना साक्षात् कर्तृभूतानामनन्तादीनामधिष्ठानेन परमशिवस्य क्रियाशक्तिबहुलमीश्वरतत्त्वम् । तत्रैव विद्येशानामनन्तादीनामन्तर्भावः ॥

ततः पञ्चम शुद्ध तत्त्व विद्याख्यम् । सप्तकोटिमहामन्त्राधिष्ठानेन परमशिवस्य ज्ञानशक्त्या प्रचुरम् । तत्रैव प्रागुक्तमहामन्त्राणा व्योमव्याप्तयादीना विद्याना कामिकादीनामष्टाविंशतितन्त्राणामन्तर्भावः । शक्त्यादितत्त्वेषु विचित्रभुवनादिसनिवेशास्सन्ति ॥

तथा च परमशिवस्य सदाशिवादिनैक्य नास्ति । शास्त्रेष्वैक्य-व्यवहारः शक्तिव्यापारनिबन्धन इति सिद्धान्त. ॥

तदुच्यते—

निमित्तमीश्वरस्तेषामुपादानं स विन्दुराट् ।
सा च कुण्डलिनी शम्भोः शक्तिः शुद्धा जडात्मिका ॥

इति । शिवशक्तिसदाशिवेश्वरतत्त्वचतुष्टय पुरुषप्रकृतिमहदहङ्कारपदैरपि क्रमाद्व्यवह्रियते ॥

पुरुषतत्त्वनिरूपणम्

पुरुषस्तु—ज्ञातृत्वकर्तृत्वभोक्तृत्वशक्तिसंपन्न· । स हि चैतन्य-मात्रस्वरूपोऽपि यदा भोक्तृत्वावस्थावान् भवति तदा तत्त्वान्तरव्यप-देश्यो भवति । स पशुस्त्रिविध —विज्ञानाकल प्रलयाकल सकल-श्चेति । आद्य मलमात्रयुक्तः, एकबन्ध इत्युच्यते । द्वितीय. मल-कर्मयुक्त. द्विबन्ध इत्युच्यते । तृतीय मलकर्ममायायुक्तः बन्धत्रययुक्त इत्युच्यते ॥

प्रथमवर्गे पक्वमलान् परमशिव बैन्दवशरीरयोगिन. कृत्वा विद्ये-शत्व सर्वज्ञत्व शुद्धाध्वाधिष्ठातृत्व पञ्चकृत्याधिकार च प्रददाति । अप-रान् सप्तकोटिसङ्ख्याकान् महामन्त्राधिदेवान् विद्यातत्त्वनिवासिनः करोति। तत्रार्ध परमशिवस्य जगदनुग्रहे सहायभूत सत् अधिकारावसाने प्रलय-दशाया मोक्ष गच्छति । इतरदर्ध सृष्टिपर्यन्त स्थित्वा परावर्तते । द्वितीयवर्गे पक्वमलानां मोक्षः इतरेषां ससार । तृतीयवर्गे संसार एव । ससारिणां सृष्ट्यादौ सूक्ष्मदेह., स्थूलदेहश्च ततो भवति ॥

ससारिष्वपि कांश्चिन्महाभागान् मन्त्रमहेश्वरान् भुवनपतीन् अणि-मादिसिद्धांश्च करोति । काश्चिच्चानुगृह्य अष्टादशशतसङ्ख्यान् मन्त्रेशान् करोति । विद्येश्वराराधनेन दीक्षादिविधिना च येऽत्यन्तपक्वमला ते

मोक्षं यान्ति । न तु ज्ञानमात्रेण मलानिवृत्ति. । अपि तु दीक्षादिविधि-समासादितपरमाशिवानुग्रहेणैवेति निर्णय· ॥

मन्त्रमहेश्वरपदाभिधेया विद्येश्वरास्ते अनन्तादय । ते हि—अनन्त सूक्ष्मः शिवोत्तम. एकनेत्र. एकरुद्रः त्रिमूर्तिः श्रीकण्ठ· शिखण्डीत्यष्टौ, इश्वरतत्त्वनिवासिन· ॥

सप्तकोटिमहामन्त्रा अपि पशव एव सर्गादावश्वरानुगृहीतमहिमानः । वाच्यवाचकयोरभेदोपचारात्तेषां मन्त्रा इति व्यवहार । मननात् त्राणाच्च । त एव हीतरेषामाराधनेन दीक्षादिना च विविधा सिद्धि प्रयच्छन्ति । शुद्धाध्वनि स्थिता अवरमुक्तिभाज । परमशिवसाम्यमापन्ना· परमुक्तिभाजः । ततश्च—मन्त्रमन्त्रेश्वरमन्त्रमहेश्वरादय लोकपालादयश्चाधिकारिका अवरमुक्तिभाज ॥

अवरमुक्तिभाजा महामाया तिरोधिशक्तिरिति पाशद्वयमेव । तदपि द्वय न मोहकम् । अपि तु बोधकम् । तत्रैव तत्त्वबोधेन निरतिशयवैराग्येण च परममुक्तिलाभ· ॥

परमशिवनिरूपणम्

स हि परमशिव. चिद्घनत्वात् तच्छक्तीनामपि ज्ञानक्रियादिरूपाणां चिदात्मकत्वमेव । न जडस्वरूपत्वम् । माया महामाया च परिग्रहशक्तिरित्युच्येते । तदेतत् द्वयं बाह्य जडात्मकम् ॥

शुद्धाध्वनि साक्षात् परमशिव· निमित्तम् । शिवतत्त्वमुपादानम् । अन्यत्रानन्तादिद्वारा निमित्तम् । मायोपादानम् । शुद्धाध्वनि भुवनाद्युत्पादन तद्वासिनां विद्याविद्येश्वराणां च बैन्दवशरीरप्रदानमित्यादिकः साक्षात्परमेश्वरव्यापार. ॥

उभयोरप्यध्वनोः सृष्टयादय पञ्च व्यपाराः सन्ति । सृष्टि स्थितिः सहारश्च प्रसिद्धाः । अनुग्रहः चेतनाचेतनयो , चेतनाना भोगमोक्षप्रदानम् । अचेतनानां स्वस्वसामर्थ्यरूपप्रवृत्तेः प्रकाशनम् । तिरोभावः बन्धः । तथा च भोगेन कर्मक्षय सम्पाद्य मोक्ष प्रयच्छति परमशिवः ॥

तस्य परमशिवस्य मलमायादिपाशजालासम्भवेन प्राकृत शरीर न सम्भवति । किन्तु शाक्त शरीरम् । शक्तिरूपैरीशानादिभि पञ्चभि मन्त्रै· मस्तकादिकल्पनायामीशानमस्तक तत्पुरुषवक्त्रः अघोरहृदय वाम-देवगुह्य. सद्योजातपादः परमशिव. ॥

ततश्च अस्मदादिशरीरविलक्षण अनुग्रहतिरोभावसृष्टिस्थिति-संहाररूपकृत्यपञ्चककारणभूत शरीर परमशिवस्य शक्तिमयम् ॥

मलाद्यसम्भवाच्छाक्तं वपुः नैतादृशं विभोः ।
तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः ॥

इत्युच्यते । एव निराकारे परमशिवे ध्यानपूजाद्यसम्भवेन साधकानामनु-ग्रहाय नानाविधदेवाद्याकारशरीरपरिग्रहणमप्यवतारपर्यायमस्ति ॥

मुक्तात्मानोऽपि शिवा एव । तथापि ते आदिमुक्ता. । अनादि-मुक्तस्तु परमशिव एव । अत एव परमपदविशेषणम् ॥

प्रत्यभिज्ञा

अनयैव प्रक्रियया केचिन्माहेश्वरा प्रत्यभिज्ञादर्शनमिति किञ्चि-द्दर्शन प्रचारयन्ति । तदेतत् शिवाद्वैतमित्यापि व्यवहर्तु शक्यते । इद-मेव मूल स्यात् आधुनिकशिवाद्वैतदर्शनस्य । अस्मिन् हि दर्शने सापेक्षकारणवाद । स हि सर्वस्य प्रपञ्चस्य सविदैक्यवाद ब्रह्मपारिणाम-वादवत् । जडस्य कारणत्वमेव न सम्भवति । अत सर्व कारण

स्वेच्छयैव कार्यात्मना परिणमते इत्ययं वाद· सापेक्षकारणवाद इत्यर्थ । तदुक्तम्—

इत्थं तथा घटपटाद्याकारजगदात्मता ।
तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रिया ॥
तस्मिन् सतीदमस्तीति कार्यकारणताऽपि या ।
साऽप्येपेक्षाविहीनानां जडानां नोपपद्यते ॥

इति । तथाचाय परमेश्वरपरिणामवाद भेदाभेदलक्षण. ॥

अत्र केवलमागमोक्तमेव दीक्षादिकं कर्म कृत्वा ज्ञानशक्ति-प्रचय सपाद्य परमशिवोऽहमिति प्रत्यभिज्ञामात्रेण परमशिवभावापत्ति-लक्षण मोक्ष प्राप्यते इति सिद्धान्तः यथा वाक्यार्थज्ञानमात्रेण भ्रमरूप-सर्वबन्धनिवृत्तिरित्यौपनिषदः सिद्धान्त. ॥

अत्र सिद्धान्ते ईश्वरप्रत्यभिज्ञासूत्र तद्वृत्ति तद्विमर्शिनी इत्यादय प्रबन्धा बहवस्सन्ति । काव्यप्रकाशाख्यालङ्काराप्रबन्धप्रणेता मम्मटोपाध्यायोऽपि शैवदीक्षया सस्कृत शैवसिद्धान्तनिष्ठ प्रत्यभिज्ञा-सूत्रविमर्शिन्या. व्याख्याताऽभूदिति तच्चारित्रे मुम्बापुरीमुद्रितकाव्यप्रका-शोपोद्घाततोऽवधार्यते । अतएव काव्यप्रकाशारम्भे—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥

इतिपद्ये नियतिपद प्रयुक्तम् । तच्च पद माणिक्यचन्द्रसूरिविरचिते सङ्केतनाम्नि व्याख्याने विवृतमेवम्—

"नियति सर्वपदार्थानां निजनिजसस्थानमानवर्णादिव्यवस्था नियमहेतु दैवपर्यायान्तर पञ्चभूतपञ्चकर्मेन्द्रियपञ्चबुद्धीन्द्रियपञ्चविषय-तत्त्वादिशिवतत्त्वपर्यन्तशैवशास्त्रोक्तषट्त्रिंशत्तत्त्वमध्योक्त तत्त्वान्तरम्" इति ॥

तस्मादय शैवसिद्धान्तनिष्ठ इति प्रथमपदेनैव सूच्यते । प्रायः आलङ्कारिका प्राचीनाः प्रसिद्धाः अभिनवगुप्तादयोपि शैवसिद्धन्त-निष्ठा एवेति च विज्ञायते । यतः—प्रत्यभिज्ञासूत्रविमर्शिन्या. अभि नवगुप्ताचार्योऽपि ध्वन्यालोकव्याख्याता व्याख्यामरीरचत् ॥

महाकाव्याप्रणेतारः कालिदासभवभूत्यादयश्च महाकवयः शैव-सिद्धन्तनिष्ठा एवेति स्फुटम् ॥

एव प्रत्यभिज्ञादर्शन प्रसिद्ध बहुदर्शनसङ्कीर्णमिति दिङ्मात्रमुप-दर्शितम् ॥

तदित्थं शैवसिद्धान्तविमर्शे दिक्प्रदर्शिता ।
लक्ष्मीपुरंश्रीनिवासविपश्चिच्चक्रवार्तिना ॥

इति दर्शनोदये शैवदर्शनं नाम षष्ठ परिच्छेद

———

कार्यकारणभावमीमांसा

अवतरणिका

कार्यकारणभावाभिप्रायविज्ञानमूलकः ।
मतभेदविवेकोऽतः कार्यकारणचिन्तना ॥

प्रथम तावदिदानीमिदमवधारणीयम्—इह खलु जगत्या सर्वेऽपि पदार्थास्समुपलभ्यन्ते चेतनाचेतनलक्षणा प्रतिक्षणपरिणामिन विविध-विचित्ररचनाविशेषा. नियतपौर्वापर्यलक्षणस्थितिमन्तः शृङ्खलिता इव प्रवहन्त इव च ॥

स चाय प्रवाह· जगद्व्यापार इति ससार इति व्यवहार इति लोकयात्रेति प्रपञ्च इति सम्प्रदाय इति च विवक्षाविशेषै सामान्यतो व्यपदिश्यते विपश्चिद्भि । तमेव च प्रवाह विवर्त स्वभाव. परिणाम. विकारः धर्मः अवस्था पर्याय उत्पत्ति अभिव्यक्तिः इत्यादिभिश्शब्द-भेदैः ते ते दार्शनिका विवेचयन्ति ॥

सेय व्यापारपरम्परा तत्तद्वस्तुस्वभावमात्रपरतन्त्रेति आकस्मिकता-वादिनो लौकायता. प्राहु. । चेतनात्मकवस्तुगतभोगापवर्गलक्षणपुरुषार्थ-मात्रपरतन्त्रेति अर्थस्वभाववादिन· कापिलास्सत्कार्यवादिनः । तादृशपुरु-षार्थस्वामिभूतभोक्तृवर्गीयप्रयत्नपरतन्त्रेति सापेक्षवादिन. असत्कार्यवादिन. आरम्भवादिनस्तार्किकाः । तादृशभोक्तृवर्गीयादृष्टलक्षणप्रयत्नसापेक्षस्य सर्वज्ञस्य सर्वशक्तस्य परमकारुणिकस्य परमेश्वरस्य सङ्कल्पायत्तेत्यौप-निषदा. प्रायेण सत्कार्यवादिन परिणामवादिन । कार्यकारणभावो दुर्नि-रूपः काल्पनिक इति विवर्तवादिन इति सामान्येन पञ्चतयी गतिः ॥

तासामुपव्याख्यानम् । तत्रेत्थमध्यवसुः स्वभाववादिन.— चेतनस्य पुरुषार्थभागित्वलक्षण सान्निध्य करणव्यापारानुकूलकृत्यौपयिक-बुद्धिमत्त्वलक्षण पौरुषमधिष्ठान वा विनैव कान्तारगिरिगह्वारादिषु विविधविचित्रभूतपरिणामदर्शनात् कण्टकतैक्ष्ण्य मयूरचित्रक निम्ब-रसादिपरिणामस्य बीजशक्त्येकायत्तत्वानुभवाच्च तत्तद्वस्तुस्वभावशक्ति-रेवाल नियतकालदेशस्वभावा जगद्व्यापारपरम्परां निर्वोढुमिति न चेतनो नाम कश्चित्, न च तत्सान्निध्य, नापि तदधिष्ठान, नापि कर्म, नैव च किञ्चित् सहकारितया स्वीक्रियत इति ॥

कापिलाः पुनरेतादृशात्केवलात् बाह्यात्सिद्धान्तात् त्रस्यन्त पुरुषञ्च कूटस्थ कल्पयन्त तस्य निर्विकारत्वेऽपि तत्त्वान्तरपरिणामापत्त्यनर्हसजा-तीयचिद्रूपपरिणामलक्षण भोक्तृत्व परमार्थमभ्युपगच्छन्त अनभ्युप-गच्छन्तश्च केचित् तदीयभोगापवर्गप्रयुक्तमपि जगद्व्यापार स्वभावपक्ष एव प्राय प्रावेशयन् ॥

अथ तार्किकादय स्वभाववादे पौरुषप्रयत्नस्य सर्वानुभवसिद्धस्य वैफल्य लौकिकवैदिकविधिनिषेधशास्त्रानर्थक्यमित्याद्यनुपपत्तिपर्यालोचनया बाह्यव्यापारमात्रे आन्तरचेतनप्रवृत्ते· निदानतामपेक्षमाणा कर्मणः कर्म-साध्यतानिराकरणेन स्वभाववादं दूरीकुर्वाणा. "संयोगाभावे गुरुत्वा-त्पतनम्, नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनं, प्रयत्नविशेषान्नोदन-विशेष" इत्यादिना वैशेषिकसूत्रेण कर्मणा प्रयत्नान्वयव्यतिरेकमध्यव-स्यन्ति। "आत्मेश्वरूर्ध्वज्वलन वायोस्तिर्यग्गमनमणूना मनसश्चाद्य कर्मा-दृष्टकारितम्" इत्यादिना अनुपलब्धप्रयत्नसाध्यताकेषु व्यापारेष्वदृष्ट-द्वारकपौर्वकालिकप्रयत्नसाध्यताञ्च कल्पयन्ति । सङ्गृह्णन्ति च नव्यास्त-त्सिद्धान्तमित्थ वैशेषिकसूत्रोपस्कारवृत्तौ —

आत्मजन्या भवेदिच्छा हीच्छाजन्या भवेत्कृतिः ।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया ॥ इति ॥

अत एवचाख्यातार्थः व्यापारसामान्य प्रयत्नसामान्यमित्यादिविवादावकाश इत्यन्यत्र विस्तरः ॥

औपनिषदास्तु—न्यायसिद्धस्वतःप्रामाण्यशास्त्रैकप्रमित परमेश्वर, कृत्स्न्यस्य जगद्व्यापारस्य पुरुषाधीनस्यापि परमेश्वरसङ्कल्पायत्तस्वरूपस्थितिप्रवृत्तिकत्वं चाभ्युपगच्छन्तः एवं चिन्तयन्ति "कर्ता शास्त्रार्थवत्त्वात्, परात्तु तच्छ्रुतेः, कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः, वैषम्यनैर्घृण्ये न सापेक्षत्वात्, लोकवत्तु लीलाकैवल्यम्" इति बादरायणीयनिर्णयम् ॥

विवर्तवादिनस्तु परमार्थं किञ्चिदाधिष्ठान स्वीकृत्य सर्वमाविद्यकमपि अद्वैततादात्म्यानन्यत्वादिपदव्यपदेश्यं सत्कार्यवादमेव ज्ञातसत्त्या व्यवस्थापयन्ति । शून्यवादिनस्तु वैभाषिकसम्प्रदाये आर्यसत्यवादिसम्मत प्रतीत्यसमुत्पादलक्षण कार्यकारणभावमपि दुर्निरूपामिति नि.स्वभावलक्षणशून्यतायामन्तर्भावयन्ति ॥

प्रकृतविचारविषयभूतः कारणपदार्थः समवायिकारणलक्षणः उपादानाख्यः, यस्माज्जगत्कारणवादिनः सामान्यतश्चतुर्विधा एव विज्ञायन्ते—शून्यवादिनः, स्वभाववादिनः, अणुवादिन', ईश्वरवादिनश्चेति । सर्वेषामपि दार्शनिकानां जगदुपादानमेव हि विजिज्ञासितम् ॥

कार्यकारणभावखण्डनयुक्तय

अत्र विषये चार्वाकमाध्यमिकयोरविशेषात् उभयसम्मतयुक्तिसंग्रहः । अत्राकस्मिकतावादिनां चार्वाकाणामयमभिप्रायः अकस्मादेव कार्यं भवतीति । तदयमर्थः—प्रत्यक्षपरिकलितोपादानशक्तिलक्षणवस्तु-

स्वभावेनैव परिणामपरम्परादर्शनात् स्वभाववादः, तत्र च नियतचेतनादि-निमित्तादर्शनान्निरपेक्षवाद , नियतनियामकादर्शनाद्यदृच्छावादः, अप्रार्थितान्यविज्ञातान्येव प्रायेण कार्याण्यनुभूयन्त इति प्रसङ्गवादोऽनुषङ्गवादो वा, देशस्वभाववत्कालस्वभावकल्पना कदाचिद्वादः, एवमादीनां सर्वेषां वादानां समाहार अकस्माद्वाद इत्याकस्मिकतावादिनो लौकायताः लोकशब्दोक्तप्रत्यक्षप्रमाणैकशरणतया आयतशब्दोक्ता अधिका इति प्रथिताः॥

(१) अथायमस्य प्रपञ्चः—परिवेषादिषु नियतपूर्वसत् किञ्चिन्न दृश्यते। न च घटादिदृष्टान्तेन तदनुमेयम्, विपरिवर्तस्य दुर्वारत्वात्। अतो दृश्यमाना अप्यवधय केषुचिद्रसोत्पत्तौ रूपादिवद्यदृच्छासिद्धा इति ॥

(२) पूर्वत्वमेव कारणस्य दुर्निरूपम् । पूर्वकालवृत्तित्व हि तत् । काले च पूर्वत्वमुपाधिकृतम् । स चोपाधिर्यद्ययमेव, तदा तदधीनं कालस्य पूर्वत्व, कालाधीन चोपाधेरित्यन्योन्याश्रयः । अन्यापेक्षायां चक्रकम्, अनवस्थाऽपि ॥

(३) यदि कार्यं कारकव्यापारात्पूर्वमस्ति तदा पूर्वसिद्धगगनादिवत् किमपि कार्य न स्यात् । अथ तदा नास्ति तदाऽपि खपुष्पवत् न कार्यम् । न चासतः सत्त्वापादनसम्भवः । न हि नलिं शिल्पिसहस्रेणापि पीतीकर्तुं शक्यम् ॥

(४) कार्यं कारणेन सह, पश्चाद्वा जायते ? आद्ये किं कस्य कारणं कार्य वा स्यात् । द्वितीये हेतुः स्वेन प्राप्त साधयेदप्राप्तं वा । आद्ये प्राप्तत्वादेव पूर्वसिद्धेर्न साध्यत्वम् । न चोत्तरकालीनस्य पूर्वकालीनेन प्राप्ति', उभयस्वरूपसिद्धयपेक्षत्वात्तस्या '। आप्राप्तोत्पादने सर्वस्मात्सर्वमुत्पद्येत, प्रकाश्यमप्राप्य वा दीपः प्रकाशयेत्, दाह्यमप्राप्य वा दहनो दहेत् ॥

(५) घटो जायत इत्येतौ तावन्न पर्यायौ, सह प्रयोगात्। अतः कार्यस्वरूपातिरिक्त जन्म। तच्च जन्यमजन्य वा? आद्ये जन्मनो जन्यत्वं हि जननकर्मतया, अतस्तस्या अपि जन्म स्वीकर्तव्यम्, एव तस्यापीत्यनवस्था। अजन्यत्वे तज्जन्मनोऽनादित्वात् तद्वतो घटादेरपि तथात्व स्यात्। तथा च कार्यत्वक्षतिः स्यादिति॥

(६) कारणात्कार्यं भिन्नमभिन्नं वा? आद्ये गवाश्वयोरिव कार्यकारणता न स्यात्। अनन्तरे कथ सिद्धस्य साध्यत्वम्॥

(७) किञ्चित्कारेण वा अकिञ्चित्कारेण वा कारणत्वम्? पूर्वत्र हेतूनामपि किञ्चित्कारजनने किञ्चित्कारान्तरापेक्षयाऽनवस्था। उत्तरत्रातिप्रसङ्ग इति॥

(८) कार्यत्वकारणत्वयोः स्वभावत्वे पटत्व नीलत्वादिवत् सर्वे प्रत्यपि स्याताम्। अस्वभावत्वे कस्य चिदपि न स्याताम्॥

(९) कार्यकारणभावस्य द्विष्ठत्वे द्वयोरपि द्वैरूप्यादविशेष। एकस्थत्वेऽपि यत्रैकस्मिन् तत्रैवमिति॥

(१०) किञ्च—न तावद्दण्डादयः मृदाद्यवयवाश्च प्रत्येक घटाद्युत्पादनशक्ताः, अदर्शनात्। अत एव न समुदिता अपि। न हि नद्यस्समेत्यापि दहेयु, सिकतास्सम्भूय तैल जनयेयु। शक्तानामेव सम्भूय करणे सर्वे कृतकराः स्युः॥

(११) पूर्वं कारणमित्युक्ते नष्ट कारणमित्युक्त स्यात्। दृष्टा च मृदिते मृत्पिण्डे घटोत्पत्तिः। तथा च स्वात्मानमलभमानस्य कथ परसाधकत्वम्। अन्यथा चिरातिक्रान्तस्य च स्यादेव कारणत्वम्। तुच्छस्य च कारणत्वे कार्यमपि तुच्छ स्यान्नित्य वेति॥

(१२) कार्यस्य कादाचित्कत्वं स्वभावो न वा? आद्ये नित्यस्वभाववत् आकाशादेराकाशत्वादिवत् निरपेक्षमेव स्यात्। द्वितीये कथमतत्स्वभाव कारणसहस्रेणापि तत्स्वभावतां नतु शक्यः। स्वभावस्य च हेतुमत्त्वे निर्हेतुकमिति किञ्चिन्न स्यात्। अतो नित्यस्वभाववन्नियतकालस्वभावता कार्यस्य स्यात्॥

(१३) परमाणव स्वांशतस्संयुज्यावयविनमारभेरन्। तदशोऽवयवरूपः? तदन्यो वा? आद्ये तस्यापि तथेत्यनवस्था। अन्यस्तु स्वाभाविक औपाधिको वा? पूर्वत्र भिन्नाभिन्नता स्यात्। उत्तरत्र उपाधिसम्बन्धेऽप्यशभेदो दुर्वचः। परिशेषात्तन्निरपेक्षसयोगै अन्योन्यानाघातभागभेदरहितैरणुभि. आरम्भ स्यात्। त्यक्तस्तर्हि सप्रतिघत्वविरोध.। ततश्च सर्वेषु परमाणुषु एकपरमाणुप्रदेशमात्रावस्थितेषु स्वाधिकदेशव्यापिकार्यारम्भो न स्यात्। दिक्सयागायत्तोऽपि भागभेदः सावयवेष्वेव दृष्टः॥

(१४) किञ्च—बुद्धिस्तावत्सर्वतन्त्रसिद्धा। सांवृतीत्यपि हि तां माध्यमिका मन्यन्ते। सा चैकाऽप्यनेकविषया दृष्टेष्टा च। निरशा सा प्रत्येक कात्स्न्येन अशतो वा विषयीकुर्यात्? नाद्यः अन्यानुल्लेखप्रसङ्गात्। न द्वितीय· निरशत्वादेव। तत्रचेत्कश्चित्समाधिः, अणुष्वपि तथा स्यादिति नात्र प्रतिबन्दि। विषयित्व हि अशानपेक्षतयैव दृष्टम्। अतो यथोपलम्भ एकवत् अनेकोऽपि विषय. एकस्या बुद्धे। एवमेकस्य निरशस्यानेकबुद्धिविषयत्वमपि निरूढम्। अवयव्यारम्भकसयोगस्तु न त्वयाऽपि क्वचिदंशनिरपेक्ष उक्तः। क्वचिद्विशेषाङ्गीकारे नियामकाभाव। अथ सङ्घातारम्भकसंयोगेऽपि समः प्रसङ्ग इति। न समः, संयोगसाध्यसङ्घाताभावात्। तत्स्वीकारे ह्यवयवविवाद एव वरम्॥

(१५) किञ्च—सयोगस्तर्हिप्रतिबन्दिः स्यात् । स चैकोऽनेकवृत्ति-स्सन् अशानशविकल्पदौस्थ्यमतिक्रान्तः । न ह्यसौ नास्त्येव, सिद्धयोस्साध्यतया दृष्टेरिति । तदपि न—विषयित्ववन्निस्तारात् । सोऽपि हि द्वयोः न स्वांशाभ्या वर्तत इति दृश्यते । एव स्वामित्वादयोऽपि न प्रतिबन्दि॰ ॥

(१६) किञ्च—अस्तु तर्हि सयुक्तप्रतिबन्दिः । मूर्तैर्विभूनां सयोगोऽस्ति न वा ? न चेदन्यतरकर्मजसयोगलोप॰ । अस्ति चेद्यदि कात्स्न्येन विभुद्रव्यमेकेन स्पर्शवता सयुज्यते, कथ स्पर्शवदन्तरेण तस्य सयोगः स्यात् । अशतश्चेत्सावयवत्वप्रसङ्ग॰ । न हि विभुद्रव्यस्यावयवित्व सङ्घातत्वं वा सुवचम् । औपाधिको विभूनामशभेद इति चेन्न—उपाधिसयोगेपि अशादिविकल्पानपायात् । निरशेपि सयुज्यमान स्वरूपेण तद्भेदोपाधिरिति चेन्न—स भेद उपाधिना छिन्ने चेत् अवयवविश्लेषात्मा स्यात् । अच्छिन्ने तु भेदाभेदवाद एव शरणम् । निरशानामपि स्वभावत एव विभूनामनेकमूर्तसयोगक्षमत्वमिति चेत् अणूनामपि तदस्तु अविशेषात् ॥

(१७) वृत्त्यनुपपत्तिर्यथा—यदि प्रत्यवयव अविभागेनावयवी वर्तते तदैकावयवदर्शनेपि अवयव्युपलभ्येत जातिरिव प्रत्याधारम् । अथ विभज्यावयवातिरिक्ताशभेदेन, अनवस्थापात ॥

(१८) तस्मात्संसर्गससर्गिद्रव्यदेशकालादिविशेषात् अवयवि परिषद्राशि वनी यूथ पङ्क्ति मण्डल सेना व्यूह पूर्ण चतुरश्रादिवाद इति नातिरिक्तावयविवादस्साधीयानिति ॥

कार्यकारणभावसमर्थनयुक्तय

(१) अथ सापेक्षवादिनामत्र समाधानसङ्ग्रहः—यदि परिवेषादीनामपि कादाचित्कत्व दृष्ट, तत्र निपुण निरूपयतां देशकालादृष्टाविशेषादातपादिकारणविशेषस्सिद्ध॰ ॥

(२) अत्र द्वितीयामाशङ्कामाशङ्कमानेन किं पौर्वापर्यमेव न दृष्टम्, दृष्टमपि वा बाधितम्। नाद्य स्वाभ्युपेतलोकव्यवहारविरोधात्। न द्वितीयः सर्वेषां नित्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात्। अत काले सत्यसति वा क्रमस्तावदुरपह्नव· ॥

(३) यदत्र पूर्वमसत्त्वे कार्यत्व न स्यादिति। तद्विरुद्धभाषितं, प्रागसत्त्वविशेषित सत्त्वमेव हि कार्यत्वम्। तत्र प्रागसत्त्वे प्रागसत्त्वमेव न स्यादिति वा तद्विशिष्ट न स्यादिति वा सत्त्वमात्र न स्यादिति वा प्रसङ्गार्थ स्यात्। तत्र न प्रथमः, कस्यापि स्वाभावेन व्याप्तयभावात्, अन्यथा शून्यवाद एव स्यात्। न द्वितीयः तदसत्त्व एव तद्विशिष्टसिद्धेः। न हि विशेषणसत्त्व विशिष्टविरोधि। न तृतीयः असत्त्वस्य स्वकालत्वेन विरोधग्रहणात्, अन्यथा देशान्तरसत्त्वेऽपि विरोधप्रसङ्गेन स एवान्त्य बौद्धपक्ष· स्यात् ॥

(४) यत्तु पश्चाद्भाविनः कारणप्राप्तिर्नास्तीति, तत्र पौर्वापर्यलक्षणा प्राप्तिः दृष्टत्वादनिवार्या। सयोगलक्षणा तु मा भूदनङ्गत्वात् प्रकाश्यदाह्यादिषु च यथादर्शन कारणानां मिथः प्राप्तिरेवाङ्गम्, न तु कार्येण ज्ञानेन सह भस्मादिना वेति ॥

(५) यस्तु जन्मनो जन्यत्वाजन्यत्व विकल्पेन अतिप्रसङ्ग उक्तः, नासाववस्थावादिना युक्तदोषः, न हि तेऽभिव्यक्ति वा कारणसमवायादिकं वा जन्मेति ब्रुवन्ति, किन्तूपादानावस्थाविशेषम्, ईदृशस्य जन्मनः उपादानावस्थान्तरसाध्यत्वे कारणानवस्थामात्रमापततीति सा च न दोष इति सर्वाविगीतम् ॥

(६) कार्यकारणयोर्भेदाऽभेदविकल्पोऽपि नावकल्पते, कारणात्कार्यस्य भिन्नस्यैव उत्पत्तिदर्शनात्।

अन्यथा बुद्धिबोध्यादौ भिन्नत्वादिविकल्पतः ।
बोध्यत्वादिक्षतेर्न स्यात् स्वमतस्थापनाऽपि वः ॥ इति ॥

(७) किञ्चित्कारादिविकल्पोऽप्येव समाधानेन प्रशाम्यति । यथा—यत्र किञ्चित्कारेण हेतुत्व दृष्ट, यथा काष्ठादे· ज्वालादिना तत्र तथा । नचानवस्था, हेतुसम्पत्तिपरपराया·दोषत्वाभावात् अतिरिक्तस्यात्रानिरूपणात् । यत्र तु द्वारनिरपेक्ष हेतुत्व, तत्रापि दर्शनबलात्किंचित्कारान्तर न जनयितव्यम्, यतोऽनवस्था स्यात् । नचातिप्रसङ्ग , नियतपूर्वत्वग्राहिणा प्रत्यक्षेणैव तन्निवारणात् । अन्यथा तदपि ते प्रमाण न स्यादिति विश्वापह्नव ॥

(८) कार्यकारणयोः स्वभावत्वादिविकल्पोऽपि नियतप्रतिसम्बन्धिकस्वभावत एव तदुभयसिद्धेर्निरस्त· । दण्डादिकार्यत्वं घटादिकारणत्व वा नीलादिवदेव पुरुषभेदेऽप्यविपर्यस्तमेव ॥

(९) यम्तु द्विष्ठत्वादिविकल्पस्सोऽप्येव समाधेय·—कार्ये कार्यत्वं कारणे कारणत्वञ्च वर्तते । तथाऽप्यन्योन्यनिरूप्यतया सम्बन्धव्यवहारादिसिद्धिरिति ॥

(१०) अथ च योऽय प्रत्येकसमुदायशक्तिविकल्प , अत्रोच्यते—समुदिताना कार्यकरत्वमेव हि प्रत्येकमपि हि शक्ति । कथमत्र वियुक्तै कार्यकरण, कथ वा समेतेषु कृतकरता । अतश्शक्तस्यापि सहकार्याकाङ्क्षायामतिप्रसङ्गश्च निरस्त , यावत्कार्यसिद्धि नियतविषयत्वात्तस्या इति ॥

(११) येय कारणस्य पूर्वत्वानुपपत्तिरुक्ता, तत्रेत्थमुपपत्ति — पूर्वक्षणसत्त्वमेव हि कारणस्य कार्योपयोगि, न च तत्तदा नास्ति । कार्यक्षणे तु कस्यचिदसत्त्वं न कारणत्वविरोधि । पूर्वं नष्टमित्यप्यसाधु, स्थिरवादे तदयोगात् । पिण्डस्य तु न साक्षात्कारणत्वम् । न च पिण्डः तद्ध्वंसो

वाऽत्यन्ततुच्छ , स्वकाले सद्भावात् । कालान्तरासत्त्वेन तुच्छत्वे प्रत्यक्ष-विषयोऽपि तथा स्यात् । तथाचेय माध्यमिकगतिः ॥

(१२) यस्तु कादाचित्कत्वे स्वभावविकल्प , स इत्थ प्रति-वक्तव्य । तथाहि—न हि यत·कुताश्चिदनन्तरमनेन भवितव्यमिति कादाचित्कत्वम् , अनियमादृष्टे , अस्मादनन्तरमेवइ दमिति कालविशेष-व्यवस्थादृष्टे । उक्तनियमानभ्युपगमे सर्वत्र सर्वदा सर्वत कार्य स्यात् । न हि धूमादिना यदाकदाचिद्भवितव्यमिति अस्य कादाचित्कत्व नियम्यते । तथासति गर्दभादेरनन्तर तदुपलब्धिर्वा सामग्र्यनन्तरमनुप-लब्धिर्वा स्यात् ॥

अथ कादाचित्कस्वभावस्य नित्यस्वभावदृष्टान्तोऽपि वैषम्य-निरूपणेन प्रत्याख्यायते । यथा—कार्यस्य निर्हेतुकत्व सतोऽसतो वा ? पूर्वत्र नित्यता, अन्यत्र तुच्छता वा स्यात् , निरवधित्वात् गत्यन्तरविरहात् ॥

(१३) योऽय परमाणूनामारम्भकत्वानुपपत्तिलक्षण· औलूक्योपा-लम्भ , स एष "महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्" इति बादरायणा-चार्यैस्सूत्रित । तस्याय भाव —अनन्यपरशास्त्रसिद्धेष्वर्थेषु "श्रुतेस्तु शब्दमूलत्वात्" इति न्यायेन गत्यन्तराभावे काचिद्गमनिका स्वीकार्या । अनुमेयेषु तु यथादृष्टान्त सिद्धि , अन्यथाऽतिप्रसङ्गात् । ततश्चा-वयविवादिनामवयवा स्वभागैर्मिथस्सयुज्यावयविनमारभन्त इति सिद्धा-न्त· । एतच्च द्व्यणुकावधि निर्विघातम् । द्व्यणुकारम्भे तु निरवयवा अणवः अवयवा इति कल्पितम् । तत्राय प्रसङ्गावतार । तथाचातिरिक्तावय-विवादिनामेष प्रहार , नत्ववस्थालक्षणपरिणामवादिनाम् ॥

स्वलक्षणसमुदायवादिनाऽपि नैरन्तर्यरूपोऽतिशय कश्चिदिष्यते । अन्यथा दूरस्थवदेकताभ्रान्ति पुञ्जबुद्धिर्वा न स्यात् । अवयविवादि-

नाऽपि विभूनामणूनाञ्च नित्यानामपि हेतुभेदैरवस्थान्तरापत्ति· स्वीकृतैव। सर्वद्रव्यस्वरूपानित्यत्व तदवस्थाभेदश्च वदतामपि तथा कि न स्यात्। सयुक्तावस्था हि परिणाम । नित्यानित्यविभागस्तु द्रव्यतदवस्थयोस्तथाभावादेव। द्रव्यविवक्षायान्तु अवस्थाविशिष्टवेषेणानित्यत्वव्यवहार इति ॥

येयमधिकारम्भाऽनुपपत्ति तत्रेदमवधेयम्—सहतैरेवाणुभिरवयववत् द्वित्वादिवच्च परिमाणान्तरसृष्टिरुपेयते, अतो न स्थूलधीविरोध । एकस्याप्रत्यक्षत्वेऽपि समुदायवशात् दृश्यत्वोपपत्ते· । यथा एकस्य दवीयस केशनीहारादेः अदर्शनेऽपि सहताना दृश्यत्वम्। एकैकस्याप्यासत्तौ दर्शनाद्योग्यत्वमस्तीति चेदणूनामपि त्रसरेणुरूपाणां सामग्रीसम्भवे तथैव स्यात्। एतेन "अवयविनमनभ्युपगच्छतामन्तत· पर्वतादयोऽपि परमाणव एव सहतास्यु । ते हि न प्रत्यक्षा । अतस्सर्वाग्रहणमवयव्यसिद्धेः, इत्यक्षपादोक्तमनतिक्रमणीय स्यात्। स्थूलद्रव्याभावे चाणुसहतौ स्थूलत्वाध्यासोऽपि न सिद्धयेत्" इत्यपास्तम्। प्रत्येकदेशादधिकदेशत्वधीर्वा स्थूलधी । अवयव्यभावेऽपि माषादिराशिषु सहतिभेदै देशतारतम्य दृश्यते ॥

अत परस्परानाक्रान्तदेशावष्टम्भेन संहन्यमानेषु त्रसरेणुषु सुग्रहमेव देशाधिक्यम्, देशस्तु आलोकाकाशादि कश्चिद्यथायोग्यमस्तु । अवयवधाराविश्रान्त्यभावे मेरुसर्षपयोरविशेषप्रसङ्गोपि जात्यादिप्रतिबन्धा परिहार्य । यथा सत्ताप्रभृतिघटत्वादिपर्यन्ताना सर्वासा जातीनां त्रैकालिकानन्तव्यक्तिवृत्तित्वमविशिष्टम्, तथापि न्यूनाधिकवृत्त्यैव परापरभावः अवयविवादिभि. कल्पित· । तथा अनन्ताः पक्षा मासाश्च. तथापि मासापेक्षया द्वैगुण्य पक्षाणामेष्टव्यम् तथा घटसमुदायाद्घटपटसमुदायोऽधिक । तथा हिमवद्दक्षिणदेशान्मेरुदक्षिणदेशोऽधिक· ।

तथा एकात्मदु·खजातादनन्तात्मदु·खजातमधिकम् । तस्माद्भागानन्त्येऽपि आधिक्यन्यूनते सुग्रहे सूपपादे च । अवयवसङ्ख्यानिबन्धनैवाधिकता न्यूनता चेति शङ्कितुराशय । प्रतिसम्बन्धिसम्बन्धाधीनाऽपि सा दृष्टा इष्टा चेति समाधातुराशय इति विवेक ॥

(१४–१६) बुद्धिसयोगसयुक्तप्रतिबन्दीनां सङ्कलय्येद समाधानमवधेयम्—यदि वय प्रदेशवर्तिगुणनिह्नवाय प्रवर्त्स्यामस्तदा प्रतिबन्द्याऽणुष्वपि तत्सम्भव प्रदर्श्येत । किंत्ववयव्यारम्भकाणामवयवैरेव सयोग इति नियमस्य तार्किकैरेवान्येषु सर्वेष्वङ्गीकारात्कल्प्येष्वपि तत्प्रसङ्गो दुर्वार इति ब्रूम । न चान्यत्रैवाय नियम इति स्थाप्यम्, तादृशानामणूनामदृष्टेः, अनन्यथासिद्धलिङ्गाभावाच्च । यदि विभज्यमानेष्वभावपरिशेषायोगात् महत्परिमाणतारतम्यविश्रान्तिवत् परिमाणतारतम्यत्वादणुपरिमाणतारतम्यविश्रान्तिरपि क्वचित्कल्प्येत, तदा दृष्टे त्रसरेणावेव विश्रमोऽस्तु, न मृग्य ह्यन्यत् । तथाच सिद्धसाधनमनुमानम् । यदि त्रसरेणुरेव परमाणु स्यादप्रत्यक्षस्तदा स्यादिति चेत्—हन्त कुत्रैषा व्याप्ति ॥

(१७–१८) वृत्त्यनुपपत्तिरुत्पत्तिविनाशानुपपत्तिश्चावयव्यनङ्गीकारादेव परिहृता वेदितव्या । अपि च लाघवशालिनि सघातमात्रपक्षे राशिन्यायान्न कोऽपि दोष । असमवायिकारणतयाऽभिमता दृष्टा सयुक्तावस्था परैरपि स्वीकृतेति नैव काचिदधिका च कल्पनेति सक्षेप ॥

इदमत्रावधेयम्—परमाणूनामारम्भकत्वाद्यनुपपत्तय यद्यपि वैशेषिकादीन्प्रति माध्यमिकादिभिरेवोद्भाविता । अनूदिताश्चौपनिषदै· । तथापि कार्यकारणभावानुपपत्तिमध्यवस्यतां चार्वाकाणामप्येतास्सम्मता इत्यत्र संगृहीता । ताश्चानुपपत्तय केवलयौक्तिकैरप्रतिसमाधेया इत्यव-

स्थावाद्यभिमतानि समाधानानि सूचितानि विद्यावता प्रमोदायेति नास-ङ्कत्याशङ्कावकाश । अवस्थावादश्च शून्यवादिव्यतिरिक्तैस्सर्वैरप्युपगत इति स्पष्टमग्रे भविष्यति ॥

अत्राय सङ्ग्रहः—

स्वक्रियादिविरोधश्च सूत्रप्रभृति दुस्तर· ।
गुरुशिष्यादिवाक्यानां परबोधार्थता यतः ॥
तेभ्यश्चैतन्यमित्यादि वदता गुरुणा स्वयम् ।
किण्वादिभ्यः प्रसिध्यन्ती मदशक्तिर्निदर्शिता ॥
प्रत्यक्षाल्लोकशब्दोक्तात् अधिकं च तदायतम् ।
अ नाप्यत भवत्पूर्वैः प्रत्यक्षं चार्थसाधकम् ।
अर्थकामौ पुमर्थौ च दृष्टोपायैरुदीरितौ ।
प्रीयसे दृयसे च त्वं बिभेषि च ततस्तत· ॥
इष्टं प्राप्तुमनिष्टं च निवर्तयितुमुद्यत· ।
तत्सिद्धौ चरितार्थ· त्वं लोकवत्कि न मन्यसे ॥
बुभुक्षुरन्नमादत्से श्वभक्ष्यादि जहासि च ।
परोक्तया प्रतिपद्यार्थ प्रतिब्रूषे जिगीषया ॥
तत्त्वावधारणार्थं वा वादे किं न प्रवर्तसे ।
स्वयं वा मानतर्काभ्यां किं न किञ्चित्परीक्षसे ॥
तस्मात्सामान्यतो हेतुनिषेधो न हि लौकिक· ।
निमित्तादिविकल्पस्तु पण्डितैरपि हीष्यते ॥ इति ॥

सांख्यसत्कार्यवाद

सांख्यसौगतयोरेव साक्षात्पक्षप्रतिपक्षभाव इति पूर्व निरूपितम् । तत्र सर्वानित्यतालक्षणासत्कार्यवादनिरासायैव सर्वनित्यतालक्षणसत्कार्य-वादसमर्थनम् । तेन सत्कार्यवादेन प्रधानादिसिद्धि । सच्छब्दार्थश्च देशकालावस्थालक्षणैरुपाधिभिरनवच्छिन्नः । तेन सर्वस्य नित्यत्वविभु-

त्वैकत्वसत्यत्वसिद्धि । तया च सर्वशून्यवादनिरासासिद्धि । धर्मधर्मिणोरभेद । तेन प्रागसत्त्व तत सत्त्वमिति तार्किकमतनिरास । सत एवाविर्भावतिरोभावौ । ताभ्यां तु कारकचक्रव्यापारसार्थक्य बुद्धिव्यपदेशार्थक्रियादिभेदोपपत्तिश्च । उत्पत्तिरभिव्यक्तिश्चेत्यनर्थान्तरम् । तेन चास्तिनास्तीत्यादिव्यवहारोपपत्ति । सर्वस्य नित्यत्वादाविर्भावोऽपि नित्य । तेनाविर्भावे च आविर्भावान्तरकल्पनाप्रसगपरिहार । यथा च तार्किकमते स्वकारणसमवायलक्षणस्य सत्तासमवायलक्षणस्य वा उत्पत्तिपदार्थस्य नित्यत्वेऽपि तदर्थानि कारणानि व्यापार्यन्त इत्यभ्युपगम तथाऽस्माकमपि आविर्भावस्य नित्यत्वेऽपि तदर्थकारणापेक्षाभ्युपगम इति ॥

तस्मिश्च कारककलापे अधिष्ठातृलक्षणस्य तत्स्वरूपाभिज्ञस्य कर्तुर्न प्रवेश । तेन च वत्सविवृद्धिनिमित्तक्षीरादिप्रवृत्त्युपपत्ति । सर्वज्ञस्येश्वरस्यापि नात्र प्रवेश । अवाप्तसकलेप्सितस्य तस्य कारुण्यात्प्रवृत्तावन्योन्याश्रय । कारुण्येन सृष्टि सृष्ट्वा च दु खिनो जन्तूनवलोक्य कारुण्यमिति । कि च करुणया प्रेरित सुखिन एव जन्तून् सृजेदिति च ॥

प्रकृतेरचेतनाया स्वाभाविक्या तु प्रवृत्तौ न स्वार्थो नानुग्रहो न वा कारुण्य प्रयोजकमिति नोक्तदोषप्रसगावतार । पारार्थ्यमात्र तु प्रयोजकमुपपद्यत इति पुरुषविशेषसिद्धिरिति सिद्धान्तसक्षेपः ॥

युक्तयस्तु पटादिक कार्य कारकव्यापारात्प्राक्सत्, क्रियमाणत्वात्, यन्नैव तन्नैव यथा गगनकुसुमम् ॥

तत्रैव प्रतिज्ञायां हेतुप्राप्तिर्द्वितीयो हेतुः । यद्येन प्राप्त तत्तेन समकाल यथा घटसयुक्त भूतलम् ॥

तत्रैव— हेतुवृत्तित्वादिति तृतीयो हेतुः । तद्वृत्तित्व च स्वशक्त-वलक्षण स्वगर्भत्वमेव, सप्रतिपन्नो दृष्टान्तः ॥

तत्रैव–हेत्वात्मकत्वादिति तुरीयो हेतु । तत्रासिद्धिवारका हेत-वस्तु—न पटः तन्तुभ्यो भिद्यते तन्तु धर्मत्वात्, तन्तूपादेयत्वात् तन्त्वसयुक्तत्वात् तन्तुसमानदेशत्वात् तन्त्वपेक्षया गुरुत्वकार्यान्तरा-योगात् सम्प्रतिपन्नवदिति ॥

अयमत्र तर्क —यदि प्रागसात् हेतुभिरप्राप्त हेत्ववृत्ति तादात्म्य-रहित च तत उत्पद्यते सर्वस्मात्सर्वसभव स्यात्, न चासावस्तीति ॥

एव विमत पूर्वापरकालयोस्सत् प्रमेयत्वात् भावत्वात् सत्त्वात् आत्मवत् । विगीत काल एतद्घटादिमान् कालत्वात् एतत्कालव-दित्यादय सत्कार्यहेतव मनीषिभिरवगन्तव्या इति युक्तिसक्षेपः ॥

पातञ्जलसत्कार्यवाद

अथ पातञ्जलाना परिणामवादलक्षणस्सत्कार्यवाद शून्यवाद-सत्यवादमाध्यस्थ्यरूप —अथ कोय परिणामः ? अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्ति परिणाम, गुणिनित्यत्वेऽपि गुणाना विमर्दवैचित्र्यात् । न धर्मी त्र्यध्वा धर्मास्तु त्र्यध्वान । अध्वशब्द कालपर । अतोऽन्यत्वेन प्रतिनिर्दिश्यन्ते । यथा एका रेखा शतस्थाने शत, दशस्थाने दश, एक चैकस्थाने। यथा चैकत्वेऽपि स्त्री माता चोच्यते दुहिता च स्वसा चेति । अनुभव एवहि धर्मिणो धर्मादीनां भेदाभेदौ व्यवस्थापयति ॥

तथाच —शान्तोदिताव्यपदेश्यापरपर्यायानतितवर्तमानानागतल-क्षणान् धर्मान् योऽनुपतति मृत्सुवर्णादि, स धर्मी परिणामनित्य । कूटस्थनित्यविलक्षण । तस्यास्यधर्मिण. त्रिविध परिणाम. धर्म लक्षणः

अवस्था चेति। तत्र धर्मिणः धर्मैः परिणाम धर्माणां लक्षणै परिणाम लक्षणानां चावस्थाभिरिति विभागो ज्ञेय । एव धर्मलक्षणावस्थापरिणामशून्य न क्षणमपि गुणवृत्तमवतिष्ठते। चल हि गुणवृत्त, प्रतिक्षणपरिणामिनस्सर्वे भावा· ऋते चितिशक्तेरिति निर्णय ॥

मृद्धर्मी पिण्डाकाराद्धर्मात् धर्मान्तरमुपसम्पद्यमान धर्मत परिणमते घटाकार इति । घटाकार लक्षणतः परिणमते—लक्ष्यति कार्यरूप व्यावर्तयतीति लक्षण कालत्रयम् । अनागतोऽध्वा वर्तमानोऽध्वाऽतीतोऽध्वेति कालत्रयमेवाध्वत्रयमुच्यते । तत्र धर्मस्य घटस्य अनागतत्त्व प्रथमोऽध्वा । वर्तमानत्वं द्वितीय । अतीतत्व तृतीय । अनागतत्त्व हि धर्म घट वर्तमानातीतत्वाभ्यां व्यावर्तयति । एव वर्तमानत्वादिकमपि लक्षण मन्तव्यम् । एव लक्षणपरिणामस्यावस्थापरिणामो यथा—आगामिकल्पभाव्यनागततम । एतत्कल्पभाव्यनागततर । श्वोभाव्यनागत । सद्यो जात· वर्तमानतम इत्याद्यूह्यम् । तथा वर्तमानस्य नवत्वपुराणत्वादयोऽवस्थापरिणामा· । धर्मिणोऽपि धर्मान्तरमवस्था । धर्मस्यापि लक्षणान्तरमवस्था । इत्येक एव द्रव्यपरिणाम भेदेनोपदर्शित । ते च परिणामा धर्मिस्वरूपमनतिक्रान्ताः, अतो धर्मिविक्रियैवैषा धर्मद्वारा प्रपञ्च्यते ॥

एवविध· त्रिविधो भूतपरिणाम । मनस निरोधसमाध्येकाग्रतालक्षण त्रिविध परिणाम·। इन्द्रियस्यालोचितविकल्पितस्फुटत्वादिलक्षण इत्यन्यत्र विस्तरः ॥

एव सर्व कारण सर्वकार्यात्मक भवति । दृश्यते हि दावदग्धवेत्रबीजात्कदळीकाण्डोद्भवः । न हि तत्रासत उद्भवस्सम्भवति । अभिव्यञ्जकाना कालदेशकर्मादीनां वैचित्र्यात्किञ्चिदेवोद्भवतीति लोके कार्य-

कारणव्यवस्था। योगसिद्धानां देशादिप्रतिबन्धाभावात् सर्वस्मात्सर्वमुद्भवतीति योगसिद्धानां सिद्धस्सिद्धान्त ॥

सर्वेषां चैतेषा परिणामानां साङ्ख्यसिद्धान्तवत् पातञ्जलसिद्धान्तेऽपि पुरुषार्थ एव प्रवर्तक । पुण्यापुण्यलक्षणमदृष्ट तु निमित्तमप्रयोजकमित्युक्तम् । अत्राय विशेष —निरीश्वरसाङ्ख्ये हि पुरुषार्थ एवानागत प्रकृतीना प्रवर्तक । सेश्वराणां तदुद्देशेनेश्वरः प्रवर्तक इत्युद्देश्यतया पुरुषार्थ प्रवर्तक इत्युच्यते । निमित्त धर्मादिक तु तासां न प्रवर्तकम्, चित्तपरिणामत्वेन तत्कार्यत्वात् । ततो निमित्तात् प्रतिबन्धकस्य बाधो भवति । धर्मेणाधर्मनिरासे प्रकृतय स्वयमेव देवादिपरिणामे प्रवर्तन्ते । पापातिशयेन पुण्यप्रतिबन्धे सति तिर्यगादिपरिणामे । यथा नहुषस्य सर्पपरिणामे । यथा क्षेत्रिकः कृषीवल जलस्योन्नतदेशादिवरणभेदनमात्र करोति, ततो जल स्वयमेव केदारान्तरे प्रवर्तते तद्वत्, तदुक्तम्—"निमित्तमप्रयोजक प्रकृतीना वरणभेदस्तु तत क्षेत्रिकवत्" (४—३) इति ॥

एतेन ईश्वरधर्मपुरुषार्थानां त्रयाणामप्युपयोग प्रदर्शित इत्यय सेश्वरसाङ्ख्य सिद्धान्त । निरूपितमिद प्रागपि ॥

तार्किकासत्कार्यवाद

अथ तार्किकाणामसत्कार्यवाद । अयमपि विलक्षणो माध्यस्थ्यविशेष, नित्यानित्यपदार्थोपगमात्। तथाहि—कापिला पुन सत्कार्यवादमूलविभ्रमेण सर्व सर्वत्रास्तीत्याकारेणान्वयसिद्धि बुद्धयमाना प्रधानसिद्धावध्यवसिता । सत्कार्यवादश्च विचार्यमाणो न समस्त्येवेति कुतस्त्या हेतुसिद्धि । तथाहि —चतुष्टयी गतिरिह स्यात् घटादिकार्य मृत्पिण्डादिना कारणेन क्रियमाणमपि असद्वा क्रियते सदसद्वा अनुभय वा सद्वेति ॥

१. (i) असतः करणे खरविषाणादेः करणं स्यात्, असत्त्वे हि घटस्य खरविषाणस्य च को विशेषः। घटस्यापि प्राक्प्रध्वसाभावदशयो· असत्त्वाविशेषात् प्रागभावदशायामिव प्रध्वसावस्थायामपि करण भवेत् ॥

(ii) असत्त्वे कार्यस्य नियतोपादानग्रहण न प्राप्नोति, तैलार्थी हि तिलसर्षपानुपादत्ते न सिकता. । असत्त्वे च तैलस्य को विशेषः सर्षपाणा सिकताभ्यः ॥

(iii) असति कार्ये निरालम्बन कारकव्यापारो भवेत्, न ह्यसौ मृत्पिण्डादिविषयो भवितुमर्हति कार्य चासत् ॥

(iv) अपि चाविद्यमाने कारणव्यतिरिक्ते च कार्ये जन्ये कारणस्य मृत्पिण्डादे घटादिकार्य जनितवत किमिति न स्वरूपमुपलभ्यते। अथ स्वविनाशेन कारण कार्यस्य जनकमिष्यते, तदियमभावाद्भावोत्पत्तिर्भवेत्। तस्या च कुतोऽय नियमः यदनन्तरवृत्त एव मृत्पिण्डाभाव कुम्भमभिनिर्वर्तयति न चिरातिक्रान्त इति। अतश्च परुन्मृत्पिण्डे नष्टे ऐषम कुम्भोत्पादस्स्यात्। कारणाव्यतिरिक्तत्वे कारण सत्कार्यमसदिति न वक्तु युक्तम् ॥

२. सदसतोर्विप्रतिषेधेन एकत्र समावेशायोगात् द्वितीय· कल्पो नावकल्पते। रूपभेदादविरोध इति चेन्न, कार्यस्य विचार्यमाणस्यैकत्वात्। ततश्च तेनैव स्वेन कार्येण रूपेणासच्चेत् न सद्भवेत्। पररूपेण तु असत्त्वं समस्तभावानामस्त्येव ॥

३. अनुभयात्मक तु वस्तु नास्त्येवेति न तृतीयोऽपि कल्पः प्रक्रमते ॥

४. पारिशेष्यात्सदेव कार्यमिति । किमिति च नोपलभ्यत इति । अनुमानेनापि यदुपलब्ध भवति तत्किमनुपलब्धं भवति । प्रत्यक्षेण तु तदानीमनुपलम्भ अनभिव्यक्तत्वात् । अभिव्यक्तिसम्पादन एव च कारकप्रयत्नसाफल्यम् । कार्य तु सदेवेति । इति साङ्ख्य-सिद्धान्तानुवादः ॥

अत्रोच्यते—केन रूपेण तदानी कार्य सदिति मन्यते ? यदि कारकव्यापाराभिनिर्वर्त्येन सलिलाहरणाद्यर्थक्रियासमर्थेन पृथुबुध्नोदराकार-तारूपेण चक्रमूर्ध्नि घटोऽस्ति, तदाऽभिव्यक्तेनापि रूपेण सत्त्वादत्यन्ताय कारकव्यापारवैफल्यम् । इत्थमपि च कारकव्यापृतौ तद्व्यापारानुपरम-प्रसङ्ग· । किं हि तदोपलभ्य कारकाणि निवर्तेरन् । कार्यस्य-प्रागुपलब्धत्वात् ॥

अथ मृत्पिण्डरूपेण तदानी घटोऽस्तीति कथ्यते ? नैवम्, पिण्ड एवास्ति घटस्तु ततो निर्वर्तते । यदाऽसौ निर्वर्तते । तदैवास्ति न ततः प्रागिति ॥

अथ पूर्व शक्त्यात्मना तस्यास्तित्वम्, इदानीमभिव्यक्त्यात्मना क्रियत इति । तदपि न, अभिव्यक्तिरपि स्वरूपाद्भिन्ना वा अभिन्ना वा सती असती वा इति विकल्प्यमाना न पूर्वोक्त दोषमतिवर्तते ॥

का चेयमभिव्यक्ति ? किं कार्यात्मनाऽवस्थानम्, अथ सस्थान-विशेषः, उत प्रतीतिरिति । नाद्य , तत्पूर्व नाभूदधुना भूतमिति असत्कार्यम् । पूर्वमपि यदि तदासीत् कारकव्यापारवैफल्यम् ॥

संस्थानमपि अवयवसन्निवेशविशेषः असन्नेव । अवयवास्तु सन्तीति चेत्कस्यात्र विवाद । न खलु परमाणवोऽस्माभिर्नाङ्गीकृता· ॥

प्रतीतिस्तु घटस्य चक्षुरादिकारकसामग्र्यधीना न मृत्पिण्डदण्ड-चक्रादिकारकचक्रसाध्येति सा चक्रमूर्धनि घटस्य नास्त्येवेत्यसन् घट. ॥

अपि च कार्यस्य सत्त्वे किमित्युपलब्धिकारणेषु सत्सु सत्यामपि जिज्ञासायां नोपलभ्यते[1] अनभिव्यक्तत्वादिति चेत्केयमनीभव्यक्ति·[2] यद्युपलब्धेरभाव , तस्यैवानुपपत्तिश्चोदिता कथ तदेवोत्तरम् । अथार्थ-क्रियानिर्वर्तनक्षमताविरह , तदानीमसन्नेव कार्यम् । अथ चक्षुरादि-वत्कुविन्दादिकारकव्यापारोऽप्युपलब्धिकारणम् , तदा स व्यापार असश्चे-दसदकरणम् । सश्चेद्भावोपलम्भप्रसङ्ग । तस्मादागन्तुकमन्तरेण प्राग-नुपलब्धस्य पश्चादुपलम्भो दुर्घट. ॥

शक्त्यात्मनाऽपि यदस्तित्वमस्योच्यते तत्रापि चिन्त्य केय शक्ति-र्नामेति । यदि घटस्वरूपाद्भिन्ना सा तर्हि पररूपेण घटोऽस्तीति न स्वरूपेण घटास्तित्वमुक्त भवेत् , तच्च प्रत्यक्षविरुद्धम् । यद्यभिन्ना सा शक्त्यात्मनाऽस्तीति नाधिकमुक्त स्यादिति ॥

(१) असत्करणपक्षे यच्चोदित शशविषाणाद्यपि क्रियेतेति, तन्न—वचनव्यक्त्यपरिज्ञानात् । यदसत्तत्क्रियते इति नेय वचनव्यक्ति , अपि तु यत्क्रियते तदसदिति ॥

(२) तैलार्थी सिकता कश्चित् आददानो न दृश्यते ।
अदृष्ट्वा चाद्य नान्योऽपि तदर्थी तासु धावति ॥
अन्वयव्यतिरेकौ च गृह्येते व्यवहारतः ।
अनादिश्चैष संसार इति कस्यानुयोज्यता ॥
अथवा शक्तिनियमान्नियमश्चोपपत्स्यते ।
शक्तिस्त्वनित्या सूक्ष्मा च नेह का चिदुपेयते ॥
तदभ्युपगमे नित्यं कार्योत्पादप्रसङ्गतः ।
स्वरूपसहकार्यादिसन्निधानं हि सेष्यते ॥

सैवेय शक्ति अवस्थिता आगन्तुका चेति द्विविधा। सत्त्वाद्यवच्छिन्न स्वरूपमवस्थिता शक्तिः। दण्डचक्रादिसयोगरूपा त्वागन्तुका। शक्तिद्वयकृता च कार्यनिष्पत्तिरसकृत् दृष्टेति तदर्थिभिस्तदुपादानानियमः॥

न च शक्तिरेव कार्यमिति वक्तव्यम्, कार्यस्वरूपस्य ततः पृथग्भूतस्य प्रतीत्या व्यवस्थापनात्। शक्तेश्च कार्यत्वे कार्यादेव कार्योत्पादोऽङ्गीकृत स्यात्। न च घटाद्घट उत्पत्तुमर्हति। शक्तेश्च कार्यमुत्पद्यत इत्यभ्युपगतम्। अतोऽन्यत्कार्यमन्या च शक्तिः॥

ननु वाच्यवाचकयो व्यङ्ग्यव्यञ्जकयोश्च दीपघटयोरुभयाश्रिता शक्तिर्दृष्टेति कार्यकारणयोरपि सा कथमनुभयाधिष्ठाना भवितुमर्हति? असति च द्वितीये कार्याख्ये तदाश्रये कथमियमुभयाश्रिता स्यादिति॥

नैतदेवं—यथादर्शन शक्तेरभ्युपगमात्। नचैकत्र दृष्टरूपमन्यत्रापि मृग्यते। वाच्यवाचकयोः व्यङ्ग्यव्यञ्जकयोश्च द्वयो. पृथक्तेन दर्शनात् उभयाश्रिता शक्तिरङ्गीकृतेति। इह तु द्वयस्यानुपलम्भात् केवलकारणवृत्तिरेव शक्ति'। तत्कृतश्चोपादाननियमविचारो युक्त'॥

उत्पत्तौ किल सिद्धायामुपादानं विचार्यते।
सतस्तु सैव नास्तीति किमुपादानचिन्तया॥

सत्कार्यवादे च सुतरामुपादाननियमो दुर्घट'। सर्वस्य सर्वत्र भावात्। सिकतातिलसरस्तीरकेदारव्युप्तबीजजनिताङ्कुरादिकार्यक्रमोत्पाद्यमानतिलस्वरूपपर्यालोचनया तिलेष्विव सिकतास्वपि तैलसम्भवात् सर्वस्य च सर्वत्रास्तित्वे नियतपदार्थप्रतिष्ठितहानोपादानादिव्यवहार. सकल एव विप्लवेत॥

अन्नादोऽमेध्यभक्षस्यात् फलं हेतौ यदि स्थितम्।
पाटघैणैव कार्पासबीजं क्रीत्वा निवस्यताम्॥ (बोधि ३६९)

(३) यत्तु निरालम्बना कारकप्रवृत्तिरिति चोदितम्, परिहृत तत् गौतमेन सूत्रकारेण—"बुद्धिसिद्ध तु तदसत्" (४—१—५०) इति। वृद्धव्यवहारतः कार्यकारणभावमवगम्य अमुष्मात्कारणादिदमीदृश कार्यमुत्पद्यत इति बुद्धौ निर्धार्य कारकाणि कर्ता नियुङ्क्ते इति न निर्विषय· कारकव्यापार ॥

(४) यत्पुनरभाणि कारणानुपमर्देन कार्यानुत्पादादभावाद्भावोत्पत्तिर्भवेत्। तत्र चानन्तरवृत्त्युत्पत्तिनियमो न स्यादिति, तदप्ययुक्तम्—मूर्तानां समानदेशत्वविरोधात्कार्यकारणयोरेकत्व नेष्यते, नैतावता भावोत्पत्तिरभावाद्भवितुमर्हति। अतएवानन्तर्यनियमोऽप्युपपन्न·। नच कार्यकारणयोरभेदात्सत्कार्यमिति वक्तव्यम्, तयो प्रत्यक्षसिद्धभिन्नरूपत्वात् ॥

प्रागुत्पत्ते पटस्य धर्मिणोऽभावात् कथमसत्त्व तस्य धर्म इति चेत्—यादृशो यक्षस्तादृशो बलिरिति न्यायादविरोध। यदसत्पूर्वमासीत् तस्य कथ सत्त्वमिति चेत् कारणसामर्थ्यादस्ति कोऽपि महिमा तुर्यादीनां, यदेतेषु सम्भूय व्याप्रियमाणेषु असन् एव घटस्सन् भवति ॥

असतोऽसम्बद्धस्य जन्यत्वे अतिप्रसक्तिरिति चेन्नैतत्—तन्तु जातीयस्य पटजातीय एव सामर्थ्यात्। कुत एतत्? त्वत्पक्षेऽपि कुत एतत्तन्तुष्वेव पटात्मता न सर्वत्रेति। वस्तुस्वाभाव्यादिति चेत् स नोऽत्रापि भविष्यति ॥

कार्यकारणयोरव्यतिरेकस्तु स्वरूपशक्तिसस्थानभेदस्य प्रत्यक्ष सिद्धत्वात् बाधित·। विश्वस्य प्रधानात्मत्वेऽतीन्द्रियत्वप्रसङ्गश्च। तद्देशत्व त्वस्माकं तदाश्रितत्वनिबन्धनमित्यलमधिकेनेति ॥

वैदिकाभिमत मध्यस्थवाद

तत्र आर्हतकौमारिलप्रभृतिभि भेदाभेदयोरविरोधमुपगम्य सत्कार्यवादमसत्कार्यवादञ्च समुच्चित्य माध्यस्थ्यमुपगतम् । इतरैस्तु प्रायेण सर्वैरपि प्रागुक्त पातञ्जलीय परिणामवादमवलम्ब्य धर्मधर्मिणोर्भेदञ्चाभ्युपगम्य धर्ममात्रस्यागन्तुकत्वम्बीकारेण विरोध प्रशमित· । तथाहि—प्राक्सदेव द्रव्य अवस्थान्तरविशिष्टवेषेण कार्य, तथैव लोकवेदव्यवहार स्थिति । ततश्च पूर्व नित्य सत् द्रव्य साङ्ख्यमतमुज्झतामपि कार्य स्यात्, यात्वागन्तुक्यवस्था सा न प्राक्सतीति वैशेषिकमतमुज्झतामपि असत् कार्य स्यात् ॥

विभागादविभागाच्च भूतभौतिकभेदधी· ।
सत्येव भवति द्रव्ये सिद्धसाध्यदशान्वयात् ॥
एकत्वं च बहुत्वं च मृत्पिण्डकरकादिवत् ।
समष्टिव्यष्टिनीत्यैव त्रिगुण वदति श्रुति· ॥
ईदृक्सत्कार्यवादश्च वैदिकै· परिगृह्यते ।
द्रव्यस्य पूर्वसिद्धस्य साध्यावस्थाविशेषत· ॥ इति ॥

एतदुक्त भवति—न तावत्कार्यमिति किमपि न दृष्ट, सर्वलोकवेदविरोधात् । अभिव्यक्तिसाधनस्यापि निराश्रयत्वप्रसङ्गात् । न च दृष्टमपि न सत्य, माध्यमिकादिमतानामनङ्गीकारात् । न च सत्यमपि न कारणाव्यतिरेकेण गृह्यते, अवस्थान्तरविशिष्टवेषेण व्यतिरेकग्रहणात् । प्रकृतिविकृतीत्यादिविभागभङ्गप्रसङ्गाच्च । अत कारणाद्भिन्नत्वेन दृष्ट कार्य तेनाकारेण पूर्व नासीदिति त्वयैवाकामेनापि स्वीकर्तव्यम् । न हि घटाकारेण निष्पन्नस्य पुनरपि दण्डादिव्यापारनिष्पाद्यत्वमस्ति ॥

कि च—कार्यव्यङ्ग्यशब्दौ लोके व्यवस्थितविषयौ दृष्टौ । कारकव्यञ्जकभेदश्च । कारक समग्रमेकमुत्पादयति । व्यञ्जक तु सहकारि-

सम्पन्नं समानेन्द्रियग्राह्याणि समानदेशानि तादृशानि सर्वाण्यपि व्यनक्ति। तदत्र घटादिव्यक्तिसामग्र्यैव तद्वन्मृत्पिण्डगताना करकादीनामपि व्याक्तः स्यात्। व्यङ्गकत्वे सिद्धे हि अवान्तरव्यङ्ग्यभेदप्रतिनियतव्यङ्गकभेद-व्यवस्थाक्लृप्ति । न चेह तथा। आगन्तुकाभावे च पुरुषवत्प्रकृतिरपि निर्व्यापारैव स्यात्। तथा च गत सृष्टिप्रलयादिवादै । सिद्धान्त-सृष्टयादिभिश्च ॥

ननु सतोऽभिव्यक्तौ घटतैलतण्डुलादिनिदर्शनमास्ति। असत उत्पत्तौ न किञ्चिदिति चेत्। किमत ? न हि निदर्शनमेव प्रमाणम्, हेतुवैफल्यप्रसङ्गात्। न च निदर्शनाभावो बाधक, सर्वत्र प्रतिनियत-स्वभावलोपप्रसङ्गात् ॥

अपि चाशेषनित्यत्वे पौर्वापर्य न कुत्रचित्।
व्यक्तिभोगापवर्गादिसाध्यतोक्तिरतो मुधा ॥
स्वप्रवृत्त्यादिनैष्फल्यं शास्त्रादेरप्यनुस्थिति.।
साङ्ख्यचार्वाकयो. स्यातां साध्यसाधनबाधनात् ॥
अयोग्यत्व तिरोधान योग्यत्वं व्यक्तिरप्यपि।
तन्नित्यानित्यताभ्यां ते विवक्षितविधातकृत् ॥ इति ॥

ननु जनिरपि व्यक्तिरेव "जनी प्रादुर्भावे" इति धात्वर्थ पाठात्। न—जनिव्यक्तिशब्दयोरर्थभेदेनैव निरूढे । प्रादुर्भाव-पाठोऽप्युत्पत्तिपर । निर्वर्त्यप्राप्ययोर्भेदसिद्धेश्च । जन्य हि निर्वर्त्य व्यङ्ग्य तु प्राप्यम्। अभूततद्भावादिषु च प्रागसतस्सत्त्वमनुस्मृतमेव। इति ॥

अत्र कृत्युत्पत्तिव्यक्तिशब्देषु कृत्युत्पत्तिशब्दयो समानार्थकत्व-मुपगम्य तदर्थस्यैव कारकव्यापाररूपता चोपगम्य तस्य च व्यापारस्यान्य-

निष्ठत्वेऽपि कार्यार्थत्वेन कार्यधर्मत्वमुपचारेण स्वीकृत्य कारकव्यापार-वैयर्थ्यानवस्थादयो दोषा परिहृता । साङ्ख्यास्तु त्रयाणामपि समानार्थकत्वमुपयन्तीति निर्णय ॥

अयमवस्थावादस्सर्ववेदान्तिसम्मत', यत' शाङ्करेऽप्युपनिषद्भाष्ये (बृ. उ. ३-२-१) घटादे. कम्बुग्रीवादिलक्षणसस्थानरूपेण जलाहरणादिलक्षणार्थक्रियादिरूपेण च प्रागसत्त्वमिष्टं, नतु सर्वात्मनैवासत्त्वमित्यवगम्यते । तथाहि—"अथ प्रागुत्पत्ते. घटः असन्नित्युच्येत, घटार्थ प्रवृत्तेषु कुलालादिषु तत्र यथा व्यापाररूपेण वर्तमानास्तावत् कुलालादयस्तथा घटो न वर्तत इत्यसच्छब्दस्यार्थश्चेत् न विरुध्यते । कस्मात्? स्वेन हि भविष्यद्रूपेण घटोवर्तते । न हि पिण्डस्य वर्तमानता कपालस्य वा घटस्य भवति । न च तयोर्भविष्यत्ता घटस्य । तस्मात्कुलालादिव्यापारवर्तमानतायां प्रागुत्पत्ते घटोऽसन्निति न विरुध्यते" इति भाषितमस्ति ॥

तस्मादवस्थाविशिष्टवेषेणासत्कार्यवादस्सर्वसम्मतः । द्रव्यस्वरूपेण तु सत्कार्यवादः । साङ्ख्यमते तु धर्मधर्मिणोरैक्याभ्युपगमात् एव विभागस्य नावकाश इत्यभिव्यक्त्याश्रयणमिति सक्षेप. ॥

दुर्निरूपतालक्षणसत्कार्यवाद

अथ परमार्थदृष्ट्या तादात्म्यपदवाच्य. अनन्यत्वलक्षणः भेदप्रतिषेधरूप' सत्कार्यवादः ब्रह्माद्वैतवादिसम्मतः तार्किकसिद्धान्तनिरासायैव प्रवृत्त निरूप्तते । श्रीशाङ्करे सूत्रभाष्ये (२-१-१८) "युक्तिस्तावद्वर्ण्यते—दधिघटरुचकाद्यर्थिभि' प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यन्ते । न हि दध्यर्थिभिः मृत्तिकोपादीयते न घटाद्यर्थिभिः क्षीरम् । तदसत्कार्यवादे नोपपद्यते ।

अविशिष्टे हि प्रागुत्पत्तेः सर्वत्र सर्वस्यासत्त्वे कस्मात् क्षीरादेव दध्युत्पद्यते न मृत्तिकायाः । मृत्तिकाया एव च घट उत्पद्यते न क्षीरात् ॥

अथाविशिष्टेऽपि प्रागसत्त्वे क्षीर एव दध्न· कश्चिदतिशयः न मृत्तिकायाम्, मृत्तिकायामेव घटस्य कश्चिदतिशय· न क्षीर इत्युच्येत, तर्ह्यतिशयवत्त्वात् प्रागवस्थायाः असत्कार्यवादहानिः सत्कार्यवादसिद्धिश्च । शक्तिश्च कारणस्य कार्यनियमार्था कल्प्यमाना नान्याऽप्यसती वा कार्य नियच्छेत् । असत्त्वाविशेषात् अन्यत्वाविशेषाच्च । तस्मात्कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूत कार्यम् ॥

अपि च कार्यकारणयो द्रव्यगुणादीना च अश्वमहिषवद्भेदबुद्धयभावात् तादात्म्यमभ्युपगन्तव्यम् । तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पनानर्थक्यम् ॥

कथं च कार्यमवयविद्रव्य कारणेष्ववयवद्रव्येषु वर्तमान वर्तेत ? किं समस्तेष्ववयवेषु वर्तेतोत प्रत्यवयवम् । यदि तावत्समस्तेषु वर्तेत ततोऽवयव्यनुपलब्धि प्रसज्येत, समस्तावयवसन्निकर्षस्याशक्यत्वात् । न हि बहुत्व समस्ताश्रयेषु वर्तमानं व्यस्ताश्रयग्रहणेन गृह्यते । अथावयवश· समस्तेषु वर्तेत, तदाऽऽरम्भकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन्, यैरवयवैरारम्भकेषु अवयवेषु अवयवश. अवयवी वर्तेत । कोशावयवव्यतिरिक्तैर्ह्यवयवै· असिः कोश व्याप्नोति । अनवस्था चैव प्रसज्येत । तेषु तेष्ववयवेषु वर्तयितु अन्येषामन्येषामवयवानां कल्पनीयत्वात् ॥

अथ प्रत्यवयवं वर्तेत, तदैकत्र व्यापारेऽन्यत्राव्यापार स्यात् । न हि देवदत्तः स्रुघ्ने सन्निधीयमान· तदहरेव पाटलिपुत्रे सन्निधीयते ।

युगपदनेकत्र वृत्तौ अनेकत्वप्रसङ्गात् । देवदत्तयज्ञदत्तयोरिव सुघ्नपाटलिपुत्रनिवासिनोः ॥

गोत्वादिवत् प्रत्येक परिसमाप्तेरदोष इति चेत् न, तथा प्रतीतेरभावात् । यदि गोत्वादिवत्प्रत्येकपरिसमाप्तोऽवयवी स्यात्, यथा गोत्वं प्रतिव्यक्ति प्रत्यक्ष गृह्यते एवमवयव्यपि प्रत्यवयव प्रत्यक्ष गृह्येत । न चैव नियतं गृह्यते । प्रत्येकपरिसमाप्तौ चावयविन कार्यणाधिकारात् तस्य चैकत्वात् शृङ्गेणापि स्तनकार्य कुर्यात्, उरसा च पृष्ठकार्यम् । न चैव दृश्यते ॥

प्रागुत्पत्ते कार्यस्यासत्त्वे उत्पत्तिरकर्तृका निरात्मिका च स्यात् । उत्पत्तिर्नाम क्रिया । सा सकर्तृकैव भवितुमर्हति गत्यादिवत् । क्रिया च नाम स्यादकर्तृकेति विप्रतिषिद्धयेत । घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका । कि तर्हि ? अन्यकर्तृकेति कल्प्या स्यात् । तथा कपालादीनामप्युत्पत्तिरुच्यमानाऽन्यकर्तृकैव कल्प्येत । तथा च सति घट उत्पद्यत इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्त स्यात् । न च लोके घटोत्पत्तिरित्युक्ते कुलालादीनामप्युत्पद्यमानता प्रतीयते, उत्पन्नताप्रतीतेः ॥

अथ स्वकारणसत्तासम्बन्ध एवोत्पत्तिरात्मलाभश्च कार्यस्येति चेत् कथमलब्धात्मक सत् सम्बध्येतेति वक्तव्यम् । सतोर्हि द्वयोस्सम्बन्धस्सम्भवति । न सदसतोरसतोर्वा ॥

अभावस्य च निरुपाख्यत्वात् प्रागुत्पत्तेरिति मर्यादाकरणमनुपपन्नम् । सता हि लोके गृहक्षेत्रादीना मर्यादा दृष्टा नाभावस्य । न हि वन्ध्या पुत्रो राजा बभूव प्राक्पूर्णवर्मणोऽभिषेकादित्येवंजातीयकेन मर्यादाकरणेन निरुपाख्यो वन्ध्यापुत्रो राजा बभूव भवति भविष्यतीति वा विशेष्यते ।

यदि च वन्ध्यापुत्रः कारकव्यापारादूर्ध्वमभविष्यत् तत इदमपि उपापत्स्यत कार्याभावोऽपि कारकव्यापारादूर्ध्वं भविष्यतीति । वय तु पश्यामः वन्ध्यापुत्रस्य कार्याभावस्य च अभावत्वाविशेषात्, यथा वन्ध्यापुत्रः कारकव्यापारादूर्ध्वं न भविष्यति, एव कार्याभावोऽपि कारकव्यापारादूर्ध्वं न भविष्यतीति ॥

[अत्र सौगतसम्मततुच्छलक्षणाभावात् विलक्षणस्य वस्तुलक्षणस्याभावस्य तार्किकैरभ्युपगमात् युक्तिरेषा चिन्त्या।]

नन्वेव सति कारकव्यापारोऽनर्थक प्रसज्येत । यथैव हि प्राक्सिद्धत्वात्कारणस्य स्वरूपसिद्धये न कश्चिद्व्याप्रियते एव प्राक्सिद्धत्वादनन्यत्वाच्च कार्यस्वरूपसिद्धये न कश्चिदपि व्याप्रियेत, व्याप्रियते च । अत. कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेरभाव कार्यस्येति चेन्नैष दोष —यत कार्याकारेण कारण व्यवस्थापयतः कारकव्यापारस्यार्थवत्त्वमुपपद्यते । कार्याकारोऽपि कारणस्यात्मभूत एव । अनात्मभूतस्यानारभ्यत्वादित्यभाणि ॥

नच विशेषदर्शनमात्रेण वस्त्वन्यत्व भवति । न हि देवदत्तः सङ्कुचितहस्तपाद प्रसारितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्व गच्छति । स एवेति प्रत्यभिज्ञानात् । तथा प्रतिदिनमनेकसस्थानानामपि पित्रादीना न वस्त्वन्यत्व भवति । मम पिता मम माता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात् ॥

जन्मोच्छेदानन्तरितत्वात् तत्र युक्त नान्यत्रेति चेन्न, क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात् । अदृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचिताना अङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसज्ञा । तेषामेवावयवानामपचयवशाददर्शनापत्तावुच्छेदसज्ञा ।

तत्रेदृग्जन्मोच्छेदान्तरितत्वेन चेदसतस्सत्त्वापत्ति. सतश्चासत्त्वापत्तिः तथासति गर्भवासिन· उत्तानशायिनश्च भेदप्रसङ्गः। तथा बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्ग· । पित्रादिव्यवहारलोपप्रसङ्गश्च ॥

यस्य तु पुन· प्रागुत्पत्तेः असत्कार्य तस्य निर्विषय कारकव्यापारस्स्यात्। अभावस्य विषयत्वानुपपत्ते.। आकाशहननप्रयोजनखड्गाद्यनेकायुधप्रयुक्तिवत्। समवायिकारणविषय कारकव्यापारस्स्यादिति चेत् न—अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसङ्गात्। समवायिकारणस्यैवात्माऽतिशय· कार्यमिति चेत्, तर्हि सत्कार्यतापत्तिः ॥

तस्मात् क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां भजन्ते इति न कारणादन्यत्कार्य वर्षशतेनापि शक्य कल्पयितुम्। तथा च मूलकारणमेवान्त्यात्कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते। एव युक्ते कार्यस्य प्रागुत्पत्तेस्सत्त्वमनन्यत्व च कारणादवगम्यते। तत्रेदशब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेस्सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात् सत्त्वानन्यत्वे प्रसिद्ध्यतः" इति भाषितमस्ति ॥

एतेन प्रपञ्चो न तुच्छ· नापि स्वतन्त्र नैव ब्रह्मणा एकीभूत.। किं तु सन्नेवानन्य इति तुरीय पक्ष स्वीकृत इति निर्णयो भवति। अधिकं प्रागेव निरूपितम् ॥

दुर्निरूपतारूप कार्यकारणभावापलाप

अथ सदसदनिर्वचनीयकार्यकारणवादसारांशः। कार्यकारणसदसत्त्वविचारो विफलः दुरन्तः दुर्निरूपश्चेत्येषां सिद्धान्त·। तथा हि—सच्चेत्किञ्चिन्न बाध्येत, सर्वथा सर्वत्र सर्वदा च स्यात्। नान्यथा, स्वभावपरित्यागायोगात्। असच्चेन्न ख्यायेत, न च कदाचित्कुत्रचित्कथं-

चिदपि स्यात्, तत एव। नापि क्वचित् सत्त्वासत्त्वसमुच्छय', उक्त-दूषणसमुच्चयात् व्याघाताच्च। उभयशून्यत्व च तत्समुच्चयसमानदूषणम्। अतस्सदादिरूपकोटिचतुष्टयविनिर्मुक्तमेव निरधिष्ठानमेव संवृतिशक्त्या भाति। इदमेव तत्त्वम्। अयमेव च सर्वज्ञोपदेशसार. इति मध्यमागम-निष्ठानां निष्ठा। यथाऽऽहु —

न सतः कारणापेक्षा व्योमादेरिव युज्यते।
कार्यस्यासंभवी हेतुः खपुष्पादेरिवासतः॥
न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥
बुद्धया विवेच्यमानानां स्वभावो नावधार्यते।
अतो निरभिलप्यास्ते निस्स्वभावाश्च दर्शिताः॥ इति॥

अपिच कार्यकारणभावाख्यस्सबन्धो दुर्निरूपस्साङ्केतिको न वास्तव इति सबन्धतत्त्वापलापिना सिद्धान्तकारिका प्रमेयकमलमार्ता-ण्डोदाहृतास्सगृह्यन्ते - (४ प. १४९ पु)

पारतन्त्र्यं हि संबन्धः सिद्धे का परतन्त्रता।
तस्मात्सर्वस्य भावस्य संबन्धो नास्ति तत्त्वतः॥
रूपश्लेषो हि संबन्धः द्वित्वे स च कथं भवेत्।
तस्मात्प्रकृतिभिन्नानां संबन्धो नास्ति तत्त्वतः॥
परापेक्षा हि सम्बन्धः सोऽसन् कथमपेक्षते।
संश्च सर्वनिराशंसो भावः कथमपेक्षते॥
द्वयोरेकाभिसंबन्धात्संबन्धो यदि तद्द्वयोः।
कस्संबन्धोऽनवस्था च न संबन्धमतिस्ततः॥
तौ च भावौ तदन्यश्च सर्वे ते स्वात्मनि स्थिताः।
इत्यभिश्रास्स्वयं भावा. तान्निश्रयति कल्पना॥
तामेव चानुरुन्धानैः क्रियाकारकवाचिनः।
भावभेदप्रतीत्यर्थं संयोज्यन्तेऽभिधायकाः॥

कार्यकारणभावोऽपि तयोरसहभावतः ।
प्रसिद्धयति कथं द्विष्ठोऽद्विष्ठे सम्बन्धता कथम् ॥

क्रमेण भाव एकत्र वर्तमानोऽन्यनिस्पृहः ।
तदभावेऽपि तद्भावात्सबन्धो नैकवृत्तिमान् ॥

यद्यपेक्ष्य तयोरेक अन्यत्रासौ प्रवर्तते ।
उपकारी ह्यपेक्ष्यस्स्यात् कथं चोपकरोत्यसन् ॥

यद्येकार्थाभिसंबन्धात्कार्यकारणता तयोः ।
प्राप्ता द्वित्वादिसंबन्धात् सव्येतरविषाणयो. ॥

द्विष्ठो हि कश्चित्संबन्धः नातोऽन्यत्तस्य लक्षणम् ।
येनचैतस्य संख्यादेः व्यवस्थाप्येत भिन्नता ॥

भावाभावोपधियोंगः कार्यकारणता यदि ।
योगोपाधी न तावेव कार्यकारणताऽत्र किम् ॥

पश्यन्नेकमदृष्टस्य दर्शने तददर्शने ।
अपश्यन् कार्यमन्वेति विनाप्याख्यातृभिर्जनै. ॥

दर्शनादर्शने मुक्ता कार्यबुद्धेरसंभवात् ।
कार्यादिश्रुतिरप्यत्र लाघवार्थं निवेशिता ॥

तद्भावभावतः कार्यगतिर्याऽप्यनुवर्ण्यते ।
संकेतविषयाख्या सा सास्नादेः गोगतिर्यथा ॥

भावे भाविनि तद्भाव. भाव एव च भाविता ।
प्रसिद्धे हेतुफलते प्रत्यक्षानुपलंभतः ॥

एतावन्मात्रतत्त्वार्थाः कार्यकारणगोचराः ।
विकल्पा दर्शयन्त्यर्थान्मिथ्यार्था. घटितानिव ॥

भिन्ने का घटनाऽभिन्ने कार्यकारणताऽपि का ।
भावे ह्यन्यस्य विश्लिष्टौ श्लिष्टौ स्यातां कथं च तौ ॥

संयोगिसमवाय्यादि सर्वमेतेन चिन्तितम् ।
अन्योन्यानुपकाराच्च न सम्बन्धी च तादृशः ॥

जनने चापि कार्यस्य केन चित्समवायिना ।
समवायी तदा नासौ न ततोऽतिप्रसगतः ॥
तयोरनुपकारेऽपि समवाये परत्र वा ।
सबन्धो यदि विश्वं स्यात्समवायि परस्परम् ॥
संयोगजननेऽपीष्टौ ततस्संयोगिनौ न तौ ।
कर्मादियोगितापत्तेः स्थितिश्च प्रतिवर्णिता ॥ इत्यादि ॥

एतेषां श्लोकानामप्यर्थ विस्तरेणात्रैव प्रमेयकमलमार्तण्डे प्रकाशित विस्तरापेक्षिभि द्रष्टव्य । विश्वापह्नववादिनामय सिद्धान्त इति सर्व भद्रम् ॥

एवं सकलसिद्धान्तमूलभूतो महत्तरः ।
कार्यकारणभावाशविचारः समगृह्यत ॥

इति दर्शनोदये कार्यकारणभावनिरूपण नाम सप्तम परिच्छेद

श्रीभाष्य भूषण प्रारम्भः

1 उपोद्घात प्रकरणम्.

---

१ मङ्गलवाद

जगज्जन्मस्थेमप्रलयरचनाकैतववशात्
दयाधीनस्तापत्रितयपरितप्तान् जनिमत.।
समुद्धर्तुं श्रेयः प्रदिशतुमनन्त व्यवसितः
श्रियः कान्तः पायादखिलदुरपायाज्जगदिदम्॥

श्रीशैलपूर्णभगिनीकान्तिमतीगर्भसिन्धुचन्द्रमसम्।
हारीतकेशवसुतं कलये रामानुजार्ययतिराजम्॥

वैश्वामित्रं पुण्डरीकाक्षपौत्रं
तोतारम्बाऽनन्तसूरीन्द्रपुत्रम्।
आत्रेयश्रीवादिहंसाम्बुदार्य
च्छात्रं श्रीमद्वेङ्कटेश श्रयेऽहम्॥

यः श्रीवत्सान्ववायद्युमणिरगणि यं श्रीसदार्योऽन्वगृह्णात्
विद्याभिर्येन पुत्री सकलजनसुहृद्रामभिश्रो बभूव।
यस्मै श्रीरङ्गधामा निजपदमदिशत् स्यामहं चापि यस्मात्
यस्य ख्याता विरक्ति. मम भवतु मनो राघवार्ये सदाऽस्मिन्॥

श्रीरङ्गनाथकालिवैरिकृपाकटाक्ष-
संपूर्णपात्रमखिलागमलब्धवर्णम्।
वाधूलवंशतिलकं विबुधेन्द्ररत्नं
कस्तूरिरङ्गगुरुमन्वहमाश्रयामः॥

लक्ष्मीपुरं श्रीनिवास विपश्चिच्चक्रवर्तिना ।
श्रीभाष्यभूषणं नाम टीका तन्वी विलिख्यते ॥

२ मङ्गलपद्यव्याख्या

अथ खलु भगवान् श्रीभाष्यकार श्रीमान् रामानुजाचार्य प्रारिप्सित प्रबन्धस्याविघ्नेन परिपूर्त्यर्थं प्रचयार्थं च शिष्टाचारादि प्रमाण सिद्धमिष्टदेवताभक्त्याशीरूप मङ्गल स्वानुष्ठितमपि शिष्याणां शिक्षार्थं तदनुकीर्तनेन महिष्ठमङ्गळावाप्त्यर्थं च आदौ निबध्नाति—**अखिलेति ॥**

प्रारिप्सितं निमित्तं स्यादविघ्नेन समापनम् ।
प्रचयश्च फलं तस्मान्मङ्गळाचार इष्यते ॥
विषयश्च फलं चैव संबन्धश्चाधिकार्यपि ।
ज्ञेयं श्लोके क्रमात्पादैरनुबन्धिचतुष्टयम् ॥

प्रथमे पादे जगत्कारणरूपविषयप्रदर्शनम्, द्वितीये रक्षालक्षण-प्रयोजनसूचनम्, तृतीये श्रीभाष्यरूपप्रबन्धेनायोगान्ययोगव्यवच्छेदा-त्मकसबन्धसूचनम्, विशिष्टाधिकारिव्यञ्जन तुरीय इति ॥

अखिलेत्यादिना प्राप्यत्वौपयिक परत्वमुक्तम् । आदिपदेनान्त· प्रवेशनियमनमोक्षप्रदाने गृह्येते । स्वकार्यस्थजन्मादे लीलात्ववर्णनात् लीलायाश्च स्वबुद्धिपूर्वकस्वगतस्वप्रीत्यात्मकव्यापाररूपत्वादुपादानत्व निमित्तत्वयोस्सिद्धि । अभिगम्यत्वौपयिक सौलभ्यमुच्यते—**विनतेति ॥** भूतसबन्धी व्रातो भूतव्रात·, भूतानि तदीयानि च, षष्ठ्या सबन्ध-मात्रोक्ते·, अन्यथा व्रातपदनैरपेक्ष्यात् । रक्षायामेका दीक्षा यस्येति वा रक्षायामेकदीक्ष इति वा विग्रह । अस्मिन्नर्थे प्रमाणमाह—**श्रुति-शिरसीति ॥** कारणस्य ब्रह्मत्वमाह—**ब्रह्मणीति ॥** ब्रह्मशब्दस्य साधा-रण्यमन्वारुह्य श्रीनिवास इति विशेषनिष्कर्ष । तेन रूढि स्थापिता ।

उपायं निरूपयति---**परास्मिन् शेमुषीति** ॥ शमदमाद्यङ्गिका बुद्धि श्शेमुषी । महनीयविषये प्रीति भक्ति ॥

भक्तेः पूजादिमात्रत्वं धियश्चिन्तादिरूपताम् ।
व्यवच्छेत्तुमिह न्यस्तं शेमुष्यादिपदद्वयम् ॥

अत्र प्रथमेन पादेन जगदनादिवादनिरास. । द्वितीयेन निरनुग्रहेश्वरवादनिरास. । तृतीयेन त्रिमूर्तिसाम्यैक्यव्यक्तव्यन्तरपरत्वपक्षाणां निरास । तुरीयेन उत्तीर्णवादरूप व्योमातीतवादश्च निरस्त ॥

परमगुरु सङ्कीर्त्यावान्तरगुरून् सङ्कीर्तयन् श्रीभाष्यरचनानुपपत्ति प्रशमयति—**पाराशर्येति** ॥ यदीद शारीरकशास्त्र लोकायतादिवत्प्रतारकप्रोक्त, भ्रान्तिमूल, निष्प्रयोजन, अपरिगृहीत, स्पष्टार्थ, विवक्षिते नेतुमशक्य, अनधिकारिक वा स्यात्, न तर्हि व्याख्येयमिति शङ्का· क्रमेण पदै प्रतिक्षिप्यन्ते । **व्याघातेति** ॥ परस्पर पीडनेनाबोधासमग्रबोधान्यथाबोधार्हामित्यर्थ । **निजेति** ॥ कद्रूसुपर्ण्याख्यानप्रसिद्धै गायत्र्यवयवैरमृताक्षरैरिति सोमाख्यसुधापक्षे व्याख्या ॥

आख्यान चेद तैत्तिरीयसहिताया (६-१—५) 'कद्रूश्च ह वै सुपर्णी चात्मरूपयोरस्पर्धेतां सा कद्रूस्सुपर्णीमजयत्साऽब्रवीत्तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मान निष्क्रीणीष्वेति । छन्दासि सौपर्णेयास्साऽब्रवीदस्मै वै पितरौ पुत्रान् बिभृतः तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मान निष्क्रीणेष्वेति मा कद्रूरवोचदिति । जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताम् । त्रिष्टुगुदपतत्त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताम् । गायत्र्युदपतच्चतुरक्षरा सती सोम चाहरच्चत्वारि चाक्षराणि साऽष्टाक्षरा समपद्यत" इति ॥

2 सूत्रपदार्थप्रकरणम्.

३ सप्रदायसूचनम्.

सूत्राभिप्रायसंवृत्या स्वाभिप्रायनिवेदनात्।
व्याख्यातं यैरिदं सूत्रं व्याख्येय तन्निवृत्तये ॥

इति भास्करभाष्यम्, "अपराण्यपि सूत्राणि यथासंभव द्रष्टव्यानि". इत्यानन्दमयाधिकरणस्थ शाङ्करभाष्य चाभिसन्धायाह— **भगवदिति ॥**

अत्राथशब्दस्यानन्तर्यार्थकत्वे "साधनचतुष्टय पूर्ववृत्तम्" इति शाङ्करभाष्यम्। "तापत्रयाभिहति पूर्ववृत्तम्" इति यादवप्रकाशभाष्यम्। "कर्मविचार पूर्ववृत्तम्" इति भास्करभाष्यम्"। "देवादिभ्योऽनृणीभाव प्रज्ञापरिपाककषायश्चेत्यन्ये" इति भास्करभाष्योल्लिखित मतान्तरम् ॥

तथा—पञ्चपादिकाया तृतीयवर्णकेऽनूदित "कर्मणामधिकारपरम्परया शब्दतो वा सस्कारतया वा यथाविभाग तादथ्यावगमान्निश्रेयसप्रयोजनत्वाच्च आनन्तर्यवचनोऽथशब्द । अधिगतादनन्तरम्" इति वृत्त्यन्तरवाक्यम् ॥

तथा—तत्रैवानूदित "तत्राथातश्शब्दौ प्रथम एवाध्याये प्रथमसूत्रे वर्णितौ। अथेति पूर्वप्रकृता धर्मजिज्ञासामपेक्ष्य अनन्तर ब्रह्मजिज्ञासाप्रारम्भार्थ. । अत इति पूर्वनिर्दिष्टस्यैवार्थस्य हेतुतामाचष्टे ब्रह्मजिज्ञासां प्रति" इत्यपरवृत्तिवाक्यम् ॥

"वृत्तात्कर्माधिगमादनन्तर ब्रह्मविवदिषा" इति बोधायनापराभिधानोपवर्षाचार्यविरचितपूर्वोत्तरमीमासाव्याख्यानरूपवृत्तिग्रन्थवाक्यम्। एतत्सर्वमभिसन्धाय बोधायन मत मङ्गीकृतम् ॥

४ अथातश्शब्दार्थ

अयमथशब्दः आनन्तर्यवाचकः प्रसिद्धिप्रकर्षात्समतवत् । प्रसिद्धिश्च प्रयोगप्राचुर्यमित्यभिप्रेत्याह—**अत्रायमिति ॥** भवतिना प्रसिद्धिस्सूचिता । **अय**मेतच्छब्दशिरस्क. । अतश्शब्देऽप्ययमेव न्याय । **वृत्तस्येति ॥** शाबरभाष्ये "वृत्तस्यापदेशको हेत्वर्थ" इति दृश्यते । एतेन वृत्तविशेषस्य सभवप्रदर्शनपर शाकर भाष्य सूचित भवति । अत्र—

आनन्तर्येऽप्यहेतुत्वं हेतुत्वेऽपि विलम्बनम् ।
दृष्टमिष्टं च तत्सार्थमथातश्च पदद्वयम् ॥

इति विज्ञेयम् ॥

एतेन—अयमथशब्दो नानन्तर्यवाचक असाधारणवृत्तविशेष-शून्यशास्त्रारम्भसूत्रघटकत्वात् सामान्यत "अथ शब्दानुशासनम्" इत्यादिसूत्रघटकाथशब्दवत् । ततश्चासाधारणवृत्तविशेषादर्शनात्प्रसिद्धि-प्रकर्षहेतुरसिद्ध. इत्याक्षेपे कर्मविचारो ब्रह्मविचारपूर्ववृत्त तन्नियत-पूर्ववृत्तित्वात् सामान्यत कर्मविचारपूर्ववृत्तसाङ्गाध्ययनवदिति न्यायेन पूर्वपक्षहेतुरसिद्धीकृत इत्यवधेयम् ॥

अधीतेति ॥ अधिगतिः प्राप्ति. । **कर्मज्ञानं** कर्मनिर्णय. । केवलपदेन विद्याङ्गकर्मव्यवच्छेद । अल्प अस्थिर फल यस्येति बहु-व्रीहिः । इद कर्मविशेषणम् । अनन्त स्थिर फल चेति कर्मधारयवृत्त्या ब्रह्मविशेषणम् ॥

अत्र षष्ठ्यन्तद्वयेन कर्मविशेष्यकाल्पास्थिरफलत्वप्रकारकानिर्ण-यविशिष्टब्रह्मविशेष्यकानन्तस्थिरफलत्वप्रकारकापातप्रतीतिमान् विशि-

ष्टाऽधिकारी निष्कर्षित । तेन च निरधिकारिकत्वात् शास्त्रमनारम्भणीयमिति पूर्वपक्षेऽपि स्वरूपासिद्धिरुक्ता भवति । तदुक्तम्--

व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्य मन्येन सिद्धत्वमथाफलत्वम् ।
एतानि वै सूत्रचतुष्टयेनानारम्भमूलानि निराकृतानि ॥ इति ॥

सिद्धे व्युत्पत्त्यभावो नाम सिद्धविषयकबोधनसामर्थ्यानवधारणप्रयुक्ततद्बस्तुविषयकतात्पर्यग्रहविरह ॥

५ ब्रह्मजिज्ञासापदार्थ

धर्मजिज्ञासेत्यत्र शबरस्वामिना धर्माय जिज्ञासेति भाषितम् । गुरुमते तथैवाभ्युपगतम् । कुमारिलेन तु शेषषष्ठ्यर्थविवरणपरतया तद्वाक्य व्याख्याय चतुर्थीसमासो दूषित । शाङ्करे ब्रह्मजिज्ञासेत्यत्र शैषिकी षष्ठी दूषिता । यादवप्रकाशेन शैषिक्येव षष्ठी भाषिता । "प्रयोजनविवक्षया तु चतुर्थीसमासोऽपि स्यादिति" पञ्चपादिकाविवरणे प्रोक्तम् । रत्नप्रभाया "वृत्त्यन्तरकर्तृभि ब्रह्मणे जिज्ञासेत्युक्त चेदस्तु ज्ञानत्वेन ब्रह्मण फलत्वात्" इत्यप्यनूदितम् । एव वैविध्येऽपि "तद्विजिज्ञासस्व" इति श्रुत्यनुरोधेन कर्मणिषष्ठ्येव सूत्रकृदभिप्रेतेति हृदि निधायाह--**ब्रह्मण इति ॥**

ननु किमर्थलभ्ये शब्दव्यापारेण? कृद्योगषष्ठ्यनुशासनस्य कर्मादिविवक्षयामपि द्वितीयादिनिषेधेन षष्ठीसाधुत्वतात्पर्यात् । विशेषविधि न शैषिकी षष्ठीमपवदेत् । तद्धे च ब्रह्मतदनुबन्धिकृत्स्न शास्त्रार्थविचार्यत्वसूचनमधिक प्रयोजनमित्यभिप्रायेणाशङ्का--**यद्यपीति ॥** यद्यपिपदमवधारणार्थक सिद्धिरित्यनेनान्वेति । अय पूर्वपक्ष्यभिप्राय । परप्रत्यायनार्थे शब्दप्रयोगे विलम्बितधीहेतूपादानस्यानुचितत्वात् अर्थलभ्यार्थग्रहणापेक्षया क्लृप्तशक्तिकशब्दार्थग्रहणस्योचितत्वात् अनुबन्धि-

विचारस्य मुख्यविचारान्तर्नीतत्वात् कृत्योगषष्ठ्यैव विग्रहस्समुचित इति समाधत्ते—**तथापीति ॥**

"सर्वा प्रतिपदविधाना शेषलक्षणां वर्जयित्वा" इति भाष्येष्टि-सिद्धात् प्रतिपदविहितत्वात् समासनिषेधमाशङ्क्य परिहरति—**नचेत्यादिना ॥**

शब्दस्वभावमनुस्मृत्याह—**ब्रह्मशब्देन चेति ॥** उभयलिङ्गत्वेन क्षराक्षरविलक्षण इत्यर्थकः ब्रह्मशब्द । अत्र निरतिशयोत्कर्ष योग-निमित्तम् । पुरुषोत्तमत्वलक्षण श्रिय पतित्व रूढिनिमित्तम् । बृह-च्छब्दवत्साधारण्यमपाकरोति—**बृहत्वं चेति ॥ भगवच्छब्दवदिति ॥** इद वैष्णवपुराणवचन हृदयस्थितम्—(६—५)

> तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वित. ।
> शब्दोऽय नोपचारेण ह्यन्यत्र ह्युपचारत ॥
> ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषत. ।
> भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥

इति । अर्थस्वभावमनुसृत्याह—**तापेति ॥ जिज्ञासाकर्मभूतं** जिज्ञा-सयाऽऽप्तुमिष्टतममित्यर्थ । जिज्ञासेत्यत्र प्रकृत्यर्थस्योपसर्जनत्वात् प्रत्यया-र्थस्य विषयानुकूल्यनिघ्नतया रागप्राप्तत्वादुभयमपि न विधेयमित्याशङ्का-यामाह—**ज्ञातुमिति ॥** प्रत्ययार्थस्य शाब्दे प्राधान्येऽपि आर्थ प्राधान्यं प्रकृत्यर्थस्यैवेत्यत' क्रियाया कर्मसिद्ध्यर्थतया कर्मैव पोक्षणीयव्रीह्यादिवत् तात्पर्यमुख्यविशेष्य विधेयमिति भाव' । तथाच ज्ञान विचारात्मक विधेय इष्यमाणत्वात् इच्छया आप्तुमिष्टतमत्वात् प्रधानत्वादिति प्रयोग. । तेन उपसर्जनत्वादिति हेतुरसिद्ध इति भावः । अयमर्थ शाङ्करेऽपि दृश्यते। सन्प्रयोगस्तु विचाररूपज्ञानस्य रागप्राप्तत्वसूचनार्थ । **विधीयत** इत्यु-

क्तिस्तु अनारम्भणार्हत्वभ्रमनिषेधार्था । विधिरत्राज्ञातसिद्धव्युत्पत्तिज्ञापनरूपः । उपासनस्यापि प्रीतिरूपतया रागप्राप्तत्वेऽपि तस्य श्रेयस्साधनत्वमलौकिकमिति वैधत्वोपपत्तिः ॥

६ शास्त्रैकत्वम्

गुरूपासनादीना पूर्ववृत्तत्वव्यावृत्तये विशिष्टवाक्यार्थमाह—**मीमांसेति ॥ विशेषण** हेतुहेतुमद्भावादिसम्बन्धेन । **विशिष्टक्रमं** नियतक्रमम् । एतेन नियतपौर्वापर्यभागद्वयात्मकवेदाख्यैकव्याख्येयव्याख्यानरूपत्वादेकशास्त्रत्वसिद्धिः । ततश्च अथशब्द· कर्मविचारानन्तर्यार्थक· एकशास्त्रीयभागान्तरारम्भसूत्रघटकत्वात्सामान्येन अथातश्शेष लक्षणमित्यादिस्थलीयाथशब्दवदिति न्यायेन गुरूपासनादीना नियतपूर्ववृत्तित्वेऽपि नाथशब्दार्थत्वप्रसङ्ग । चतुर्लक्षण्यात्मको देवताकाण्डस्तु कर्मशेषभूतः । अतो देवताविचारान्तरमिति नार्थ ॥

७ अथ शब्दार्थसमर्थनम्—स्वाध्यायविधिवाक्यार्थ

अथ कर्मणो हानार्थ तद्विचारस्य पूर्ववृत्तत्व समर्थयितु प्रारभते । तत्र कर्मविचारो ब्रह्मविचारपूर्ववृत्त तन्नियतपूर्ववृत्तित्वादिति निरुक्तानुमाने ब्रह्मविचारनियतपूर्ववृत्तित्वहेतुरसिद्ध , अन्वयव्यतिरेकाभ्या व्यभिचारादिति चेन्न—कृतकर्मविचारेषु क्वचित् ब्रह्मविचारविरह नियति विशेषनियतवैराग्याभावार्थीन इति नाद्यो व्यभिचार । द्वितीयेऽपि किमध्ययनात्प्राच्यो ब्रह्मविचार·[१] आहोस्वित्प्रतीच्य·[१] इति विकल्प्य आद्य. कल्प शक्त्यभावान्निरस्यते—**तथाहि प्रथमामिति ॥ ग्रहणं विधीयते ॥** फलत्वेन बोध्यत इत्यर्थ. ॥

यद्यपि "स्वाध्यायोऽध्येतव्य." इति विधिनित्य·, अकरणे प्रत्यवायदर्शनात्, निमित्तादर्शनाच्च । तथापि दृष्टफलस्यापरित्याज्य

तया तदंशे नियमः—यथा जपादिः, अनुष्ठानौपयिक विज्ञान चाध्ययनगृहीतेनैवेति । अक्षरराशिग्रहणकामना तु वैतुष्यकामनावदधिकारिविशेषणम् । अतो न काम्यत्वशङ्का । इदमत्रावधेयम्—

तत्रार्थकर्माध्ययनं सम्मतं सक्तुहोमवत् ।
स्वरूपतो विधेयं स्यादध्यापनविधेर्बलात् ॥
प्रयुक्तं चोपनयनमङ्गमध्यापनस्य च ।
प्राभाकरस्याभिमतमेतदर्थचतुष्टयम् ॥
गुणकर्म त्वध्ययनं अवघातादिवन्मतम् ।
नियमोऽत्र विधेयस्स्यात् प्रयुक्तं स्वविधेर्बलात् ॥
स्वस्योपनयनं चाङ्ग एवमर्थचतुष्टयम् ।
कुमारिलस्याभिमतं ज्ञानान्तत्व द्वयोस्समम् ॥
तत्रौपनिषदाना तु मतं स्याद्भाट्टसम्मतम् ।
विशेषस्स्यादुभयतो ह्यक्षरग्रहणान्तता ॥

इति । मानमेयश्लोकवार्तिके (४५८ पु) विस्तरो द्रष्टव्य ॥

"अष्टवर्षं ब्राह्मणमुपनयीत" इत्याद्या उपनयनपूर्वकत्वादि विधयश्चापेक्षितविधय । "अध्यापयेत्" इत्यादयस्तु याजनादिवत् वृत्त्यर्थतया प्राप्तत्वात् "द्वादशाहेन प्रजाकाम याजयेत्" इत्यादिवत्स्यु. । तथाचाष्टवर्षो ब्राह्मण स्वाध्यायग्रहणकाम उक्तप्रकाराचार्योपनीत सदुपसत्त्या यथोक्तव्रतनियमवान् अधीयीतेति सोपबृहणाद्याध्ययनशास्त्रार्थ. ॥

ननु वृत्त्यर्थाध्यापनात् अन्यदेव धर्मार्थमध्यापनमस्ति । तद्विधि प्रयुक्तमध्ययन स्यादिति चेदुच्यते-स च नित्यो नैमित्तिक काम्यो वा ? नाद्यः, लघुविषयाध्ययनविधिनान्तरीयकत्वात् । न द्वितीय., नियतनिमित्तादर्शनात् । न तृतीय., दृष्टे सभवत्यदृष्टकल्पनानौचित्याच्चेति ॥

अथाध्ययनस्य नियोगविषयत्वलक्षणार्थकर्मत्वप्रतिक्षेपेण व्यतिरेकव्यभिचारे द्वितीयः कल्पो निरस्यते —**अध्ययनंचेति**॥ अय भावः— अध्ययनस्य नियोगविषयत्वलक्षणप्रधानकर्मत्वे "सकृत्कृतश्शास्त्रार्थः" इति न्यायेन अध्ययनेन स्वाध्यायग्रहणासभवात् तत्र सशयानुदयाच्च तदर्थविचारे प्रवृत्तिरेव नोत्पद्येत । संस्कारकर्मत्वे तु अधीतसाङ्गसशिरस्कवेदानां त्रिवर्गप्रवणानां प्रथम स्वरसतः कर्मविचारप्रवृत्तिः। ततश्च स्वारसिकी ब्रह्मविचारप्रवृत्तिरित्यध्ययनादनन्तर कर्मविचाराभावेऽपि ब्रह्मविचारोऽसिद्ध इति न व्यतिरेकव्यभिचार इति ॥

स्वाध्यायोऽध्ययनसस्कार्यः उत्पाद्यत्वप्राप्यत्वविकार्यत्वविरहसहकृतकर्मत्वात् प्रोक्षणीयव्रीह्यादिवादिति न्यायोऽभिमत ' इदमवधेयम्—

उत्पत्ति राप्तिर्विकृतिस्संस्कृतिश्चेति भज्यते ।
आधानाधीत्यवाघातप्रोक्षणानीत्युदाहृतिः ॥

इति मीमांसकमतेन यद्यपि स्वाध्यायस्य आप्यत्व युक्तम् । तथापि फलान्तरे सभवति तावन्मात्रपर्यवसानमयुक्तमिति भाव । अध्ययनस्य स्वाध्यायसस्कारत्व शालिकनाथेनापि वाक्यार्थमातृकायां सप्रदायतः प्रोक्तम्—

संस्कार्यगणनायां च युक्तैवाक्षरसंस्क्रिया ।
स्वाध्यायो हि स्फुटं कर्म साक्षात्संस्क्रियते हि सः ॥ इति ॥

अध्ययनसस्कार्यत्वानुमाने बाधं परिहरति—**धर्मार्थेति**॥ भाविदृष्टादृष्टविविधप्रयोजनप्रयोजकत्वादुपयोक्ष्यमाणसस्कार इति भाव' । अर्थकामतदुपायानां लोकसिद्धत्वेऽपि त्रैलोक्यविभवादिरूपफलतदुपायानां धृतिलक्षणसुखसाधनत्वेन शास्त्रग्राह्यत्वात् युक्त धर्मत्वम् । आत्मा कदाचित्समस्तविशेषगुणशून्य. अनित्यविशेषगुणवत्त्वात् घटादिवदित्याद्यनु-

मानाना मोक्षसाधकानामप्रयोजकत्वमिति भाव । **जपादिनेत्यादि**पदेन अध्यापन गृह्यते ।

वेदस्वीकरणं पूर्व विचारोऽध्ययनं जपः ।
तद्दानं चैव शिष्येभ्यः वेदाभ्यासो हि पञ्चधा ॥

इति दक्षादिस्मृतेः । जपविधिश्च निरर्थकोच्चारणविषयोऽपि स्वाध्याय-स्यार्थपरता न बाधते । यदाहु —

स्वरूपेण जपाद्यर्थः स्वशक्त्याऽर्थावबोधकः ।
रूपभेदाद्विरोधो नो यथाग्नेर्दाहभासयोः ॥ इति॥

अध्ययनविधेरनुष्ठानोपयोग्यर्थज्ञानपर्यन्तता मीमासकाभिमतां प्रतिक्षिपति— **एवमिति ॥ मन्त्रवन्नियमवदिति ॥** मन्त्रा काण्डव्रता-द्यङ्गभूता. अध्ययनदशाया जप्या. "श नो मित्र" इत्याद्याश्च । नियमा "श्रावण्याम्" इत्यादिना प्रागुक्ता । तद्वैशिष्ट्यमनूच्चारण-गतमक्षरग्रहणे उपचरितम् ॥

अत्रायमाशय.—अध्ययनस्य स्वयप्रयोगानुगुणाक्षरग्रहणार्थतैव लौकिकवाक्याध्ययनस्येव युक्ता "यो ह वा, अविदित्वा ऋषिम्, यदधीतम्, स्थाणुरयम्, यश्च मीमासतेऽध्वरम्," इत्यादिभिस्तु अर्थज्ञान-प्रशसया स्वत प्रवृत्तिरुत्तभ्यते, यथा रागप्राप्तऋतुगमनादेः अकरणे दोष. विधिवत्करणे सतत्यादिलाभश्च फलत्वेन स्मर्यते, एवमिहापीति ॥

यद्यप्यङ्गाध्ययनस्य अङ्ग्युपकारकतानिर्वाहायार्थज्ञानपर्यन्तत्वे अङ्गिनः उपकार्यतानिर्वाहायाध्ययनमर्थज्ञानपर्यन्तमित्यापतति विध्यैकरूप्यात् । तथापि अङ्गाध्ययनस्य केवलदृष्टार्थत्वाभ्युपगमादस्ति किंचिद्वैषम्यम् । विचारे स्वयप्रवृत्तावपि तदुपायभूतश्रवणादौ गुर्वभिगमन नियम्यते ॥

नन्वध्ययनस्यापातघ्नजननद्वारा कर्मविचारप्रवर्तकत्वमुक्तमयुक्तम् "आचार्यकुलाद्वेदमधीत्य, अधीत्य स्नायात्" इत्यादिभिः स्नानविधिभि अनवसरावगमादिति चेदत्राहुः—

अनुज्ञातं च सर्वत्र न स्वाङ्ग व्यवधायकम् ।
अतो मीमांसया नात्र व्यवधान विरोधकृत् ॥
गृहस्थस्य श्रावयितुर्यथाऽवसरसम्भव ।
समावृत्तस्य वा तद्वत्समय श्रोतुरिष्यते ॥ इति ॥

अथाध्ययनविधेरर्थज्ञानपर्यन्ततानिरासमुपसहरति—**अध्ययनगृहीतस्येति ॥** अत्र स्वभावत एवेत्यनेन विधेरक्षरग्रहणमात्रपर्यन्तत्वे अर्थातत्परत्वाद्वेदो निरर्थकस्स्यादिति शङ्कानिरास । दर्शनादित्यन्तेन परम्परया पुरुषार्थपर्यवसानतत्परेण विधिर्निरर्थकस्स्यादपुरुषार्थत्वादिति शङ्कानिरास । अवगम्यमानानित्यन्वितेन दृष्टेत्यनेन मीमांसाऽप्यनारभ्या प्रवर्तकविरहादिति शङ्कानिरास । श्रवणे इत्यन्तेन एकव्याख्येयव्याख्यानरूपासम्भवात् शास्त्रैक्य दुर्भणमिति शङ्कानिरास इति भाव । **तत्रेति ॥** स्वय प्रवृत्ताविवर्थ ॥

८ अतश्शब्दार्थसमर्थनम

एवमथशब्दार्थ स्वाध्यायविधिवाक्यार्थेन समर्थ्य अतश्शब्दार्थ श्रुतिभिरेव समर्थयति—**तथाचेति ॥** कर्मविचारनिश्चितसवादेनानिश्चिते श्रद्धां समर्थयद्वाक्य—**तद्यथेति ॥** लोक्यत इति लोकः भोग्यः । कर्मवैयर्थ्यशङ्कामपनुदद्वाक्य—**अन्तवदिति ॥** प्रायिकत्वशङ्कामपनुदद्वाक्य—**नहीति ॥** तमर्थ द्रढयद्वाक्य—**प्लवा इति ॥** उभयविधफलं समुच्चित्य वदद्वाक्य—**परीक्ष्येति ॥** य इत्यध्याहार्यम् । **ब्रह्म** अणति अधीते इति **ब्राह्मणः** त्रैवर्णिक । **येन** विद्याविशेषेण । **वेद** विद्यात् । **प्रोवाच** प्रब्रूयात् । ब्रह्मफलस्य निरतिशयत्व वदद्वाक्य—

ब्रह्मविदिति ॥ पुनरावृत्तिशङ्कामपनुदद्वाक्य–**न पुनरिति ॥** सर्वज्ञत्व वदद्वाक्य––**न पश्य इति ॥** पश्य पदस्य विषय वदद्वाक्य– **तदेकमिति ॥** सर्वात्मकमित्यर्थ. । स्वातन्त्र्य निराकुर्वद्वाक्य – **स स्वराडिति ॥** अकर्मवश्य इत्यर्थ । उपायवैलक्षण्य वदद्वाक्य–**तमेवेति ॥** उपायस्य विषय वदद्वाक्य––**पृथगिति ॥** पृथक् मत्वेत्यन्वय । **ततः** पृथक्त्वमननात् । **तेन** प्रेरकेण । **जुष्टः** वरणीय । आदिशब्द "भूयसा स्याद्वलीयस्त्वम्" इति न्यायसूचनार्थ । कर्मविचाररूपहेतोरन्यथासिद्धिमनूद्य परिहरति–**ननु च साङ्गेति ॥**

3 लघुपूर्वपक्षः

९ साधनचतुष्टयं पूर्ववृत्तम्

अथ कर्मण उपादानार्थं पुनरथशब्दार्थ एव समर्थ्यते । अत्र न कर्मविचार. ब्रह्मविचारपूर्ववृत्त ब्रह्मविद्यासमुच्चयानर्हविषयकत्वात् अर्थकामविचारवदिति सत्प्रतिपक्षमभिप्रेत्याशङ्कते––**ननु च ब्रह्मेति ॥**

इदमत्र शाङ्करभाष्यवाक्यद्वय हृदि निधेयम् । "एव ब्रह्म जिज्ञासाऽपि यत्पूर्ववृत्त नियमेनापेक्षते तद्वक्तव्यम्, स्वाध्यायानन्तर्य तु समानम् । नन्विह कर्मावबोधानन्तर्य विशेष., न––धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः" । "उच्यते––नित्यानित्यवस्तुविवेक इहामुत्रफलभोगविराग , शमदमादिसाधनसम्पत्, मुमुक्षुत्वञ्च । तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया. ऊर्ध्व च शक्यते ब्रह्म जिज्ञासितु ज्ञातु च न विपर्यये" इति । साधनचतुष्क पूर्ववृत्त नियमेनापेक्षितत्वादिति न्यायोऽत्राभिप्रेत । इममेव हेतु सिद्धान्तेऽन्योन्याश्रयदोषेणासिद्धयति । **अधीतवेदान्तस्येति ॥** वेदान्तमात्राध्यायिन **इत्यर्थः** । अवयुत्याध्ययने मानाभावोऽनुवादेन व्यञ्जित· ॥

१० उद्गीथविचार

कर्मेति॥ उद्गीथाद्युपासनानि अनधिगतकर्मणोऽशक्यचिन्तनानि कर्माङ्गविषयत्वात् प्रणयनाश्रयगोदोहनादिवादिति प्रयोगोऽभिप्रेत.। इय सिद्धान्तिसम्मता प्रधानयुक्ति· । तामुपालभते—**अनभिज्ञ इति॥ शारीरको** जीवः । **मिथ्याज्ञानं** भ्रान्तिज्ञान मिथ्याभूतमज्ञान वा । **प्रतिपिपादयिषितं** प्रदातु प्रापयितु वा इष्टमित्यर्थ । प्रस्तावोद्गीथ-प्रतिहारोपद्रवनिधनाख्येषु सामावयवेषु द्वितीय उद्गीथ.। **न साक्षादिति॥** प्रसङ्गादित्यर्थः । उक्ता युक्तिरप्रयोजिकेति भाव ॥

११. कर्मसमुच्चय विचार

अथ भास्करयादवसिद्धान्तिमतावमर्शी मध्यस्थ प्रत्यनुमाने हेत्वसिद्धि शङ्कते—**बाढमिति॥ कर्मसमुच्चितादिति**। साहित्य विवक्षित, तच्च यथायथम् । तथाहि-भास्करमते प्रयाजादिवन्निष्पन्नस्य करणस्य फलोत्पत्तौ सहकारित्वलक्षण आरादुपकारकत्वरूपाङ्गत्व कर्मणोऽभिमतम् । यादवप्रकाशमते प्रथम ज्ञानोत्पादकतया द्रव्यादेरिव करण-शरीरनिष्पादकत्वलक्षण सन्निपत्योपकारकत्वरूपमङ्गत्व, ततश्च मृत्यु-तरणरूपफलभेदसाधनत्वेन ज्ञानसमप्रधानत्वम् । साध्यद्वित्व साधनद्वित्वं चाभिमतम् । सिद्धान्तिमते सन्निपत्योपकारकत्वरूपमङ्गत्वमेवेति विशेष· । **केन समुच्चय इति॥** नित्यनैमित्तिकाभ्या समुच्चय निषिद्धकाम्याभ्यां नेत्यर्थ ॥

यद्यपि यादवप्रकाशमते तापत्रयाभिहते पूर्ववृत्तत्वमभिहितम् । तथापि विषमत्वेन समत्वेन च कर्मण. क्रमेण समुच्चेतव्यत्वात् अन्तत कर्मविचारपूर्ववृत्तत्व दुस्त्यजमित्याशय ॥

१२ विरोधाधिहेतुषट्कम्

समसमुच्चयपक्षनिरासेन हेत्वसिद्धि परिहरति—**नैतद्युक्तामिति॥**

सकलेति साधनद्वित्वनिरास. । **अविद्येति** साध्यद्वित्वनिरासः । **प्रत्यनीकत्वं** निवर्तकधीगोचरत्वम् । तुच्छत्वव्यावृत्तये चिच्छब्द. । विरोध व्यनक्ति —**वर्णाश्रमेति** ॥ **निवृत्तिरूपेति** ॥ अज्ञानसदसद्भावयो भेददर्शनसदसद्भावनिरूप्यत्वात्तद्रूपत्वोक्ति । कर्म न मोक्षसाधन अनित्यत्वात् सम्प्रतिपन्नवदिति युक्तिमभिप्रेत्य तदनुग्राह्य मानं दर्शयति—**श्रुतयश्चेति** ॥ अनित्यत्व वदद्वाक्य—**अन्तवदिति** ॥ स्वरूपत फलतश्च बोध्यम् । तदुपपादक वाक्य—**तद्यथेति** ॥ ज्ञानस्य साधनत्वं वदद्वाक्य—**ब्रह्मविदिति** ॥ भेदनिषेधेन कर्मणस्साधनत्व नास्तीति व्यञ्जयद्वाक्य—**ब्रह्मवेदेति** ॥ मृत्युतरणमपि ज्ञानसाध्यमिति वदद्वाक्य—**तमेवेति** ॥ चित्तशुद्ध्युपयोग वक्ष्यन् विषमसमुच्चयपक्षनिरासेन तामेवासिद्धि परिहरति—**यदपि चेति** ॥ **वस्तुविरोधः** भेदाभेदवासनयो. तत्फलयो बन्धमोक्षयोश्च विरोध । **श्रुत्यक्षरं** सन्प्रत्यय· । असिना जिघासतीत्यादावगतिका क्लिष्टा गतिरिति भाव ॥

अयमाशय —"यज्ञेन" इत्यादिश्रुत्या इच्छासाधनत्वमवगम्यते, "क्रियावान्" इति श्रुत्या वेदनसाधनत्वम्। तथापि "शान्तो दान्तः" इत्युत्पत्तिवाक्यशिष्टेन निवृत्तिरूपशमादिगुणेनावरुद्धे ज्ञाने गुणान्तरसामान्यस्याप्यनिवेशे किपुन प्रवृत्तिरूपस्य कर्मलक्षणस्य गुणस्येति न्यायेन क्रियावानिति श्रुति स्तुति न तु विनियोक्रीति स्वीकर्तुमुचितामिति ॥

शमादीनां ज्ञानाङ्गत्वमाह—**विविदिषायां जातायामिति** ॥ ज्ञानमात्रस्य हेतुत्व श्रावयति—**तदेवामिति** ॥ तत्र कारणत्वेन लक्ष्यत्वात् ब्रह्मण. प्रथम कारणवाक्य —**सदेवेति** ॥ एकमेवाद्वितीयपदै विजातीयसजातीयस्वगतभेदत्रयनिषेध । कारणत्वशङ्कितदोषान् शोधयद्वाक्य—

सत्यमिति ॥ अनृतजडपरिच्छिन्नव्यावृत्तिरिहाभिप्रेता । शाब्दं विशेषनिषेधमाह—**निष्कलमिति ॥** जीवब्रह्मैक्यविधि·—**अयमात्मेति ॥** तात्पर्यभूम्नाऽऽज्ञातो विधि·—**तत्त्वमसीति ॥** एव च मोक्षसाधन ज्ञान न कर्मजन्यं निवर्तकज्ञानत्वात् नेद रजतमित्यादिज्ञानवदिति न्यायोऽत्राभिमत· । अत्र अप्रमाणत्वादिति हेतुस्सूचित· । श्रवणादिविधिं सफलयति—**वाक्यार्थेति ॥ प्रतिपादकानि** प्रदायकानि । कर्ममीमांसा कर्तव्यस्थापिका अविद्वदर्था । ब्रह्ममीमासा तु कर्तव्यनिवर्तिका तत्त्वबोधिका इति तत्त्वदर्शिन इत्यर्थ । आपातधीव्यावृत्तये न्याययुक्तत्वोक्ति । सशयादे पुनरनङ्कुरत्वाय मननम् । साक्षात्कारप्रतिबन्धकभेदवासनानिरसनाय ध्यानम् । "द्रष्टव्य " इति फलानुवाद· ॥

वस्तुसामर्थ्यहेतु व्यनक्ति—**तच्चेति ॥** "नास्त्यकृत· कृतेन, शान्तो दान्त , येनाऽह नामृतास्या किमह तेन कुर्याम्, मा भगवान् शोकस्य पार तारयतु" इत्यादिभिरेतच्चतुष्टयसिद्धि । अनित्यवस्तुविवेकाद्विराग । नित्यवस्तुविवेकात् मुमुक्षा । तत्पूर्वकविचारस्तु शमाद्यपेक्ष इ्युपयोगप्रकार । **अर्थस्वभावादिति ॥** वस्तुसामर्थ्यादित्यर्थ· । तच्च कर्मण· भेदावलम्बित्वम्, ज्ञानस्य निरपेक्षत्वं, शमादेर्निवृत्तिरूपत्वञ्च । एतेन शमाद्यङ्गत्वमपि व्यक्तम् । आच्छादकाविद्येत्येव पाठस्स्यात् । आच्छादिकाऽविद्येति पाठस्तु भावप्रकाशिकायां समर्थित· । **अतः** हानार्थमुपादानार्थञ्च कर्मज्ञानस्यानपेक्षितत्वादित्यर्थ· । अत्रायं तूलिकास्थ लघुपूर्वपक्ष सङ्ग्रहः—

विरोधादप्रमाणत्वाच्चित्तशुद्ध्युपयोजनात् ।
ज्ञानमात्रस्य हेतुत्वश्रुतेस्सामर्थ्यतोऽपिच ॥
शमाद्यङ्गकताज्ञानान्न धीकर्मसमुच्चयः ।
श्रवणादिक्रमोन्निद्रवाक्यजा धीर्विमोचिका ॥ इति ॥

अत्राद्यत्रिक कर्मपक्षकानुमानम्। अनन्तरत्रिक धीपक्षकानुमानम्। न धीकर्मसमुच्चय इति मतत्रयसाधारण्येन प्रतिज्ञा। विरोधः स्वरूपतः फलतश्च। अप्रमाणत्व श्रुत्यादिप्रमाणशून्यत्वम्। सामर्थ्यं मिथ्याभूतवस्तुबाधने पर्याप्तत्वम्। एवञ्च एतै हेतुभि समुच्चयानर्हविषयकत्वादिति प्रतिहेतो स्वरूपासिद्धिः परिहृता भवति॥

१३ वाक्यजन्य ज्ञान मोक्षसाधनम्

मोक्षसाधन ज्ञान प्रमाणजन्य (वस्तुतन्त्रम्) निवर्तकज्ञानत्वात् सामान्येन सम्मतवदिति युक्तिरभिप्रेता। वस्तुतन्त्र नाम तत्, यत् नियोगशतेनापि कारयितु प्रतिषेधशतेनापि वारयितुमशक्यम्॥

4 लघुसिद्धान्तः.

१४ वाक्यजन्यज्ञानस्य मोक्षहेतुत्वे शास्त्रप्रत्यक्षविरोध.

अथ कर्मविचार न पूर्ववृत्त· विद्यासमुच्चयानर्हविषयकत्वादिति प्रत्यनुमाने स्वरूपासिद्धि स्थापयति—**अत्रोच्यत इति**॥ साध्यसाधनद्वित्वनिरासोऽभिमत इत्याह **यदिति**॥ **अविद्येति**॥ अत्र विकल्प परमत स्वमतयो। मोक्षसाधन ज्ञान प्रमाणजन्यमित्यनुमानस्य शास्त्र प्रत्यक्षाभ्या बाधमभिप्रेत्य दूषयति—**नतावदिति**॥ वाक्यार्थज्ञानस्या पुरुषतन्त्रत्वात् "द्रष्टव्य·" इत्यादिशास्त्रविरोध। तावन्मात्रेणेति प्रत्यक्षविरोध "बुद्धे क्षेमप्रापणम्। तच्छास्त्रैर्विप्रतिषिद्धम्। बुद्धे चेत् क्षेम प्रापणमिहैव न दु खमुपलभेत" इति आपस्तम्बधर्मसूत्राण्यनुसहिनानि। शास्त्रविरोध मण्डनमतमाश्रित्य प्रतिवक्ति—**न च वाच्यमिति**॥ शाङ्करमतमाश्रित्य प्रत्यक्षविरोध प्रतिवक्ति—**जातेऽपीति**॥ **चन्द्रेति**॥ अङ्गुल्यवष्टम्भादिमत. चन्द्रैकत्वे वाक्यतो ज्ञातेऽपीत्युपस्कार्यम्। **अनिवृत्तामिति**॥ खण्डिता लता न पुन प्ररोहेत्। विज्ञाता प्रतिमायोषित् न

रागादिकं जनयेत् । दग्धः पटः नाच्छादयेत् । हेतुविकल चक्रभ्रम· न घटमालामुत्पादयेदिति भाव । शास्त्रविरोध स्थापयति —**सत्यामिति ॥** प्रत्यक्षविरोध स्थापयति—**सत्यपीति ॥** बाधितानुवृत्तावुक्त दृष्टान्त विषम इत्याह —**द्विचन्द्रेति ॥** प्रमितप्रामाणिकत्व प्राबल्यम् । सर्पादि-भ्रमापेक्षया भयग्रहणम् । ज्ञानानुत्पत्तिपक्ष पुनर्दूषयति —**अपिचेति ॥** अत्र दृष्टद्वारा निवर्तकत्वेऽनुपपत्तिरियम् । अदृष्टद्वारा निवर्तकत्वे निव-र्त्यसत्यत्वप्रसङ्ग. । अयमर्थस्समन्वयनये षष्ठवाक्यार्थे विस्मृतोऽवधेय ॥

१५ पुरुषतन्त्र ज्ञानमुपासन मोक्षसाधनम्

मोक्षसाधन ज्ञान प्रयत्नसाध्य शास्त्रविहितत्वादिति युक्तिमभि-सधाय स्वमतमाह —**अत इति ॥** वाक्यार्थज्ञानस्य मोक्षहेतुत्वे शास्त्र-प्रत्यक्षविरोधादित्यर्थ । पूर्वपक्ष्यनुमानस्य बाधितत्वादिति भाव । एतेन ज्ञानमात्रहेतुत्वश्रवणहेतौ सिद्धसाधन दोष इत्युक्त भवति । अत्र ध्यानादिशब्दोक्तविशेषपरता वेदनादिशब्दानामभिमता । यथोक्तम्-

वेदन ध्यानविश्रान्त ध्यान श्रान्त ध्रुवस्मृतौ ।
सा च दृष्टित्वमभ्येति दृष्टिः भक्तित्वमृच्छति ॥ इति ॥

श्रवणे मनने वा विश्रम वारयति—**श्रोतव्य इति ॥** एतेन श्रवणादित्रिक दर्शनसाधनतया विधीयत इति भास्करपक्ष·, चतुर्णा विकल्पेन मोक्षसाधनत्वमिति यादवप्रकाशपक्षश्च अपास्त. ॥

श्रोतव्यश्श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभि ।
मत्वा च सततं ध्येयः एत दर्शनहेतव ॥

इतिश्लोकेऽपि श्रवणादित्रिकस्य दर्शनहेतुत्वमात्रोक्तौ साध्यस्यापि विधे-यत्वे विरोधाभावेन रागप्राप्तश्रवणादिपूर्वकविधिपदान्तरोपात्तदर्शनाकार-विशेषित ध्यानमेवात्र विधेयमिति भाव । सवादयति—**वक्ष्यति चेति ॥** सूत्रविवरण—**तदिदमित्यादिः ॥** वेदनमुपासन व्यतिकरितशब्द

निर्दिष्टत्वात् सामान्यत प्रसिद्धमुदाहरणम् । **व्यतिकरः** मिथ स्थानापत्ति । अयमर्थ शाङ्करभाष्ये आवृत्त्यधिकरणेऽप्युक्त । क्वचिदादौ। क्वचिदाद्यन्तयोः । क्वचिदन्ते विशेषशब्दः । "न स वेद" इत्यत्र तूभयत्र उपासिः, "अथ योऽन्या देवतामुपास्ते" इत्युपक्रमात् । "यस्तद्वेद" इत्यस्यायमर्थः—ब्रह्म ब्रह्मविच्चेत्येतद्वय तवोक्तमिति । नैरन्तर्यलक्षणविशेषवत्त्व ध्यानत्वम् । विसदृशबुद्धिव्यवधानरहितप्रवाहत्व ध्रुवत्वम् ॥

१६ उपासनं स्मृतिरूपम.

सा चेति ॥ ध्यानधारणयोस्समाधिलक्षणदर्शनसाधनत्वमपि वैशद्यातिशयाधायकत्वमेव, न तु ध्यानफलमन्यद्दर्शनमिति भाव । **दर्शनरूपं** दर्शनस्य रूपमिव रूपं यस्येति विग्रह । रूप च वैशद्यातिशय । प्रत्यक्ष तु—"इन्द्रियज, समनन्तरप्रत्ययज, मानसज, भावनाबलज चेति चतुर्विधम्" इति न्यायबिन्दौ धर्मकीर्तिराह । तदनुयायिनोऽन्ये ध्याननियोगादिवादा इति ध्येयम् । मोक्षसाधनज्ञानस्य प्रमाणजन्यत्ववादोऽप्येतत्सोदर एव ॥

योगिप्रत्यक्षस्य तु बाह्येन्द्रियाणां मनसश्च सुकृतविशेषैरतिशयाधानान्नानुपपत्ति । तत एवानधीतसूक्तकाण्डमन्त्रसाक्षात्कारस्यापि नानुपपत्ति । मन्वादीना धर्मसाक्षात्कारेऽपि न खलु चोदनैकसमधिगम्यत्वविरोध , चोदनालक्षणत्वेनैव धर्मस्य साक्षात्करणात् ॥

अत. श्रुतिस्मृतिशतैश्चोदिता स्मृतिरूपिणी ।
भाष्यते परविद्येय भवारम्भस्य निष्कृतिः ॥ इति ॥

उक्त न्यायवर्ग द्रढयति—**वाक्यकारेणेति** ॥ वाक्यकारश्च ब्रह्मनन्दी आत्रेयवश्य टङ्काचार्यापराभिधान छान्दोग्योपनिषद वाक्यनामकग्रन्थकार । तस्या एवोपनिषद सूत्रकारस्तु जैमिनि । तयो-

र्भाष्यकारस्तु द्रमिडाचार्य । अतस्सूत्र वार्तिक भाष्यञ्चेति प्रस्थान त्रयप्रसिद्धि । जैमिनीय बादरायणीयादिकं च वेदान्तसूत्रजात बादरायणापराभिधानेन कृष्णद्वैपायनेन वेदव्यासेन परिष्कृतमिति रहस्यम् । **सिद्धं त्विति ॥** वेदनमुपासनमिति सिद्धमित्यर्थ । **दर्शनादिति ॥** श्रुते· स्मृतेश्चेत्यर्थः ॥

१७ सैव भक्तिः

अनेनैव सामान्यविशेषन्यायेन पूर्वाचार्याभिमतेन श्रुत्यन्तरसिद्ध भक्तिरूपत्वं विशेषान्तरमाह—**एवं प्रत्यक्षेति ॥**

भज इत्यष धातुर्वै सेवायां परिकीर्तितः ।
तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसा ॥
इति बोधायनवचः प्रत्यक्षं समुदाहृतम् ।
प्रकाशिकादीपिकयोः श्रीसुदर्शनसूरिभि· ॥ इति ॥

अत्र श्रीभाष्यकारस्यायमतिशयः अपूर्व अवगन्तव्य , यत् उपासनमार्गभक्तिमार्गयोः विभिन्नप्रस्थानत्वेन निगमागमसम्प्रदायभेदेनपरै व्याख्यातयो· ऐक्यस्य पूर्वाचार्यसमतस्य प्रकाशीकरणम् ॥

यद्यप्यत्र सर्वत्र प्रकरणभेद । तथापि फले तारतम्यरहिते उपाये गुरुलघुविकल्पानुपपत्त्या वस्तुसामर्थ्यलक्षण लिङ्ग प्रकरणाद्बलीय इति सर्वप्रमाणप्रामाण्यवादिन साधवस्सन्धिमिच्छन्ति ॥

यथा "नान्तरिक्षे न दिवि" इत्यप्राप्तप्रतिषेधसहपठितो "न पृथिव्याम्" इति प्राप्तप्रतिषेधः केवलपृथिव्यामन्तरिक्षादिवदधिकरणत्वव्युदासेन हिरण्योपधानत्ववैशिष्ट्यविधौ विश्राम्यति तथाऽनुपायभूतश्रवणमननसहपठितोपायभूतनिदिध्यासनप्रतिषेधः केवलनिदिध्यासनस्य श्रवणवदनुपायत्वोक्तिमुखेन भक्त्यात्मकविधौ विश्राम्यतीति "नाय मात्मा" इति श्रुतिसारार्थः ॥

१८ भक्ते कर्माङ्गत्वम्

ननूपात्तश्रुतिस्मृतिस्वारस्यात् केवलभक्तेरेवोपायत्वावगमान्न कर्मापेक्षेत्यत्राह—**एवंरूपाया इति ॥ तदुत्पत्तये** यज्ञादिसाध्यविविदिषोत्पत्तये इत्यर्थ । एतेन चित्तशुद्ध्युपयोजनहेतुस्सिद्धसाधनदोषेण दूषित । आश्रमार्थस्यापि विद्यार्थत्वसूचनाय अग्निहोत्रसूत्रोपादानम् । विनियोगपृथक्त्वसूचनाय सहकारिसूत्रोपादानम् । एतेनाप्रमाणत्वादिति हेतुरसिद्धीकृत ॥

१९ साधन सप्तकम.

समुच्चयानर्हविषयकत्वादिति प्रतिहेतुमसिद्धयितु वृद्धवचनमुपादत्ते—**वाक्यकारश्चेति ॥** इदमेव साधनसप्तकमिति व्यवह्रियते । **संभवः** उपपत्ति । **निर्वचनं** प्रमाणम् । अत्र सर्वत्र इति शब्दनिर्वचनशब्दा , तथा "तद्विपर्ययोऽनवसाद , तद्विपर्ययोऽनुद्धर्ष " इति च वाक्यशेष श्रीभाष्यकाराया अवगन्तव्या ॥

अत्र भाष्यकार. **ब्रह्मनन्दि**वाक्यव्याख्याता द्रमिडाचार्य । वाक्यकारेणैवान्यत्र श्रुतिरुदाहृता । अत्र तु भाष्यकारेणैव स्मृतिरिति । **शोकवस्त्विति ॥** भूतभाव्यनिष्टगोचरधीरूपे दु ख शोकभये, तद्धेतुभूत वस्त्वित्यर्थ । **तज्जं दैन्यमिति ॥** मनसो यदभाम्वरत्व यच्च तज्ज परदु खदु खित्वादि तद्विपर्यय अनवसाद इत्यर्थः । **तद्विपर्ययजेति ॥** देशकालसाद्गुण्येन भूतभाविसुखहेतुधिया बन्धुसुखेन च जातेत्यर्थः ॥

सन्राहित्वेनोक्तार्थे स्फुटार्थ श्रुत्यन्तरमुपादत्ते **तथाचेति ॥** "नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थावगति " इति वैयाकरणपरिभाषान्यायेनाविद्यापदार्थमाह—**अत्रेति ॥** उभयं सह वेदेति वेद्यत्वे सहभावकथनात् अङ्गाङ्गित्वेनानुष्ठेयतया बुद्ध्यारोहणे साहित्यमभिप्रेतम् ॥

तथाच चशब्दसहशब्दयोरन्यथासिद्धत्वात् समसमुच्चयपक्ष आरादुपकारकत्वपक्षश्च प्रतिक्षिप्तौ । अविद्याशब्दस्य अज्ञानार्थकत्वमङ्गीकृत्य अविद्यया मृत्युं प्राप्य वर्तमान इति परसम्मतयोजनाऽपि प्रत्युक्ता ॥

विद्ययाऽमृतमश्नुत इति ॥ अत्र धीसङ्कोचनिवृत्तेर्विद्यासाध्यत्वे भावान्तराभावनयेन अमृतत्व विद्यासाध्यमेव । प्रतिबन्धकनिवृत्तेर्विद्यासाध्यत्वे सेतुभङ्गस्रोत प्रवृत्तिनयेन स्वतस्सिद्धममृतत्व विद्यासाध्यत्वेनोपचर्यत इति विशेष ॥

२० धर्मेण पापमपनुदति

अन्योपबृहणम् —**यथोक्तमिति ॥ ज्ञानव्यपाश्रयः** आगमोत्थज्ञाने प्रतिष्ठित । **ब्रह्मविद्यामधिष्ठाय** भक्तिलक्षणा निष्पाद्यत्वेनाभिसन्धायेत्यर्थ । पापस्य भोगेन विनापि निवर्त्यत्व स्पष्टयति —**तथाचेति ॥** प्रकृतवाक्यार्थमुपसहरति—**तदेवमिति ॥ अवसेयं** साध्यमित्यर्थ । अनेन सदर्भेण विरोधादिति हेतुरसिद्धीकृत ॥

२१ साधनचतुष्कस्य पूर्ववृत्तत्वानुपपत्ति

अथ साधनचतुष्क पूर्ववृत्त नियमेनापेक्षितत्वादिति परानुमाने हेतु अन्योन्याश्रयदोषणासिद्धयति—**अपि चेति ॥** अत्र मीमांसापद भागद्वयपरम् । उपासनवेलायामपेक्षित साधनचतुष्टय श्रवणवेलायामेवापेक्षितमिति वाद लोभमूल इति भाव ॥

शमादिविनियोगस्य कर्मविचाराधीनत्वेन श्रवण प्रति हेतुत्वमन्यथासिद्धमिति नियमेनापेक्षितत्वमसिद्धमित्याह—**एषामिति ॥** शमादीनामित्यर्थ । **विनियोगः** अङ्गाङ्गिभावबोधनम् । इह तृतीयाध्याये तु प्राक व्युत्पादितैर्न्यायैराक्षेपसमाधानमात्र क्रियते, न तु न्याया व्युत्पाद्यन्ते । अनेन भाष्येण शमाद्यङ्गकताज्ञानादिति हेतु निषिद्धकाम्यव्यर्थलक्षणकर्मभ्यो निवृत्तिरूपत्वेन साधारणीकृत ॥

२२ उद्गीथसमाधि

अथ युक्तयन्तरेण प्रधानप्रतिपाद्यावश्यापेक्षितत्वरूपेण क्रमावचारस्य पूर्ववृत्तत्व साधयति—**उद्गीथादीति ॥** प्रधानप्रतिपाद्यस्योपासनस्याङ्गभूते कर्मणि समृद्ध्यर्थत्वेन अवश्यापेक्षितत्वमवधेयम् । **सुतरामिति ॥** सादृश्यादिना धीस्थत्व प्रसङ्गात्सङ्गति । उभयापेक्षया धीस्थत्व साक्षात्सङ्गति । ततश्च विचारेऽनुष्ठाने च उभयापेक्षा बोध्या । उद्गीथाद्युपासन नाम छान्दोग्यादिषूक्तम्— उद्गीथावयवे प्रणवे रसतमत्व सर्वकामाप्ति समृद्धि प्राण बृहस्पत्यादित्यादिदृष्टि । आदिपदेन पञ्चविधसामसु पृथिव्यादिलोकदृष्टिप्रभृतय ग्राह्या ॥

वेदान्तमात्राध्या यिन विध्यतिलङ्घित्वादापन्नत्वाद्वा न तत्र व्यभिचारशङ्का । अत्र शांकरे भाष्ये "अधीतवेदान्तस्य" इति वाक्यपरामर्शेन "वर्णाश्रमधर्माणा व्याकुलत्वात्" इति देवताभिकरणवाक्य परामर्शेन च वर्णाश्रमधर्मनियमे अनादरस्तदानीतनस्सूच्यते ॥

एतेन मोक्षसाधन ज्ञान प्रमाणजन्य (वस्तुतन्त्र) निवर्तकज्ञानत्वान्नेद रजतमित्यादिबाधज्ञानवदित्यनुमान, एव कर्मविचारो न ब्रह्मविचारपूर्ववृत्त विद्यासमुच्चयानर्हविषयकत्वादित्यनुमान च प्रमाणोपपत्तिभ्या बाधित स्वरूपासिद्ध चेत्युक्त भवतीति वेदितव्यम् । अत्र पूर्वपक्षोक्तहेतुषट्के सामर्थ्यव्यतिरिक्त हेतुपञ्चकमाभासीकृतम् । सामर्थ्य तु महासिद्धान्ते तुच्छीक्रियते इति सक्षेप ॥

२३ विरोधादिहेतुनिरास

अथैषोऽस्मदीय विरोधादिहेतुनिरासरूपः लघुसिद्धान्तसङ्ग्रह —

फलाभिसन्धिराहित्यान्क्रियाधानिति मानत ।
जिज्ञासाचित्तशुद्ध्याश्च चीयमानत्वतोऽन्वहम् ॥

साधनद्वित्वशून्यत्वात् बन्धसत्यत्वतोऽपि च ।
निषिद्धकाम्यव्यर्थेभ्यो निवृत्तेश्शमरूपत ॥
अपेक्ष्यते नियमतो धिया कर्माङ्गता यत· ।
उपादेयं तत· कर्म जिज्ञास्यं प्राङ्मुमुक्षुभिः ॥ इति ॥

अयमर्थ –कर्म न धीसमुच्चितमित्यत्र अनभिसहितफलत्वात् विरोधहेतुरसिद्धः। क्रियावानिति विनियोजकप्रमाणस्य निरूपणेन द्वितीयोऽप्यसिद्ध । अङ्गवेऽपि चित्तशुद्धयुपयुक्तत्वम्याभ्युपगमात् तृतीयस्साधारणः। धी. न कर्मसमुच्चितेत्यत्र–समसमुच्चयानभ्युपगमात् ज्ञानमात्रहेतुत्वश्रवणहेतो सिद्धसाधन दोष । मिथ्याभूतवस्तुबाधनपर्याप्तत्वरूप वस्तुसामर्थ्यमसिद्धमिति महासिद्धान्तसारार्थ । षष्ठोऽपि शमाद्यङ्गकताज्ञानरूपः हेतु शमशब्दस्य निषिद्धकाम्यव्यर्थरूपकर्मनिवृत्तिपरत्वेन भिन्नविषयत्वेन साधारणः। सर्वेषामागमेन बाधश्चेति ध्येयम् । ततश्च मोक्षसाधन ज्ञान प्रमाणजन्य निवर्तकज्ञानत्वात सामान्येन सम्मतवदिति पूर्वपक्षन्यायस्य स्वरूपासिद्धिः, आगमबाधश्चेति दोष· । मोक्षसाधन ज्ञान प्रयत्नसाध्य शास्त्रविहितत्वात् सामान्येन ज्योतिष्टोमादिवत् इति सिद्धान्तन्यायोऽवधेयः ॥

एव च कर्मणो ब्रह्मविद्याङ्गतयोपादानाय तद्विचार· पूर्ववृत्त इति लघुसिद्धान्तसारार्थ । तत्पूर्वतनस्य सूत्रपदार्थप्रकरणश्रीभाष्यस्य सारार्थस्तु अल्पास्थिरफलतया हानाय तद्विचार पूर्ववृत्त इति न पुनरुक्तदोष इति विवेक ॥

5. महापूर्वपक्षे प्रतिज्ञाप्रकरम्

२४ निर्विशेष ब्रह्म सत्यम्

अथ कर्मविचारो ब्रह्मविचारपूर्व वृत्तः, तन्नियतपूर्ववृत्तित्वादित्यनुमानस्य अन्वयव्यतिरेकव्यभिचारपरिहारेणासिद्धिपरिहारेऽपि सत्प्रति-

पक्षलक्षणस्य, कर्मविचार न ब्रह्मविचारपूर्ववृत्त· ब्रह्मविद्यासमुच्चयानर्ह-विषयकत्वात् अर्थकामादिविचारवदिति लघुपूर्वपक्षसारार्थभूतस्य प्रतिहेतो. स्वरूपासिद्धिपरिहारायोपात्तस्य ज्ञान न कर्मसमुच्चयार्ह मिथ्याभूतवस्तु-बाधनपर्याप्तत्वलक्षणवस्तुसामर्थ्यादित्यस्य पञ्चमस्य हेनो· विस्तरेणोप-पादनेन स्वरूपासिद्धिनिराकरणाय महापूर्वपक्षप्रारम्भ —**यदप्याहुरिति ॥** अस्य च ज्ञानस्य निवर्तकरूपस्य निरुक्तसामर्थ्यसिद्धये निवर्त्यस्य मिथ्यात्वरूप वस्तुसामर्थ्य साधनीयम् । तत्सिद्धये च प्रथममधिष्ठान-भूतस्य ब्रह्मण सत्यत्व साधयति - **अशेषेति ॥** तदुच्यते माध्यमिक-मतनिराकरणावसरे शाङ्करे—"न ह्यय सर्वप्रमाणप्रसिद्धो लोकव्यवहार अन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुम्" इति ॥

अय भाव —अपह्नवे आरोपितत्व हेतु । आरोपे च तत्त्वा-धिष्ठानत्व हेतु । दृष्टश्च शुक्तिकादिषु रजतादे । अपह्नवश्च शास्त्र-सिद्ध । ततश्च सकारणस्य ससारस्य सत्यत्वेन ज्ञानबाध्यत्वाभावान्न तदर्थ शास्त्रमारम्भणीयमित्यत्र तस्य मिथ्यात्वेन धीबाध्यत्वात् तत्प्रधान शास्त्र प्रारभ्यमिति हि परेषा वस्तुसामर्थ्योपन्यास ॥

सिद्धान्ते तु निवर्तकमुपासन, निवर्त्य भगवन्निग्रहलक्षण कर्म, फलमुभयलिङ्ग ब्रह्म । एव निर्णय सिद्ध्युत्पत्तिनिबन्धन इति । उपास्यस्य भगवतो निरवद्यमहामहिमवत्त्वात् निस्सीमप्रीतिरूप निर्व्याजस्वाम्याद्या-स्यैकरुचिगर्भ चेदमुपासन विविच्यत इति भक्तित्वव्यपदेश ॥

२५ ब्रह्मातिरिक्त सर्व मिथ्या

तथा चात्र प्रथमेन वाक्येन माध्यमिकमतनिरासाभिप्रायगर्भेण ब्रह्मसत्यत्व साध्यते । तत्र च निर्विशेषत्व चिन्मात्रत्वञ्च व्यतिरेकिहेतु-द्वयमुक्तम् । द्वितीयेन वाक्येन तु योगाचारमतनिरासाभिप्रायगर्भेण सर्वस्य

तद्व्यतिरिक्तस्य मिथ्यात्वं सदसद्विलक्षणत्वरूप साध्यते । तत्रापि ब्रह्मान्यत्व भिन्नत्व ज्ञातृत्व ज्ञेयत्वमित्यादिक अन्वयिहेतुजातमुक्तम् —**तद्व्यतिरेकीत्यादिना** ॥ अनेन प्राप्यस्वरूप निवर्त्यस्वरूपञ्च प्रदर्शितम् ॥

अत्र अशेषविशेषप्रत्यनीकत्व अशेषविशेषनिवर्तकधीगोचरत्वम् । तत्कृतज्ञान नाम अहङ्काररूपान्त करणविकाररूप कर्मकर्त्रवच्छिन्न वृत्तिज्ञान विवक्षितम् । **कल्पितं मिथ्याभूतमिति** ॥ स्वात्यन्ताभाववन्निष्ठतया प्रतीयमानत्वात्सदसद्विलक्षणमित्यर्थ ॥

6 श्रुतिप्रकरणम्.

२६ निर्विशेषब्रह्मसत्यत्वे श्रुति

उक्तप्रथमन्यायानुगृहीत श्रुतिजातमुदाहरति—**सदेवेति** ॥ इद वाक्य लक्ष्यस्वरूपानन्तर्गतत्वे सति व्यावर्तकत्वमितिलक्षणलक्षितेन तटस्थलक्षणेन कारणत्वेन ब्रह्मण उपलक्ष्यत्वप्रतिपादनपरम् । अत्र एवैका द्वितीयपदै विजातीयसजातीयस्वगतभेदाः निषिध्यन्ते । भेदनिषेधकण्ठोक्तिमत्कारणवाक्य—**अथ परेति** ॥ नित्य विभु सर्वगतमिति पदै कालदेशवस्तुपरिच्छेदा व्यावर्त्यन्ते । सुसूक्ष्मपदेन योग्यानुपलब्धिबाधशङ्काव्यावृत्तिः । अथ स्वरूपाभिन्नेन कल्पितधर्मधर्मिभावरूपोपेतेन स्वरूपलक्षणेन शङ्कितदोषव्यावृत्ति व्यञ्जयद्वाक्य—**सत्यं ज्ञानमिति** ॥ अनृतजडपरिच्छिन्नव्यावृत्ति पदत्रयेण लभ्यते । विशेषतो व्यावृत्तिमत्कण्ठोक्ति —**निष्कलमिति** ॥ चिन्मात्रपदसूचित ज्ञेयत्वज्ञातृत्वनिषेधमभिदधद्वाक्य—**यस्यामतमिति** ॥ **न दृष्टेरिति च** ॥ मननोपासनाद्यविषयत्व प्रथमवाक्यार्थ । ज्ञानव्यतिरिक्तो ज्ञाताऽपि नास्तीति द्वितीयवाक्यार्थ । अत्र दृष्टेरिति पञ्चमीविभक्ति । परमप्रेमास्पदत्वादानन्दरूपो जीव , स्वप्रकाशत्वात्परमार्थश्च, तेन सद्वितीयत्व-

शङ्का वारयितु असुखाद्यावृत्तिमाह—**आनन्दो ब्रह्मेति ॥** जीवोऽपि ब्रह्मानतिरिक्तत्वैव आनन्दरूप इति भाव. ॥

२७ अतिरिक्तमिथ्यात्वे श्रुति

अथ द्वितीयन्यायानुगृहीतश्रुतिजातमुच्यते—**इदमिति ॥** चोर स्थाणुरितिवत् बाधायामत्र सामानाधिकरण्यम् । स्थाणुरेवाय न चोर इति हि तस्यार्थ । बाधस्य कण्ठोक्तिः—**नेहेति ॥ इह** प्रपञ्चे यन्नानात्व भाति तन्न सत्यमित्यर्थ । भेददर्शनस्य प्रत्यवायोक्त्या भेदनिषेध—**मृत्योरिति ॥** भेदस्यासत्त्वे खपुष्पादिवन्न दृश्येत, असतोऽपि दृश्यत्वे खनैल्यवन्नित्य दृश्येत इत्यत्र बद्धमुक्तदशाभेदेन व्यवस्थामाह—**यत्रत्विति ॥ यत्र** यदा, **तत्** तदेत्यर्थ । कार्यमात्रस्य मिथ्यात्व लोकदृष्ट्या निदर्शितमाह—**वाचेति ॥ वाचारम्भण** वागालम्बन, व्यावहारिक, असत्यमित्यर्थ । असत्यत्व नाम कारणापेक्षया कार्यस्य अनन्यत्वतादात्म्यादिलक्षण भेदनिषेधात्मकमतिरिक्तसत्ताशून्यत्वरूप दुर्निरूपत्वापरपर्याय मिथ्यात्व सर्वत्रानुगतमस्तीत्यवधेयम् । ससारजनकधीगोचरतया भेदस्य मिथ्यात्वमाह—**यदाहीति ॥ उ** इत्यवधारणे । **दर**मन्तर इषद्भेद मन्यते इत्यर्थ ॥

२८ उभयत्र सूत्रम्

निर्विशेषसत्यत्वे सूत्र—**न स्थानत इति ॥** नोभयलिङ्गमित्यन्वय । सविशेत्व सविशेषत्वे सति निर्विशेषत्व च नास्ति किन्तु निर्विशेषत्वमेवेत्यर्थ । तदन्यमिथ्यात्वे सूत्र—**मायामात्रमिति ॥** इद स्वप्नविषयमपि दुर्निरूपत्वाविशेषात् कृत्स्नमिथ्यात्वप्रदर्शनपरमिति भावः ॥

7 स्मृतिप्रकरणम्.

२९ उपबृंहण विष्णुपुराणम्

पाराशर्योक्तमर्थद्वय पराशरश्लोकाभ्या सवादयति—**प्रत्यस्तमितेति ॥** सत्तामात्रमित्यनेन धर्मधर्मिभावभेदस्यापि व्यावृत्ति । आत्म-

संवेद्यमिति तुच्छत्वव्यावृत्तिः । एतेन निर्विशेषं ब्रह्म सत्यमित्युक्तम् । जगन्मिथ्येत्युच्यते—**ज्ञानस्वरूपमिति ॥ अर्थस्वरूपेण** कृत्स्नप्रपञ्चात्मना विभिन्नरूपेणेत्यर्थः । अत्र प्रथमः श्लोकः विष्णुपुराणोपसंहारस्थः (६ ७-५३) केशिध्वजेन खांडिक्यायोपदिष्टः । द्वितीयस्तूपक्रमस्थः (१-२-६) नमस्कारश्लोकः । **परमार्थ** इत्यर्धेनोभयमुच्यते वराहस्तुतिचतुःश्लोक्याम् । (१-४-३८) नान्योस्तीत्यस्य विवरणम्—**यदेतदिति** पद्यद्वयम् ॥ अत्र मूर्तपदं स्वरूपार्थकं विधेयसमर्पकम् । ज्ञानात्मकं ज्ञानाभिन्नं प्रपञ्चं अर्थात्मकं ज्ञानभिन्नं पश्यन्तीति पद्यद्वयार्थः । परमार्थस्त्वमित्यस्य विवरणं—**येत्विति** पद्यद्वयम् ॥ एकमयमित्यत्र मयट् स्वार्थिकः । एकाकारं यद्विज्ञानं ततोऽसौ परमार्थः इत्यर्थः । अत्र प्रथमं पद्यं चतुःश्लोकीगतम् । (१-४-४१) । अपरमादिभरतवाक्यम् । (२ १४-३१) । अथ जीवानामैक्यम्—**यद्यन्य इति ॥** (२-१३-९०) । अत्र निदर्शनं—**वेण्विति ॥** (२-१४-३२) उपदिष्टस्यार्थस्याप्तिः—**इतीरित इति ॥** (२-१६-२४) । अथ तेषां जीवानां ब्रह्मैक्यम्—**विभेदेति ॥** (६-७-९६).

३०. भगवद्गीता.

स्पष्टार्थतया पुराणोक्तिमुक्त्वा जीवैक्ये ब्रह्मैक्ये अन्यमिथ्यात्वे च इतिहासोक्तयः—**अहमात्मेति ॥ आदिभिरिति** भूयोऽनुग्रहन्यायसूचनार्था । (१०-२०, १३-२, १०-३९)

8. अविद्याप्रकरणम्.

३१. स्वरूपमानिर्वचनीयम् .

नन्वेतेषु मिथ्याशब्दो न दृष्टः । भेदनिषेधादितात्पर्यतस्तत्सिद्धावपि मिथ्यात्वस्यासत्त्वरूपत्वे निवर्त्याभावेन मिथ्याभूतवस्तुबाधनपर्याप्तरूपहेतोरसिद्धिस्तदवस्था, अन्यथाख्यातिगोचरत्वरूपत्वे क्वचित्सत्यत्व-

प्रसङ्गात्, ब्रह्मव्यतिरिक्तसर्वनिवर्तकत्वासिद्ध्याऽसिद्धिस्सुस्था, अत आह— **मिथ्यात्वं नामेति ॥** प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूप मिथ्यात्व-मिह विवक्षितम् । तदेव हि सदसद्विलक्षणत्वम् । तदेवोच्यते— **प्रतीयमानत्वेति ॥** ज्ञानप्रागभावब्रह्मणो दळद्वयेन क्रमेण व्यावृत्ति । ततश्च सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत इति अत्र युक्ति ॥

इदमत्र मूल आनन्दबोधीयप्रमाणमालायामुदाहृत मण्डनमिश्रीय-ब्रह्मसिद्धिव्याख्याया ब्रह्मतत्त्वसमीक्षाया वाचस्पतिमिश्रीयाया वच-नम्—"एतदेवोपजीव्य प्रतीतिबाधान्यथानुपपत्ति प्रवृत्तिबाधान्यथाऽ-नुपपत्तिश्चेत्यर्थापत्तिद्वयमपि तद्वादिन प्रत्यभिधातव्यम्" इति । तदेतद्व-चनमनुसृत्य इष्टसिद्धाविदमुक्तम्—

सत्त्वे न भ्रान्तिबाधौ स्तो नाऽसत्त्वे ख्यातिबाधने ।
सदसद्भ्यामनिर्वाच्याऽविद्या वेद्यैस्सह भ्रम ॥ इति ॥

अत्र भ्रम वेद्यैस्सह अविद्येत्यन्वय । तथाच विषय विषय्यप्याविद्यक इत्यर्थ । एतेनासत्ख्यातिनिरास । अतएवालीकाकारविकल्पविज्ञानोदय इत्युच्यते । **एवमिति ॥** दोषेत्यादिपदै निरुक्तार्थद्वयातिदेश । **इदं** प्रतीयमानमित्यर्थ ॥

३० तिरोधानम्

दोषश्चेति ॥ अविद्याया दोषत्वार्थ तिरोधानादिशक्तिमत्त्व, निवृत्त्यर्थमनिर्वचनीयत्व, अनवस्थापरिहारार्थमनादित्व चोक्तम् । **विक्षेपः** विशेषप्रतिभास । आच्छादिका विक्षेपिका चेति विभागश्च स्वरूपत स्वभावतश्चेति केचित् । आकारभेदादित्यन्ये । अवस्थाभेदादित्यपरे ॥

३१ प्रमाणम्

तत्रादौ तिरोधाने प्रमाणम् **अनृतेनेति ॥ प्रत्यूढाः** प्रति-रुद्धा । जीवभेदविवक्षया बहुवचनम् । एतस्य विवरण पूर्ववाक्यम्—

तेषामिति ॥ अनिर्वचनीयत्वे मान—**नासादिति** ॥ तमश्शब्दार्थस्पाष्ट्याय - **मायामित्यादि**वचनद्वयम् ॥ मायामिति विधेयपदम् । अनादित्वे मानं—**अनादीति** ॥ विशिष्टो वाक्यार्थः—**निर्विशेषेत्यादिः** ॥ यत इति पूरणम् ॥

३४ विष्णुपुराण प्रमाणम

अत्रोपबृहण —**यथोक्तमिति** ॥ वस्तुपद देवादिपरम् । **विज्ञानं** अविद्या । भेदस्याविद्याकार्यत्वेऽन्वयमुक्त्वा व्यतिरेकमाह—**यदेति** ॥ **सङ्कल्पः** अविद्या । विजातीयभेदनिषेध —**तस्मादिति** ॥ सजातीयभेदनिषेध —**विज्ञानमिति** ॥ स्वगतभेदनिषेध —**ज्ञानमिति** ॥ **विशुद्धं विमलं** अविद्यातत्कार्यरहितम् । **सदैकं** वृद्ध्यादिरहितम् । नेद परमत—**सद्भाव इति** ॥ भुवनाश्रित यत्सांव्यवहारिक सत्यत्व तत्राप्यविद्यैव कारणमुक्तमित्यर्थः । इय पञ्चश्लोकी (२-१२) भुवनकोशदशश्लोक्यन्तर्गता ॥

३५ निवृत्ति निवर्तक च

एव मिथ्याभूतवस्तुबाधनपर्याप्तत्वहेतौ मिथ्याभूतत्वमुपपादितम् । अथ बाध्यबाधकभावमुपपादयन् असिद्धि निराह—**अस्याश्चेति निवृत्तिर्युक्तेत्यन्तेन** । तत्र प्रथम प्रमाणमाह—**न पुनरिति** ॥ एक पश्यतीति यत्ततो न मृत्यवे इत्यर्थ । अत्र कारणनिवृत्त्या कार्यनिवृत्ति — **न पश्य इति** ॥ कार्यनिवृत्त्या कारणनिवृत्तिसूचन **यदाहीति** ॥ **आत्म्यं** शरीर **निरुक्तिः** नाम । **अभयं** भयाभावाय । अव्ययीभाव । पर्याप्तत्वोपपादनाय कर्मणोपि निवर्त्यतामाह- - **भिद्यते इति** ॥ पर्याप्तत्वकण्ठोक्ति —**ब्रह्म वेदेति** ॥ **तमेवेति च** ॥ पूर्वमिद वक्यद्वय ज्ञानस्यैव मोक्षसाधनत्वायोदाहृतमिति न पौनरुक्त्यम् । मृत्युपदव्याख्या—**अत्रेति** ॥ अथ ज्ञानस्य विषयनिरूपणेन पर्याप्तत्वनिष्कर्ष - **सत्य-**

मित्यादि सिद्धमित्यन्तम् ॥ अत्र निर्विशेषत्व शोधकवाक्यसिद्धम् । ऐक्य—**अथ य इति** वाक्यसिद्धम् । अस्योपदेश —**तत्त्वमिति ॥** अथ देवता प्रत्युक्ति·—**त्वं वा इति ॥** स्वस्मिन्ननुसन्धान—**तद्योहमिति ॥** अथ सूत्रकृतः सूत्रविदश्च सम्मति· **वक्ष्यतीति ॥ तन्निष्पत्तेः ॥** तस्मिन्नध्यस्तत्वादित्यर्थ ॥

9. शास्त्रप्राबल्यप्रकरणम्.

३६ बाध्यबाधकभावनिर्णय

एवविधस्य निर्विशेषब्रह्मात्मैक्यबोधकस्य शास्त्रस्य प्रत्यक्षविरुद्धत्वेन अप्रामाण्यात्तज्जन्यज्ञानस्य बाधकत्वाभावेनासिद्धयाशङ्का शास्त्रस्य प्राबल्योपपादनेन प्रामाण्य व्यवस्थाप्य निराह **नन्वित्यादिना तस्मात्सदनुभूतिरेवेत्यन्तेन ॥ प्रत्यक्षविरुद्धेति ॥ क्रियते** विषयीक्रियते इत्यर्थ । भेदावगाहिप्रत्यक्षविरोधान्न कथञ्चित् निर्विशेषचिन्मात्रब्रह्मैक्यावबोधक शास्त्र प्रमाण स्यादिति भावः ॥

अत्र यत्र प्रत्यक्षत्व न तत्र बाध्यत्वमिति नियमोऽभिमत । अन्यथा आदित्यो यूप , पावकोऽनुष्ण इत्यादेरपि प्रत्यक्षबाधकत्वं स्यादिति । अस्य नियमस्य रज्जुसर्पप्रत्यक्षे व्यभिचार वक्ति—**कथमिति ॥** अथ यत्र परोक्षत्व तत्राबाधकत्वमिति नियममभिप्रेत्य शङ्कते—**तत्रेति ॥** अत्रापि समव्याप्तौ व्यतिरेके यत्र परोक्षत्वाभाव तत्र बाधकत्वमिति नियमे सति रज्जुसर्पप्रत्यक्षे व्यभिचारमभिप्रेत्य प्रतिवक्ति—**तुल्ययोरिति ॥** यत्र दुष्टकारणजन्यत्व तत्र बाध्यत्वमिति नियम इत्याशङ्क्य प्रत्यक्षस्यापि तादृशस्य बाध्यत्वमित्याह—**पूर्वोत्तरयोरित्यादिना ॥**

अथ मूलमूलिभावरहित तुल्यत्वसहित दुष्टकारणजन्यत्व यत्र तत्र बाध्यत्वमिति चेदत्राह—**एतदिति ॥ ज्वालेति ॥ अयोगात्**

अयोगप्रसङ्गादित्यर्थ । ज्वालैक्यप्रत्यक्षस्यासङ्ग्रहप्रसङ्ग इति भाव । ज्वालाभेदानुमानाकारश्च—प्राथमिकदीपजनकसामग्रीनाश स्वजन्यदीपनाशवान् दीपजनकसामग्रीनाशत्वात् चरमदीपजनकसामग्रीनाशवत् इति प्रभानिरूपणप्रकरणे तत्त्वटीका ॥

संभाव्यमानेति ॥ स्वविषयसत्यत्वमन्तरेणापि स्वरूपलाभलक्षणमन्यथासिद्धत्व बाध्यताप्रयोजक, तच्च सावकाशत्वात्, तदपि द्विचन्द्रादिवदप्रमाणकोटिनिवेशार्हत्वात्, अथवा पदाहवनीयादिनयेन अविरुद्धविषयलाभात् । अनन्यथासिद्धत्व चैतद्विपरीतम् । एवचाप्रमाणकोटिनिवेशार्हत्वाविरुद्धविषयलाभैतदन्यतरप्रयुक्तसावकाशत्वनिबन्धनान्यथासिद्धत्व बाध्यत्वौपयिकमिति फलितार्थ । यत्रान्यथासिद्धत्व तत्र बाध्यत्वमिति निष्कृष्टो नियम ॥

३७ शास्त्र प्रबलम्

प्रकृते शास्त्रस्याप्रमाणकोटिनिवेशार्हत्वप्रयुक्तान्यथासिद्धिमपाकरोति—**तस्मादिति** ॥ सर्गप्रलयकालेष्वप्यानुपूर्व्यविपर्यासादनादिनिधनत्वम् । मन्वन्तरादिष्वप्यनुपप्लवादविच्छिन्नसप्रदायत्वम् । अपौरुषेयत्वात् स्वतश्चानुपूर्व्यनवच्छिन्नत्वरूपात् भ्रमप्रमादाशक्तिविप्रलिप्सारूपदोषसभावनाऽनर्हत्वम् । अथाविरुद्धविषयालाभनिबन्धनामन्यथासिद्धिमपाकरोति—**निर्विशेषेति** ॥ नित्यत्व शुद्धत्वादौ सर्वत्रान्वेति । **शुद्धं** वस्तुतोऽविद्यादोषरहितम् । **बुद्धं** अतिरोहितप्रकाशम् । **मुक्तं** कर्मसंबन्धविधुरम् । **स्वप्रकाश** पराधीनप्रकाशानर्हम् । तच्च चिन्मात्रत्वात् । **ब्रह्मात्मभावः** ब्रह्मण एव प्रत्यगात्मत्वम् ॥

प्रत्यक्षस्य प्रकारद्वयादपि सावकाशत्वादन्यथासिद्धिमाह—**संभाव्यमानेत्यादिना॥ विविधविकल्पेति॥** अनेन विषयान्तरलाभस्सूच्यते ।

"आदित्यो यूप " इति वाक्यस्य यूपाङ्गनविधि शेषत्वेनान्यपर्यात् न व्यभिचार निष्कृष्टनियमस्येति भाव' ॥

३८ मोक्षशास्त्र प्रबलं (अपच्छेदनय)

ननु भेदग्राहिप्रत्यक्षस्याभ्यान्यथासिद्धत्वे भेदावलम्बिन कर्मकाण्डस्याप्यन्यथासिद्धिसभवाद्बाध्यत्वप्रसङ्ग इत्याशङ्क्य इष्टापत्त्या परिहरति---**नन्विति ॥ पूर्वापरेति ॥** "पञ्चर्त्विजस्समन्वारब्धा प्रसर्पन्ति अध्वर्यु प्रस्तोताऽन्वारभते । प्रस्तोतार प्रतिहर्ता । प्रतिहर्तारमुद्गाता । उद्गातार ब्रह्मा । ब्रह्माण यजमान " इति । अस्मिन् प्रयोगे "यदि बहिष्पवमान प्रसर्पतां प्रस्तोताऽपच्छिद्येत" इत्यादिना विच्छेदप्रायश्चित्तविधौ---"यदि प्रतिहर्ताऽपच्छिद्येत पशुभिर्यजमानो व्यृद्धयेत सर्ववेदस दद्यात्, यद्युद्गाता यज्ञेन यजमानो व्यृद्धयेत अदक्षिण स्स यज्ञ सस्थाप्य पुनराहार्य तत्र तद्दद्यात् यत्पूर्व दास्यन् स्यात्" इति वाक्यविषयक अपच्छेदन्याय पूर्वतन्त्रे षष्ठे माञ्चमिक प्रसिद्ध । तत्र युगपदपच्छेदे विकल्प । यथा न्यायमाला—

समुच्चयो विकल्पो वा प्रायश्चित्तद्वयेऽग्रिम· ।
अदक्षिणत्वं पूर्वस्मिन् प्रयोगेऽन्यत्तु पश्चिमे ॥
प्रयोगे पश्चिमे नास्ति निमित्त तेन तद्दयम् ।
प्राप्तमेकप्रयोगेऽतो विरुद्धत्वाद्विकल्प्यते ॥ इति ॥

तथा क्रमेणापच्छेदे परस्य प्राबल्यम्---

अपच्छेदक्रमं पूर्व· प्रबलस्स्यादुतोत्तर· ।
असञ्जातविरोधेन पूर्वेणोत्तरबाधनम् ॥
निरपेक्षोत्तरज्ञानं जायते पूर्वबाधया ।
न बाधकान्तरं तस्य तेन प्रबलमुत्तरम् ॥ इति ॥

तदुक्त "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" (६–५–५४) इति। पूर्वापरापच्छेदयोः पूर्वस्य दुर्बलत्व, कुत ? आख्यातेन योऽर्थ कर्तव्य इत्युच्यते तत्रैतदनुबद्ध यथा शक्येत तथेति। तत् पूर्वविज्ञानबाधेन शक्यते ! नान्यथा। तेन पूर्वविज्ञान बाधित्वा इद कर्तव्यमिति भवति प्रत्यय। प्रकृतिवदिति॥ यद्धि प्राकृत वैकृतेन बाध्यते तत्राप्येतदेव कारणम्, नाबाधित्वा पूर्वविज्ञान वैकृत सभवतीति। कर्मशास्त्रस्य पूर्वत्व च पाठक्रमादर्थक्रमात् प्राक् त्रिवर्गप्रावण्याच्च ज्ञेयम्॥

३९ निर्गुणवाक्य प्रबलम्

अथ वेदान्तवाक्येष्वपि सगुणोपासनविधीनां भेदावलम्बित्वात् पौर्वापर्यनियामकविरहात् सगुणवाक्येनैव निर्गुणवाक्यबाधस्यादित्याह—**वेदान्तवाक्येष्विति॥ अयमेवेति॥** तेषामुपासनाविधिपरत्वेन उपास्यांशे तात्पर्यविरहात् पूर्वत्वफलभूत बाध तात्पर्यसिद्ध इत्यपच्छेदन्यायोऽवतीर्ण एवेति भाव॥

४० सत्यादिवाक्यविचार

अथ स्वरूपपराणा सगुणवाक्याना पूर्वत्वान्यपर्ययोरयोगात् न बाध्यत्वमित्याशङ्क्य परिहरति—**ननु चेति॥** निषेध्यप्रसजकत्वेन पूर्वत्वम्, उपाप्तिविधिशेषत्वक्लप्त्या च सार्थक्यमिति भाव। निर्गुणवाक्यत्वेनोपात्तमेव सत्यादिवाक्य सगुणपरमिति बुद्ध्या चोदयति—**ननु च सत्येति॥** भावप्रधानोऽत्र निर्देशः। प्रतीति दुरपह्नवोऽनुभव। प्रतीतिर्न प्रमितिरित्याह—**नेतीति॥** एकार्थतात्पर्यार्थत्वरूपसामानाधिकरण्येन भेदप्रतीति बाध्येत्याह—**सामानाधिकरण्येनेति॥** एकत्वानेकत्वयो विशेष्यविशेषणस्थत्वात् न विरोध इत्याशङ्कते—**अनेकेति॥** समाधत्ते—**अनभिधानेति॥** देवानाप्रिय इत्यज्ञातनाम्ना-

मुपचार । अय भावः —**त्रिविध हि पदानामर्थैक्यम्** । प्रकृतिप्रत्यय-समुदायबोध्य विशिष्टैक्यमेकम् । कारकभेदेऽपि क्रियैक्यवत् प्रधानैक्यात् एकार्थत्व द्वितीयम् । पदभेदेऽप्यर्थभेदाभावलक्षण तृतीयम् । तत्राद्य पदसामान्ये । द्वितीय व्यधिकरणवाक्ये । तृतीय समानाधिकरणवाक्ये कोटिद्वयविलक्षणमभिप्रेतमिति । **विशेषणभेदेनेति** ॥ विशेषणाना परस्पर विशेष्याच्च भेदेन विशिष्टभेदेन विशेष्यभेदेन चेत्यर्थ ॥

अथ विशेष्यमात्राभिधाने पदानामन्यूनानतिरिक्तार्थत्वलक्षण पर्यायत्व पदान्तरवैयर्थ्य सामानाधिकरण्यलक्षणभङ्गश्चेति चोदयति- — **एवं तर्हीति** ॥ **एकार्थेति** ॥ अयमाशय —पदार्थोपस्थितिदशाया तत्तद्विशेषणभानेऽपि सामानाधिकरण्यविरोधात् तदभिधान त्यक्तम् । तत्फलभूतव्यावृत्तिपरत्व पर स्थितम् । वाक्यार्थप्रतीतिदशाया तत्तद्व्या-वृत्त्युपलक्षितस्वरूपमात्र प्रतीयते । ततश्चैकार्थत्व सिद्धम् । अनन्तर च व्यावृत्त्युपस्थिति धर्म्युपस्थितिश्च मिलित्वा विकारजडादिभ्रम निवर्त-यत । अयमेव फलतो व्युदास । यथा प्रत्यभिज्ञास्थले ग्रहणस्मरणे भेदभ्रम विनिवर्तयतस्तथाऽत्रापीति । ततश्चार्थवत्त्व निमित्तभेदव्युत्पा-फलै अपर्यायत्वमेकार्थत्व चेति ॥

ननु सत्यज्ञानादिवाक्यमप्यन्वयमुखेन उपलक्षण स्यात्तत्त्व-मस्यादिवाक्यवदित्यत्राह—**एतदुक्तमिति** ॥ कारणत्वेनोपलक्षितस्य ब्रह्मण स्वरूपविशोधनप्रकरणत्वात् पुनरुपलक्षणकथनमयुक्तमित्याशय । **अपित्विति** ॥ यथा व्यावृत्ति स्वत एव स्वेतरव्यावृत्तिस्तथा ब्रह्म-स्वरूपमपि सकलेतरविरोधित्वात् स्वय व्यावृत्ति. । मण्डनमिश्रीय-भावाद्वैतपक्षस्तु भीरुकल्पित इति भाव ॥

तत्र भावान्तराभावपक्ष निदर्शयति—**यथेति** ॥ काष्ण्यपीतिमरक्तिमाद्यनेकव्यावृत्तिरूप शौक्ल्य प्रतिबन्दितयाऽभिमतम् । **अपर्यायमिति** ॥ यस्य पदत्रयस्य मिथः पदानि पर्याया न भवन्ति तदपर्यायमिति विग्रह । **तस्मादिति** ॥ शास्त्रस्य प्राबल्यात्तज्जन्यज्ञानस्य बाधकत्वसम्भवात् मिथ्याभूतवस्तुबाधनपर्याप्तत्वहेतोर्नासिद्धिरिति भाव ॥

सत्यादिवाक्यस्य सगुणपरत्वे कारणवाक्यविरोधमाह—**एवमिति** ॥ कारणवाक्योक्तस्वरूपशोधकस्य वाक्यस्य तच्छेषतया तदेकार्थकत्व युक्तम् । "यस्सर्वज्ञस्सर्ववित्" इत्यादिकारणवाक्यान्तरे गुणोक्त्या तदैकार्थ्य स्यादित्याशङ्कायां अनुक्तार्थस्वीकारफलसर्वशाखाप्रत्ययन्यायेनात्रापि निर्गुणब्रह्मसिद्धौ अपच्छेदनयमुपजीव्य कारणशोधकवाक्ययोरैकार्थ्यसम्भवे मिथ कारणवाक्याना किमुतेत्याशयेनाह—**तत्रेति** ॥ **अद्वितीयत्वेति** ॥ सम्राडद्वितीय इत्यादौ समनिषेधार्थकत्वेऽप्यत्रावधारणाभ्या सजातीयविजातीयनिरासौचित्यात् समनिषेधसिद्धे परिशेषात् गुणनिषेध· प्राप्त इति भाव । शोधकान्तर च विरुध्येतेत्यत्याह—**अन्यथेति** ॥ सामानाधिकरण्यसामर्थ्यात् कारणवाक्यैकार्थ्यात् शोधकवाक्यान्तरैकार्थ्याच्चेत्यर्थ । **अखण्डैकरसं** अखण्डैकस्वभाव नित्यनिर्विशेषस्वप्रकाशस्वभावमिति यावत् ॥

अथ "ब्रह्मविदाप्नोति परम्" इत्यनन्यथासिद्धफलकरणदर्शनकल्पितविधिशेषतया सत्यादिवाक्यस्य विशिष्टविधितात्पर्ये सम्भवति न लक्षणा न्याय्येत्यभिप्रायेण चोदयति—**ननु चेति** ॥ विशेष्याशात्यागेऽपि विशेषणाशत्यागात् न शक्ति·, किन्तु लक्षणेति भाव· । मोक्षसाधनीभूताविधेयवाक्यार्थज्ञानानुवादितयाऽन्यथासिद्धे विधिक्लप्तयोगात् तात्पर्यार्थविरुद्धत्वाच्च मुख्यार्थासम्भवे लक्षणाऽनुगुणैवेत्यभि-

प्रायेण परिहरति—**नैष दोष इति ॥** तात्पर्यस्थापकस्य मुख्यस्य कस्यचिद्वाक्यांशस्य पदस्यादर्शनात् लक्षणैव न स्यादित्यभिप्रायेण पुनराशङ्का—**ननु चेति ॥** तात्पर्यस्थापकाना प्रकरणादीनामन्यतमेन सामानाधिकरण्येन तात्पर्यव्यवस्थिते अन्यस्यादर्शनमकिञ्चित्करमिति समाधि—**ततः किमिति ॥ न दोषायेति ॥** विष भुङ्क्ष्व इत्यादौ निषिद्धभोजन न कर्तव्यमित्यर्थे सर्वपदलक्षणाऽपि दृश्यत इति भाव ॥

४१ कार्यवाक्यार्थवाद

अत्र परीक्षकसम्मतिमाह—**तथा चेति ॥** एते हि वाच्यापूर्ववादिन प्राभाकरा, न तु कल्प्यापूर्ववादिन कौमारिला । वृद्धव्यवहारोपक्रमा वेदावसाना कार्यमुखेनापूर्वकार्यप्रधाना व्युत्पत्तिस्तत्सम्मता । तत्र कृतिसाध्यत्वविशिष्टकृत्युद्देश्यत्वरूपकार्यत्वविशिष्टे कार्ये अपूर्वे नियोगापरपर्याये वैदिकलिङादेशक्ति । क्रियालक्षणे कार्ये तु प्रवृत्तिनिमित्तैकदेशेन कृतिसाध्यत्वमात्रेण लोके लक्षणा । स्वर्गकामो यजेतेत्यत्र स्वर्गसाधन यागविषयक स्वर्गकामनियोज्यक कार्यमित्यध्याहृतेन स्वर्गसाधनरूपार्थेन सह प्रथम बोध । ततश्चापूर्वे कृतिसाध्यत्व यागे कृतिसाध्यत्वमन्तराऽनुपपन्नमिति अनुपपत्तिज्ञानरूपोपादानसहकृतेन शब्देन स्वर्गसाधन स्वर्गकामनियोज्यको याग स्वर्गकामकृतिसाध्य इत्योपादानिको यागविशेष्यको बोध । गामानयेत्यादौ गवानयन कार्य कृतिसाध्यमिति बोधः । एव च वेदवाक्ये अपूर्वकार्यान्विते स्वस्वार्थे सर्वेषा कारकपदाना शक्ति । लोके तु क्रियाकार्यान्विते । शब्दस्य कार्यपरत्वात् अपूर्वकार्यान्वयाशत्यागात्सर्वत्र लक्षणेष्टा । इति ॥

10 प्रत्यक्षाविरोधप्रकरणम्.

४२ प्रत्यक्ष सन्मात्रग्राहि

एव प्रत्यक्षस्य दौर्बल्य प्रसाध्य शास्त्रस्याप्रामाण्यशङ्का परिहृत्य तज्जन्यज्ञानस्य बाधकत्व प्रसाध्य सामर्थ्यलक्षणस्य मिथ्याभूतवस्तु-बाधनपर्याप्तत्वहेतोरसिद्धि निराकृता। ज्ञान न कर्मसमुच्चयार्हमिति प्रतिज्ञा निर्व्यूढा। अथ शास्त्रस्य प्रत्यक्षविरोधाभावेनाप्रामाण्यशङ्का परिहृत्य निरुक्तप्रतिज्ञा निरूह्यते। तथाहि—

कल्पनापोढमभ्रान्त प्रमाणं निर्विकल्पकम्।
विकल्पोऽवस्तुनिर्भासादसंवादादुपप्लव॰॥

इत्यस्य स्वलक्षणरूपविशेषमात्रग्राहिनिर्विकल्पकप्रत्यक्षवादपरस्य धर्मकीर्तिश्लोकस्य प्रतिपक्षतया—

आहुर्विधातृ प्रत्यक्ष न निषेद्धृ विपश्चितः।
नैकत्वे आगमस्तेन प्रत्यक्षेण विरुध्यत॥

इति ब्रह्मसिद्धौ मण्डनमिश्र प्राह। तस्यायमर्थ - प्रत्यक्ष विधातृ विधायक न निषेद्धृ न निषेधक सामान्यग्राहि न विशेषग्राहीत्यर्थ। सन्मात्रग्राहि, न भेदग्राहीति यावत्। शास्त्रमपि निर्विशेषसन्मात्रग्राहि। तथा च तयोरेकत्वे ग्राह्यैकत्वे सति आगम प्रत्यक्षेण न विरुध्यते शास्त्रप्रत्यक्षयो र्विरोधो नास्तीत्यर्थ। सोऽय सामान्यमात्रग्राहिनिर्विकल्पकप्रत्यक्षप्रामाण्यवाद अन्यत्र निरूपित॥ (मान ३५०)

४३ भेद प्रमाणानुपपत्ति तर्क

प्रत्यक्ष न शास्त्रविरुद्ध सन्मात्रग्राहित्वादिति युक्तिरुक्ता। तत्र स्वरूपासिद्धिमाशङ्क्य निराह— **ननु चेति। तथैवात्र विविच्यत**

इति ॥ सर्वेषु भ्रमेषु अधिष्ठानाध्यस्तव्यवहारांशयो यथा विभाग· तथैवात्र व्यवहारद्वये विविच्यत इत्यर्थ ॥

नभ स्तलमलिनत्वादाविव अत्र स्वारसिकबाधाभावेपि यौक्तिक बाध वक्तु प्रमाणानुपपत्तिमाह—**घटोऽस्तीति** ॥ सामान्यविशेषात्मकयो अस्तित्वघटत्वरूपयो स्वरूपभेदयोरैक्यम्[१] उत भेद[१] इति विकल्प । आद्यपक्षप्रतिषेध —**घटोस्तीति** ॥ तद्भेद· तत्सबन्धितया ततोन्यत्वेनोल्लिख्यमान घटत्वादिलक्षण· भेद । अस्तिघटशब्दयोश्चापर्यायतया व्युत्पत्ते तदर्थयोर्भेदः अवश्यमभ्युपेय । तथाच भिन्न इति व्यवहार इव घट इति व्यवहारेऽपि घटस्य पटाद्यावृत्ततया प्रतीतौ प्रतियोगिसापेक्षत्वात् घटव्यवहार एव भेदव्यवहार इत्यर्थ ॥

भेदपक्षे प्रत्यक्षमुभयमन्यतरद्वा गृह्णातीति विकल्प । तत्राप्याद्यपक्षे युगपत् क्रमेण वेति विकल्प्य यौगपद्यपक्ष प्रतिक्षिपति - **नचेति** ॥ भेदग्रहणस्यानुयोगिग्रहणपूर्वकत्वनियमात् स्वरूपस्यैवात्रानुयोगित्वात् यौगपद्यासम्भव इत्यर्थ । क्रमेण ग्रहणपक्ष प्रतिक्षिपति—**प्रत्यक्षेति** ॥ भेदपक्षे द्वितीयविकल्पमन्यतरग्रहणरूप स्वेष्ट परिशेषयति—**तत्रेति** ॥ **अत इति** ॥ अनुपपन्नतैकवेषाया भ्रान्तौ क्रमयौगपद्यादिपरामर्शानवकाशात् भेदव्यवहारोऽन्यथोपपद्यत इति भाव ॥

४४ भेदरूपप्रमेयानुपपत्ति तर्क

एव भेदे प्रमाणानुपपत्तिमुक्त्वा सन्मात्रग्राहित्व प्रत्यक्षस्य समर्थितम् । अथप्रमेयानुपपत्तिरूप अनुकूलतर्क तत्रैवाह—**किंचेति** ॥ स्वरूप धर्मो वेति विकल्पे प्रथम निरस्यति—**भेदस्तावदिति** ॥ अयमाशय - स्वरूपस्य भेदत्वे तद्ग्रहे कथ भेदाग्रह , तदभावे कथतरा सशयविपर्ययादिः । तदभावे कथंतमां बाधकसाध्य किंचित्स्यात् । तथाच

सर्वेभ्यो भेदव्यवहार एव स्यादिति । अत्र प्रसङ्गान्तरं—**हस्त इति** ॥ स्वरूपभेदशब्दयो घटभेदशब्दयोर्वा पर्यायत्व स्यादिति वक्तव्ये घटभिन्नशब्दयो पर्यायतापसङ्गोक्तेरय भाव·—घटस्य स्वरूपमेव भेदश्चेत् घटस्य भेदसबन्धित्वेन अनुयोगित्वात् भिन्नत्वात् भिन्नशब्दपर्यायतापसङ्ग इति । चकारेण भेदशब्दस्समुच्चीयते ॥

धर्मपक्षे धर्मभूतो भेद· स्वरूपेणाभिन्नो भिन्नो वेति विकल्प्य आद्य निरस्यति—**धर्मत्व इति** ॥ **अन्यथा** भेदाभावे धर्मधर्मिभावो न स्यात्, स्वरूपपक्षोक्तदोषश्च स्यात् । द्वितीय निरस्यति—**भेदेचेति** ॥ **तस्यापिभेदस्तद्धर्म इति** ॥ तस्य धर्मतया स्वीकृतस्यापि भेदस्य स्वरूपापेक्षया यो भेद सोऽपि तस्य धर्मतया स्वीकृतस्य भेदस्य धर्म इत्यर्थ । ग्रहणद्वारापि दोषमाह —**किञ्चेति** ॥ तज्जातीयत्वातज्जातीयत्वतद्गुणकत्वातद्गुणकत्वविशेषणत्वविशेष्यत्वधर्मत्वधर्मित्वादावपि भेदग्रहेऽन्योन्याश्रयत्वमभिप्रेत्य जात्याद्युक्ति ॥

४५ तर्कानुग्राह्यमनुमानम्

एव प्रत्यक्षस्य सन्मात्रग्राहित्वेन शास्त्रविरोध परिहर्तु भेदे साधक प्रमाणाभाव उक्त । अथ तदनुगृहीतेन भेदस्यापारमार्थिकत्वसमर्थनरूपेण बाधकप्रमाणेन विरोध परिहृत्य शास्त्रजन्यस्य अनुभूत्यात्मकनिर्विशेषसन्मात्रब्रह्मविषयकस्य ज्ञानस्य मिथ्याभूतवस्तुबाधनपर्याप्तत्वहेतावसिद्धि निराकरोति —**किञ्चेति** ॥ अत्र सत् परमार्थ अनुवर्तमानत्वात्, घटादयोऽपरमार्था व्यावर्तमानत्वादिति विवक्षितस्यानुमानद्वयस्य पक्षसिद्धिमाह—**घटोऽस्तीति** अनुभूत्यनुवृत्तिप्रदर्शन सदनुभूत्यैक्याधानार्थम् । स्वरूपासिद्धि व्याप्यत्वासिद्धि च व्युदस्यति—**अत्रेति** ॥ **परमार्थसती** व्यावहारिकावस्थयेति शेष ॥

अनुवर्तमानत्व नाम उत्तरोत्तरप्रतीतिविषयेषु विद्यमानत्वम् । व्यावर्तमानत्व तेष्वविद्यमानत्वम् । सत्त्वमनुवर्तते । घटत्वादिक व्यावर्तते । अत्र धर्मधर्मिणोर्भेदो न विवक्षित ॥

इदमत्रावधेयम्—अस्मिन् सिद्धान्ते विवरणकृन्मतरीत्या सत्तात्रैविध्यमभ्युपगम्यते पारमार्थिकसत्ता व्यावहारिकसत्ता प्रातिभासिकसत्ता चेति । आद्या बाध्यत्वसामान्याभावरूपा । द्वितीया व्यवहारकालाबाध्यत्वे सति बाध्यत्वरूपा । तृतीया व्यवहारकालेऽपि बाध्यत्वरूपा । बाध्यत्व निषेधप्रतियोगित्वम् । आद्या ब्रह्मस्वरूपा द्वितीया घटपटादिरूपा तृतीया रज्जुसर्पादिरूपा । अत्र पूर्व पूर्व सत्त्वमधिक परपर न्यूनम् ॥

तथाच इह सिषाधयिषित पारमार्थ्यमधिकसत्ताकत्वरूपम् । अपारमार्थ्य न्यूनसत्ताकत्वरूपम् । यथा रज्ज्वपेक्षया व्यावर्तमान सर्पभूदलनादिक रज्ज्वपेक्षया न्यूनसत्ताकम् । रज्ज्वादीना व्यावहारिक सत्त्व ह्याधिकम् । सर्पादीना प्रातिभासिक सत्त्व न्यूनम् । एव सत्पदार्थे पारमार्थिक सत्त्व घटाद्यपेक्षयाऽधिकम् । घटादेर्व्यावहारिक सत्त्व सदपेक्षया न्यूनम् ॥

एव च सत् घटाद्यपेक्षयाऽधिकसत्ताकम्, तदपेक्षयाऽनुवर्तमानत्वात् । घटादय सदपेक्षया न्यूनसत्ताका, तदपेक्षया व्यावर्तमानत्वात् रज्ज्वादिवत् सर्पादिवच्चेति सामान्येनोदाहरणम् । ततश्च ब्रह्मणो न रज्जुतुल्यतापत्ति. रज्जोर्वा पारमार्थ्यापत्तिरिति ॥

४६ अनुमानस्य निरुपाधिकत्वम

अत्र क्रमेण बाधितत्वाबाधितत्वे उपाधी शङ्कते—**ननु चेति** ॥ अत्र माध्यमिकनयेन घटादितुल्यतया सतोऽपि बाधकस्य सुवचत्वात् अबाधितत्वोपाधे· साधनाव्यापकत्वमित्याशयेनाह—**अत्रेति** ॥ बाधितत्वस्योपाधित्व परिहरति—**घटादाविति** ॥ घटोस्तीत्यत्र घटत्व भासते,

तद्धि विशेषलक्षण भेदरूप घटेतरव्यावृत्तिपदवाच्यमित्यनुभवसिद्धमित्यर्थ । **सा** व्यावृत्ति **किंरूपा?** कि सत्यसर्पनिवृत्तिवद्भ्रान्तिसिद्धा उत रज्जुसर्पनिवृत्तिवत् प्रमाणसिद्धेति विकल्प । तत्राद्य घटपटतादात्म्यस्य पारमार्थिकत्वप्रसङ्गादयुक्त इति द्वितीय दूषयति—**किमिति** ॥ घटोऽस्तीति प्रतीतेऽर्थे पटाभाव प्रमितश्चेदित्यर्थ । **घटोऽस्तीत्यनेनेति** ॥ नेद रजतमिति बुद्धयभावेऽपि यथा शुक्तिरिति बुद्धया रजतबाध तथेहापीति भाव । एव पटादिविधौ घटस्यापि व्यावृत्तिर्बोध्या । **बाधफलभूता** नास्तीति धीस्थाप्या **विषयनिवृत्तिः** घटादिविषयाभाव । व्यावर्तमानत्वस्य निरुपाधिकत्वमुपसहरति—**सेति** ॥ अबाधितत्वस्याप्युपाधित्व परिहरति—**रज्जुवदिति** ॥ सतोऽपि माध्यमिकयुक्त्या बाधोक्ति निरधिष्ठानभ्रमासभवादयुक्तेति भाव । हेतुद्वयफलितमाह—**तस्मादिति** ॥ उक्ततर्कानुग्राह्य निष्कृष्याह—**प्रयोगश्चेति** ॥

४७ सदेवानुभूति

उक्तन्यायेनैव सदनुभूत्या मिथो व्यावृत्त्याऽपारमार्थ्य स्यादित्याह—**सैव सतीति** ॥ व्यावृत्तिरसिद्धेति भाव । सत् अनुभूतिभिन्न विषयत्वात् घटवत् इत्यनुमानमाशङ्कते—**ननुचेति** ॥ प्रमाणत प्रमेयतश्च भेदस्यानुपपन्नत्वात् साध्याप्रसिद्धिबाधाभ्या दूषयति—**नैवमिति** ॥ स्वरूपासिद्धिमाह—**अत इति** ॥

11. अनुभूतिप्रकरणम्.

४८ अनुभूतस्वतःसिद्धा

एव शून्यवाद निराकृत्य विज्ञानवादं निराकर्तुमुपक्रमते—**सा चेति** ॥ इदमत्रावधेयम्—निर्विशेषसल्लक्षणब्रह्मरूपानुभूतेर्निर्धर्मक-

त्वात् तां पक्षीकृत्यानुमानप्रयोग· कथमिति शङ्का जायते । अयमत्र समाधि –कल्पितेन धर्मधर्मिन्यायेन व्यवहार इति । अभ्युपगत चेदं प्रतिवादिभिस्सौगतै । यथा "सर्व एवायं अनुमानानुमेयव्यवहारः बुद्ध्यारूढेन धर्मधर्मिन्यायेन, न बहिस्सत्तामपेक्षते" इति दिङ्नाग-वाक्यम् (२५८) न्यायरत्नाकरोदाहृतम् ॥

अथ सल्लक्षणानुभूत्यात्मकसविद एवात्मत्वमुत्तरत्र सिषाधयिषितम् । तत्र हेतूनामसिद्धिपरिहाराय प्रक्रमते—

याऽनुभूतिरजाऽनन्ताऽमेयाद्यानन्दविग्रहा ।
महदादिजगन्मायाचित्रभित्तिर्नमामि ताम् ॥

इतीष्टसिद्धौ विमुक्ताचार्योक्तक्रमेणोपरितनोऽयमुपन्यासः । येति स्वतस्सिद्धता सूचयति । अनुभूतिरिति हेतुगर्भ विशेषणम् । अनुभूतिः स्वतस्सिद्धा अनुभूतित्वात् इति व्यतिरेक्यनुमानम् । स्वतस्सिद्धत्व स्वेतरनिरूपितविषयतानाश्रयत्वम् । अनुभूतित्वमनुभवस्वरूपत्वम् ॥

विपक्षे बाध दर्शयति—**अन्यत इति** ॥ अनुभूतिर्नानुभाव्या यावत्सत्त प्रकाशमानत्वात् इति व्यतिरेक्यनुमानान्तरमाह—**किञ्चेति** ॥ अथवा—अनुभूति परप्रकाशा भासमानत्वात् इति प्रत्यनुमाने विद्यमानत्वे सत्यविदितावस्थायोगित्वमुपाधिमाह—**किञ्चेति** ॥ प्रथमपक्षे हेतोरसिद्धि द्वितीयपक्षे उपाधेस्साधनव्यापकत्वञ्च निरस्यति —**न हीति**॥

४९ ज्ञाततालिङ्गकानुमानवाद

असिद्धि भाट्टमतेनाशङ्कते—**अथैवमिति** ॥ मात्रपदेनानुभूतिर्व्यवच्छिद्यते । तत्र हेतु —**घट इति** ॥ घटस्यानुभूतिकर्मत्वात् धियः स्वकर्मकत्वविरोधात् तदानी न भानमिति भाव । तस्यैव विवरणं—**न हीति** ॥ विषय पृथुबुध्नोदराकार घट । तस्य देशकालविशेषसा-

न्निध्यमिदभाव । **तस्मादिति ॥** हेतुतया उपाधिनिवृत्तितया च विवक्षितस्य यावत्सत्तप्रकाशमानत्वस्यानुपलब्धिपराहतत्वादित्यर्थः ॥

ननु ग्राहकासिद्धौ ज्ञेयस्यासिद्धया सर्वासिद्धिरित्यत्राह--**तदनन्तरमिति ॥** इय घटनिष्ठा ज्ञातता घटज्ञानजन्या ज्ञाततात्वात् । पटगतज्ञाततावदिति प्रकाशातिशयलिङ्गकानुमानम् । अत्र लिङ्गपद कार्यलिङ्गक उपदेशलिङ्गक अदृष्टलिङ्गकमिति व्यवहारवत् ज्ञाततालिङ्गकमिति व्यवहारः । अर्थगतप्रकाशस्य प्राकट्यनामकस्य ज्ञाततारूप्यस्य पुरुषविशेषधीजन्यतया तत्प्रतियोगिकतयैव भानात् न रूपादिवत्साधारण्यप्रसङ्गः ॥

अनुभूतेरन्यतस्सिद्धावननुभूतित्वप्रसङ्ग इति प्रागुक्त स्मारयन् स्वप्रकाशवादी चोदयति—**एवं तर्हीति ॥** अन्यतस्सिद्धावित्यर्थ । प्रसङ्गं दूषयितु प्रसञ्जनीयविपर्यय प्राकट्यवादी विकल्पयति –**किमिदमिति ॥** हेतुत्वेनोक्त स्वसत्ताव्यापकप्रकाशमानत्वकत्वम्? उत साध्यत्वेनोक्त स्वतस्सिद्धत्वमिति विकल्प । आद्यमसिद्धिव्यभिचाराभ्या निरस्यति—**न तावदिति ॥** हेतोर्दुष्टत्वात्साध्यमपि नेति द्वितीय निरस्यति--**अत इति ॥** अनुभूतित्वहेतुना तत्सिद्धिरित्येतत् साध्या प्रसिद्धया दूषयति—**अर्थान्तरमिति ॥**

अथ स्वप्रकाशानुभववाद्याह—**तदिदमिति ॥ विभव** स्वव्यतिरिक्तकृत्स्नप्रकाशकत्वम् । तेनानन्यापेक्षत्वसिद्धि । तेन च यावत्सत्तं प्रकाशमानत्वसिद्धि । तेन च स्वरूपासिद्धिनिरास , उपाध्यनिवृत्तिश्च । अथ ज्ञाततालिङ्गकानुमानमाश्रयासिद्धया दूषयितु किं प्राकट्य रूपादिवद्दृष्ट? उत गुरुत्वादिवत्कल्प्यमिति विकल्पमभिप्रेत्य प्रथम निरस्यति—**अनुभूतीति ॥** घटादि प्राकट्याख्यधर्मवान् प्रकटो घट ,

प्रकाशते घटः इति व्यवहारविषयत्वात् सम्मतवदिति कल्पनाकल्पं द्वितीयमर्थान्तरेण दूषयति—**उभयेति** ॥ घट प्रकाशते घटमनुभवतीत्येकस्य कर्मकर्तृव्यवहार स्वदते रोचते इत्यादिवत् धातुभेदनिबन्धनो नार्थभेदनिबन्धन । अङ्गुल्यादिदृष्टान्तेन कर्मकर्तृभावविरोधोऽपि कारकस्थल एव, मयोगस्य द्विष्ठत्वेन स्पर्शासम्भवात् । ज्ञापकस्थले तु दीपादिदृष्टान्तेन स्वपरनिर्वाहरीत्या न विरोध ॥

धीरस्तीति मतौ शब्दशब्दे लक्षणलक्षणे ।
इष्टः स्वपरनिर्वाहः सर्वेभित्यादिधीष्वपि ॥ इति ॥

५० मानसप्रत्यक्षवेद्यतावाद

अथ ज्ञान मानसप्रत्यक्षवेद्य क्षणिकात्मविशेषगुणत्वात् सुखादिवदिति नैयायिकमत निरस्यति—**नापीति** ॥ अनुपलब्धे कल्पनाऽयोगाच्चेत्यनुषञ्जनीयम् । तेन चानुमानस्य बाध, अप्रयोजकत्वञ्च दूषणे उक्ते भवत । क्षणिकत्वात्मधर्मत्वगुणत्वादीनामस्माभिरनभ्युपगमात् हेतुरन्यतरासिद्ध । दृष्टान्तश्च साध्यविकल ॥

एवमनुभूत्यात्मकस्य सविलक्षणस्य ज्ञानस्यानुमेयत्वमानसप्रत्यक्षवेद्यत्वयोरयोगे परज्ञानस्यापि तथात्वेन व्युत्पत्त्याद्यभावेन आगमस्यापि निर्मूलत्वापातात् माध्यमिकमतमानेच्छता स्वतस्सिद्धत्वपक्ष एव परिशिष्यते इत्याह—**अपित्विति** ॥ अनुमानमप्यस्तीत्याह—**प्रयोगश्चेति** ॥ लाघवाय प्रयोगद्वयमिहाभिमतम् । एक प्राकट्याभ्युपगमेन द्वितीयस्तदनभ्युपगमेन ॥

अयमत्रत्यो निर्गलितार्थ —अनुभूति स्वसजातीयापेक्षानियमरहितस्वप्रकाशा स्वसम्बन्धादर्थान्तरे प्रकाशस्य हेतुत्वात् प्रदीपादिवत् । प्रकाशपदार्थ प्राकट्य ज्ञाततऽपरपर्यायम् । तथा अनुभूति स्वसजाती-

यापेक्षानियमरहितस्वव्यवहारा स्वसम्बन्धादर्थान्तरे व्यवहारहेतुत्वात् पूर्वोक्तवत् । व्यवहारश्च प्रकाशते इत्याकारक । अत्र हेतुत्वादित्येवाल क्वचिदपि व्यभिचाराभावात् । स्वसम्बन्धादित्यादिविशेषणत्रयोक्तिस्तु तत्कृतविशेषवैशद्यायेति ॥

12. विज्ञानवादप्रकरणम्.

५१ अनुभूतिर्नित्या

शाङ्करे (२-२-२८) भाष्ये विज्ञानात्मवादस्य सौगतसम्मतस्य "विज्ञानस्योत्पत्तिध्वसानेकत्वादिविशेषवत्त्वाभ्युपगमात्" इति वैलक्षण्यं स्वतस्सिद्धत्वाभ्युपगमेऽप्यस्तीति श्रुतिसिद्ध आत्मा न तादृश इति प्रतिपादितमस्ति । तत्र सौगताभिमतक्षणिकत्ववैलक्षण्याय स्वय प्रकाशत्वेन नित्यतां साधयति —**सेयमिति** ॥ अनुभूतिर्नित्या स्वयप्रकाशत्वात् व्यतिरेकेण घटादिवदिति प्रयोग । नित्यत्वमुभयान्तशून्यत्वम् । ननु संवित्प्रागभावध्वसयो प्रत्यक्षसिद्धत्वात् बाध इत्यत्राह—**प्रागभावाभावादिति** ॥ तयो कल्पितत्वात् प्रत्यक्ष भ्रम इति भाव । अतो न यथाश्रुतेन साध्याविशेषाशङ्का । **स्वतस्सिद्धत्वादेवेति** ॥ अनेन मानाभावोऽभिप्रेत । अत्र धी तद्विन्न वा मानम्? आद्य सा सती वा गृह्णाति असत्यपि वेति विकल्प्य आद्य विषयाभावात् अन्त्य विषय्यभावाच्च निरस्यति—**अनुभूतिरिति** ॥ द्वितीये प्रतियोगिन विषयीकृत्य नवेति विकल्प्य आद्य वेद्यत्वविरहात् अन्त्य प्रतियोगिधीविरहाच्च निरस्यति **नापीति** ॥

५२ अनुभूतिर्निर्विकारा

अथोत्पत्तिकारणीभूतप्रागभावाभावात् उत्पत्त्यभाव प्रसाध्य तेन व्यतिरेकिणा विकाराभाव साधयति सविकारत्ववैलक्षण्याय —**अत**

इत्यादिना ॥ प्रतिबद्धाः व्याप्या । **भावविकाराः** "षड्भावविकारा भवन्तीति वार्ष्यायणि जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति" यास्कनिरुक्ते प्रारम्भे पठ्यते । अत्र धीरुत्पत्तिरहिता उत्पत्तिकारिणीभूतप्रागभावाद्यभावात् सम्मतवत् इति प्रथम प्रयोग. । धीर्निर्विकारा अनुत्पन्नत्वात् व्यतिरेकेण घटादिवदिति द्वितीय प्रयोग. ॥

५.३ अनुभूतिर्निर्विशेषा

अथानेकत्वरूपसजातीयभेदवत्त्वैवलक्षण्याय धीस्सजातीयभेद रहिता अनुत्पन्नत्वात् व्यतिरेकेण घटादिवदिति प्रयोगमभिप्रेत्याह— **अनुत्पन्नेयमिति ॥ व्यापकेति ॥** नानात्वव्यापकोत्पत्तिविरुद्धानुत्पत्युपलब्धेरित्यर्थ । अत्र परमाणुभिर्व्यभिचारस्तदनभ्युपगमपरास्त । अत्र सजातीयस्वगतविजातीयभेदा क्रमेण निरस्यन्ते । भेदपदार्थश्च —

स्वरूपमेव वस्तूनां परस्परविलक्षणम् ।
नानात्वं तत्सुसवेद्य भेद इत्यभिधीयते ॥

इति भास्करभाष्योक्तरीत्या तत्तद्वस्तुस्वरूपमेव भेद इत्याभिप्रायेण पूर्व पक्षोपन्यास । भेदस्यान्योन्याभावरूपत्वे च सजातीयाद्विजातीयात्स्वगताच्च भेदो व्यासिद्धयते इति वक्तव्य स्यात् । तदानी न भिद्यमानापह्नव , अपि तु भेदापह्नवस्स्यात् । प्रथम पक्ष जरदद्वैति सम्मत. । द्वितीयस्त्वभिनवसम्मत· । फलतस्तूभयोरविशेष ॥

प्रागुक्तव्यतिरेकसाध्ययोरन्वयिनमप्याह—**भेदादीनामिति ॥** आदिना विकारान्तरपरिग्रह· । सजातीयभेदा विकाराश्च नानुभूतिधर्मा. अनुभाव्यत्वात् रूपादिवदिति भावः ॥

अथानुभूतौ जडत्वविकारनानात्वादिनिषेधात् स्वयप्रकाशत्वनित्यत्वैकत्वादिभिः सधर्मत्वापत्त्या व्याघात इत्याशङ्क्य कल्पितैस्तादृशैर्हेतु

साध्यव्यवहारेऽपि वस्तुतो निर्धर्मत्वरूप स्वगतभेदराहित्यमाह—**अत इत्यादि** ॥ धीर्निर्धर्मा आनुभवस्वरूपत्वात् व्यतिरेकेण घटवदिति ॥

13. अहमर्थानात्मवादप्रकरणम्.

५४ ज्ञातुरनात्मता.

अथ निर्धूतनिखिलभेदत्वात् ज्ञातृलक्षणाश्रयाख्यविजातीयभेद-राहित्यमाह—**यत इति** ॥ ज्ञाता कल्पितः—अनात्मा सविदतिरिक्त-त्वात् घटादिवदिति प्रयोग. ॥

५५ सविदात्मता

एव प्रसाधितेन निर्विशेषत्वेन स्वप्रकाशत्वेन अजडत्वेन च व्यतिरेकित्रयेण सविदो जिज्ञासितमात्मत्व साधयति—**स्वप्रकाशरू-पेति** ॥ अनुभूतिरात्मा निर्विशेषत्वात् स्वयप्रकाशत्वात् अजडत्वाद्वा व्यतिरेकेण घटादिवदिति प्रयोगा । **व्याप्तं** व्यापकमित्यर्थ ॥

अस्यानुमानत्रयस्य तार्किकमतेन बाधमाशङ्कते—**ननुचेति** ॥ अयमाशय —अह जानामीत्यनुभव सर्वसम्मत । अत्रात्मनो ज्ञाना-श्रयत्व भासते न तु ज्ञातृत्वमिति । आत्मनो ज्ञातृत्व भ्रान्तिसिद्ध ज्ञातृत्वस्वरूपत्वात् देहादे ज्ञातृत्ववदिति युक्त्याऽनुभवस्य भ्रान्तत्व-माह—**नैवमिति** ॥ अत्र ज्ञानाश्रय सत्यत्वेऽपि आश्रयाशस्यासत्य-तया विशिष्टस्य कल्पितत्वे निदर्शनमाह—**रजततेवेति** ॥

ननु शुक्तौ रजतत्वभानेऽपि आपणस्थरजते रजततेव देहे-बाधिताऽपि ज्ञातृताऽऽत्मनि स्यादित्यत्र स्वरूपज्ञानाश्रयत्व वा कर्मकर्त्र-वच्छिन्नज्ञानाश्रयत्व वा ज्ञातृत्वमिति विकल्प्य आद्यमात्माश्रयदोषेण निरस्यति—**अनुभूतेरिति** ॥ कर्तृत्वमाश्रयत्व जनकत्व वा । द्वीतीय

निरस्यति—**अत इति ॥** अयमाशय —कर्मकर्त्रवच्छिन्नज्ञानाश्रयत्व-रूपं ज्ञातृत्व नात्मधर्म भ्रान्तपुरुषप्रतीतिसिद्धत्वात् मनुष्यत्वादिविशिष्ट पिण्डत्वाश्रयत्ववदिति । स्वरूपासिद्धिं परिहरति—**ज्ञातृत्वं हीति ॥** प्रागुक्तानुभाव्यत्वहेतुनाऽपि ज्ञातृत्वस्यात्मधर्मत्व प्रतिषेधति—**दृशीति॥**

५६ अहमर्थस्यानात्मता

अथ कर्तृत्वमात्मधर्म आत्मासाधारणाहत्वसमानाधिकरणत्वात् अनुभूतित्वादिवत् । अह कर्ता इत्यनुभवेन पक्षधर्मत्वसिद्धया प्रतिरोध इत्यत्राह—**सुषुप्तीति ॥** अह कर्तेति धीर्नात्मगोचरा आत्मानुभवावच्छि-न्नसुषुप्तिकालवृत्त्यभावप्रतियोगित्वात् सामान्येन घटादिधीरुदाहरणम् । ततश्च प्रतिहेतुः स्वरूपासिद्ध. ॥

अथ कर्तृत्वाहत्वयो. अत्मधर्मत्वाभावे व्यतिरेकि त्रय प्रमङ्गरूपे-णाह—**कर्तृत्व इति ॥** आत्मा न कर्ता नाह प्रत्ययगोचर अजड-त्वात् प्रत्यक्तृात् आत्मत्वाच्च । यत्कर्तृ यच्चाहप्रत्ययगोचर तज्जड पराक् अनात्मा च दृष्ट शरीरादीति भाव ॥

यदि देहस्य अहत्व कर्तृत्व च तर्हि कामित्वकर्तृत्वयो. सामा-नाधिकरण्येन प्रतीतेः भोक्तृत्वमपि नात्मन· स्यात् । तथाच ससारा-भावान्मुक्तिशास्त्रमनारभ्य स्यादित्यत्राह—**अहं प्रत्ययेति ॥ प्रामा-णिकाः** चार्वाकव्यतिरिक्ता । अयमाशय —अहत्व व्यापाराश्रयत्व-लक्षणं कर्तृत्व च देहगतमपि ऐहिकामुष्मिकफलभोक्तृत्वमात्मगतमेवेति यथा मीमांसकादिभिरभ्युपगत, तथा अनात्मनोऽहमर्थस्य कर्तृत्वेऽपि गतिरिति । अहमर्थकर्तृत्व न भोक्तृत्वसमानाधिकरण कर्तृत्वस्वरूपत्वात् देहगतकर्तृत्ववदिति प्रयोगः ॥

वस्तुतस्तु — अभोक्तृत्वेऽप्यात्मान भोक्तृत्वाध्यासात्तदुक्ति· । मुक्तिशास्त्रञ्च तावन्मात्रस्यापि निवृत्त्यर्थमिति नानारभ्यत्वप्रसङ्ग ॥

नन्वहमर्थस्यात्मन्यध्यस्तत्वे शुक्तिस्थतया रूप्यवत् धीस्थतयाऽहमवभासेत, प्रत्युत तद्धर्मतया अह जानामीति धीर्भाति। तथा च धियोऽहमर्थविकारत्वेन निर्विकारत्वानुमान बाधित स्यादित्यत्राह — **एवमविक्रियेति ॥** अहमर्थस्य व्यञ्जकत्वेन व्यञ्जकसामान्यस्वभावनिबन्धन तथा दर्शनमिति बाधोऽन्यथासिद्ध इत्यर्थ । **यतोऽहंजानामीति ॥** अग्निमत्तया हि धूमवानितिवदय निर्देश· । ज्ञाताऽयमहमर्थ इति भावप्रधानो निर्देशः । अत्र ज्ञातृत्वाहंत्वे नात्मासाधारणधर्मौ सुषुप्त्यादावभातत्वात् मनुष्यत्वादिवदिति प्रयोग । स्वरूपासिद्धि परिहरति — **तत्रहीति ॥**

एतावता प्रबन्धेन लघुपूर्वपक्षे कर्मविचारो न ब्रह्मविचारपूर्ववृत्त· ब्रह्मविद्यासमुच्चयानर्हविषयकत्वादित्युक्तस्य प्रतिहेतो स्वरूपासिद्धिपरिहारायोपात्तस्य मिथ्याभूतवस्तुबाधनपर्याप्तत्वलक्षणस्य वस्तुसामर्थ्यस्य स्वरूपासिद्धि परिहृता । तदेतद्वस्तुसामर्थ्य निगमयति — **तस्मादिति ॥** अत्र निर्विशेष प्राप्य, नित्यप्राप्ते तस्मिन् नोपासनादिसाध्या प्राप्तिरस्ति । निवर्त्य मिथ्याभूतमज्ञानम्, तन्निरासे च ज्ञानातिरिक्त नापेक्ष्यम् । निवर्तकञ्च वाक्यजन्यैक्यज्ञानम्, तच्च स्वोत्पत्तौ फले वा न कर्मापेक्षते इति वस्तुत्रयसामर्थ्यनिष्कर्षेणासिद्धिपरिहारः । शुद्धमुक्तशब्दौ अविद्यातत्कार्यनिवृत्त्यर्थौ । वाक्यजज्ञानस्य मोक्षसाधनत्व "प्रत्यक्षसाधना योगा साङ्ख्याश्शास्त्रविनिश्चया" इति नारायणीयवचनेन साङ्ख्यसम्मतामिति प्रागेवोपपादितम् ॥ (९१)

९७ पूर्वपक्षसारार्थ

अयमत्र विशिष्टार्थः — एव महापूर्वपक्षे प्रथमं निर्विशेषं ब्रह्म

सत्य जगन्मिथ्या इति प्रतिज्ञाय तत्र श्रुतिस्मृतिप्रमाण प्रदर्श्य जगतो मिथ्यात्वप्रयोजक दोषलक्षणमविद्यास्वरूपमुपपाद्य बाधकज्ञानस्य निर्विशेष-चिन्मात्रपरमार्थब्रह्मात्मैकत्वरूपविषयनिरूपणेन बाधकत्वमुपपाद्य मिथ्या-भूतवस्तुबाधनपर्याप्तत्वरूपसापेक्ष्यहेतोरसिद्धिरपाकृता ॥

तत्र विषयांशे शास्त्रप्रत्यक्षयोर्विरोधेन शास्त्राप्रामाण्यात्पुनरसिद्धि-माशङ्क्य द्विप्रकारेण विरोधपरिहारेणासिद्धिरपाकृता । तत्र द्वितीये प्रकारे ब्रह्मात्मक सामान्यस्य पारमार्थ्य विशेषात्मकस्य भेदस्यापारमार्थ्य-लक्षण मिथ्यात्व चासिद्धिपरिहारायैव च युक्त्या समर्थितम् । एव सदनुभूत्योर्भेदे मिथो व्यावृत्त्या मिथ्यात्वापत्तौ पुनरसिद्धिरित्यैक्य प्रसा-धितम् । एवमपि सत अनुभूत्यविषयत्वेन प्रमाणाभावे शून्यवाद प्रसङ्गेन विषयासिद्धावसिद्धिपरिहाराय स्वतस्सिद्धत्वमुक्तम् । एव स्वत-स्सिद्धत्वेन नित्यत्व निर्विकारत्व निर्विशेषत्वञ्च प्रसाध्य विज्ञानात्मवादः सौगतसम्मत निराकृत ॥

ततोऽहमर्थात्मवाद मीमासकतार्किकमतञ्च निराकृत्य सत एवा-त्मत्व निरूपितम् । अन्यथा क्षणिकस्य विज्ञानस्य अहमर्थस्य वाऽऽत्मत्वे स्वतो मिथश्च व्यावृत्त्या मिथ्यात्वापत्तौ विषयाभावप्रसङ्गेन प्रागुक्ता-सिद्धिर्दुरुद्धरा स्यादिति विशिष्टार्थ ॥

एवञ्च अत्र प्रबन्धे पञ्चमं प्रकरणमारभ्य त्रयोदशपर्यन्तानि नव प्रकरणानि महापूर्वपक्षे प्रधानभूतानि—प्रतिज्ञाप्रकरणम्, श्रुतिप्रकरणम्, स्मृतिप्रकरणम्, अविद्याप्रकरणम्, शास्त्रप्राबल्यम्, प्रत्यक्षाविरोधः, अनुभूतिप्रकरण, विज्ञानवादप्रकरण, अहमर्थानात्मवादप्रकरणम्, इति क्रमेण महाप्रकरणानि नव । अवान्तरविभागास्तु तत्र तत्र सूचिताः ॥

यद्यपि सिद्धान्ते अनेनैव क्रमेण विचार· कर्तव्य । तथापि सङ्गतिलक्षणसन्निकर्षविशेषदृष्ट्या क्रमानादर , विचित्रत्वात्पुसामभिप्राय-पद्धतेः । तथाच सिद्धान्तेऽय क्रम —पञ्चमदशमैकादशद्वादशत्रयोदश-नवमषष्ठसप्तमाष्टमानां समाधानानि नव प्रकरणानीत्यवधेयम् ॥

इति महापूर्वपक्ष

14. महासिद्धान्तः-प्रतिज्ञानिरासः

५८ निर्विशेष ब्रह्माप्रामाणिकम्

अथ पराभिमतस्य सिद्धान्तस्यानुपपन्नतां स्वाभिमतस्योपपन्नता च प्रतिजानन् बहुशास्त्रज्ञाना बहुग्रन्थकृतां बहूनां स्खलनासभव सम्यज् ज्ञानसामग्रीवैकल्यप्रदर्शनेन परिहरति —**तदिदमित्यादिना** ॥ तदिद परोक्तमुपायादित्रितयम् । आरभ्यन्त इति यदप्याहुः तदिदमनादरणीय-मित्यन्वय । **कल्पितामिती**त्यन्तेन परमर्यादाया अनुपपन्नताप्रतिज्ञा, **न्यायेत्यादि**नोपपन्नताप्रतिज्ञा स्वमर्यादायाश्च सूच्यते । पूर्वपक्षे निष्क-र्षितस्य प्राप्यस्य निवर्त्यस्य निवर्तकस्य च स्वरूप निष्प्रमाणक चेत् प्रागुक्तवस्तुसामर्थ्यहेतुरसिद्धो भवतीति निर्विशेषलक्षणस्य प्राप्यस्या-प्रामाणिकतामाह—**तथाहीति** ॥ विगीत वस्तु प्रमाणसामान्याभाववत् यावद्विशेषाभाववत्त्वात् यो यदीययावद्विशेषाभाववान् स तत्सामान्या-भाववान् यथा निर्घट भूतलमिति भाव· । सामान्यत स्वरूपासिद्धि परि-हरति—**सविशेषेति** ॥ अनेन पूर्वपक्षारम्भे प्रोक्तस्य ब्रह्म सत्य निर्वि-शेषत्वादित्यनुमाने स्वरूपासिद्धिरुक्ता भवति ॥

अथ स्वानुभवरूपेणापरोक्षाख्यप्रमाणेन निर्विशेषवस्तुग्राहकत्वे-नाभिमतेन विशेषाभावकूटरूपहेतोरसिद्धिमनूद्य प्रतिक्षिपति—**यास्त्विति**॥

इदमहमदर्शमिति पदत्रयेण विषयाश्रयस्वगतविशेषप्रदर्शनम्। **विशिष्टविषयत्वात्** सविशेषतया भासमानत्वादित्यर्थ। ततश्च तेन न स्वरूपासिद्धिरिति भाव॰॥

अथ धीर्निर्विशेषा धीत्वादिति व्यतिरेकिणा ज्वालाभेदानुमानेनेव सर्वानुभवबाध इत्याशङ्कां तेनैव हेतुना सविशेषत्वसिद्धया निरस्यति—**स इति॥ अनुभूयमानः** भासमान॰। पक्षस्वरूपस्य हेतुत्वे स्वरूपासिद्धि, साध्यसदेह साधनाकाङ्क्षा च न स्यादिति—**सत्तातिरेकिभिरिति॥** स्वरूपातिरिक्त भासमानत्वादिक व्यभिचारान्न हेतुरिति—**स्वासाधारणैरिति॥** सर्वनिषेधको हेतु स्वपरनिर्वाहकनीत्या रजतकनकवच्च स्वात्मनोऽपि निवर्तकस्स्यादित्यत्राह—**अत इति॥** कारकस्थले तथात्वेऽपि ज्ञापकस्थले केनचिद्विशेषेण तत्सामान्याभावसाधने विरोध एवेत्यर्थः॥

कल्पितैरेव धर्मैर्हेतुसाध्यव्यवहारस्तु अयुक्त॰—साध्यस्य कल्पितत्वे सिद्धसाधनप्रसङ्गात्। हेतो कल्पितत्वे बाधकप्रमाणाभावेन सविशेषत्वप्रसङ्गात्। अपिच बाह्यार्थशून्यवादिन प्रति कल्पितेन व्यवहारसभवेऽपि बाह्यार्थसत्यवादिन प्रति कल्पितेन व्यवहार आत्मानमेव जिघत्सति॥

एव धीर्निर्विशेषा धीत्वादित्युक्तस्यैवानुमानस्याबाधितविपरीताभ्युपगमेन बाधमाह—**धिय इति॥** अयमाशय॰—निर्विशेषत्व कर्मकर्त्रवच्छिन्नस्य ज्ञानस्य उत स्वरूपज्ञानस्येति विकल्पः। तत्र किञ्चित्कर्मककिञ्चित्कर्तृकव्यवहारानुगुण्यापादकत्व धीत्वम्। स्वकर्मककिञ्चित्कर्तृकव्यवहारानुगुण्यापादकत्वं स्वप्रकाशत्वम्। एवविध धीत्व स्वप्रकाशत्व च धियः स्वयप्रकाशत्वसाधनाय परेण हेतुतया साध्यतया

चाभ्युपगते इति प्रथमविकल्पे बाधस्सुस्थ । स्वरूपज्ञानरूपात्मानुभवोऽपि प्रत्यक्तैकत्वानुकूलत्वरूपेणैवात्मावगाहीति तत्रापि बाधस्सुस्थ इति । अत्रोपलब्धेरित्यनन्तर सिध्यतीति शेषः ॥

सौगतवैलक्षण्यायाभ्युपगतै नित्यत्वैकत्वादिधर्मै पूर्वपक्षग्रन्थोक्तानुमानेषु साध्यभूतै बाधमाह—**स्वाभ्युपगताश्चेति ॥** तेषां धर्मिरूपत्वे सिद्धसाधनम् । अतिरिक्तत्वे सविशेषतेति भाव ॥

अथ बलीयस्त्वेनाभ्युपगतेन शब्दरूपप्रमाणेनासिद्धिं वारयति—**शब्दस्य त्विति ॥** पदस्य वाक्यस्य चानेकपदार्थससर्गावगाहिधीजनकत्वात् विशिष्टविषयतैवेत्यर्थ ॥

५९ निर्विकल्पकसविकल्पकविचार

अथ प्रत्यक्षप्रमाणेन स्वरूपासिद्धि वारयति-- **प्रत्यक्षस्येति ॥** सविकल्पक सविशेषविषयमिति सर्वसम्मतम् । निर्विकल्पकन्तु निर्विशेषविषयमिति प्रायेण वदन्ति । तदपि सविशेषविषय स्वगोचरजात्यादिविशिष्टवस्तुविषयप्रत्यवमर्शलक्षणस्मरणरूपसविकल्पकबुद्धिहेतुत्वात् प्रत्यभिज्ञाहेतुभूताभिज्ञावदिति । तादृशवस्तुन स्मरण नाम जात्यादेर्नानाव्यक्तिसम्बन्धरूपायामनुवृत्तौ भासमानाया प्राग्दृष्टव्यक्तिविषयीकरणम् । अयमर्थ —अय घट इति प्राथमिके पिण्डग्रहणे आकारलक्षणे घटत्वे एतद्घटसबन्धो भासते । तादृशग्रहणजनितसस्कारवतः पुस पुनरयमपि घट इति द्वितीयादौ पिण्डग्रहणे घटत्वे सस्कारमहिम्ना पूर्वघटसम्बन्धः सन्निकर्षेणोत्तरघटसम्बन्धश्च भासते । एतादृशानेकव्यक्तिसम्बन्धरूपानुवृत्त्यवगाहानवगाहाभ्यामेव भेद· प्रथमद्वितीयज्ञानयोरिति । अय च मार्ग प्राभाकरसंमतः प्रकरणपञ्चिकायामुपपादित ॥

स्वलक्षणमात्रग्रहणं निर्विकल्पकमिति विशेषमात्रवस्तुवादिनस्सुगता प्राहु । सन्मात्रग्रहण तदिति सामान्यमात्रवस्तुवादिन मण्डनादयः वेदान्तिन । सम्मुग्धग्रहण तदिति सामान्यविशेषलक्षणवस्तुद्वयवादिन साख्यादय । सामान्यविशेषयोः स्वातन्त्र्येण ग्रहण निर्विकल्पकमित्याहुर्वैशेषिकादय ॥

तत्र सामान्येनेदमनुमानम्—निर्विकल्पकं यावद्विशेषरहितविषय निर्विकल्पकपदबोध्यत्वलक्षणयोगरूपसमाख्याशालित्वात् यद्यादृशसमाख्यावत् तत्तादृश यथा निर्गन्ध वस्तु इति ॥

तत्र प्रत्यनुमानमिदम्—प्रथमाक्षसन्निपातज ज्ञान विशिष्टविषय ज्ञानत्वात्सम्मतवदिति । अनेन विशिष्टविषयकत्वाभावे प्रत्यक्षत्वाभावप्रसङ्ग इति बाधकतर्कसाचिवेन प्रतिरोध । तेन योगरूपसमाख्यायाः निरीहादिपदवत् सङ्कोचेनान्यथोपपत्त्या स्वरूपासिद्धिः । सङ्कोचस्तु निरुक्तानुवृत्तौ ज्ञेय ॥

ननु विगाता धी विशेषणधीपूर्विका विशिष्टविषयकत्वेसति बुद्धित्वात् दण्डीति बुद्धिवदित्याशङ्कायामाह—**संस्थानरूपेत्यादि ॥** अय भाव—विशेषण द्विविधम्-विशेष्यापृथक्सिद्ध तद्विलक्षण चेति । आद्य जातिगुणादि । अन्त्य दण्डकुण्डलादि । प्रथमस्थले एकयैव सामग्र्या विशेषण विशेष्य च गृह्यते । द्वितीयस्थले भिन्नयाऽपि । तथा च निरुक्तानुमाने भिन्नसामग्रीवेद्यवस्तुगोचरत्वमुपाधि । किच हेतुतावच्छेदक विशिष्टविषयकत्व व्यर्थ व्यवच्छेद्याप्रसिद्धे । अनेनैवानुमानेन तत्सिद्धावन्योन्याश्रय , व्यवच्छेद्यासिद्धौ सविशेषणहेतुसिद्धि । तत्सिद्धौ व्यवच्छेद्यसिद्धिरिति ॥

६० भेदाभेदवाद

अथ धर्मधर्मिणोर्भेदाभेदवादिमते निर्विकल्पकमभेदपक्षे निर्विशेषवस्तुविषयक, सविकल्पक भेदपक्षे सविशेषवस्तुविषयक भविष्यतीति तेन स्वरूपासिद्धिशङ्कां वारयितु धर्मधर्मिणोर्भेदाभेदपक्षं प्रतिक्षिपति—**अत एवेति ॥** दर्शनादनुमानाद्वा भेदाभेदसमुच्चय इति विकल्प्याद्यमसिद्धत्वात् द्वितीय भेदग्रहेण बाधितत्वाच्च निरस्तमित्याह—**इदमिति ॥** तत्राद्य विवृणोति—**तथाहीति ॥ सकलेतरव्यावृत्तं** गृह्यमाणासाधारणाकाररूपेतरभेदविशिष्टमेवेत्यर्थ । **प्रतीतेरिति ॥** निश्चीयत इति शेष ॥

भेदाभेदवादिना घटपटादीनां परस्पर भदाभदसमर्थने युगपदेकत्र भावाभावव्याहति· अभेदो जात्यात्मना भेदो व्यक्त्यात्मनेत्याकारद्वयेन परिहृता । तत्राभेदो जातिगत भेदो व्यक्तिगत इति । तर्हि एकस्य न द्व्यात्मकतेति शङ्काऽपि जातिव्यक्त्योर्मिथ भेदाभेदाभ्युपगमेन निरस्ता । तत्रापि व्याहति दर्शनेन दूरीकृता "वस्तुनो विरोधः क्वचिदुपलम्भनिरस्त." इति । तस्यैवोत्तरत्रोपालम्भ सिद्धान्ते "अतो वस्तुविरोध· प्रतीतिपराहत इति प्रतीतिप्रकारनिह्नवादेवोच्यते" इति ॥

द्वितीयं विवृणोति—**सर्वत्रेति ॥** अयमाशय —व्यक्त्यादयो जात्याद्यभिन्नाः अभेदेन प्रथमग्रहविषयत्वात्, स्वोपलम्भव्याप्योपलम्भविषयत्वलक्षणसहोपलम्भनियमात्, एको घट इति एकशब्दानुविद्धप्रत्ययविषयत्वात्, मत्त्वर्थप्रत्ययनिरपेक्षसमानाधिकृतपदबोध्यत्वाच्चेति चतुर्विधा हेतव ॥

एतेषां निरासोऽत्राभिप्रेतः—इदमित्थमित्येव सर्वत्र प्रतीत्यनुभवात् प्रथमो हेतुरसिद्धः । सहोपलम्भनियमः स्वरसतो भेदसाधकत्वात्

विरुद्ध । एको दण्डीत्याद्येकशब्दानुविद्धप्रत्ययविषयत्वं दण्डपुरुषयोस्सत्त्वादनेकान्तम् । खण्डो गौरित्यादौ मत्त्वर्थप्रत्ययनिरपेक्षसामानाधिकरण्यस्य अपृथक्सिद्धत्वप्रयुक्तत्वादर्थान्तरत्वेनाप्रयोजकता । विशेषणविशेष्यभावेन सर्वेषा सत्प्रतिपक्षता चेति । अपृथक्सिद्धत्वेऽपि क्वचिन्मत्त्वर्थप्रत्यय निष्कर्षकशब्दत्वविवक्षानिबन्धन गोत्ववान् गुणवान् शरीरीत्यादौ ॥

ननु सहधीनियमस्य दण्डादिष्वदृष्टस्य गोत्वादौ दर्शनात् अभेदस्स्यादित्यत्राह —**इयानिति** ॥ अयमाशय —यथा भिन्नत्वाविशेषेऽपि क्वचिदेवाभेद इति ते स्वभावनियम तथा तादृशेष्वपि केषु चिदेवापृथक्सिद्धि , अतो दुरतिक्रमस्वभावेन निर्धूयतेऽतिप्रसक्ति ॥

एव भेदाभेदे दर्शनमनुमान च निरस्तम् । सोऽयमनेकान्तवादलक्षण भेदाभेदवाद सूत्रकारेणाऽर्हतमतनिरासेन निराकृत इत्याह—**तदेतदिति** ॥

अथाप्रामाण्यसाधकस्य यावद्विशेषाभावहेतोरनुमानप्रमाणेनासिद्धिं वारयति—**अतः प्रत्यक्षस्येति** ॥

पूर्व स्वानुभवस्य निर्विशेषत्वसाधकयुक्तेरुक्त दूषण सर्वप्रमाणानामपि विषयेऽतिदिशति—**वस्तुगतेति** ॥ प्रतिज्ञाविरोधलक्षणेन बाधेन युक्तिर्दुष्टेति भाव । एव निर्विशेषवस्तुनिराकरणेन सविशेषसर्ववस्तु स्थापनेन ब्रह्म सत्य जगन्मिथ्या इति प्रतिज्ञाद्वय निर्मूलितम् ॥

15. प्रत्यक्षाविरोधनिरासः.

६१ भेदग्रहणसमर्थनम्

अथ पूर्वपक्षे शास्त्रप्रत्यक्षयोरविरोधप्रकरणे (१०) सन्मात्रग्राहिप्रत्यक्षविचारोऽनूदितोऽपि प्रत्यक्षमूलसर्वप्रमाणानां सविशेषविषयत्व-

व्यवस्थापनप्रकरणेन तन्निराकरण सुसङ्गतमिति सन्मात्रग्राहिप्रत्यक्षपक्ष प्रतिक्षिपति—**यत्तु प्रत्यक्षमिति ॥** पूर्वपक्षे स्वरूपभेदलक्षणयो· सामान्यविशेषयो अस्तित्वघटत्वात्मकयो भेदमभ्युपगम्य स्वरूपलक्षणसामान्यस्यास्तित्वस्य प्रत्यक्षग्राह्यता स्वीकृता, अनुपपत्तयश्चोद्भाविता । सिद्धान्ते भावान्तराभाववादमाश्रित्य सस्थानलक्षणगोत्वादिजातेरेव भेदव्यवहारगोचरत्वमुपेत्य तस्यैव स्वपरनिर्वाहकत्व चाङ्गीकृत्य सर्वविधदोषाणां परिहार प्रोक्त ॥

एव सन्मात्रग्राहिप्रत्यक्षनिराकरणेन प्रकृते प्रामाण्याभावसाधकस्य यावद्विशेषाभावरूपस्य हेतोरत्राप्यसिद्धिशङ्काऽपास्ता । पूर्वपक्षाभिमते शास्त्रजन्यज्ञानात्मके पक्षे कर्मसमुच्चयानर्हत्वसाधकस्य मिथ्याभूतवस्तुबाधनपर्याप्तत्वरूपसामर्थ्यहेतो प्रत्यक्षविरुद्धत्वेन शास्त्राप्रामाण्यात् असिद्धिरपि स्थापिता भवति । प्रत्यक्ष न शास्त्रविरुद्ध सन्मात्रग्राहित्वादिति पूर्वपक्षग्रन्थोक्तहेतोरप्यसिद्धिरुक्ता भवति ॥

६२ सन्मात्रग्रहणेऽनुपपत्ति

एव विशेषलक्षणभेदग्राहकस्य अबाधितप्रत्यक्षप्रमाणस्य तद्विषयस्य सस्थानरूपजात्यात्मकभेदस्य च दुरपह्नवत्वात् भेदे प्रमाणानुपपत्ति प्रमेयानुपपत्तिलक्षणतर्कस्य वक्ष्यमाणानुमानप्रमाणानुग्राहकस्यासिद्धिमुक्त्वा सन्मात्रग्राहिप्रत्यक्षपक्षे विरोधपरम्परामाह । तत्र प्रतीतिविरोध — **अपिच सन्मात्रेति ॥** व्यवहारविरोध —**यदिचेति ॥** शब्दव्यवस्थाविरोध —**सर्वास्विति ॥** प्रतीतिविरोधविशेष —**किञ्चाश्व इति ॥** **स्मृतिवैलक्षण्यं** स्मृत्यपेक्षयाऽनुभवस्य वैलक्षण्यमित्यर्थ· ॥ प्रतिपत्त्यविशेषे विरोध —**सर्वेषामिति ॥** आगमानर्थक्यम्—**निर्विशेषेति ॥** अतः प्रत्यक्ष विशिष्टविषयमेष्टव्यमिति प्रकरणार्थ ॥

ननु किमियान् कोलाहल ? प्रत्यक्ष हि द्विविध निर्विकल्पक सविकल्पक चेति । तत्र निर्विकल्पकमेव प्रमाण तदेव सन्मात्रग्राहि । सविकल्पक सर्वमप्रमाण कल्पिताकारग्राहि ' कल्पना च द्रव्यगुणकर्म-सामान्यनामभेदेन पञ्चप्रकारा । दण्डी श्याम गच्छति पुमान् देवदत्त इत्यादौ प्रसिद्धा । सेय प्रक्रिया सौगतसम्मता श्लोकवार्तिकशास्त्रदीपिकादौ विस्तृता । एतादृशेन सविकल्पकेन लौकिकस्सर्वो व्यवहार उपपद्यत इति प्रागुक्तविरोधपरपरापरिहार । तत्र सौगतै. वैभाषिकाभिधानै दिङ्नाग-धर्मकीर्त्यादिभिरेव पठ्यते—

कल्पनाऽपाढमभ्रान्त प्रमाणं निर्विकल्पकम् ।
विकल्पोऽवस्तुनिर्भासादसत्वादादुपप्लवः ॥ इति ॥

विकल्प सविकल्पकम् । उपप्लव भ्रम । इयास्तु विशेष – वैभा-षिकै स्वलक्षण विशेषरूप निर्विशेष निर्विकल्पकस्य विषय इत्युच्यते । अस्माभिस्तु सामान्यलक्षण निर्विशेष सन्मात्रपदवाच्य विषय इत्युपेयते इति ॥

नैतद्युक्तम्—यत वैभाषिकसिद्धान्तस्याबाधितसर्वप्रमाणप्रति-हतत्वेन भिक्षुपादप्रसरणन्यायेन शून्यवादाङ्कुरभूतत्वेन च भवद्भिरपि प्रतिक्षिप्तत्वात्तादृशमार्गानुसरणेन भेदापह्नव विश्वापह्नवे पर्यवस्यतीति ॥

६३ सस्थानमेव जाति भेदश्च

प्रत्यक्षस्य विशिष्टविषयकत्वे विशेषण सस्थानरूप जातिपदवाच्य निर्वक्तु अतिरिक्तजातिवादे दर्शन कल्पन च हेतुद्वयेन निरस्यते—**संस्थानेति** ॥ जातिसामान्यव्यक्तिव्यावृत्त्यादिशब्दवत् अनुगतव्यव-हारोऽन्यथासिद्ध इति न जातिकल्पक इति भाव । शब्दानुगमस्तु वस्तुसौसादृश्यनिबन्धनः ॥

अथ संस्थानमवयवव्यूह इति चेत् आत्मादावव्याप्ति । स्वरूप चेत् न विशिष्टविषय प्रत्यक्षम् । अनुभय चेदस्मन्मत स्यादित्यत्राह— **संस्थानं नामेति ॥** स्वशब्दो धीस्थपर ॥ **रूप**मपृथक्सिद्ध विशेषणम् ॥

अथ सस्थानस्यैवान्योन्याभावलक्षणभेदरूपतामुपादयति - **जाति-ग्रहणेनेति ॥ व्यवहारसंभवादिति ॥** प्रतियोगिनिरपेक्षस्य भावस्य घटादे. तत्सापेक्षशब्दवाच्यत्व घटाभावाभावव्यवहारे दृष्टम् । तथाच धर्मत्व भ्रमासहत्व च घटत्वादिजातिस्वरूपस्य भेदत्वे प्रयोजक, न तच्छून्यस्येति नातिप्रसगावकाश । **तदपेक्षत्वादिति ॥** तत्पद प्रतियोगिधीपरम् । तदपेक्ष्यत्वादिति पाठे भिन्न इति व्यवहारपरम् । एतेन पूर्वपक्षोक्तस्तर्कोऽपाकृत ॥

६४ अनुमाननिरसनम्

एव भेदे प्रमाणप्रमेयानुपपत्तिलक्षण तर्क निराकृत्य तदनुग्राह्यमनुमानमसिद्धयितुमनुवदति—**यत्पुनरिति ॥** सोपाधिकत्वबाधितत्वविरुद्धत्वानि प्रपञ्चमिथ्यात्वविषयकसर्वानुमानसाधारणानि दूषणानि । प्रतिपन्नोपाधौ बाधितत्वमुपाधि. । धर्मिग्राहकमानेन प्रत्यक्षादिना सत्यत्वावगाहिना बाध । साध्यसाधनसत्यत्वमिथ्यात्वविकल्पफलभूत विरोध इति दूषणत्रयनिष्कर्ष ॥

प्रकृते घटादयोऽपरमार्था व्यावर्तमानत्वात् रज्जुसर्पवदित्यत्र बाधितत्वमुपाधिः । स हि यस्मिन् देशे यस्मिन् काले यस्य सद्भाव. प्रतिपन्नः तस्मिन् देशे तस्मिन्नेव काले तस्याभाव. प्रतिपन्नश्चेत् बाधितत्वम् । ततश्च तस्याभावलक्षणा व्यावृत्ति । मिथ्याभूतरज्जुसर्पादेस्तु तादृश बाधितत्वमस्तीति तस्य साध्यव्यापकत्वम् । धर्मिग्राहकमानबाधेन घटादेस्तन्नास्तीति साधनाव्यापकत्व च । निरुक्तव्यावर्तमानत्वमेव

मिथ्यात्वप्रयोजकम् । न तु सामान्यतो व्यावर्तमानत्व देशान्तरकालान्तरायत्तम् । घटोऽस्तीत्यत्र पटादेः प्रतीयमानमपि न बाधफलभूतविषय निवृत्तिलक्षणमिति भाव ॥

सत् परमार्थ अनुवर्तमानत्वादित्यत्र सिद्धसाधनमित्याह— **यत्त्वनुवर्तमानत्वादिति ॥** अपि चाय हेतु स्वरूपासिद्ध , यत. प्रमाणसंबन्धार्हत्वलक्षणव्यवहारयोग्यताया एव सत्त्वरूपत्वात् तस्याश्च तत्तद्वस्तुविशेषरूपतैवेति अनुवर्तमान सद्रूप वस्त्वेव नास्तीति ॥

अनुभूतिसद्विशेषयोरिति ॥ सत् अनुभूतिभिन्न विषयत्वात् घटवदित्यनुमान पूर्वपक्षे साध्याप्रसिद्धिबाधस्वरूपासिद्धिभि दूषितम् । अत्र दोषत्रय परिहृतमिति भावः ॥

16 अनुभूति निरूपणम्.

६५ स्वत परतस्सिद्धत्वम्

पूर्वपक्षे योगाचारसमत विज्ञानवाद मनसि निधाय निर्विषया निराश्रया निर्विकारा नित्या स्वप्रकाशा सविदभिधानाऽनुभूतिरात्मभूता द्रव्यधातुरेकैव परमार्थेति प्रसाधितम् । सा ह्यविद्ययाऽन्त करणवृत्तिद्वारा घटादिविषयससर्गवतीव भातीति च अभिप्रेतम् ॥

सेय कल्पना विज्ञानवादपरिष्काररूपा अबाधितप्रत्यक्षादिसकलप्रमाणविरुद्धेति प्रत्यक्षादिप्रमाणानुरोधेन सविषयसाश्रयसविकारानित्यज्ञानसवेदनानुभवादिपदवाच्यानि विज्ञानानि अनन्तानि । तेषामाश्रयभूताः कर्तृस्थानीया. आत्मान जन्तुसत्त्वजीवपदवाच्या अप्यनन्ता. । घटादयश्च विज्ञानविषयभूता कर्मपदवाच्या अनन्ता । तथाच परमार्थसकर्तृकसकर्मकसकरणकज्ञानवाद. योगाचारविज्ञानवाद अविद्यावाद्यनुभूतिवादं

च लक्षीकृत्य प्रवर्तते इति प्रकरणार्थ । सोऽय वाद प्रमाता प्रमाण प्रमेय प्रमा इति "चतसृषु चैवविधास्वर्थत्तत्व परिसमाप्यते" इति वात्स्यायनेनाप्यनूदितः ॥ (१-१-१)

सामान्यतस्सर्वेषा वादिना प्रायेण विज्ञानपदाभिधेय स्वतस्सिद्ध स्वप्रकाश स्वविषयव्यवहारे परानपेक्षामिति समतम् । तत्र सर्व सर्वत्र सर्वदा सर्वथेति न वक्तु युक्तम् सविद्विरोधात् । अत ज्ञातुराश्रयस्य विषयप्रकाशनवेलायामिति सिद्धान्तिनामाशय । तमेवाह—**यत्त्वनुभूते-स्वयमिति ॥** ततश्चानुभूति स्वतस्सिद्धाऽनुभूतित्वादित्यनुमान सिद्ध-साधनदोषदुष्टमिति भाव. । वेलायामेव ज्ञातुरेवेत्यशद्वय विशेष· सिद्धान्ते बोध्य । ततश्चानुभूते स्वत परतश्च प्रकाश्यत्वमुपगतम् ॥

अथानुभूतेः परत प्रकाश्यत्वाभावगोचरमनुभूतिरननुभाव्या अनुभूतित्वरूपात् सत्तयैव प्रकाशमानत्वादित्यनुमान दूषयति—**अनुभूतेरनुभाव्यत्व इति ॥** अनुभाव्यत्व परप्रकाश्यत्वम् । लौकिकवैदिकव्यवहार-विरोधप्रदर्शनम्—**स्वगतेति ॥** एतेनाप्रयोजकत्वमुक्तम् । अथ बाध वक्ति **नचान्यविषयत्वे इति ॥** अनुभाव्यत्व साधारणाकारः । अनुभूतित्व विशेषाकार । न खलु तयोर्विरोध इत्यनुभूतित्व निर्वक्ति—**अनुभूतित्वं नामेति ॥** व्यवहारप्रयोजकविषयतावत्त्वलक्षणस्य प्रकाश-मानत्वमात्रस्योक्तौ घटादावतिव्याप्तिरत —**स्वाश्रयं प्रतीति ॥** स्वाश्रय-कर्तृकव्यवहारप्रयोजकविषयतावत्त्वमात्रोक्तौ अदृष्टलक्षणधर्माधर्मयोरति-व्याप्ति. —**स्वसत्तयैवेति ॥** स्वसत्ताव्यापकत्व तदर्थ· व्यवहारान्वयी । अतीतानुभवस्येदानी तादृशलक्षणाभावादव्याप्तिरत —**वर्तमानदशाया-मिति ॥** विषयसबन्धवर्तमानदशायामिति तदर्थ । इदानी प्रकाश-मनत्वाभावेऽपि तदानीमस्त्येवेति नाव्याप्ति । तथाच विषयससर्गसमान-

कालीनस्वसत्ताव्यापकस्वाश्रयकर्तृकव्यवहारप्रयोजकविषयताश्रयत्वमनुभू-तित्वमिति निष्कर्ष । इद स्वयप्रकाशतावादिमताभिप्रायेण ॥

अथास्वयप्रकाशतावादिमतसाधारण्येन निर्वक्ति—**स्वसत्तयैवेति**॥ वर्तमानदशायां स्वाश्रय प्रतीति चानुवर्तते । स्वविषयव्यवहारप्रयोजत्व-रूपस्य स्वविषयसाधनत्वमात्रस्य दण्डचक्रादिसाधनेऽपि सत्त्वात्—**स्वाश्रयं प्रतीति** ॥ चक्षुरादीन्द्रियव्यावृत्तये—**स्वसत्तयैवेति** ॥ इन्द्रिय ज्ञानद्वारा साधनम्, नतु सत्तयैवेति ॥ अतीतानुभवेऽव्याप्ते प्रागिव वारणाय—**वर्तमानेति** ॥ अत्रापि विषयसमर्गसमानकालीन-स्वसत्ताव्यापकस्वाश्रयकर्तृकस्वविषयकर्मकव्यवहारप्रयोजकत्वमनुभूतित्व-मिति निष्कर्ष ॥

एव तर्हि घटादौ दृष्टाया अननुभूतित्वानुभाव्यत्वव्याप्ते का गति-रित्यत्रोपाधिमाह—**घटादाविति** ॥ **एतत्स्वभावविरहः** निरुक्तानुभू-तिलक्षणयोरन्यतरस्याभाव । तन्निबन्धन अनुभूतिपदव्यपदेश्यत्वा-भावः । नत्वनुभाव्यत्वप्रयुक्त इत्यर्थ ॥

अथाभाससमानयोगक्षेमतामाह —**तथानुभूतेरननुभाव्यत्व इति** ॥ अय भाव —व्यतिरेकसामानाधिकरण्यमात्रेण धीरवेद्या धीत्वा-द्व्यतिरेकेण घटवदित्यनुमानप्रयोगे धीर्वेद्या धीत्वात् व्यतिरेकेण गगन-कुसुमवदित्यपि प्रयोक्तु शक्यत इति । अत्रासत्त्वमुपाधिरिति चेत् अवि-दितावस्थायोगित्वलक्षण अज्ञानाविरोधित्व घटादावुपाध्यन्तरमाह—**एवं तर्हीति** ॥ तस्य पक्षे प्रसक्तिशङ्का—**अनुभूतेरिति** ॥ अननुभाव्य-त्वेऽपि तत्प्रसज्जयति—**अननुभाव्यत्वेऽपीति** ॥ **अज्ञानाविरोधित्वम-पीति** ॥ अपिना असत्त्वपरिग्रह । प्रयोगप्रौढिमप्रदर्शनार्थ शिष्या-णामूहशक्त्यर्थ च प्रकारान्तरेण प्रत्युक्ति । ज्ञानस्यानुमेयतावाद

मीमासकसमत , अनुव्यवसायवेद्यतावाद· नैयायिकसंमतश्च पूर्वपक्षे दूषित सिद्धान्तेऽपीष्ट· ॥

17 विज्ञानवादनिरूपणम् .

९६ अनुभूतिरनित्या

अथानुभूतिर्नित्या स्वप्रकाशत्वादित्यनुमानस्य व्यतिरेकिणः उत्पत्तिविनाशयोरनुभूतावनुभवसिद्धत्वेन बाध वक्ति—**यत्तु संविद इति ॥ अन्धेनेति ॥** असिद्धमत्यन्तासिद्धेन साध्यत इत्यर्थ ॥ अयमत्रार्थ — अनुभूतिपदेन प्रत्यक्ष किं विवक्षितमुत तदतिरिक्तम् । आद्यस्य समकालविषयविषयकत्वनियमेन स्वप्रागभावग्रहणासभवेऽपि द्वितीयस्यानुमानागमस्मरणयोगिप्रत्यक्षादिरूपस्य त्रैकालिकादिविषयकत्वात् तत्सभवे नानुपपत्ति । अनुमानेन तत्सभवप्रकारस्तु—इयन्त काल न किञ्चिदहमज्ञासिषमिति सुषुप्तयवस्थापरामर्शेन ज्ञानसामान्याभावरूपसुषुप्तयशेऽनुमानात्मकेन स्मर्तव्यास्मरणलक्षणलिङ्गजनितेन ज्ञानसामान्याभावान्तर्गत स्वाभावोऽपि प्रागभावरूप विषयीकृत इति । ततश्च सत्येवानुभूति स्वप्रागभावावगाहिनी भवतीति बाधो दुरद्धर इति भाव ॥

अत्र यत्प्रमाणग्राह्यत्व यत्र तत्र तत्समकालत्वमिति पूर्वपक्ष्याशय । स च प्रत्यक्षप्रमाणे सम्मतो विशेषनियम । सामान्यतस्तु यस्मिन् देशे यस्मिन् काले यस्य प्रमाणवेद्यत्व तस्मिन् देशे काले तस्यानारोपितत्वलक्षमबाधितत्वमेव मानमेयाविनाभावनियम इति सिद्धान्त्याशय ॥

९७ स्मृतिनिरूपणम्

वैभाषिकमते—

ग्राह्यं वस्तु प्रमाणं तु ग्रहणं निर्विकल्पकम् ।
न तद्वस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिजम् ॥

इत्युक्तया ज्ञान द्विविध ग्रहण स्मरणं चेति मतम्। तत्रानुभवलक्षणस्य ग्रहणस्यैव निर्विकल्पकस्य प्रामाण्यम्। स्मरणलक्षणस्यानुमानागमादिजन्यस्याप्रामाण्यमिति प्रतिपाद्यते। तद्वासनया अनुमान प्रागभावे प्रमाणमेव न भवतीति पूर्वपक्ष्याशय हृदि निधायाह—**अत इदमपीति ॥** स्वसमकालत्वनियमाभावादित्यर्थ। अयमाशय.—

स्मृतिरेव हि संस्कारो वासनेत्यपि कथ्यते।
स्मृतिशक्तौ स्थितः सर्वः प्रपञ्च इति सुस्थितम् ॥
वासनामात्रनिघ्नं चेत् जगत्स्याच्छून्यलक्षणम्।
इति हार्द सौगतानां मध्यमागमवादिनाम् ॥
तस्मान्न प्रत्यभिज्ञाऽपि प्रामाण्यं लब्धुमर्हति।
तत. क्षणिकसिद्धान्तः निर्निरोध इतीतरे ॥
अगृहीतार्थगन्तृत्वं प्रोक्तं प्रामाण्यलक्षणे।
स्मृतिव्यावृत्तये पूर्वैः दूषितं तत्तु तार्किकैः ॥
न स्मृतेरप्रमाणत्वं गृहीतग्राहिताकृतम्।
अपित्वनर्थजन्यत्वमित्यन्यत्रास्य विस्तरः ॥

इति॥ मानमेयरहस्यवार्तिके स्मृतिविचारेऽधिकमनुसन्धेयम् ॥

एव प्रागभावे फलप्रमाणमुक्त्वा करणप्रमाण विकल्पय निरूपयति—**अथोच्येतेति ॥ योग्यानुपलब्धचैवेति ॥** विषयाविकलप्रतियोगिग्राहकसामग्रीलक्षणयोग्यता समवहितप्रतियोग्युपलम्भाभाव अभावे प्रमाणमिति कुमारिलसिद्धान्त·। तत्र योग्यता ज्ञाततया सहकारिणी। अनुपलब्धिस्तु सत्तया। अपरथाऽनवस्थापातस्तस्या अप्यभावत्वादिति ॥

सैषाऽनुपलब्धि स्मृतिप्रमितिरूपप्रतियोगिभेदेन द्विविधा। द्वितीयाऽपि प्रत्यक्षानुमित्युपमितिशाब्धार्थापत्तिभेदेन पञ्चविधेति अनुपलब्धिरपि पञ्चविधा भवतीत्यन्यत्र विस्तर·। प्रकृते घटादिविषयकस्मरणाभावरूपानुपलब्ध्या सवित्प्रागभावग्रह इति भावः ॥

स्वज्ञानाभावस्य स्वयमज्ञाने व्यवहारविरोधस्त्वेषः—

स्वज्ञानाभावदृष्ट्या हि ज्ञानिनः त्वं प्रपद्यसे ।
अज्ञातं पृच्छमानश्च न जानामीति भाषसे ॥
परधीजननार्थं च त्वया वाक्यं प्रयुज्यते ।
शृणोषि च स्वधीसिद्धयै कथं नित्यां ब्रवीषि ताम् ॥

इत्यादि ॥ तत्त्वटीकायां विस्तरो द्रष्टव्य ॥

किंच—सविषयस्य वा निर्विषयस्य वा सवेदनस्य नित्यत्वमभिमतमिति विकल्प्य आद्यस्यार्थापत्त्याऽप्यनित्यता साधयति—**किंच प्रत्यक्षेति ॥ तदप्रतीतिश्च संवेदनस्य** स्वानवच्छेदककालावच्छिन्नघटादिसत्ताव्यवहारप्रयोजकत्वाभावः । **कालपरिच्छिन्नतया प्रतीते**ः संवेदनस्य कालपरिच्छिन्नत्वादित्यर्थः । अर्थापत्तिर्नाम—

प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् ।
अदृष्टं कल्पयेदर्थं साऽर्थापत्तिरुदाहृता ॥

इति । प्रकृते व्यवहारकादाचित्कत्व ज्ञानकादाचित्कत्वं कल्पयतीत्यर्थ. ॥

एव विषयव्यवहारकादाचित्कत्वान्यथाऽनुपपत्त्या सवेदनसामान्यस्य कादाचित्कत्वलक्षणार्थापत्तिमुक्त्वा घटादिविषयानित्यत्वान्यथानुपपत्त्या प्रत्यक्षज्ञानस्य अनित्यत्वमुच्यते—**घटादिविषयामिति ॥**

सवेदनस्य नित्य नित्यतयाऽनवभासान्यथानुपपत्त्याऽप्यनित्यत्वमुच्यते—**नित्यं चेदिति ॥** अयमाशय. —सविन्नित्यत्व सविदिय नित्येति संविदं विषयीकृत्यैव ग्राह्यम् । सविदो विषयीकारानर्हत्वे नित्यत्वमपि स्वतस्सिद्धमिति वक्तव्यम् । ततश्च नित्यत्व नित्य भासेतेति ॥

एवमनुमानादीति ॥ अय भावः—प्रत्यक्षज्ञानस्य तद्विषयस्य च नित्यत्वप्रसक्तौ अनुमित्यात्मकज्ञानस्य त्रैकालिकविषयकत्वेऽपि सविद-

पेक्षया प्रत्यक्षविषयलिङ्गापेक्षया वा अतीतत्वागामित्वयोर्वक्तव्यत्वेन तयोर्नित्यत्वे अनुमितेरनुमेयस्यापि नित्यत्वप्रसग इति ॥

अथ निर्विषयानुभूतिनित्यतापक्ष निराकरोति—**नच निर्विषयेति** ॥ प्रतिज्ञाप्रकरणे "स्वापमदमूर्छासु सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्याम" इत्युक्तस्यायमप्यवसर ॥

अयमत्र शङ्कितुरभिप्रायः—निर्विषया निराश्रया नित्या स्वप्रकाशा संविदादिपदाभिधेयाऽनुभूतिरेकैव लोकोत्तरा आत्मपदवाच्या। सा ह्यन्तःकरणवृत्तिद्वारा कदाचिद्विषयससर्गवतीव भवति। वृत्तिविगमे स्वापादिदशासु स्वप्रकाशा चकास्तीति ॥

समाधातुरभिप्रायस्तु—प्रदीपस्थानीयस्यात्मन. प्रभास्थानीया स्वप्रकाशा सविदनुभूत्यादिपदाभिधेया स्वरूपतो नित्याऽपि सकोचविकासलक्षणप्रसरणभेदाधीनोदयविलयव्यपदेशवती अत एवानेकाऽनित्या साश्रया साविषया स्वापादिदशाया विषयससर्गविरहादनवभासमाना प्रत्यात्मनियता। प्रभाश्रयप्रदीपस्थानीया त्वात्मपदवाच्या सदा स्वप्रकाशा सविल्लक्षणा स्वापादिदशास्वप्यनुभूयते। सोऽप्यनुभव आत्मानुभवपदवाच्य. स्फुरणलक्षण स्फुरत आत्मन धर्मरूप· प्रभाश्रयप्रदीपस्येव औज्ज्वल्यस्थानीयः नित्यः स्वाश्रयविषयकः। एतादृशश्च विकारः आत्मन. तत्त्वान्तरापत्त्यनापादक वस्तुस्वभावायात्त. अतिशयाधायक भूषणभूतः शास्त्रतोऽनुभवतश्च स्वीकृत इति। अत्र सिद्धान्त्यभिमतधर्मभूतज्ञानस्य पूर्वपक्ष्यभिमतात्मभूतज्ञानस्य च प्रक्रियाया समानायामपि विकारस्य पारमार्थ्यापारमार्थ्ये विशेषभूते ॥

अत्रानुपलब्धिपराहतत्वादिति॥ प्रात्यक्षिकबाधोक्तिः। यौक्तिकबाधोक्तिः—**तास्वपि दशास्विति** ॥ **अस्मरणनियम इति** ॥ यस्य

यत्रानुभवः तस्य तत्र संस्कारतिरस्काराभावे स्मरणमिति व्याप्ति. । तत्र व्यापकाभावे व्याप्याभाव इति सिद्धोऽनुभवाभाव इत्यर्थ ॥

एवं प्रसङ्गान्निर्विषयनिराश्रयानुभूतिनित्यतापक्षं प्रतिक्षिप्य प्रागभावसिद्धिं निगमयति—**अतोऽनुभूतिस्सतीति ॥ अनुभूतेरनुभाव्यत्वेति ॥** अनुभूतेरननुभाव्यत्वेन प्रागभावाग्रहणसाधनमनुभूतेः प्रागभावनिराकरणेऽपि समानमिति भाव । **तस्मादिति ॥** अनुभूतिर्नित्या स्वतस्सिद्धत्वादित्यनुमान बाधित, पूर्वपक्ष्यभिमत स्वतस्सिद्धत्वमप्यसिद्धमिति भावः ॥

६८ अनुभूतिस्सविकारा

धीर्निर्विकारा अनुत्पन्नत्वात् व्यतिरेकेण घटादिवदित्यनुमानमनुत्पन्नत्वमङ्गीकृत्यापि दूषयति—**यदप्यस्या इति ॥** प्रागभावे व्यभिचारवारणाय भावत्वविशेषणदानेऽपि अविद्यायां व्यभिचारमाह—**भावेष्वितीति ॥** परमार्थविकारराहित्य साध्यमिति चेत् व्यतिरेकदृष्टान्ते घटादौ साध्यसत्त्वात् व्याप्यत्वासिद्धिरिति प्रकृतार्थ. ॥

६९ अनुभूतिस्सविशेषा

धीः भेदरहिता अनुत्पन्नत्वात् व्यतिरेकेण घटादिवदिति भेदसामान्यनिषेधानुमानेऽपि सर्वमते आत्मनि देशेन्द्रियादिभेदाभ्युपगमात् अद्वैतमते आत्मन्यविद्याभेदाभ्युपगमाच्च सामान्येन भेदस्योत्पत्तिव्याप्यत्व व्याप्यत्वासिद्ध्या दूषयति—**यदप्यनुभूतिरजत्वादिति ॥** अनेन विजातीयभेदराहित्यानुमानमपि निरस्त भवति ॥

धीस्सजातीयभेदरहिताऽनुत्पन्नत्वादित्यस्यापि बाधमाह—**अबाधितप्रतिपत्तीति ॥** नात्रानुमानमभिमतम् । अपि तु दृष्टादृष्टविषयभेदेन धीभेदप्रत्यक्षं बाधकतयाऽभिमतम्—**यदपि नास्या इति ॥** अत्रा-

यमर्थ.—धी दृश्यधर्मलक्षणस्वगतभेदरहिता धीत्वादिति व्यतिरेकी हेतु । दृश्या न धीधर्मा दृश्यत्वात् रूपादिवदित्यन्वयी हेतुश्च प्रागुक्तौ । तत्रान्वयिन नित्यत्वस्वयप्रकाशत्वादिना धीधर्मेण साधारणानैकान्तिकत्वमू । व्यतिरेकिणस्तु असाधारणानैकान्तिकत्वम् । तथाहि—नित्यत्वादौ दृश्ये धर्मे अनवस्थाप्रसङ्गेन दृश्यधर्मान्तराभावात्सपक्षभूते हेतु धीत्व न वर्तते अत. पक्षमात्रवृत्ती हेतुरिति ॥

धीत्व स्वयप्रकाशत्व नित्यत्व एकत्व च निरुच्य स्वरूपतो मिथश्च भेदं निरूप्य व्यभिचारनिरूपकाधिकरणापलापमपाकरोति—**नच ते संवेदनेति ॥ एकसङ्ख्यावच्छेदः** एकत्व सङ्ख्यारूपो व्यावर्तकधर्म इत्यर्थ । इति स्वरूपभेदादित्यन्वय· ॥ **तेषां जडत्वेति ॥** भावाद्वैतमतेऽपि मण्डनसमते प्रकृतलिङ्गयोरुक्तदोषो दुरुद्धर इति भाव । **किमपि नोक्तं भवेदिति ॥** सिद्धसाधन दोष इति भाव । अत्र प्रकाशपदार्थनिरूपणेन पूर्वपक्षोपक्षिप्तप्राकट्यविचारोऽप्यनुमेयत्वानभ्युपगमात्समाहित इति ध्येयम् ॥

तिष्ठन्तु नित्यत्वादय । स्वरूपप्रकाशमात्रेणापि सधर्मत्वाद्बाधमाह—**अपिच संविदिति ॥ गगनकुसुमादिवदिति ॥** उक्तमनुमानद्वयमाश्रयासिद्धिसाध्याप्रसिद्धिभ्यां दूषितमिति भाव ॥ सवित्स्वरूपतत्प्रकाशयोरभेदेऽपि विषयाश्रयलक्षणकर्मकर्तृप्रयुक्त सविशेषत्व दुस्त्यजमित्याह—**सिद्धिरेव संविदितीति ॥**

अथ अन्त.करणवृत्तिरूपज्ञानस्य विषयाश्रयसबन्धे सत्यपि त्वदुक्तात्मस्वरूपवत् अस्मदुक्तं सवित्स्वरूप स्वतस्सिद्धमिति शङ्कायां प्रसिद्धस्याहंशब्दार्थस्यात्मन. प्रसिद्धज्ञानादन्यस्यैव स्वापेक्षया प्रकाशत्वरूप सवित्त्वमस्माभिरुच्यते । त्वया तु प्रसिद्धाया. सविद: प्रतीतिविरुद्ध-

मात्मत्वमुच्यते, साङ्ख्यप्रक्रिया चानुरुध्यते। उभय लोकविरुद्धमिति विस्तरेणाह—**एतदुक्तं भवतीति ॥**

सविच्छब्दवाच्यो नाहशब्दवाच्यात्मा तद्धर्मत्वात् सामान्यतः द्रव्यधर्मभूतगुणवदित्युक्ता अस्थिरत्वादपि स्थिरादात्मनो भेदं साधयति—**तथाह्यस्येति ॥ स एवायमर्थः** इति दृष्टान्तः। **पूर्वं मयेति** दार्ष्टान्तिक.। सोऽयमिति बाह्यार्थे कालद्वयावच्छिन्नदेशद्वयावगाहिप्रत्यभिज्ञावत् सोऽहमित्यान्तरार्थेऽपि अतीतज्ञानवर्तमानज्ञानरूपाकारद्वयावगाहनेन प्रत्यभिज्ञा स्थैर्यावगाहिनी निराबाधेति भावः ॥

एव प्रत्यभिज्ञाविषयतया स्थैर्यमुक्त्वा प्रत्यभिज्ञाश्रयतया स्थैर्यमाह—**एवं क्षणभङ्गिन्या इति ॥ प्रतिसंधानं** प्रत्यभिज्ञा। **उभयेति ॥** यद्यपि सविदात्मपक्षे लाघवमस्ति। तथापि क्लृप्तौ हि गौरवलाघवविचार, न तूपलब्धौ। उपलब्धिबलेनैव हि अतिलघुरपि शून्यवादो निराक्रियते। अथ शुद्धायामेव सविदि तत्त्वतो भ्रान्त्या च निर्विषयत्वसविषयत्वादिविरोधशान्तिः। उपलब्धमपि युक्तिविरुद्धं त्याज्यमित्यत्राह—**अनुभूतिमात्रमेव परमार्थ इति ॥**

18. अहमर्थात्मवादः.

७० अहमर्थानात्मानुमानदूषणम्

अथाहमर्थात्मनिरास विस्तरेणानूद्य दूषयति—**ननुचाहमिति ॥** अत्र परेण विषये घटत्वादिरहित सन्मात्र विषयिणि कर्तृकर्मक्रियात्वरहित प्रकाशमात्रमात्मेत्यभ्युपगतम्। तच्च विस्तरेण प्रतिक्षिप्तम्। तथा ज्ञातरि प्रत्यगर्थे अहत्वादिकं त्यक्त्वा तत्रत्यं प्रकाशमात्रमात्मेत्याहुः। तथाहि—अहं जानामीत्यस्मदर्थप्रत्यये उत्तमपुरुषोपात्तज्ञातृविषयायां धातूपात्ताया ज्ञप्तौ ज्ञप्तयशभूतसविदात्मा अनिदशत्वलक्षणप्रत्यक्त्वात्।

तत्र हेतुः प्रकाशैकरसत्वलक्षणस्वतस्सिद्धत्वात् । तत्र हेतुः चित्त्वलक्षण-धीत्वादिति व्यतिरेकित्रयम् । तथा—अहं जानामीत्यबाधितप्रतीतिसिद्धः उत्तमपुरुषोपात्तो ज्ञाता, अनात्मेति शेष , युष्मदर्थत्वरूपात् प्रत्यक्त्वशून्यत्वात् । तत्र हेतुः युष्मदर्थलक्षणोपेतत्वरूपात् धीनिर्भासितत्व-लक्षणात् स्वतस्सिद्धत्वशून्यत्वात् । तत्र हेतुः चिद्व्यतिरिक्तत्वलक्षणात्-धीत्वशून्यत्वादित्यन्वयित्रयम् । अयं पूर्वपक्षसारार्थ ॥

तत्र धिय स्वतस्सिद्धत्वमिष्टम् । ज्ञातु· स्वतस्सिद्धत्वशून्यत्वरूप जडत्व प्रतिवक्ष्यते । शिष्टाना चतुर्णां हेतूनां बाध उच्यते—**नैतदेव-मिति** ॥ प्रत्यक्त्वं नाम स्वस्मै भासमानत्वम् । पराक्त्व तु परस्मै भासमा नत्वम् । अह स्वस्मै भाति । धीस्सुखादिवत् परस्मै भाति । अत· अहम-र्थस्यैव प्रत्यक्त्वम् ॥

७१ सग्रहकारिकाष्टकम्

विरुद्धमपत्याह—**किञ्चेति** ॥ इयमष्टश्लोकी अहमर्थात्मवादस्य सकलार्थस्य सग्रहरूपा भाष्यकारीया । तत्र अहं शब्दवाच्य आत्मा प्रत्यक्त्वादिति व्यतिरेकिण· अनुकूलतर्क —**अहमर्थो नचेदिति** ॥ योऽसावहमिति व्यवह्रियते स एव हि स्वस्मै भाति । तदन्यत्सर्वं परस्मा एव भातीति परागेव । परस्मै अञ्चन्निति पराक् । तस्य प्रतीपमञ्चतीति प्रत्यक् । अञ्चनमत्र भानम् । सविदनात्मा पराक्त्वात्सुखादिवदित्यर्थो हीत्यनेन विवक्षितः ॥

अनिष्टनिवृत्तीष्टप्राप्तिकामनाविशिष्टस्याधिकारिणो विनाशे शास्त्र-स्य निरधिकारिकतयाऽप्रामाण्यापत्तिलक्षणा श्रुत्यर्थापत्ति· द्वाभ्यां श्लोका-भ्याम्—**निरस्तेति** ॥ अपुरुषार्थत्वेन विनश्वरत्वेन च ज्ञेरधिकार-शङ्कानिराकृति· द्वाभ्यां—**मयि नष्टेपीऽति** ॥ घटाकाशादिदृष्टान्तं निराह—**छेत्तुरिति** ॥

अय भाव —

स्वावच्छेदकनिर्मुक्तसंविन्नित्यत्वमिच्छता ।
संयोगच्छेदनादौ च किं न तादृक्तुमिष्यते ॥
घटाकाशादिनीतिश्च त्वया संविदि दुर्भणा ।
तत्तत्संयोगविश्लेषतुल्यागन्तृगुणोज्झनात् ॥ इति ॥

अहमर्थात्मत्व निगमयति—**अतोऽहमिति ॥** सविदनात्मत्वं निगमयति—**विज्ञातारमिति द्वाभ्याम् ॥** इति श्लोकार्थः । अनन्तरमस्यैवार्थस्य विस्तर —**अहं प्रत्ययसिद्ध इति ॥** यद्यप्यत्रास्मदर्थस्यैव युष्मदर्थत्वमात्मव्यक्तिभेदात्स्यात् । तथापि घटादिवत् प्रत्यक्त्वसामान्याभावलक्षण युष्मदर्थत्वमिह व्याहतमित्यभिप्राय. ॥

७२ अहमर्थ स्वयंप्रकाश

अत्राहमर्थस्यात्मत्वं नैयायिकमीमांसकादि सकलप्रबलदार्शनिकसम्मत श्रुत्यनुगृहीत च स्थापितम् । तत्रेतरदर्शनापेक्षया स्वदर्शनमात्रासाधारणं जडत्वप्रत्यनीक स्वयप्रकाशत्व श्रुतिसमत स्थापयन् परात्तुसाधकतया प्रागुक्त जडत्वलक्षण तद्बलनिर्भासितत्वमसिद्धयति—**न चासावहमर्थोऽन्याधीनेति ॥** स्वधर्मभूतज्ञाननिरपेक्षप्रकाश इत्यर्थः । **स्वयं प्रकाशत्वात्** स्वत एव व्यवहारानुगुण्यशक्तियुक्तत्वात् । तस्योपपादनम्—**चैतन्यस्वभावतेति ॥** चिद्रूपत्वमेव स्वतोव्यवहारानुगुण्यशक्तिमत्त्वमित्यर्थ । चिद्रूपत्वे श्रुतिं वक्ष्यन् तर्कमाह—**यः प्रकाशेति ॥** अत्र प्रकाशपदार्थ आत्मप्रदीपयोः ज्ञानप्रभयोश्च साधारण व्यवहारागुण्यशक्तिमत्त्वम् । तत्रात्मन स्फुरणरूप । प्रदीपस्य तमो विरोधिरूपमौज्ज्वल्यम् । ततश्च स्वतासिद्धव्यवहारानुगुण्यशक्तिमत्त्वलक्षण चिद्रूपत्वं यदि न स्यात् प्रकाशस्वभावत्व न स्यादिति तर्काकारः ।

दृष्टान्ते साध्यवैकल्यशङ्कां परिहरति—**न हि दीपादेरिति ॥ अन्यानपीति ॥** परिच्छिन्नस्वभावत्वादिति भाव· ॥

७३ प्रभाविचार

एतदुक्तमिति ॥ यथेत्यस्य एवमित्यनेनान्वय । इदमत्रावधेयम्—कौमारिले श्लोकवार्तिके शब्दनित्यताधिकरणे क्षणभङ्गवादनिराकरणप्रकरणे यदि न क्षणिकस्य कार्यारम्भकत्व कथ तर्हि ज्वाला प्रभामारभते? अत्राह (८४१)--

ज्वालादेरपि नाशित्वं नैव सिद्धं प्रतिक्षणम् ।
लघवोऽवयवास्तत्र यान्ति देशान्तरं लघु ॥
प्रभूतं वर्तिदेशे हि तेजस्तिष्ठति पिण्डितम् ।
तत्र यावत् व्रजत्यूर्ध्वं तावत् ज्वालेति गम्यते ॥
ततोऽपि यदतिक्रम्य याति तत्स्यात्प्रभात्मकम् ।
ततः परं तु यद्याति तत्सौक्ष्म्यान्नावधार्यते ॥
उत्तरावयवै रुद्धे मार्गे पूर्वे न यान्ति च ।
यथोत्तरे विमुञ्चन्ति पूर्वे यान्ति तथातथा ॥

इति ॥ अयमर्थ —तेजास्यतिगत्वरस्वभावानि त्रिचतुरक्षणावस्थायीनि अनिरन्वयविनाशीनि कारणक्रमनियतक्रमेणोत्पत्तिमन्ति च प्रवहन्ति । तस्मिंश्च प्रवाहे केचनांशा पिण्डीभूता भवन्तः निबिडावयवत्वात् प्रदीपव्यवहारभाजो भवन्ति । केचनांशा विरलावयवत्वात् प्रभापदवाच्या भवन्ति। तथाचाविनष्टमेव तेज ज्वालातो निर्गत्य प्रभात्मतां लभत इति न जातु क्षणिकस्य प्रदीपस्य प्रभारम्भकत्वमिति क्षणभङ्ग· परास्त इति॥

तार्किकास्तु—प्रदीपस्य विशीर्णा अवयवाः प्रभेति परिकल्प्य प्रदीपस्यातिरिक्तावयविन आरम्भमभिप्रेत्योत्पत्तिविनाशमभ्युपगम्य क्षणिकताप्रसङ्ग निराचक्रु· ॥

परिणामवादिनस्तु प्रायेण वेदान्तिनः तार्किकमतमनभ्युपगम्य सप्रभाकाणामेव प्रदीपानामुत्पत्ति विनाशं च समुपपादयन्ति । अत एव शांकरेऽपि शारीरिकभाष्ये—(२—३—२५) "निबिडावयवं हि तेजोद्रव्यं दीप । प्रविरलावयव तु तेजोद्रव्यमेव प्रभेति" इति भाषितम् । अत्र प्रभा द्रव्यभूताऽपि प्रभावन्तं नित्यमाश्रिता, अत एव गुणभूता आश्रयादन्यत्रापि वर्तमाना दृश्यते इत्यर्थ स्वीकृत । सिद्धान्ते तु पुष्कलकारणक्रमेण सप्रभाका एव प्रदीपास्समुत्पद्यन्त इत्यभ्युपगमात् न दृष्टान्ताशुद्धिरिति भाव· ॥

दार्ष्टान्तिकातिदेशः—**एवमिति** ॥ तर्कानुग्राह्य मानमुपदर्शयति—**तथाहीति** ॥ घनशब्द· अयोघन इत्यादाविव जात्यन्तरसांकर्यव्यवच्छेदक· । रसघनदृष्टान्तः जाड्यांशव्यवच्छेदकः गुणवत्त्वसूचकश्च । ज्ञानस्वरूपकत्व ज्ञानधर्मकत्वं च श्रुतिसूत्रासिद्धमिति फलितार्थ । निगमनम्—**अत इति** ॥ ज्ञान साश्रय प्रकाशत्वादित्यनुमानान्तरम्—**प्रकाशत्वादिति** ॥ साक्षाद्विषयसबन्धितया व्यवहारहेतुत्वादित्यर्थ । अत्रैव संबन्धिशब्दाभिधेयत्व हेत्वन्तरम्—**संविदनुभूतीति** ॥

७४ संविदात्मत्वानुमानदूषणम्

अस्मिन् प्रकरणे पूर्वपक्षक्रमेण प्राधान्येनावगन्तव्यान्येतान्यनुमानानि, येषा सिद्धान्ते दूषणान्यभिहितानि—

१. ज्ञाता कल्पित· (अपरमार्थ·) संविदतिरिक्तत्वात् घटादिवत्.

२. अनुभूतिरात्मा निर्विशेषत्वात् प्रत्यक्तात् अजडत्वात् व्यतिरेकेण घटादिवत् ॥

३ ज्ञातृत्व भ्रान्तिसिद्ध ज्ञातृत्वस्वरूपत्वात् देहादे ज्ञातृत्ववत्॥

४. कर्मकर्त्रवच्छिन्नज्ञानाश्रयत्वरूप ज्ञातृत्व नात्मधर्मः भ्रान्त-पुरुषप्रतीतिसिद्धत्वात् मनुष्यत्वादिविशिष्टपिण्डत्वाश्रयत्ववत् ॥

५. ज्ञातृत्व नात्मधर्मः अनुभाव्यत्वात् रूपादिवत् ॥

६ अहकर्तेतिधी नात्मगोचरा आत्मानुभवावच्छिन्नसुषुप्तिकालवृत्त्यभावप्रतियोगित्वात् सामान्येन घटादिधीवत् ॥

७. आत्मा न कर्ता अजडत्वात् प्रत्यक्त्वात् आत्मत्वात् व्यतिरेकेण देहादिवत् ॥

८. आत्मा नाहप्रत्ययगोचर. अजडत्वात् प्रत्यक्त्वात् आत्मत्वाच्च व्यतिरेकेण देहादिवत् ॥

९. अहमर्थकर्तृत्व न भोक्तृत्वसमानाधिकरणम्, कर्तृत्वस्वरूपत्वात् देहगतकर्तृत्ववत् ॥

१०. ज्ञातृत्वाहत्वे नात्मधर्मौ सुषुप्तयादावभातत्वात् मनुष्यत्वादिवत् ॥ इति ॥

२ अथ अजडत्वात्सविदात्मेति पूर्वपक्षोक्तमनुमानमहमर्थस्याप्यजडत्वोपपादनेनसाधारणीकृत्य प्रकृते संविदात्मत्वसाधकप्रत्यक्त्वसाधकतया प्रयुक्त तमेव हेतुमसिद्धयति—**यच्चोक्तमजडत्वादिति** ॥ अत्र चत्वारो विकल्पा. । प्रथमविकल्पे बहुव्रीहिसमास. । अनैकान्त्यमसिद्धि निर्विशेषत्वलक्षणसिद्धान्तविरोधश्च दूषणानि । द्वितीये परमतेन सुखादौ व्यभिचारः । तत्रहि **अव्यभिचरितप्रकाशेति** बहुव्रीहिसमासेन सत्ताविशेषणम् । अविदितावस्थायोगित्वाभावरूपमजडत्वमिति फलितार्थ । स्वस्मै प्रकाशमानत्वरूप तृतीयमसिद्धयति—**यद्युच्येतेति** ॥ स्वस्मै स्वयं प्रकाशमानत्वरूप तुरीयमप्यसिद्धयति—**तस्मादिति** ॥ अत्र स्वयमशरूप निरपेक्षत्वमपि नास्तीत्याह—**ज्ञानस्यापीति** ॥ ततश्च प्रत्यक्त्व-

महमर्थस्यैवात्मत्व साधयति, न जातु सविद इति निगमयति—**अत इति ॥**

१. ज्ञाता कल्पित सविदतिरिक्तत्वात् घटादिवदिति विजातीयभेदराहित्यानुमानमनूद्य कल्पितत्वेऽधिष्ठानसामानाधिकरण्येनानुभूयमानत्वमुपाधिमाह—**अथ यदुक्तमनुभूतिरिति ॥**

४. एव द्वितीय प्रथम चानुमानमेतावता प्रबन्धेन निराकृत्यावशिष्टानि निराक्रियन्ते। ज्ञानाश्रयत्वरूप ज्ञातृत्व नात्मधर्मः (मिथ्या) भ्रान्तपुरुषप्रतीतिसिद्धत्वादिति पूर्वपक्षोक्तस्यानुभूतौ व्यभिचार बाधितत्वरूपमुपाधिचाह—**यदप्युक्तं स्थूलोऽहमिति ॥**

अत्र भ्रान्तपुरुषप्रतीतिसिद्धत्वहेतोरसिद्धिपरिहाराय ज्ञातृत्व ज्ञानक्रियारूपमितिप्रसाध्य तदवगाहिज्ञान भ्रम एवेत्यत्र ज्ञातृत्वस्य चेतनासाधारणधर्मत्वाभ्युपगमात् स्वरूपासिद्धि द्रढयितुमनुवदति—**यदप्युक्तमविक्रियेति ॥**

५, ७, ८ ज्ञानक्रियाकर्तृत्व न दृशिलक्षणात्मधर्मः दृश्यत्वाद्रूपादिवदित्युक्तमनुमान आत्मा न कर्ता नाहप्रत्ययगोचर अजडत्वात् प्रत्यक्त्वात् आत्मत्वाच्चेति प्रसगानुमानत्रय च अह जानामीत्यबाधितानुभवेन बाधितमिति वक्तुमनुवदति—**कर्तृत्वादिर्हीति, कर्तृत्वेऽहंप्रत्ययेति च ॥**

अनेन प्रकरणेन सिद्धानां अन्तःकरण ज्ञातृ विकारित्वात्, ज्ञातृत्वमन्त.करणधर्म दृश्यत्वात्, अन्त करण कर्ता अहप्रत्ययगोचरश्च जडत्वात् परात्क्वात् अनात्मत्वाच्चेति पञ्चाप्यनुमानानि अहंजानामीत्यनुभवेन, अन्त करण न ज्ञातृ अचेतनत्वात् देहवत् इत्यादिभिरबाधितैरन्वयिभिश्च बाधितानीत्याह—**नैतदुपपद्यते देहस्येवेति ॥**

देहात्मभेदासिद्धये देहस्य द्रष्टृत्व यन युक्तिजालेन वार्यते तेनैव अन्तः-करणस्यापीति विशदमुपपादयति—**एतदुक्तमिति ॥**

९ ज्ञातृत्वस्य क्रियारूपत्व प्रतिक्षिप्य प्रागुक्तदूषणान्युद्धरति—**नच ज्ञातृत्वमिति ॥ ज्ञानस्वरूपस्येति ॥** ज्ञानासाधारणधर्मकस्ये-त्यर्थ· । **नकदाचिदिति ॥** ज्ञानानाश्रयत्वादित्युपस्कर्तव्यम् । एतादृश-ज्ञानक्रियाकर्तृत्वमप्यात्मनो न स्वाभाविकम्, स्वाभाविकविकारप्रतिषेधपरा निर्विकारश्रुतय इति भाव· । अन्त करणवृत्तेः सारूप्यन्यायेन ज्ञानत्वा-भ्युपगमस्तु भूतचैतन्यवादप्रसजक इति भावः ॥

७५ चिच्छाया, चित्सपर्क

३ अथान्त करणस्यौपाधिक ज्ञातृत्व सभवतीत्याशङ्क्य चिच्छा-यापत्तिलक्षणमुपाधिमपाकरोति—**जडस्वरूपस्येति ॥ केयमिति ॥** दुर्निरूपत्वान्न काऽपीत्यर्थ । अयमत्र विकल्प —ज्ञातृत्व चिच्छाया-पन्नम्[१] उत ज्ञानमेव । आद्येऽपि अन्त करणगतस्य ज्ञातृत्वस्य चिति च्छाया[२] उत चिद्गतस्यान्त.करणे छायेति विकल्प्य बुद्धिस्थक्रमेण निरास·—**न तावत्संविद इति ॥ उक्तरीतिः** अचेतनत्वादि· । ज्ञानस्यैव छायेति द्वितीयविकल्पनिरास —**द्वयोरपीति ॥** प्रकृतिपुरुषयोरितरेतरस्वभावा-भिमानस्सास्यैरुक्त । तदनुसार परस्य किस्यादिति विकल्पावसर ॥

सपर्करूपमुपार्धि निराकरोत्ति—**अथाग्निसंपर्केति ॥** रुमागत-काष्टलबणत्ववत् जलौष्ण्यवद्वा इत्याभिप्रायेण ज्ञातृत्व तदुपलब्धिर्वे त्युक्तम् । अस्य पक्षस्येद वचन मूलम्—

अयःपिण्डे यथा वह्निर्भिन्नस्तिष्ठत्यभिन्नवत् ।
तथा विश्वमिदं देवो व्यावृत्या परितिष्ठति ॥

इति ॥ तत्त्वटी(१२५. II)कोदाहृतम् ॥

७६ चिदभिव्यङ्ग्यता

अथ सविदो निर्विकारत्वानुमानबाधपरिहाराय अहजानामीत्यहमर्थधर्मतया धियो भान व्यञ्जकसामग्रीस्वभावनिबन्धनामित्युक्तम् । अत्र सविदन्तःकरणयोः व्यङ्ग्यव्यञ्जकभावस्यैवासभावनीयतया सेयं कुसृष्टिरित्याह—**यदप्युक्तमुभयत्रेति** ॥ साप्रदायिकत्वायात्मसिद्धिग्रन्थमुदाहृत्य विवृणोति—**तदुक्तमिति** ॥

स्वयंप्रकाशानुभवेति ॥ आत्मस्वरूपस्यैवानुभवरूपत्वात् प्रभास्थानीयस्य धर्मभूतज्ञानलक्षणानुभवस्यापि आत्मस्वरूपानुभवायत्तत्वात् सर्ववस्तूनां तदधीनसिद्धिकत्वोक्तिः । अनिष्टमप्युक्त्वा तत्र पूर्वोदाहृतग्रन्थवाक्य प्रमाणयति—**किंचाहंकारेति** ॥ परोक्तदृष्टान्त विघटयति—**नच रविकरेति** ॥

अभिव्यक्ति विकल्प्य दूषयति—**किंचास्य संविदिति** ॥ **किंरूपा** न किञ्चिद्रूपेत्यर्थ । उत्पादकमपि उत्पत्तिद्वाराऽभिव्यक्तिहेतुरित्युत्पत्तिरूपकोट्यवकाश । **तत्प्रकाशनं** आत्मगोचरप्रकाशजननम् । **ततएवचेति** ॥ दृष्टद्वारा साधनानुग्रह प्रथम कल्प । सस्काररूपादृष्टद्वारा द्वितीयः । अत्रापि प्रागुदाहृतग्रन्थसम्मति—

करणानामभूमित्वान्न तत्सबन्धेहेतुता ।
अहमर्थस्य बोद्धृत्वात् न स तेनैव शोध्यते ॥

इत्युत्तरार्धम् ॥ **संविदाश्रयत्वमिति** ॥ सवित् आश्रयो यस्येति तत्सविदाश्रयम्, तस्य भाव सविदाश्रयत्वमिति समासः । आश्रयशब्द विषयतयाऽऽधारतया च सबन्धित्वमाह । असभवस्य व्यापकाभावसिद्धतामाह—**ज्ञातृभावेति** ॥ भ्रान्त्या तत्सभवाभ्युपगमेऽनिर्मोक्षप्रसङ्गमाह—**संविदो ज्ञानेति** ॥ कोट्यन्तरासभवव्यक्तये निगमनम्—

अतो न केनापीति ॥ व्यङ्ग्यव्यञ्जकव्यक्तिस्वभावसमीक्षयोक्ताना दोषाणा दुर्वारत्वादुत्पादकतया प्रकाशकतयाऽनुग्राहकतया चेत्यर्थ. ॥

अहङ्कारः स्वाश्रयतयाऽऽत्मानमभिव्यनक्ति व्यञ्जकत्वात् योयो व्यञ्जकस्स तादृश दर्पणजलखण्डादिवत् इत्यभिप्रेतो न्याय प्रदीपेन्द्रियलिङ्गशब्दसस्कारादिषु तदनुग्राहकेषु च व्यभिचारादपन्याय स्वत· प्रामाण्यवादिनामित्याह—**नच स्वाश्रयतयेति ॥** प्रतीतिपद व्यवहार योग्यतापादनपरम् ॥

७७ स्वत प्रामाण्यम्.

स्वतः प्रामाण्यन्यायेति ॥ प्रामाण्य नाम ज्ञानगत सम्यक्त्वलक्षण यथावस्थितव्यवहारानुगुणज्ञानत्वम् । तद्विपरीतमप्रामाण्यम् । तदेतदुभय उत्पत्तौ ज्ञप्तौ चेति प्रत्येक द्विविधम् । तत्र प्रामाण्ये स्वतस्त्व नाम ज्ञानोत्पादकसामग्रीजन्यत्वमुत्पत्तौ, ज्ञानग्राहकसामग्रीग्राह्यत्वं च ज्ञप्ताविति । अप्रामाण्यमुभयत्रापि परतः । तत्त्व च दोषघटितसामग्रीजन्यत्व बाधज्ञानग्राह्यत्व च । सोऽय स्वत· प्रामाण्यन्याय ॥ इदमत्रावधेयम्—

प्रमाणत्वाप्रमाणत्वे स्वतस्त्वाङ्ग्यास्समाश्रिताः ।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः ॥
वैदिकास्तु स्वतः पूर्वं चरमं परतो विदुः ।
स्वाभाविकं स्याद्वाहुल्यमल्पतौपाधिकी मता ॥

इति ॥ नैयायिकमते गुणदोषौ परशब्दाभिधेयौ । गुण. सत्सन्निकर्षादि । दोष विषयगतः दूरत्वादिः । करणगतः कामलादि. । वैदिकमते दोष परशब्दार्थ· । दोषाभाव एव गुण इति तस्य प्रायिकत्वमिति ॥

दृष्टान्ता अपि साधनविकला इत्याह—**नच दर्पणादिरिति ॥ आकारः** सस्थानम्। व्यक्तिर्दर्पणाभिप्रायेण—**वस्तुतो दोषतो वेति ॥** तत्फलितव्यञ्जनम्—**ज्ञातृत्वं तथोपलब्धिर्वेति ॥**

७८ सुषुप्त्यवस्थाविचार

६, १० अथ पूर्वपक्षे कर्तृत्वस्यात्माधर्मतासाधकानुमानानि सत्प्रतिपक्षयितु प्रसक्तस्य कर्तृत्वमात्मधर्मः आत्मासाधारणाहंत्वसामानाधिकरण्येन प्रतीयमानत्वादिति सामान्यतोदृष्टानुमानस्य स्वरूपासिद्धिं वक्तु प्रयुक्तेन अह कर्तेति धीर्नात्मगोचरा आत्मानुभवावच्छिन्नसुषुप्तिकालवृत्त्यभावप्रतियोगित्वात् घटादिधीवदित्यनुमानेन सुषुप्तिकाले अहत्वभानं नास्तीति साधितम्। तदानीमप्यहत्वभान प्रसाध्य प्रतिहेतु समर्थयति— **तमोगुणेति ॥** सुखित्वाद्विरान्तरः मनुष्यत्वादिर्बाह्यश्च परागर्थः। **अहमिति ॥** प्रत्यक्षे इत्युपस्कार । **तथैवेति ॥** अस्पष्टतयेत्यर्थः। **अवतिष्ठते** इति वर्तमानोक्ति तत्सामीप्यात्। अज्ञानविषयकत्वमेव हि साक्षित्वम्। **एवंहीति ॥** स्वपक्षे मान प्रदर्शितम्। अत्र स्वावसरे निपुणतरमिति प्रागुपक्षिप्तमुपपादित च भवति। **सुखित्व ज्ञातृत्वं चेति ॥** यद्धि यस्यानुकूलतया भाति स तेन सुखीति व्यवह्रियते। यस्य येन यद्भाति स तेन तस्य ज्ञातेति चेति भाव. । अनुकूलत्वेन स्वस्मैभासमानत्वरूप प्रत्यक्त्वेन च स्वय भासत इति यावत्। **अतदिति ॥** "तत्र ते न्यवसन् सुखम्, मन्दमगच्छ, मधुरमगायम्" इत्यादौ सुखमान्द्यमाधुर्याणां क्रियाविशेषणाना तात्कालिकत्वस्वारस्यवत् सुखस्वापयो समकालत्व प्रतीतिस्वारस्यसिद्धमिति भाव । तदानीं सुखमस्वाप्समिदानीं दु ख्यामीति च क्वचित्परामृश्यते इत्यपि बोध्यम्।ज्ञानसामान्याभावरूपस्वापोऽपि प्रात.कालीनचत्वरगतगजाभाववत् पश्चाद्योग्यानुपलब्धिगम्यः। अधिक पूर्वपक्षे प्रपञ्चितम् ॥

अहमर्थः सुषुप्तौ सुखं नानुसंधत्ते विनष्टत्वादिति युक्त्या न समकालतेत्याशङ्क्य स्वरूपासिद्धया परिहरति—**नचाहमर्थस्येति॥ परामृशतीति॥** करणत्रयव्यापारप्रदर्शनायोदाहरणप्रपञ्चः। आपाततस्सुषुप्तावहमर्थाननुभवमाशङ्क्य प्रतीतिस्वारस्यनिरूपणेन परिहरति—**एतावन्तं कालमिति॥** न खलु प्रात· काले चत्वरे कोऽपि नास्तीत्यनुसन्धाने चत्वराभावोऽपि प्रतीयते इति भाव। **देवानामिति॥** अप्रतिब्रुवतामित्यर्थ·। अत्रेदमात्मवादसिद्धान्तभाष्य शाबर हृदयास्थितम्—"नच शक्यमेवमवगन्तु यथोपलभ्यन्ते अर्थाः न तथा भवन्तीति। यथा तु खलु नोपलभ्यन्ते तथा भवन्तीति। तथाहि सति शशो नास्ति शशस्य विषाणमस्तीत्यवगम्येत" इति॥ अहमर्थनिषेधविषय परामर्शमाशङ्क्यात्रास्मदश· वर्णाश्रमादिविशिष्टदेहाभिमानविषयात्मपर इति समाधत्ते—**मामप्यहमिति॥ अनुभववचने इति॥** प्रथमाद्विवचनम्। "सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतस्सति विशेष्ये बाधे" इति न्यायात् विशेषणविषयो निषेध इत्याह—**वर्णाश्रमादिविशिष्टेति॥** तदभिमान इत्यर्थ। **अत्र सुप्तोऽहमिति॥** शब्दप्रयोगस्य वैवक्षिकत्वात् एकदेश प्रयोग इति भाव॥

भवदीयप्रक्रिययाऽपि अहमर्थस्य ज्ञातु स्थैर्यसभवात् प्रागुक्त (३५८) सत्प्रतिपक्षोऽपि निराबाध इत्याह— **किंच सुषुप्तावात्मेति॥** मोक्षदशायामहत्वभानानुमान वक्ष्यमाण सुषुप्तिदशायामपि सक्षेपेण दर्शयति—**आत्मने स्वयमिति॥** अत्र जाग्रदात्मा सपक्ष॥

सुषुप्तिमुक्त्योर्नान्वेतीति पूर्वपक्षोक्ते दूषितावशिष्ट **यत्त्वित्यादि**नाऽनूद्य दूषयति—**तदपेशलमिति॥** असुन्दरमित्यर्थ। **प्रकारान्तरेणेति॥** धीसततिविनाशो दोक्ष इति वदतस्सौगतस्य दोष तवाप्यागत इति सूच्यते॥

७९ मुक्तयवस्था

पूर्वं ज्ञातुरेवाहमर्थस्यात्मत्वे परमसाध्ये सग्रहेणोक्ता श्रुत्यर्थापत्ति तस्य मुक्तिदशानुवृत्तिरूपावान्तरसाध्येऽपि हेतुतया विस्तृणीते—**अपि-चेति ॥** अवान्तरसाध्येऽपि व्याप्तिद्वयोपेतमनुमानमाह—**स च प्रत्य-गात्मेति ॥** अहमिति व्यवहारविषयतया प्रकाशस्य साध्यत्वात् हेतोर्न साध्याविशेषः । अभानस्य परस्मा एव भानस्य वा त्वयाऽनभ्युपगमान्न हेत्वसिद्धि । अकस्मैचिद्भानत्वस्य दुर्वचत्वाच्च । एकस्मिन्नेव सम्मतविम-तदशाभेदेन विभागान्नापि पक्षस्य दृष्टान्ताविशेष । अनुकूलतर्कस्तु प्रत्यक्त्वाभावप्रसङ्ग प्रागुक्त । विशेषविरोधप्रसङ्गमनूद्य निषेधति—**नचाहमिति प्रकाशमानत्वेनेति ॥** अत्र प्रसङ्गे मोक्षशास्त्रविरोध· स्वरूपाज्ञानमुपाधिश्चेति दूषणद्वयम् । अनेन प्रसङ्गनिराकरणेन प्रागुक्ता-नुमाने अज्ञत्वस्योपाधित्वमपि निरस्तं वेदितव्यम् ॥

तत्त्वविदनुभवेनाप्यहमर्थस्यात्मता साधयति—**ब्रह्मात्मभावेति ॥** आपरोक्ष्यं अविद्यानाशस्य कारको ज्ञापकश्च हेतु । आदिपदेन प्रह्लाद-भरतादिग्रहः । **पश्यन्** जगत्कारण ब्रह्म स्वान्तरात्मत्वेन पश्यन्नि-त्यर्थ । **सच्छब्दप्रत्ययेति ॥** सच्छब्दजन्यप्रत्ययेत्यर्थ । **तथा यस्मा-दिति ॥** क्षराक्षरातीतत्वचिदचिदन्तरात्मत्वनित्यत्वमहदादिकारणत्वमोक्ष-प्रदत्वादयो नाहकारस्य सभवन्तीत्यर्थ । एभिश्शब्दैश्चिन्मात्रोपलक्षण चेल्लक्षणैव दोष । पूर्वपक्षबीज ससूच्य परिहरति—**यद्यहमित्येवेति ॥ अहंभावकरणेति ॥** अहमित्यभिमानकरणेत्यर्थ । **पराशरेणेति ॥** (वि पु. ६-७) "चास्वे स्वमिति या मति" इति तुरीय पाद । अह ममेति धीरेवाविद्येत्यर्थ । आत्मनोऽहत्वज्ञातृत्वादिसाधकवर्गस्य सङ्कलितबोधार्थमात्मसिद्धिश्लोकावुदाहरति—**तदुक्तामिति ॥**

19. शास्त्रप्राबल्यनिरासः.

८० व्यवहारावस्था

एव सविशेषविषयसकलप्रत्यक्षादिप्रमाणविरोधात् न निर्विशेषवस्तुनि शास्त्र प्रमाणमिति तज्जन्यज्ञानस्य मिथ्याभूतवस्तुबाधनपर्यासत्वरूपसामर्थ्यासिद्धया कर्मसमुच्चयानर्हत्वसाधकवस्तुसामर्थ्यहेतोरसिद्धिशङ्काया शास्त्रप्रत्यक्षयोर्विरोध एव नास्तीति मण्डनमिश्रीयमार्गेण परिहारमपाकृत्य पुनरसिद्धिरेव स्थापिता। अथ शास्त्र प्रत्यक्षापेक्षया प्रबल प्रत्यक्ष च दुर्बलमिति प्रागाशङ्कित शाङ्करमार्गमनूद्य प्रत्यक्षस्य दौर्बल्यमपाकरोति—**यदुक्तं दोषमूलत्वेनेति ॥** अत्र अन्योन्याश्रयत्वतुल्यदोषत्वपौर्वापर्यकिञ्चित्करत्वरूपैस्त्रिभिर्दोषै दोषमूलत्व न सभवतीति फलितार्थ ॥

अथ दौर्बल्ये प्रमाणाभावलक्षण मूलोच्छेद दोषमाह—**अपिचेदं शास्त्रमिति ॥ स्वाभिमतार्थः** शास्त्रप्राबल्यादि ॥

अथ सौगतसर्वस्वे सवृत्याख्ये प्रलोभने व्यवहाराख्य शब्द प्रयुञ्जानस्समाधित्सति—**ननु व्यावहारिकप्रमाणेति ॥** अत्र—

इन्द्रियैरुपलब्धं यत् तत्तत्त्वेन भवेद्यदि ।
जातास्तत्त्वविदो बालास्तत्त्वज्ञानेन किं तदा ॥

इति प्रागुदाहृत (५० पु) रीत्या लोकातीतत्वमेव तत्त्वदर्शित्वमित्यभिमान । इदमेवाभिप्रेत्य प्रवृत्त शाबर भाष्य प्रागुदाहृत (३६९) मत्रानुसधेयम् ॥ सेय परिभाषा—

वञ्चनार्थ उपन्यासः लालावक्त्रासवादिवत् ।
नास्तिक्यपरिहारार्थं संवृतिः कल्पनेति च ॥

इति निरालम्बनवादपद्यार्थपूर्वपक्षमूलेति परिहरति—**कोऽयं व्यावहारिको नामेति ॥** पाश्चात्यबाधादर्शनमभ्युपेत्य परिहरति—**तदयुक्तम-**

बाधितस्येति ॥ बाधकवत्कारणदोषस्यापि पृथगेव कारणत्वमप्रामाण्य-प्रतिपत्तौ प्रसिद्धमित्यभिप्राय ॥

व्याप्तिमूलत्वात्प्रयोगपदवाच्यान् प्रसंगतर्कानाह—**भवन्ति चात्रेति ॥** यद्यप्यत्र परेष्टव्याप्तया ज्ञानविषयत्वे मिथ्यात्व स्यादित्येक एव प्रयोगस्साधीयान् । तथापि प्रथमतृतीयौ सविशेषणप्रयोगौ प्रसगहेतोस्साधकत्वव्यक्त्यर्थावित्यवधेयम् । प्रत्यक्षाबाधस्यापि वाक्यतात्पर्यान्तर्भूतत्वात् यूपादित्यैक्यवाक्यस्य विधिशेषत्वोक्तिरपसिद्धान्त । साधकबाधकज्ञानागोचरत्वमेव ह्यपूर्वत्वमतो नाध्यक्षात् शास्त्र बलवादिति भावः ॥

८१ असत्यात्सत्यासिद्धि

अथासत्यहेतुजन्यज्ञानविषयत्वरूपप्रसगहेतो मिथ्यात्वव्याप्तयभावलक्षण मूलशैथिल्य वक्ष्यन् असत्यात्सत्यसिद्धिनिदर्शनैरष्टभि शास्त्र प्राबल्य सिषाधयिषित तावदाह—**नचवाच्यं स्वाप्नस्येति ॥** संध्याधिकरणे स्वप्नप्रपञ्चस्य सत्यत्वे स्थापयिष्यमाणेऽपि परमतान्वारोहेणान्यथाख्यातिपक्षेण विषयबाधोक्तिः । **मायामयमिति ॥** आश्चर्यभूतमिथ्यार्थगोचरमित्यर्थ. । **दृष्टबुद्धिरिति ॥** मरणादिहेतुरिति योज्यम् । शङ्काविषोदाहरण निर्विषसर्पदष्टादौ छिन्नकण्टकवेधादौ च भाव्यम् ॥

एवमबाधितत्वात्सत्यत्वमुक्ता हेत्वन्तरेण सत्यत्वमाह—**एषांसंवेदनानामिति ॥** बुद्धीना सत्यालम्बनत्वात्तन्निवृत्त्या सत्यतानिवृत्तिमाशङ्क्य व्यापकनिवृत्तिरेव नास्तीति प्रत्याह—**हस्त्यादीनामिति ॥ सालम्बनत्वमात्रेति ॥** सविषयकत्वं सालम्बनत्वम् । मात्रचा विद्यमानत्वव्यवच्छेदः । **प्रतिभासमानत्वं** बुद्धिप्रतिसंबन्धित्वम्, बुद्धिव्यावर्तकत्वमित्यर्थ. । **आलम्बनत्वे** विषयत्वव्यवहारे । **स इत्यर्थपरामर्शः ॥**

तथाच विद्यमानत्वे सति प्रतिसबन्धित्व विषयसत्यताव्यवहार-प्रयोजकम् । अविद्यमानत्वे सति प्रतिसबन्धित्व मिथ्यात्वव्यवहारे प्रयोजकम् । अन्यत्र प्रसिद्धस्यैव स्वानधिकरणे प्रतीयमानत्वं मिथ्यात्व, न तु केवल मानसबन्धानर्हतालक्षणं, नाप्यनिर्वचनीयत्वलक्षण तुच्छत्वम्, विशेष्यविशेषणसंसर्गाणामन्यत्र प्रसिद्धत्वात् । विशेष्यविशेषणयो तथात्व-निर्वाहकस्ससर्ग स्वस्य तदीयत्वे ससर्गान्तरनिरक्षेप । पुरोवर्तिनि भ्रमाधिष्ठाने प्रतीयमान पुरोवर्त्यपेक्षया स्वय स्वस्य ससर्गरूपत्वनिर्वहणा-सामर्थ्यात् पुरोवर्तिनि नास्तीति तदपेक्षया ससर्गः अपरमार्थ , न तु स्वरूपत । आलम्बनत्वे च सनिहितत्व नापेक्षितम्, असन्निहितस्यातीता-नागतादेरालम्बनत्वदर्शनात्, सन्निहितस्याप्यसन्निकृष्टस्यादर्शनात् । अत· स्वरूपतस्सत्यमेव सर्वत्रालम्बनमिति निष्कर्ष ॥

असत्यात्सत्यप्रतिपत्तिरिति केवल डिम्भप्रलोभनम् । यथार्थ-ख्यातिपक्षे सत्यादेव सत्यप्रतिपत्ति । अनिर्वचनीयख्यातिपक्षे उभय-मप्यनिर्वचनीयम्, कुतोऽसत्यात्सत्यप्रतिपत्तिः । अतः असत्यस्य हेतु-त्वमेव नास्ति । न तरा ज्ञानहेतुत्वम् । न तमां सत्यज्ञानहेतुत्वमिति-सूचयितु ज्ञप्त्युत्पत्त्युदाहरणानि अभिन्नसमाधानसमाधेयानि षड्विधानि दर्शितानि ॥

अथासत्यपदाभिप्रेतानां बुद्धिव्यतिरिक्तानां हेतुत्वशङ्का निराकर्तु-मुदाहरणद्वय निदर्शयति—**रेखयेति** ॥ अत्र रेखैव वर्ण इति प्रथम पक्षः । तत्र कल्पिता वर्णता हेतुरिति द्वितीय । वर्णबुद्धि तृतीय । रेखावर्णात्मतयोस्सत्यानृतयोस्सभेदस्तुरीय· । सकेतसहकृतरेखापक्ष पञ्चम· । अथ सकेतनिरपेक्षरेखोदाहरणं दूषयति—**रेखागवयादपीति** ॥ आदिपदेन छायया श्येनानुमानादिपरिग्रहः ॥

८२ स्फोटवाद

अथ वैयाकरणपुरस्करण प्रत्याह—**नचैकरूपेति ॥** शब्दः स्फोट । स च नादै स्वरव्यञ्जनै. स्फोट्यते स्फुटीक्रियत इति स्फोट-पदव्यपदेश्यः नित्यो निरवयव निष्क्रम सत्य एक सकलार्थावबो धक । नादा पुनरसत्या अनित्या श्रोत्रग्राह्या अनन्ताः । यथोच्यते—

उपायाश्शिक्षमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततस्सत्यं समीहते ॥ इति ॥

अत्राध्यस्तवर्णस्य स्फोटस्यासत्यस्यार्थबुद्धिहेतुत्वमस्तीति शङ्काशय । **अभिव्यङ्ग्यस्वरूपेणेति ॥** कत्वादीना शब्देऽध्यासाभावेऽपि अभि-व्यक्तित्वविशिष्टस्य शब्दस्य बोधकस्य सत्यत्वान्नेद निदर्शनमिति समा-धानाशय ॥

स्फोटवादोऽय मीमासकादिभिस्सर्वैरपि दार्शनिकैर्निराकृत । वर्ण-शब्दतावादस्समर्थितश्च । तमेत वादमुपवर्षापरनामधेयवृत्तिकारबोधायन-समत सक्षिप्याह—**शब्दस्यैकरूपत्वमपीति ॥** शाब्दबोध शब्द इत्यनुगतव्यवहारश्च स्फोटकल्पक इति वैयाकरणाशय । वर्णैरेव तथा-तथा सङ्कलितैर्बोधोदयात् श्रावणत्वोपाधिना व्यवहारोपपत्ते कल्पकमसि-द्धमितीतरेषामाशय ॥ विस्तृतश्चाय वादश्शाबरे भाष्ये कौमारिले वार्तिके चेत्यवधेयम् । अत्रापि प्रात्किञ्चित्सूचितम् ॥ (१०१ पु.) ॥

८३ असत्यत्वम्.

अथ नित्याप्रतीतत्वलक्षण यदसत्यत्व तादृशासत्यहेतुजन्यज्ञान-विषयत्व ब्रह्मणि नास्त्यैवेति प्रसङ्गहेतोरसिद्धिं शङ्कते—**ननु शास्त्रस्य गगनकुसुमवदिति ॥** बाधार्हत्वलक्षणमसत्यत्व स्वीकृतमिति तादृशहेतु-जन्यज्ञानविषयत्व लिङ्गविपर्यासन्यायेन निरुक्तासत्यत्वलक्षणमिथ्यात्व-प्रसञ्जक भवत्येवेति समाधत्ते—**नैवमसति शास्त्र इति ॥**

पूर्वमुभयोरविद्यामूलत्वेऽपि शास्त्रस्य परत्वात् प्रत्यक्षस्य पूर्वस्य बाध्यत्वमिति शङ्कायां तन परेण बाधाभावमभ्युपेत्य कारणदोषनिबन्धनमप्रामाण्य शास्त्रस्योक्तम् । इदानी सर्वेभ्योऽपि परेण शून्यमेव तत्त्वमिति सुगतशास्त्रेण बाधमाह—**पश्चात्तनेति ॥ तस्यापि** ब्रह्मणोऽपि। **तत्तु** बुद्धवाक्यम्। **एतदवि** वेदान्तशास्त्रमपि। अयमाशय — यथा भ्रान्तिमूल वेदान्तशास्त्र सत्यज्ञान जनयतीत्युपगम्यते तादृशं सुगतशास्त्र शून्यज्ञान जनयतीत्युपगम्यता ब्रह्मभ्रममूलत्वबुद्धभ्रममूलत्वयोरविशेषादिति । स्ववचनविरोधादिभिस्तर्कस्याप्रतिष्ठितत्व, उपजीव्यविरोधात्कुतर्कत्व चेति ॥

20 श्रुतिसमाधिः.

८४ निर्विशेषपरवाक्यम्

एव सविशेषविषयसर्वप्रमाणविरोधात् सामान्येन शास्त्र न निर्विशेषविषयमिति स्थापितम् । सामर्थ्यहेतुश्चासिद्धीकृत । अथ प्रत्येक तत्तद्वाक्यैदपर्यसमीक्षयाऽपि प्रमाणान्तराविरुद्धे शास्त्रप्रामाण्यमिति प्रतिपादयितु श्रुतिप्रकरणप्रारम्भ । तत्र कारणशोधकवाक्ययो परोक्तमर्थमनुवदति—**यदुक्तं वेदान्तवाक्यानीति ॥ वस्तुमात्रेति ॥** निर्विशेषेत्यर्थ । वक्ष्यमाणानेकविशेषणविशिष्टैदम्पर्यस्य विशदीक्रियमाणत्वादुच्यते—**तदयुक्तमिति ॥** कारणत्वोपलक्षितनिर्विशेषवस्तुपरत्वेनाभिमत कारणवाक्यमुपादाय सविशेषपरतामाह—**सदेवेति ॥** वाक्यस्यास्यायमर्थ —इद विभक्तनामरूप बहुत्वावस्थ जगत् अग्रे सृष्टे प्राक् एकमेव अविभक्तनामरूपतया एकत्वावस्थापन्नमेव अद्वितीय अधिष्ठात्रन्तरशून्य सदेवासीदिति । इद पदमुद्देश्यपरम् । अवशिष्ट विशिष्टविधेयपरम् । अत्र सच्छब्द मानसम्बन्धयोग्यतालक्षण सत्त्व

प्रवृत्तिनिमित्तीकृत्य परमात्मनि वर्तते । कारणविषयत्वस्वाभाव्यात् पूर्वापरश्रुत्यन्तरपरामर्शाच्च कारणत्वौपयिकगुणविशिष्टप्रकृतिपुरुषकालशरीरकपरमात्मानमुपस्थापयति । एकमेवेत्येवकार. वक्ष्यमाणस्तक्ष्यमाणकार्यबहुत्वावस्थाव्यवच्छेदमुखेन वैशेषिकादिप्रक्रियया वियदादीना नित्यतामपि व्यवच्छिनत्ति । एकमद्वितीयमिति पदाभ्यामभिन्ननिमितोपादानत्वं सिद्धयति । सदेवेत्येवकारेण उत्तरत्रानूद्य निषेध्यमान असत्कार्यवादलक्षण आरम्भवादो व्यावर्त्यते । अग्रे सदित्यस्य अग्रे असदिति हि प्रतिद्वन्द्वि स्वरसतः प्रतीयते । असत्कारणवादलक्षण शून्यवाद व्यावर्त्यते इति शाङ्कराशय· । क्षणिकवाद व्यावर्त्यते इति भास्कराशयः । शून्यवादक्षणिकवादयोर्निरस्तयोरप्यनिरस्ते ह्यारम्भवादे कारणविज्ञानेन कार्यविज्ञानप्रतिज्ञाया असिद्धिरेवेत्यसत्कार्यवादनिरासः स्वरस इत्यवधेयम् ॥

एवं कार्यकारणयो विशिष्टयोरद्वैते तात्पर्यवर्णनाच्च तत्त्वमसीत्यत्र निरुक्तसकलविशेषविशिष्टपरमात्मन तत्पदार्थस्य सशरीरकजीवशरीकपरमात्मनश्च त्वपदार्थस्य विशिष्टयोरद्वैते तात्पर्यवर्णनात् विशिष्टाद्वैतमिति सिद्धान्तस्य व्यवहार । तत्त्वमसीत्युपसहाररूपोपदेशस्तु जीवस्य स्वातन्त्र्यभ्रमनिवृत्तिप्रयोजन ॥

उपदेशाय प्रवृत्तत्वादिति ॥ अनेन आत्माद्वैतपक्षे प्रबुद्धस्य गुरो· भ्रान्तिसिद्ध शिष्य प्रत्युपदेशानुपपत्ति· सूच्यते । अत्रोपक्रमप्रभृति तत्त्वमसीत्युपसहारपर्यन्त निरुपाधिक प्रशासनादिकमपूर्व मानान्तरागोचरत्वरूपमुपदर्शितम् । अभ्यस्त च बहुश । तस्य तावदिति फलम् । आख्यायिका अर्थवाद । त्रिवृत्करणादिरुपपत्ति । एव षड्विधानि तात्पर्यलिङ्गानि—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इति सगृहीतान्यत्र पुष्कलानीति निर्णय· ॥

विशेषनिषेधकण्ठोक्तिमद्वाक्यत्वेनाभिमत परविद्यावाक्य व्याख्याति—**अथ परेति ॥** अत्र हेयलक्षणाः विशेषरूपभेदा· कण्ठतो निषेध्यन्ते इति भाव ॥

अथ कारणत्वशङ्कितदोषव्यावृत्तिमुखेन सामानाधिकरण्यानुपपत्त्या अखण्डार्थपरत्वेनाभिमत वाक्य व्याख्याति—**सत्यं ज्ञानमिति ॥** अत्राखण्डार्थपक्षे लक्षणा पर्यायता अनर्थकता सामानाधिकरण्यलक्षणहानिश्चेति चत्वारो दोषा उक्ता· । शौक्ल्यादिवैषम्य शाब्द स्पष्टम्, तत्तद्व्यावृत्तस्वरूपस्य शब्दोपात्तत्वाल्लक्षणाऽभावात् । **प्रवृत्तिः** विशेष्यबोधनम् । **निमित्तं** तत्र विशेषणम् । **अर्थे** विशेष्ये । इति सामानाधिकरण्यलक्षणघटकपदानामर्थ । सत्यज्ञानवाक्यविचार· शास्त्रप्राबल्यवादे विस्तृत । इदमत्रावधेयम् - सत्यादिपद द्वितीयान्त वेदेत्यनेनान्वेति वाक्यभेदस्यानुचितत्वात् । अनन्तपद योगेन सर्वपरिच्छेद व्यवच्छिन्दत् रूढ्या परमपुरुषमभिधत्ते नारायणादिपदवत् ॥

एव सामानाधिकरण्यानुपपत्ति निराकृत्य कारणवाक्यान्तरशोधकवाक्यान्तरैकार्थ्यं निर्विशेषपरताभ्युपगममूल निराकर्तुमनुवदति—**यदुक्तमिति ॥ गुणतोऽपीति ॥** सजातीयविजातीयव्यावृत्त्यो एवैकपदाभ्या सिद्धेः परिशेषात् स्वगतभेदनिषेधकमित्यर्थः । **अनुपपन्नमिति ॥** पूर्वापरपरामर्शेन प्रसक्तनिमित्तान्तरनिषेधेन विचित्रशक्तियोगप्रतिपादनपरमद्वितीयपदमिति भावः ॥ **उपादानेति ॥** भाव्यवस्थाविशेषस्य उपादेयत्वस्य प्रागवस्थायोग उपादानता ॥

सर्वशाखेति ॥ "एकं वा संयोगरूपचोदनाख्याऽविशेषात्" इति द्वितीयाध्यायेऽन्तिमं शाखान्तराधिकरणमिति पूर्वतन्त्रप्रसिद्धो न्याय । तत्र हि—वेदैकत्वे प्रतिशाख पुरुषभेदात् सर्वेषामुत्पत्तिपरत्वेऽपि न कर्मभेद· । अतएवैकस्मिन् कर्मणि विरुद्धानां नानाशाखागताङ्गानां विकल्पः । अविरुद्धाना समुच्चयः इति निर्णय· । अतः परिग्रहलक्षणोपसहारफल एव स न्याय इति भाव । शोधकान्तरैकार्थ्य व्युदस्यति—**नच निर्गुणेति ॥** विषयविभागादविरोध इति भावः ॥

ज्ञानस्वरूपतोक्तिरूपमार्थगुणनिषेध परिहरति—**ज्ञानमात्रस्वरूपेति॥** ज्ञानस्य ज्ञानाश्रयत्वव्याप्ति धर्मभूतज्ञानत्वोपाधिदुष्टेति भाव ॥

कल्याणगुणान् ज्ञातृत्वप्रमुखान् वदन्ती· श्रुतीरुदाहृत्य निर्गुणश्रुतिविरोध परिहरति —**नित्यो नित्यानामिति ॥ अन्यतरामिथ्याविषयत्वेति ॥** "नीचा कलहमिच्छन्ति सन्धिमिच्छन्ति साधवः" इति भाव ॥

एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतन्तरात्मा ।
कर्माध्यक्षस्सर्वभूताधिवासस्साक्षी चेता केवलो निर्गुणश्च ॥
स विश्वकृद्विश्वविदात्मयोनि· य· कालकालो गुणी सर्वविद्यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ॥ (श्वे ६)

अत्र प्रथमे पद्ये गुणसामान्य निषेध्यते । द्वितीये गुणसामान्यं विधीयते । "एष आत्माऽपहतपाप्मा" इत्यादौ गुणविशेषविधिनिषेधौ दृश्येते । अत्र सर्वसमीकरणाय उत्सर्गापवादसामान्यविशेषन्यायावाश्रयितव्यौ । उत्सर्गापवादन्यायो नाम विरोधपरिहाराय शब्दोपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य सङ्कोचलक्षण· । "पदे जुहोति, आहवनीये जुहोति" इत्यादौ प्रसिद्ध । सामान्यविशेषन्यायस्तु शब्दो-

पात्तविशेषविषये सामान्यशब्दस्य सङ्कोचलक्षण· "पशुना यजेत" इत्यादौ प्रसिद्ध ॥

अथ वाङ्मनसनिवृत्त्युक्तिरूपमार्थगुणनिषेध प्रत्याह-- **भीषाऽस्मादिति ॥** उक्तार्थस्योपक्रमानुगुण्यमाह---**सोऽश्नुते सर्वानिति ॥** अत्र सहशब्द "क्षीरेण सह ओदन भुङ्क्ते" इत्यादाविव भोज्यसाहित्यपर , न तु "पुत्रेण सह भुङ्क्ते" इत्यादाविव भोक्तृसाहित्यपर । "त इमे सत्या कामा 'इतिश्रुत्यन्तरे कामानां कल्याणगुणाना सत्यत्व स्पष्टमुच्यते । अतः श्रुते गुणेष्वादरावगमात् गुणनिषेधे तात्पर्यकल्पन श्रुतिप्रतारणमेवेति भावः ॥

सगुणस्यैव ज्ञेयत्वसभवात् ज्ञेयत्वव्युदासेन निर्गुण ब्रह्मेति भ्रान्तिनिदानभूतां श्रुति व्याख्याति---**यस्यामतमिति ॥ असत् ब्रह्मेति वेद चेदिति ॥** ब्रह्म वेदेत्यसच्चेदित्यर्थ । **अस्ति ब्रह्मेति ॥** ब्रह्म वेदेत्यस्ति चेदित्यर्थ । धात्वर्थप्रधानोऽय निर्देश "ब्रह्मविषयज्ञानासद्भावसद्भावाभ्याम्" इति विवरणात् । यस्यामतमित्यस्यार्थमाह---**यतो वाचो निवर्तन्ते इति ॥**

ज्ञातृत्वनिषेधपरतयाऽभिमतश्रुत्यर्थमाह---**यत्तु न दृष्टेरिति ॥** अस्य पञ्चम्यन्तत्वपक्षे तार्किकदर्शननिरासोऽभिमत । तदा हि व्यतिरिक्तामिति पदमध्याहृत्य जडरूपमात्मानमित्यर्थोऽवगन्तव्य । षष्ठ्यन्तत्वपक्षे कापिल हैरण्यगर्भादि दर्शननिरासोऽभिमत । तस्मिन् हि दर्शनेजीवस्यैव जगत्कारणत्व तस्यैव च ज्ञेयत्वमभिमतम् । आनन्दस्वरूपतोक्तिं व्याख्याति---**आनन्दो ब्रह्मेति ॥** अनुकूलतया वेदनमेवह्यानन्द· । तत· ज्ञानस्वरूपतोक्तिन्याय एवात्रापीति भाव ॥

८५ भेदनिषेधपरवाक्यम

अथ भेदनिषेधाभिमतानि वाक्यानि व्याख्याति—**यदिदमुक्तमित्यादिना ॥** तदिति परिहृतमित्यनेनान्वेति । अत्र भेदशब्द ज्ञातृज्ञान ज्ञेयरूप तत्तद्वस्तुपर । **ब्रह्मकार्यतयेति ॥** ब्रह्मकार्यत्वात् ब्रह्मात्मकत्वाच्च कार्यकारणभावनिबन्धन शरीरात्मभावनिबन्धन च किंचिदैक्यं प्रतीयते, तच्च प्रकार्यैक्य, तदैक्यश्रुतीनामर्थ । तच्छेषभूत एव भेदनिषेधस्सर्वत्र दृश्यते । शेषत्व च विहितैक्यस्थिरीकरणलक्षण किंचित्कार.। एव च कार्यकारणभावनिबन्धनैक्यस्य प्रत्यनीको भेद कार्यात्मा आरम्भवादप्रसिद्धो भेद एक । शरीरात्मभावनिबन्धनैक्यस्य प्रत्यनीको भेदः साख्यादिसमयप्रसिद्ध स्वतन्त्रवस्तुरूप कश्चिद्भेद । तदुभयमुभयविधैक्यशेषतया प्रतिषिध्यते, न भेदसामान्यमिति तात्पर्यार्थ, यत प्रकृते सामानाधिकरण्येनैक्य प्रतीयते । सामानाधिकरण्य च भिन्नप्रवृत्तिनिमित्तकम् । भेदसामान्यप्रतिषेधे सामानाधिकरण्यमेव भज्येत । अतः भेदविशेष एवात्र सर्वत्र स्वीकर्तव्य इति ॥

न पुनर्बहुस्यामिति ॥ अयमर्थ —"नेह नानास्ति" इत्यादिषु भेदनिषेधवादेषु प्रतियोगितया निर्दिष्टा सामान्यतो भेदा "बहु स्या प्रजायेय" इत्यादीना भेदविशेषापेदशानामवैयर्थ्याय विशेषव्यतिरिक्ता इति गोबलीवर्दन्यायेन निर्णय. । स हि न्याय वैयर्थ्यपरिहाराय शब्दोपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य सङ्कोचलक्षणः "गामानय, बलीवर्द चानय" इत्यादौ प्रसिद्ध । तथा भेदविशेषस्य विधानात् विरोधपरिहाराय "नेहनानास्ति" इत्यादय भेदसामान्यनिषेधवादाः विहितव्यतिरिक्तविषया इत्यपि उत्सर्गापवादन्यायस्य प्रवृत्तिरस्ति । तथा "न तत्समश्चाभ्यधिकश्च दृश्यते" इति भेदविशेषनिषेधस्यापि

दर्शनात् सामान्यनिषेध विशेषानिषेधपर्यवसायीति वक्तु शक्यतया सामान्यविशेषन्यायलक्षणस्य छागपशुन्यायस्याप्यत्र प्रवृत्तिरस्तीत्यवधेयम् ॥

अत एव श्रुतप्रकाशिकाया "उत्सर्गापवादनयमभिप्रयन्नाह—**नपुनरिति**" इत्यवतारितम् । श्रुतदीपिकाया तु "गोबलीवर्दनयमभिप्रयन्नाह—**नपुनरिति**" इत्यवतारितम् ॥ अत्र वैयर्थ्यदृष्ट्या गोबलीवर्दन्यायावतार । विरोधदृष्ट्या उत्सर्गापवादन्यायावतार इत्यभिप्राय. । अपच्छेदन्यायस्तु नात्र प्रवर्तते । तस्यानियतपौर्वापर्यविषयत्वात् । प्रकृते विरोधः पौर्वापर्य च नियते । यत एवमुदाह्रियते—

पौर्वापर्य विरोधश्च पूर्वाप्रामाण्यमेव च ।
नियमान्नास्ति यत्रासावपच्छेदनयो भवेत् ॥

इति भावप्रकाशिकायाम् । अपि तु विरोधनयादुपक्रमनयाद्वा परभूतभेदनिषेधोत्पत्तिप्रतिबन्ध एव स्यादित्यवधेयम् ॥

भेददर्शनस्य भयहेतुत्वोपदेश अभेद परमार्थ इति सूचयतीत्यभिप्रेत वाक्य व्याख्याति—**यदा ह्येवेति ॥ तदुत्पत्तिस्थितीति ॥** तदुत्पत्त्यादि कर्म क्रिया यस्येति बहुव्रीहि । अत्रान्तरशब्दो विच्छेदपर इति भाव· ॥

८६ सूत्रविचार

ब्रह्मनिर्विशेषत्वान्यमिथ्यात्वपरतयाऽभिप्रेत सूत्रद्वय विचारयति—**यदुक्तं न स्थानत इति ॥** (३–२- ११) **न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥** इति सूत्रम् । अस्याय पूर्वपक्षेऽर्थ·—उभयलिङ्गत्व सविशेषत्वनिर्विशेषत्वे । स्वभावतः पर ब्रह्म नोभयलिङ्ग. विरोधात् । परस्य पृथिव्याद्युपाधिरूपस्थानतोऽपि पर नोभयलिङ्गम् । सर्वत्र श्रुतिषु निर्विशेषत्वेनैवोपदेशादिति ॥ **मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॥** (३–२–३) **इति** सूत्रस्यायमर्थ·—स्वप्ने सृष्टिः

मायामात्र केवलमपरमार्था । कात्स्न्र्येन देशकालनिमित्ताबाधितत्वादि-सपत्त्या परमार्थवस्तुगतया अनभिव्यक्तस्वरूपत्वात् असस्पृष्टस्वरूपत्वा-दुर्निरूपत्वादिति । इद स्वप्नपरमपि दुर्निरूपत्वाविशेषात् कृत्स्नमिथ्यात्व-प्रदर्शनपरमिति भाव ॥

सिद्धान्ते अयमर्थ —**न स्थानत इति॥** चेतनाचेतनरूपसर्वपदार्था-न्तर्यामित्वेऽपि स्थानरूपपदार्थप्रयुक्तः परस्य न दोषगन्ध , सर्वत्र श्रुति-षूभयलिङ्ग ब्रह्मावगम्यते । उभयलिङ्गत्व च सकलहेयप्रत्यनीकत्व सकल-कल्याणगुणाकरत्व च । **मायामात्रमिति ॥** स्वाप्नः प्रपञ्च· मायामात्र अत्याश्चर्यरूपत्वात्परमपुरुषसृष्ट । न जीवसृष्ट· । जीवस्य ससारदशायां कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् सत्यसङ्कल्पत्वादिगुणाणां सर्वांशेन तिरो-हितत्वादिति ॥

21 स्मृतिसमाधिः

८७ भगवद्गीता

यद्यपि श्रुतेस्सविशेषपरत्वे तदनुरोधित्वात् स्मृतिरपि तत्परै-वेति सिद्धा । तथापि स्मृते केवलया पूर्वापरालोचनया सविशेषपरता विज्ञायते इत्यारम्भ । यत· पूर्ववादिना स्वाभिमतं श्रुत्यर्थमापाततः प्रदर्शयन्त्येव वाक्यान्युपात्तानि । तत्र पुराणमापि स्मृतिरेव । तथापि लोके विभज्य व्यवहारेणात्रापि पृथग्व्यपदेश । पूर्वपक्षे भगवद्गीतावच-नस्य पुराणवचनात्पश्चादुदाहृतत्वेऽपि स्वतो वक्तृवैलक्षण्याभ्युपगमा-दितिहासत्वाच्च पूर्व भगवद्गीतावचनमुपादत्ते—**स्मृतिपुराणयोरपीति ॥**

पूर्वपक्षे भगवद्गीतावचनत्रयमुदाहृतम् । तत्राद्य विभूत्यध्याये दशमे उपक्रमे "अहमात्मा गुडाकेश सर्वभूताशयस्थित" इति । (१०—२०) सर्वस्यापि भूतजातस्य एक एवात्मा भगवानिति तदर्थः ।

"क्षेत्रज्ञ चापि मां विद्धि सर्वक्षेत्रेषु भारत" इति द्वितीयम्। (१३-२) चिदचिद्विभागाध्यायगतम्। अनेन जीवब्रह्मैक्यमुपदिश्यते। "न तदस्ति विना यत्स्यात् मया भूत चराचरम्" इति तृतीयमू। इद विभूत्यध्यायोपसहारगतम्। (१०-३९) अत्रात्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वमुच्यते इति पूर्ववादिनामाशय ॥

उत्तरवादिनामयमाशय.—यद्यप्येतानि वचांसि आपाततो निर्विशेषपरत्वभ्रमास्पदानि। पौर्वापर्यादिन्यायपरामर्शे भ्रमो बाधितो भवति। तथाहि—अस्या हि भगवद्गीतायामसमूढपदघटित वचनत्रयमुपलभ्यते। तत्रेद प्रथमम्—

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढः ब्रह्मविद्ब्रह्मणि स्थितः ॥ ५-२० ॥

अत्र समदर्शने सति असमूढत्वमुक्तम्। अवशिष्टस्य वचनद्वयस्य योऽवगम्यमानोऽर्थः स एव सिद्धान्त· परमार्थ इति न्यायविदा निर्णय। तत्र प्रथममिदम्—

यो मामजमनादि च वेत्ति लोकमहेश्वरम्।
असंमूढस्स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ १० ३ ॥

इति। अत्र पूर्वार्धे मामित्यादिभिश्चतुर्भि पदैः अचेतनबद्धमुक्तनित्यविलक्षण परमात्मोपदिश्यते। उत्तरार्धेनैव वेदितु असमूढत्वलक्षण तत्त्वदर्शित्वमुच्यते। द्वितीये "उत्तम पुरुष" इत्यत्र· (१५-१७)—

यो मामेवमसंमूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत ॥

इत्यनेन बद्धमुक्तविलक्षणस्य पुरुषोत्तमस्य वेदितुरेव सर्ववित्त्वमुच्यते। अत्र व्यावर्त्यमिथ्यात्वे व्यावृत्तमपि मिथ्यैव स्यादित्युभयो सत्यत्व मिथो वैलक्षण्य च शास्त्रार्थ इति सारार्थः। एवमुभयोरपि सत्यत्वे परस्परसबन्ध

उपदिश्यते—**मत्स्थानीत्यादिना** उपक्रमोपसंहारमध्यगतेन भक्तियोगाध्यायस्थेन (९-४) ॥

अथ सप्तमे प्रबुद्धप्राधान्याध्याये (७-६, ७) एव वेदितुरेव श्रैष्ठ्यमुच्यते—**अहं कृत्स्नस्येति ॥ न तदस्तीत्यत्र** अविनाभावशब्दस्य प्राचुर्येण सबन्धे प्रयोगात् **विना**शब्दस्य सबन्धाभावोऽर्थ । ततश्च मदसबद्ध मदनात्मक किमपि नास्तीति तदर्थ । अतस्सर्वापि भगवद्गीता सविशेषपरैवेति निर्णय ॥

८८ विष्णुपुराण प्रत्यस्तमितश्लोक

पूर्ववादिना विष्णुपुराणवचनानि एकादशश्लोकरूपाणि निर्विशेष ब्रह्म सत्य जगन्मिथ्येत्यत्र प्रमाणतयोपात्तानि । तत्र—

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसवेद्यं तत् ज्ञानं ब्रह्मसंज्ञितम् ॥

इति श्लोक प्रथमः पुराणोपसहारस्थ । (६-७-५३)—

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥

इति द्वितीयः श्लोक पुराणोपक्रमस्थ । (१-२-६)—

परमार्थः त्वमेवैको नान्योऽस्ति जगतः पते ।
तवैष महिमा येन व्याप्तमेतच्चराचरम् ॥
यदेतद्दृश्यते मूर्तमेतत् ज्ञानात्मनस्तव ।
भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूप पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥
ये तु ज्ञानविदश्शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥

इति चतुःश्लोकी आदिवराहस्तुत्यन्तर्गता । (१, ४, ३८-४१)—

तस्यात्मपरदेहेषु सतोऽप्येकमयं हि तत् ।
विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः ॥ (२-१४-३१)
यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम ।
तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते ॥ (२-१३-९०)
वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥ (२-१४ ३२)
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यजभेदमोहम् ।
इतीरितस्तेन स राजवर्यः
तत्याज भेदं परमार्थदृष्टिः ॥

इयं चतुश्लोकी आदिभरतोपाख्यानान्तर्गता । (२–१६–२४)

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

अय श्लोकः पुराणोपसहारोपसहारस्थ । (६–७–९६) पञ्चपादिका-विवरणे समुदाहृत. ॥

उदाहृतेष्वेकादशसु श्लोकेषु प्रथमः निर्विशेष ब्रह्मपर । द्वितीय तृतीयौ जगन्मिथ्यात्वपरौ । तुरीयपञ्चमावुक्तार्थविवरणरूपौ । तत्रसप्रदाय· षष्ठेनोच्यते । ततश्चतुर्भि सप्तमादिदशमान्तैः जीवानामैक्यमुच्यते । जीवब्रह्मैक्य मुख्यमेकादशस्य विषय ॥

अत्रोत्तरवादिनोऽयमभिप्राय –यद्येते श्लोका मुक्तका भवेयुः तदा आपातत निरुक्तार्थप्रतिपादकास्यु. । कि तु प्रबन्धान्तर्गता —

स्तुतिवाक्यकृतश्चैष जनानां मतिविभ्रमः ।
पौर्वापर्यापरामृष्टश्शब्दोऽन्यां कुरुते मतिम् ॥

इति सबन्धाक्षेपपरिहारश्लोकवार्तिकोक्तन्यायेन पौर्वापर्यपरामर्शेनैव शब्दा-नामर्थो वर्णनीय "यत्परश्शब्दस्स शब्दार्थः" इति न्यायात् । तथैव

वक्ष्यते । पूर्ववादी तु स्वहृदयानुसारेण न्यायपरामर्श विनैव संगतिविहीनान् श्लोकान् सकलय्य स्वसिद्धान्त प्रकाशयतीति ॥

तदुच्यते—प्रत्यस्तामिति श्लोकस्य (६-७-५) ब्रह्मपरत्व पूर्ववादिसमतम् । मुक्तात्मपरत्व सिद्धान्तिसमतम् । तत्र ब्रह्मपरत्वे प्रत्यस्तमितभेद सत्तामात्रमिति पदद्वयस्य पराभिमतार्थपरत्वव्युदासाय तत्प्रकरणोपक्रमगतान् ब्रह्मण उभयलिङ्गत्वपरान् श्लोकानुदादहरति—**स सर्वभूतेति** ॥ (६, ५, ८३-८७)

अगोचर वचसामित्यस्यापि पराभिमतार्थपरत्वव्युदासाय शब्दवाच्यत्वपरान् श्लोकानुदाहरति—**शुद्धे महाविभूतीति** ॥ (६, ५ ७२-७९) अत्र भकारगकारयो समुदायस्य वकारस्य तत्समवेतस्य चार्था क्रमेण कथ्यन्ते । अनित्यस्याप्यर्थोऽयम् —**विना हेयैरिति** ॥ पश्यक· कश्यपोऽभवदितिवत् नेतिपदमनित्यभवत् । पूज्यपदार्थोक्ति योग । परिभाषा रूढि । उपचार प्रयोग ॥

एतत्प्रकरणोपसहारगता उभयविभूतिपरा श्लोका —**समस्ताश्शक्तय इति** ॥ (६, ७, ७०-७२) प्रथमे शुभाश्रयलक्षणदिव्यमङ्गलविग्रहयोग उच्यते । यत्र यस्मिन् रूपे चेतनाचेतनकर्मरूपा प्रागुक्ताश्शक्तय अस्त्रभूषणादिरूपेण प्रतिष्ठिता आश्रिता इत्यर्थ । समस्तशक्ति तत् ब्रह्म चेष्टावन्ति रूपाणि करोतीत्यन्वय ॥

एवमुपसहारस्य बुद्धिस्थत्वात् ज्ञानस्वरूपमत्यन्तमिति (१-२-६) श्लोकस्य सविशेषपरताव्युत्पादनाय तदुपसहारगत श्लोक पठति—**एवंप्रकारमिति** ॥ (१-२२-५३) श्लोकोऽय परमसाम्यापत्तिनिरूपणाय मुक्तात्मगुणान् परमात्मन्यतिदिशति । मुक्तात्मस्वरूप तु—

निर्व्यापारमनाख्येयं व्याप्तिमात्रमनूपमम् ।
आत्मसंबोधविषयं सत्तामात्रमलक्षणम् ॥

इत्यादिभि· (१,२२,५०–५२) त्रिभिरुच्यते । अत्रामलमित्यधिक-गुणोक्ति ॥

एवमुपक्रमे सविशेषपरत्व दर्शयति—**परः पराणामिति पञ्चभिः** ॥ (१,२,१०–१४) सर्वोत्कर्षमुक्त्वा नित्यत्वमुच्यते—**अपक्षयेति** ॥ अन्त र्यामित्वमुच्यते— **सर्वत्रासाविति** ॥ वासुदेवस्यैव ब्रह्मत्वम्- **तद्ब्रह्मेति** ॥ तस्यैव त्रिविधमानन्त्यम्- **तदेव सर्वमिति** ॥

एव शास्त्रोपक्रमे उभयलिङ्गत्वादिकमुक्त्वा उपसहारेऽपि तदुच्यते— **प्रकृतिर्येति** ॥ (६,४,३९–४०) एव शास्त्रस्योपक्रमोपसहारयो प्रकर-णस्य चोपक्रमोपसहारयो· सविशेषमेव ब्रह्म प्रतिपाद्यमिति दर्शितम् ॥

अथास्य ब्रह्मण· जगत्कारणस्य निर्दोषता वक्तु जीवब्रह्मणोऽशरीर-शरीरिभावरूपस्संबन्ध उच्यते उपक्रमे—**द्वे रूपे इति सार्धद्वयेन** ॥ (१,२२,५५–५७) तथोपसहारेऽप्युच्यते—**विष्णुशक्तिरिति त्रिभिः** ॥ (६,७,६१–६३) तथा मध्येऽप्युच्यते—**प्रधानं च पुमानिति त्रिभिः** ॥ (२,७,२९–३१) एव च प्रपञ्चस्य पारमार्थ्य स्पष्टमुच्यते—**तदेत-दक्षयं नित्यं जगदिति** ॥ (१–२२–६०) एषामर्थं सगृह्णाति— **इत्यादिना परं ब्रह्मेति** ॥ **शुभाश्रयमिति** ॥ शुभत्वमाखिलहेयनिवर्त-कत्वम् । आश्रयत्व योगयुञ्जानसालम्बनत्वम् । **भावनात्रयेति** ॥ भावना वासना सस्कार । मूर्तामूर्तपदवाच्ययो· बद्धमुक्तयो ब्रह्मरूपत्वो पदेशात्तेनतेनरूपेणोपास्यत्वप्रसक्तौ बद्धाना सनकादीना वय ब्रह्मैव प्राप्नुम इति ब्रह्मैकपरायणत्वरूपब्रह्मभावनान्वितत्वात्साधनावस्थायां स्थित-त्वात् न तद्रूपेण ध्याने कश्चिदुपकार । देवादीना वय कर्मैव कुर्म इति कर्म परायणत्वात्तत्रापि तथैव । हिरण्यगर्भादीना वय तूभय सदध्महे इति भावनावत्त्वात्तत्रापि तथैव । मुक्तरूप तु परिशुद्धमपि योगमारुरुक्षूणां

मनसो विषयीकरणानर्हतया नैवोपकारकमिति प्रत्यस्तमिति श्लोकेनोच्यते। तस्मात् शक्तित्रयाश्रयशुभाश्रयलक्षणाप्राकृतदिव्यमङ्गलविग्रहविशिष्टवेषेण भगवान् ध्यातव्य इति प्रकृतार्थ ॥

स्वोक्तस्यार्थस्योपपादकानीमानि वचनान्याद्यन्तरूपाणि—**न तद्योगेत्यादीनि** ॥ (६, ७, ५५-७२) तत्र विष्णुधर्म सवाद — **तथा चतुर्मुखेत्यादि सार्धत्रिकम्** ॥ अयमत्र पुराणपाठ —

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यंत् ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्च विष्णोः परं रूपमरूपाख्यमनुत्तमम्।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः ॥
न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः।
ततः स्थूलं हरे रूपं चिन्तयेद्विश्वगोचरम् ॥ ५५ ॥
हिरण्यगर्भो भगवान् वासुदेवः प्रजापतिः।
मरुतो वसवो रुद्राः भास्करास्तारका ग्रहाः ॥
गन्धर्वयक्षदैत्याद्याः सकला देवयोनयः।
मनुष्याः पशवश्शैलाः समुद्रास्सरितो द्रुमाः ॥
भूप भूतान्यशेषाणि भूतानां ये च हेतवः।
प्रधानादि विशेषान्तं चेतनाचेतनात्मकम् ॥
एकपादं द्विपादं च बहुपादमपादकम्।
मूर्तेमेतद्धरे रूपं भावनात्रितयात्मकम् ॥
एतत्सर्वमिदं विश्वं जगदेतच्चराचरम्।
परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितम् ॥ ६० ॥
विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा।
अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते ॥
यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा।
संसारतापानखिलानवाप्नोत्यतिसंततान् ॥
तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता।
सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥

अप्राणवत्सु स्वल्पा सा स्थावरेषु ततोऽधिका ।
सरीसृपेषु तेभ्योऽपि ह्यतिशक्तया पतत्रिषु ॥
पतत्रिभ्यो मृगास्तेभ्य. तच्छक्तया पशवोऽधिकाः ।
पशुभ्यो मनुजाश्चातिशक्तया पुंसः प्रभाविताः ॥ ६५ ॥
तेभ्योऽपि नागगन्धर्वयक्षाद्या देवता नृप ।
शक्रस्समस्तदेवेभ्य. ततश्चातिप्रजापति. ॥
हिरण्यगर्भोऽपि ततः पुंसश्शक्तयुपलक्षित. ।
एतान्यशेषरूपाणि तस्य रूपाणि पार्थिव ॥
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा ।
द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते ॥ ६८ ॥
अमूर्त ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः ।
समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिता. ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥ ७० ॥
समस्तशक्ति रूपाणि तत्करोति जनेश्वर ।
देवतिर्यङ्मनुष्याख्यांचेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा ।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥ इति ॥ ७२ ॥

८९ ज्ञानस्वरूपश्लोक

अथ ज्ञानस्वरूपमिति द्वितीयोदाहरणविचार —**ज्ञानस्वरूपमितीति** ॥ जगच्च स इति सामानाधिकरण्येन कृत्स्नस्य मिथ्यात्व प्रतीयत इति शङ्कते--**जगद्ब्रह्मणोस्सामानाधिकरण्येनेति** ॥ **सामानाधिकरण्यं त्विति** ॥ प्रकारभेदेन प्रकार्यैक्येन अन्यतरबाधनिरपेक्ष प्रथमविद्वद्वैयाकरणसंमतसामानाधिकरण्यलक्षणानुगुण बहुविद्वत्परिगृहीतमङ्गीक्रियते, न तु पारिभाषिक सकेतसिद्ध अखण्डार्थत्वलक्षणमिति भाव ॥

अथास्यैव विस्तर —**तथाहि यतो वा इति** ॥ **अवसिते सतीति** ॥ अनेन ब्रह्ममीमांसाश्रवण कृतमित्युक्त भवति। अनन्तरमिति-

हासपुराणश्रवणं प्रतारणपरिहाराय कर्तव्यमिति विधीयते - **इतिहासेति ॥** महाभारतोपक्रमे वचनमिद श्रूयते । तत्र धर्मशास्त्राणि कर्मणां भगवदाराधनरूपता बोधयन्ति सन्ति पूर्वभागोपबृहणानि भवन्ति । इतिहासपुराणानि तु कर्मणा ब्रह्मविद्याङ्गतामुपदिशन्ति सन्ति उत्तरभागोपबृहणानि भवन्ति । ज्ञानस्वरूपमित्युपक्रमस्याप्युपक्रम प्रश्नवचन दर्शयति— **सोऽहमिच्छामीति ॥** (१,१,४–५) **सृष्टिस्थितीति ॥** स्थितिलययो प्रयोजकव्यापाराभिप्रायेण कर्मभूतमित्युक्ति । **अतो विष्णोस्सकाशादिति ॥** (१–१–३१) अत्र उत्तरवचने जगच्च स इति सामानाधिकरण्य शरीरात्मभावनिबन्धनमिति भाव· ॥

परब्रह्मभूतं भगवन्तं विष्णुमिति ॥ अत्र नमस्कारसप्तश्लोकी व्याख्याति । सैषा सप्तश्लोकी—

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥
नमो हिरण्यगर्भाय हरये शङ्करायच ।
वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥
एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।
अव्यक्तव्यक्तरूपाय विष्णवे मुक्तिहेतवे ॥
सर्गस्थितिविनाशानां जगतो यो जगन्मयः ।
मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥
आधारभूत विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्वभूतस्थं अच्युतं पुरुषोत्तमम् ॥
ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनत· स्थितम् ॥
विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे तथा प्रभुम् ।
प्रणम्य जगतामीशमजन्मक्षयमव्ययम् ॥

कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः ।
पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥

इति ॥ (१,२,१–८) उत्तरत्रापि प्रश्नप्रतिवचनग्रन्थानुपपत्तिं दर्शयति —**यदि निर्विशेषेति ॥ (१,३,१-३) ॥**

९० वराहभरतचतुश्लोकीद्वयम्

आदिवराहस्तुतिचतु श्लोकी समाधत्ते—**परमार्थस्त्वमिति ॥** मूर्तं मूर्ति । विधेयसमर्पकपदमिदम् । अत्र प्रथमे श्लोके सर्वव्यापकत्व द्वितीये सर्वस्य स्वनिष्ठत्वभ्रम तृतीये देहात्मभ्रम तुरीये तत्त्वज्ञानेन सर्वभ्रमनिवृत्तिश्चोच्यते ॥

आदिभरतचतुश्लोकीं व्यवहिता समाधत्ते—**तस्यात्मपरेति ॥** एकमय, स्वार्थिको मयट् । सर्वत्रावस्थितस्याप्यात्मन एकमेव विज्ञानस्वरूपपरमार्थभूतम् । ज्ञानैकाकार सर्वेषा समान इत्यर्थ. । देवमनुष्याद्याकारस्तु भ्रान्तिसिद्ध इत्यर्थ । अस्याश्च चतु श्लोक्या सर्वेषा जविानां ज्ञानैकाकारवत्त्वेन ऐक्य साम्यापदाभिधेय प्रकाराद्वैतलक्षण प्रमेयभूतम् । तत्र प्रथमे साम्य द्वितीये तथाविद्वद्व्यवहार तृतीये दृष्टान्त तुरीये सप्रदाय इति प्रतिपाद्यविभाग ॥

९१ विभेदजनकश्लोक

विभेदनक इत्युपसहारश्लोकस्यायमर्थ (६-७ ९६) — विभेद विविधो भेद देवमनुष्यादिलक्षण । तादृशभेदहेतुभूत कर्म अज्ञान तस्मिन् भगवदुपासनेन ध्वस्ते सति जीवपरयो हेत्वभावात् असन्त निरुक्तभेद क पश्यतीत्युच्यते इति ॥ एवमर्थमुपपादयितु पीठिकामारचयति—**विभेदजनकेऽज्ञानइति ॥ देहात्मनोरिवेति ॥** यथा न जातुचिदपि प्रायेण शास्त्रविदा देहजीवयोरभेदशङ्कागन्धस्याप्यवकाश तथा

जीवपरयोस्तादृशमनवकाशं सूचयितुं श्रुतिस्मृतिषु परस्य तद्व्यातिरिक्तस्य च शरीरशरीरिभावोपदेश इति हृदयम् ॥

अत्र जीवपरयो स्वरूपैक्यपरताभ्रमे साक्षाद्विरोधं तिसृभिश्श्रुतिभिराह—**तथाच श्रुतिरिति** ॥ अत्र निखिलहेयास्पदत्व निखिलहेयप्रतिभटत्व, सकलदोषाकरत्वं सकलकल्याणगुणाकरत्व, निरुपाधिक नियमन च श्रुतीनामर्था । प्रागुक्त प्रकरणविरोध चाह—**स सर्वभूतेति** ॥ अत्रोपभयलिङ्गत्व तद्राहित्य विरुद्धधर्मावुक्तौ । अस्मिन्नर्थे सप्रदायमप्याह— **उभयेऽपीति** ॥ सूत्रेष्वित्यस्य स्वरूपनिर्णयादित्यनेनान्वयः ॥

एतेषा प्रमाणानामविद्यावद्विषयकत्वमितिपराभिप्रायमाशङ्क्याह— **नापि साधनानुष्ठानेनेति ॥ परमात्मेति** ॥ (२ १४-२७) योग. तादात्म्यरूपः । इद साक्षादभेददूषणवचनम् । इष्यते इत्यनेन परमत मिति स्पष्टम् । यत पुराणे परमतनिराकरणप्रकरणमिदम् । तत उत्तरः श्लोक एष·—

तस्मात् श्रेयांस्यशेषाणि नृपैतानि न संशयः ।
परमार्थस्तु भूपाल संक्षेपात् श्रूयतां मम ॥ इति ॥ (२ १४-२८)

इहापि—**आत्मभावं नयतीति** ॥ (६-७-३०) विकार्य परिशुद्धियोग्यं जीवात्मान आकर्षक अयस्कान्त लोह अयःखण्ड आत्मभाव नयति तिष्ठति स्थापयति गच्छति गमयति भ्रमति भ्रामयति चेति । अत्र बादरायणबोधायनद्रमिडाचार्यादिसत्सप्रदायः—**वक्ष्यति चेति ॥ ज्योतिषा** परमात्मना । **अशरीरो** मुक्त । **सिद्धिः** अनुभव. । आनन्दे साम्य—**रसो वै स इति** ॥

९२ अत्रसंप्रदाय

एतेषां वाक्यानां सगुणब्रह्मविद्यारूपापरविद्याविषयतां परसमतां निराह—**पराविद्यास्विति** ॥ अत्रापि संप्रदायः—**सूत्रकारेणैवेति** ॥

वाक्यकारः ब्रह्मनन्दी आत्रेयवश्य टङ्काचार्यापराभिधानः छान्दोग्यस्य-वाक्यनामकव्याख्यानकर्ता । **युक्तं** गुणयुक्त प्राप्य तथोपासनादित्यर्थः । **भाष्यकारः** द्रमिडाचार्य वाक्यव्याख्याता । इद हि भाष्यम्—"यद्यपि सच्चित्तो न निर्भुग्नदैवत गुणगण मनसाऽनुधावेत् । तथाप्यन्तर्गुणामेव देवता भजते । तत्रापि सगुणेव प्राप्यते" इति ॥

अस्यार्थः वेदार्थसग्रहे सर्वश्रुतिसामरस्यनिरूपणप्रकरणे निरूपितो यथा—"सच्चित्त सद्विद्यानिष्ठ. न निर्भुग्नदैवत गुणगण मनसाऽनुधावेत् अपहतपाप्मत्वादिकल्याणगुणगण दैवताद्विभक्त यद्यपि दहरविद्यानिष्ठ इव सच्चित्तो न स्मरेत् । तथाप्यन्तर्गुणामेव देवतां भजते देवतास्वरूपानुबन्धित्वात् सकलकल्याणगुणगणस्य । केनचित्परदेवताऽसाधारणेन निखिलजगत्कारणत्वादिना गुणेनोपास्यमानाऽपि देवता वस्तुत स्वरूपानुबन्धिसर्वकल्याणगुणविशिष्टैवोपास्यते अतस्सगुणमेव ब्रह्म तत्रापि प्राप्यमिति सद्विद्यादहरविद्ययो विकल्प इत्यर्थ" इति ॥

एव द्रमिडभाष्यवाक्यमुपादाय व्याख्यानस्य बीजमिद स्यादित्यन्वीक्ष्यते । सक्षेपशारीरके हि—

अन्तर्गुणा भगवती परदेवतेति
प्रत्यग्गुणेति भगवानपि भाष्यकारः ।
आह स्म यत्तदिह निर्गुणवस्तुवादे
सङ्गच्छते न तु पुनस्सगुणप्रवादे ॥ (३-२२१)

इति । अन्तर्गुणेत्यस्य व्याख्यान—प्रत्यग्गुणेत्यादि । गुणपद स्वरूपपरम् । अपरोक्षचिदेकरसेति प्रत्यग्गुणेत्यस्यार्थ । अत्र प्रकरणे वाक्यकारः ब्रह्मनन्दी भाष्यकार द्रमिडाचार्यश्चाद्वैतसिद्धान्तस्यैव प्रवर्तकाविति ग्रन्थकार कथयति । एव कथनस्यापि मूल भास्करभाष्ये दृश्यते (८५ पु.) "सूत्रकारश्श्रुत्यनुकारी परिणामपक्ष सूत्रयांबभूव । अयमेव छान्दोग्ये

वाक्यकारवृत्तिकाराभ्या सप्रदायतस्समाश्रितः । तथाच वाक्य—परिणामस्तु स्याद्ध्यादिवदिति । विगीत छिन्नमूल माहायानिकबौद्धगार्धित मायावाद व्यावर्णयन्तो लोकान् व्यामोहयन्ति" इति । एव सर्वमवधार्य श्रीभाष्यकार सप्रदाय परिरक्षतीत्यवधार्यते ॥

एव प्राप्यत्वप्रापणीयत्वलक्षणभेदेनाप्यैक्य प्रतिषेधद्वचनमुपादत्ते-**अत्रापि विज्ञानमिति** ॥ (६, ७, ९३-९५) अत्र प्रथमे श्लोके इष्टप्राप्तिरुच्यते । द्वितीये अनिष्टनिवृत्ति । **तेन** करणत्वेनेत्यर्थ । निवर्तेयेदित्यनेन न निवृत्तिर्विधीयते, यावत्सिद्धि अनुष्ठाने तात्पर्य बोध्यम् । भक्तिसिद्धान्ते हि उपायोऽपि प्रीतिलक्षणसुखानुभवरूपतया निरतिशयसुखरूपेण परिणम्य फलदशा प्राप्य यावत्काल यावदात्मभावी भवतीति विशेषोऽस्ति। तदेवोच्यते —**यावत्सिद्धीति** ॥ इतरेषु सर्वेष्वपि सिद्धान्तेषु ज्ञानान्मोक्षवादिषूपायस्य निवृत्तिरिष्टा । अभावस्य मोक्षकारणतावादिन कुमारिलस्य मते कारणस्य नित्यता मोक्षनित्यतायै एव हि स्वीकृता ॥

तृतीयश्लोके मुक्तस्य स्वरूपमुपदिश्यते—**तद्भावभावेति** ॥ तस्य ब्रह्मणः भाव प्रक्षीणाशेषभावनत्वादि तस्य भाव. आविर्भाव. तमापन्न. अभेदी ज्ञानैकाकारतया देवादिभेदराहित्येन च यो भेदाभाव तद्वान् भवति भेदहेतो अज्ञानस्य कर्मण. विनाशात् इत्यर्थ ॥

निरुक्तार्थविवरणम्—**एकस्वरूपभेदास्त्विति** ॥ (२—१४—३३) भेदश्च तस्याज्ञानकृतो भवेदित्यस्य विवरणम् -**विभेदेति** ॥ (६—७—९६) अय श्लोक पञ्चपादिकाविवरणे समुदाहृत । अत एवात्रेयान् प्रयास पुरस्कृत । अत्रायमाशय.—आपातत· श्रूयमाणोऽय श्लोक कस्यचिद पूर्वस्यार्थस्योपदेशरूप इति न प्रतीयते लोकसिद्धानुवादसरूपत्वात् ।

अत पूर्ववाक्यपरामर्शेनैवार्थो वर्णनीय । पूर्वेषु हि श्लोकेषु जीवपरयोः स्वरूपभेदमुपगम्यैव मुक्ते मुक्तस्य च स्वरूपमुपदर्शितम् । तदानुगुण्येनैवार्थस्य वक्तव्यतया इच्छयाऽर्थवर्णनमुदाहरण च बालप्रलोभनमात्रमिति ॥

एव विष्णुपुराण सविशेषपरमेवेत्युपबृहणानुसारेणोपबृहणीयस्य नेतरयतया न निर्विशेषे श्रुति. प्रमाणमिति सामर्थ्यरूपहेतुरसिद्ध एवेत्युपपाद्य भगवद्गीतावचनस्याप्यर्थ निरुक्त प्रकाशयितुमुपादत्ते—**क्षेत्रज्ञं चापि मामिति** ॥ अत्र व्याख्यातव्य सर्व प्रागेव प्रतिपादितमिति पुनर्न प्रयत्यते ॥ (३८२)

अयमत्र सारार्थ —इह तावत्सर्वेषामप्यौपनिषदाना सम्मतोऽयमर्थ , य एष श्रुतिस्मृतीतिहासपुराणादीनि सर्वाण्यपि शास्त्राणि सर्वेश्वरस्य भगवत महिमप्रतिपादकानि भगवति भक्तिमुपजनयन्य सर्वेषा यथाऽभिलषित सर्वविधपुरुषार्थोपायबोधकानि सन्ति मोक्षमपि प्रापयन्तीति । सत्यप्येव शास्त्रेषु सर्वेषु प्रतिपाद्यस्य ब्रह्मण द्विरूपत्व मभ्युपेत्य तदनुरोधेन शास्त्रद्वैविध्यमुपगम्य अधिकारिष्वपि मन्दोत्तमभेदमुपजीव्य मार्गद्वय व्यवस्थापितम् । तत्र मन्दमार्गेणोत्तममार्गाधिकार प्राप्य फल प्राप्तव्यम् । मन्दाधिकारगोचर सर्व सगुणशास्त्रम् । उत्तमाधिकारिगोचर निर्गुणशास्त्रम् । तत्र सगुणशास्त्रमेव बहुवक्तव्यत्वात् भूय प्रवर्तते । इतरदल्प, वक्तव्यस्य सूक्ष्मत्वात् । ततश्च शारीरकमपि शास्त्र प्रायेण सगुणपरम् । तस्यैवोपास्यत्वात् । चतुर्थाध्याय फलपर सगुणगोचरः तृतीयादयोऽप्युपायादिपरा तद्गोचरा । तत्र त्रिचतुराण्येवाधिकरणानि अनन्यत्वादिप्रतिपादनपराणि मुख्यानीति स्पष्टमवधार्यते । तथैव सिद्धान्तवेदिभि शिवाद्वैतनिर्णयादिषु प्रबन्धेषु

निर्धार्यते । अयं च सगुणमार्ग प्रायेण सर्वविद्वत्सम्मत इति भाष्यकार. स्वयमेवाह —(बृ. उ. ४-३-६) "तस्मात् श्रुत्यर्थकल्पनाकुशला· सर्व एव उपनिषदर्थमन्यथा कुर्वन्ति । तथापि वेदार्थश्चेत्स्यात् कामं भवतु न मे द्वेष·" इति ॥ (दर्श १२)

अत्रात्यन्तबाधलक्षणाप्रामाण्यं प्रत्यक्षादिप्रमाणविरुद्ध सर्वम्य सगुणशास्त्रम्य कल्पित भवति । तदपेक्षया भूयोऽनुग्रहन्यायेन बहुविद्वत्सम्मत एव मार्गः अनादिपरम्पराप्रसिद्ध परिष्करणीय इत्यालोच्य सर्वेषामपि शास्त्राणा समान प्रामाण्य प्रमाणान्तराविरुद्धमुपगम्य सिद्धान्त· प्रवर्तित ॥

22. अविद्याविचारः.

९३ आश्रयानुपपत्ति

अविद्याविषये आश्रयतिरोधिस्वरूपानिर्वाच्यत्वप्रमाणनिवर्तक–निवर्त्यत्वानुपपत्तिरूपास्सप्त दोषा क्रमेण कथ्यन्ते । तदर्थं निरुक्तसप्तविधाकारपरिकर्मितमविद्याख्यदोषमनुवदति—**यदप्युच्यते निर्विशेष इति ॥** तत्र प्रथम दोषपरिकल्पनमाश्रयैकार्थमित्याश्रयानुपपत्ति. प्रवर्तते - **सा हि किमाश्रित्येति ॥** अत्र जीवो नाविद्याश्रय तत्कल्पितत्वात् प्रपञ्चवदित्येका युक्तिः । **ब्रह्म** नाविद्याश्रयः अविद्याविरुद्धस्वभावत्वात् सामान्यतस्तिमिरानाश्रयतेजोवत् इति द्वितीया । अत्रार्थे श्रीनाथमुनिश्लोकान् सम्प्रदायतस्समागतानाह—**ज्ञानरूपं परं ब्रह्मेति॥**

स्वरूपधीर्न निवर्तिका, अपि तु मानधीरित्येतदनूद्य निरस्यति—**ज्ञानं ब्रह्मेति ॥ तत्प्रकाशत्वात्** तत्स्वरूपानतिरिक्तप्रकाशत्वात् । द्वितीयश्लोक विवृणोति—**ज्ञानस्वरूपमिति ॥ ब्रह्मस्वरूपप्रकाशत्वे सतीति ॥** स्वरूपविषयज्ञानत्वे सतीत्यर्थः । **विशेषानवगमात्** विषय-

वैषम्याभावात् । विवृणोति—**एतदुक्तमिति ॥** तृतीयश्लोकस्य विपर्यये पर्यवसानमाह—**किंचानुभवेति ॥** निवर्तकत्वमानधीत्वयो शुक्तिज्ञानादौ व्याप्तिदर्शनात् ब्रह्मणि मानधीत्वस्य व्यापकस्य निवृत्त्या ब्रह्मस्वरूप न निवर्तकमिति शङ्काया जडविषयकत्वमुपाधिरित्यभिप्रेत्याह—**शुक्त्यादयस्त्विति ॥**

प्रपञ्चसत्यत्वमेव ब्रह्मणस्सद्वितीयत्वम्। प्रपञ्चमिथ्यात्वज्ञानेन सद्वितीयत्वनिवृत्तिरेव ब्रह्माज्ञाननिवृत्तिरित्याशङ्क्य अद्वितीयत्व ब्रह्मण स्वरूप वा धर्मो वा ? इति विकल्प्य आद्ये स्वरूप चेत् स्वानुभवसिद्धमेवेति विरोधस्तदवस्थ । धमश्चेत् सिद्धान्तविरोध इति समाधत्ते—**ब्रह्मस्वरूपाज्ञानं नामेति ॥** आश्रयानुपपत्तिनिगमनम्—**अतो ज्ञानरूपस्येति ॥**

९४ तिरोधानानुपपत्ति

अथ दोषफलस्य तिरोधानस्य दूषणम्—**किंचाविद्ययेति ॥ प्रकाशोत्पत्तीति ॥** प्रागभावो वा प्रध्वसो वेति विकल्प । सिद्धान्ते आत्मस्वरूपस्य स्वयप्रकाशत्वेऽपि तद्धर्मस्य नित्यत्वाणुत्वशेषत्वादे धर्मधीसङ्कोचलक्षणतिरोधानसम्भवात् विकासलक्षणप्रकाशाभ्युपगमाच्च नानुपपत्ति । उपपादित चेद निपुणतर वेदार्थसग्रहे ॥

९५ स्वरूपानुपपत्ति

अथाश्रयप्रयोजनयोरसम्भवे स्वरूपमेव तुच्छ म्यादिति खण्डयति—**अपिच निर्विषयेति ॥** अत्रानवस्थापत्ति दोष । यथा ज्ञातृज्ञानज्ञेयेषु क्वचित् दोषस्यान्तर्भावः वक्तव्य तस्यापि पुन तथेति ॥ अथ दोषस्याकल्पितपरमार्थब्रह्मस्वरूपत्वे सिद्धान्तविरोध प्रक्रियाविरोधश्चेत्याह—**अथैतदिति ॥ व्यतिरिक्तपारमार्थिकेति ॥** व्यतिरिक्तत्वे नानिर्मोक्षप्रसङ्गः । पारमार्थिकत्वे अनवस्था नेत्यर्थ । अवि

द्याया स्वरूपानादित्वं प्रवाहानादित्व दुर्घटत्व स्वपरनिर्वाहकत्वं वा समाधानं तु अधिष्ठानस्यापारमार्थिकत्वेऽपि सुवचमिति न सत्यब्रह्मसिद्धिरिति भाव ॥

९६ अनिर्वाच्यत्वानुपपत्ति

अथानिर्वाच्यत्वेन नानुपपत्ति प्रक्रमते इत्यत आह—**अनिर्वचनीयत्वं च किमभिप्रेतमिति ॥ सर्वं सर्वप्रतीतेरिति ॥** सदसद्विलक्षणमिति बुद्धे सदसदेव विषय स्यात् समुच्चयविलक्षणतुरीयकोट्यनभ्युपगमादित्यर्थ । सर्व हि वस्तु स्वरूपेण सद्रूप पररूपेणासद्रूप, य प्रतीतेर्विषय स एवाकार इति भाव । उभयरूपत्वमेकस्य विरुद्धमिति चेत् उभयविलक्षणत्वमपि तथैव । तत्रोभयात्मकत्व दृष्ट, अनुभयात्मकत्व तु अदृष्ट कल्प्यमिति विशेष । ख्यातिबाधानुपपत्तिस्तु समुच्चयपक्षेऽपि शक्यते प्रशमयितुमित्यवधेयम् ॥

९७ प्रमाणानुपपत्ता प्रत्यक्षम्

अथ मानसिद्धोऽर्थो न तर्कबाध्य इति शङ्कामनूद्य प्रमाणानुपपत्तिरुच्यते - **अथ स्यादिति ॥** निरवद्यमित्यन्तेन शङ्कानुवाद । अस्य विचारस्य पञ्चपादिकाविवरण मूलम् । (१२ पु) अत्राध्यासपदं परिकल्पितवस्तुपरम् । वस्तुस्वरूपेत्यारभ्य अवगम्यते इत्यन्तेन प्राङ्निराकृतानामर्थानामनुवाद । प्रत्यक्षप्रमाणोपपादनम्—**कारणाज्ञानेति ॥** अज्ञशब्दविवरणम्—**मामित्यादि ॥** षष्ठप्रमाणमनुपलब्धि । **अभावस्य प्रत्यक्षत्वेति ॥** नेयायिकमतम् । विषयभेदेन ज्ञानज्ञानाभावयोरेकत्र न विरोध इत्यत आह—**एतदुक्तमिति ॥** निरुक्तापरोक्षावभासस्य ज्ञानसामान्याभावविषयकत्वेन ज्ञानमात्रविरोधितेति भाव ॥

समानविषयकज्ञानाज्ञानयोरसमावेशमाशङ्क्य विषयभेदात्परिह-

रति—**ननु च भावरूपमिति ॥** दृश्यस्यैव दृश्यावच्छेदकत्वात् घटादिरूपदृश्यावच्छिन्नमेव अज्ञान साक्षिदृश्य भवति । साक्षिण दृश्यत्वाभावात्तदवच्छिन्नमज्ञान कथ साक्षिवेद्य स्यादित्याक्षेपे नियमोऽय जडत्वोपाधिक , अजडस्थले सङ्कोचार्ह इति समाधत्ते—**ननु चेदं भावेति ॥ प्रमाणानधीनसिद्धिरिति ॥** दृश्यभिन्नमित्यर्थ ॥ अत्र प्रत्यक्षनिगमनम्—**तस्मादिति ॥**

९८ अनुमानम्

अथ तत्रानुमानम्—**तदिदं भावेति ॥** घटादिविषय धर्माधर्मभय-प्रागभावानादाय सिद्धसाधनवारण प्रतिलोमत· पदाना प्रयोजनम् । वस्तुतस्तु—स्वाधिकरणकालावच्छेदेनावर्तमानत्व स्वविषयावरणत्वम् । स्वप्रयोज्याभावप्रतियोगित्व स्वनिवर्त्यत्वम् । सामानाधिकरण्यसम्बन्धेन स्वविशिष्टत्व स्वदेशगतत्वम् । ततश्च- अनुलोमत परस्परतो वा प्रागभावानुकूलादृष्टप्रतिबन्धकादृष्टवेद्यगतावित्त्यभिव्यक्तिप्रागभावाना वारणाय विशेषणचतुष्टय बोध्यम् । धारावाहिकद्वितीयादिज्ञाने व्यभिचारवारणायाप्रकाशितपदम् । दिवादीपे द्वितीयादिप्रभासु च साध्यवैकल्यव्युदासायान्धकारप्रथमशब्दौ । दृष्टान्ते साध्यवैकल्यशङ्का परिहरति—**आलोकेति ॥** आलोकाभावमात्र तम इति वैशेषिकमतम्। अन्धसाधारण रूपज्ञानाभावस्तम इति तदेकदेशिन ॥

९९ प्रत्यक्षनिरास

अत्रोच्यत इति ॥ केवलेनेत्युक्ति दृष्टान्ततया । अविरोधमपि वक्ष्यन् प्रथम विरोधसाम्यमाह—**यस्त्विति ॥** प्रमाणेन भान विशदावभास· । **विशदस्वरूप विषय इति ॥** विशद स्वरूप विषय अवच्छेदक यस्येत्यर्थ· । विशदस्वरूपस्य प्रागभावावच्छेदकत्व तु स्वविषयधीद्वा-

रेण । **आश्रयप्रतियोगीति ॥** आश्रयज्ञानन्याविशदविषयत्व अविशदप्रत्यगर्थविषयकत्वम् । प्रतियोगिज्ञानस्याविशदस्वरूपविषयकत्व तु अभावप्रतियोगिभूताविशदज्ञानविषयकत्वम् । प्रत्यक्षज्ञान त्वभावप्रतियोगि । स्मृतिरूपे धर्मिप्रतियोगिज्ञाने इति भाव । मम घटज्ञान नास्ति, नाह घट जानामीत्यनुभवस्सर्वसम्मत । तदुपपादनाय प्रत्यक्षज्ञानमभावप्रतियोगि । धर्मिप्रतियोगिज्ञाने स्मृतिरूपे इत्येवसर्वैर्वक्तव्यमिति यावत् । **अन्यत्राभिनिवेशात्॥** अभिनिवेश विनेत्यर्थ । **ज्ञानप्रागभावस्त्विति॥** प्रतिबन्दितौल्येऽपि लाघवमतिरिच्यते इति भाव । मूढोऽस्मीत्यादौ मोहपदार्थोऽपि विषयाश्रयाभ्या-वच्छिन्नस्साकाङ्क्ष एवेत्यवधेयम् ॥

विरोधसाम्येपि प्रतिकूलतर्कमाह—**नित्यमुक्तस्वप्रकाशेति ॥** **अन्यतः** अविद्याख्यदोषत । अत्रान्योऽन्याश्रयश्च दोष इत्याह—**किञ्च ब्रह्मस्वरूपेति ॥** मिथ्याभूतस्य सत्तया कार्यकरत्वाभावात् अनुभवपूर्वकत्वम् । स्वानुभवस्वरूपत्वात् अस्यानुभवस्य तिरस्कारपूर्वकत्व चेति । अनुभवपूर्वकतिरस्कारमात्रपक्षे तिरोधानकल्पना आच्छादकाविद्याकल्पना च व्यर्थेत्याह—**अनुभूतमेव तिरस्करोतीति ॥** दूषणान्तरम्—**किंञ्च ब्रह्मण इति ॥** स्वत पक्षेऽनिर्मोक्ष स्वरूपनिवृत्तिश्च । अन्यत. पक्षेऽनवस्था । तिरस्कारपूर्वकानुभवपक्ष प्रतिक्षिपति—**ब्रह्म तिरस्कृत्यैवेति ॥** यौगपद्यपक्ष दूषयति—**अथेदमज्ञानमिति ॥**

वैशद्यावैशद्यानुपपत्तिमुपक्रमते— **अपिचाविद्ययेति ॥** प्रकाशमात्रेति मात्रचा विषयत्वव्यावृत्ति । लोकप्रसिद्धे वैशद्यावैशद्ये शिक्षयित्वा प्रकृते तदसम्भवमाह—**एतदुक्तमिति ॥ प्रकाशाभावादेवेति ॥** धर्म्यभावाद्धर्माभाव इत्यर्थ. । उक्तर्नात्या विषयेऽपि लोके वैशद्यावैशद्यासम्भव इत्यत आह—**विषयेऽपीति ॥** अनुपपत्तिनिगमन—**तस्मादिति ॥**

प्रागुक्ताश्रयानुपपत्तिमप्यत्र प्रतिकूलतर्कत्वेनाह—**अस्याज्ञानस्येति**॥ अपरमार्थदोषमूलभ्रमवादे अधिष्ठानमप्यपरमार्थमापततीत्याह—**अपिचापरमार्थेति**॥ स्वरूपानादितया प्रवाहानादितया दुर्घटतया स्वपरनिर्वाहकतया वाऽनवस्थापरिहारोऽधिष्ठानापारमार्थ्येऽपि तुल्य । अधिष्ठानापारमार्थ्य न दृष्टमिति चेत् दोषदोषाश्रयत्वादिकमप्यपरमार्थ न दृष्टमित्यवधेयम् । इष्टापत्तौ अनिष्टापत्ति —**इतश्च सर्वेति** ॥

१०० अनुमाननिरास

अथानुमानदूषणम्—**यदुक्तमिति** ॥ प्रकृतानुमितेरपि पक्षान्तर्गतत्वेन तत्रापि वस्त्वन्तरपूर्वकत्वसिद्धौ अज्ञानविषयकमज्ञानमनभिमत सेत्स्यतीति विरुद्धो हेतुरित्याह—**अज्ञानेऽपीति** ॥ अज्ञानान्तरसाधनावश्यभावमुपपादयति—**तत्राज्ञानान्तरेति** ॥

ननु प्रकृतानुमितेस्सम्यक्त्वे हेतुरदुष्ट । असम्यक्त्वेऽपि न दुष्ट., अप्रकाशितार्थप्रकाशकत्वस्यैव प्रमात्वलक्षणसम्यक्त्वरूपत्वेन तत्रहेतोरवृत्तेर्व्यभिचाराविरहात् इति चेदुच्यते—विकल्पोऽयमसम्बद्धः, प्रकृते अनुमितेस्सम्यक्त्व हेतुनैर्दोष्य प्रतिक्षिपति हेतुनैर्दोष्यमनुमितिसम्यक्त्व प्रतिक्षिपति । मिथ प्रतिक्षेपकत्वात् समुच्चित्य स्थित्यभावात् अन्यतराभावेऽपि न साध्यसिद्धिरिति ॥

अथेदमनुमानमप्रकाशितमज्ञान न प्रकाशयति, किंतु साक्षिचैतन्यसिद्धस्यैवाज्ञानस्याभावाद्विवेचन करोतीति चेदत्राप्युच्यते—अज्ञान साक्षिगोचर इति सङ्केतमात्रम्, कस्मिन्नपि दर्शनान्तरे तथाऽनभ्युपगमात् । प्रायेण सर्वेष्वपि दर्शनेषु ज्ञातुरहमर्थस्यात्मत्वाभ्युपगमात् सर्वस्यापि तदीयज्ञानवेद्यत्वाभ्युपगमात् । ततश्चाहमर्थविलक्षणसाक्षिसिद्धौ

अज्ञानसिद्धिः। तत्सिद्धावहमर्थस्य कल्पितत्वेन विलक्षणसाक्षिसिद्धिरित्यन्योन्याश्रयदोषोऽस्त्येवेति ॥

साधने चेति ॥ स्वविषयावरणत्वादिति भाव । **निष्फलेति ॥** मिथ्याऽर्थो न सत्तया कार्यकृदिति तिरोधानरूपकार्यकरत्वाभावादित्यर्थ । साक्षाद्भासकत्वलक्षणप्रकाशकत्वस्य हेतुत्वे दृष्टान्तस्य साध्यविकलतेत्याह—**दृष्टान्तश्चेति ॥** विरोधिनिरासकत्वात्सकलस्य प्रकाशकत्वस्य हेतुत्वे तस्यैव साध्यत्वात् असिद्धिरित्याह—**न हि विरोधीति ॥** संप्रतिपन्न प्रकाशकत्व विशदयति—**अपिचेति ॥** परपरया प्रकाशकत्वस्य हेतुत्वे इन्द्रियादिष्वनैकान्त्यमित्याह—**यद्युपकारकाणामिति ॥**

अथानुमानस्य प्रतिकूलतर्कानाह—**प्रतिप्रयोगाश्चेति ॥** व्याप्तिमूलत्वात् प्रयोगपदप्रयोग । स्वदेशगतत्वस्वविषयावरणत्वस्वनिवर्त्यत्वानाक्रमेण तर्कत्रयम् । अत्राज्ञान पक्षीकृत्य प्रसङ्गत्रयम् । ब्रह्म पक्षीकृत्य प्रसङ्गत्रयम् । प्रमाणज्ञान पक्षीकृत्य प्रागभावातिरिक्तत्वस्य प्रतिकूलतर्क एक । निवर्त्यत्वांशस्यान्वयव्यतिरेकाभ्या द्वौ प्रतिकूलतर्कौ। व्यर्थविशेषणत्वं चेति त्रयोदश दोषा द्रष्टव्या । तत्र भावरूपमज्ञान ज्ञानरूप ब्रह्म चाभ्युपगम्याद्य तर्कत्रयम् । अत्र ज्ञाता जीव । अज्ञानत्वे ज्ञानानाश्रयत्वप्रसङ्ग ज्ञानानावरणत्वप्रसङ्गश्च । ज्ञेयानावरणत्वे ज्ञानानिवर्त्यत्वप्रसङ्ग इति आद्यप्रसङ्गत्रयशरीराणि ॥ **ब्रह्म नाज्ञानेति ॥** अज्ञानाश्रयत्वे ज्ञातृत्वप्रसङ्ग । अज्ञानावरणत्वे ज्ञेयत्वप्रसङ्ग । ज्ञाननिवर्त्याज्ञानवत्त्वेऽपि ज्ञेयत्वप्रसङ्ग । **विवादाध्यासितमिति ॥** प्रमाणज्ञानपक्षकास्तर्काः । प्रमाणज्ञानत्वे प्रागभावातिरिक्ताज्ञानपूर्वकत्वाभावप्रसङ्ग । वस्तुविनाशकत्वे ज्ञानत्वाभावप्रसङ्ग । तस्य व्यतिरेकः ज्ञानत्वे वस्तु-

विनाशकत्वाभावप्रसङ्ग इति । अत्र द्वितीयतृतीययो व्यभिचार शङ्कते—**अथोच्येतेति** ॥ वस्तुशब्दस्य भावे प्रचुरप्रयोगात् प्रथमदल व्यर्थम् । एवमन्तरपद चेत्याह—**स्वप्रागभावेति** ॥

एवमज्ञाने प्रत्यक्षमनुमान च निराकृत्य श्रुति तदर्थापत्ति च निराकर्तु प्रतीक्षा विधत्ते—**श्रुतितदर्थापत्तिभ्यामिति** ॥ कार्यकारणयो सालक्षण्यमावश्यकमिति कार्य मिथ्याकारणक मिथ्याभूतत्वात् सामान्येन घटकटकादिवत् इत्यनुमानमपि नविलक्षणन्यायेन व्याप्यत्वासिद्ध-मित्याह—मिथ्यार्थम्येति ॥

१०१ ख्यातिविचार

कार्यम्य विलक्षण मिथ्यात्वमप्यसिद्धमिति बिस्तरेणाह—**प्रतीतिभ्रान्तीति** ॥ शुक्तिरूप्यादेरिति शेष । पूर्वपक्षे विस्तरोऽस्य द्रष्टव्य । **प्रतीयमानमेव हीति** ॥ उल्लिख्यमानमेव हीत्यर्थ । **आभिः** प्रत्यक्ष-भूताभि प्रतीतिभ्रन्तिबाधरूपाभि । **प्रतीत्यन्तरेण** आगमादिजन्य-ज्ञानेन । पूर्वज्ञानेन बाधकज्ञानेन चेत्यर्थ । अत्र सर्वसम्मतप्रतीतिविषय-भूत परमार्थ रजतादिकमेव दोषवशात् पूर्व स्वानधिकरणे सदिति भासते । दोषनाशादनन्तरमसदिति च । तावतैव ख्यातिबाधोपपत्ते कुसृतिः निर-वकाशा । ततश्च मिथ्यात्वमपारमार्थ्य च स्वानधिकरणे प्रतीयमानत्वम् । असत्वञ्च तत्तन्निष्ठात्यन्ताभावप्रतियोगित्वम् । तुच्छलक्षण निरुपाधिकोऽ-भाव माध्यमिक विना न केनाप्यभ्युपगत इति भाव ॥

उक्तार्थम्यैव प्रपञ्चः—**शुक्त्यादिष्विति** ॥ **अयोगादिति** ॥

परस्मिन् भासमाने तु न परं भासते यतः ।
तेनान्यस्यान्यथाभानं प्रतीत्यैव पराहतम् ॥ (१८१ पु) ॥

इत्यभिप्राय. । कथमन्यथाभानावर्जनीयत्वमित्यत्राह—**कल्प्यमानं हीति** ॥ अलौकिकसदभ्युपगमेऽपि तुल्यो दोषः, तस्य लौकिकसता भेदाग्रहे

सम्प्रतिपन्नस्यैव भेदाग्रहकल्पन वर लाघवादिति भावः । **यथार्थख्याति-व्यतिरिक्तेषु अन्यथाख्याते**· प्राबल्यमभिप्रयन्नाह—**ख्यात्यन्तरेति ॥** असदिति प्रतीत चेत् प्रवृत्तिबाधभ्रमत्वायोग· । सदिति चेदन्यथाभानम्। एव सर्वत्र । आत्मख्यातीत्यत्रात्मशब्दो ज्ञानपरः । **अख्यातीति ॥** ज्ञानमेकमनेक वेति विकल्प । प्रथमस्य दूषण—**अन्यविशेषणमिति ॥** समानाधिकरणधीबलादापादित न तु तथोपगतम् ॥

अनिर्वचनीयरजतादौ हेतुप्रख्योपाख्यानुपपत्तीः क्रमेणाह—**किञ्चानिर्वचनीयमिति ॥ महतामित्यत्र** विपरीतलक्षणा । **दोषस्य** इन्द्रियस्य दुष्टस्य वा इन्द्रियस्य न कारणत्वमित्याह—**अथेन्द्रियादीति ॥ अनादीति ॥** आनिर्वाच्यस्याप्रामाणिकत्वादित्यर्थ । प्रख्योपाख्यानुपपत्ती आह—**किञ्चापूर्वमिति ॥ स्यातामिति ॥** परमार्थापरमार्थयोरन्वयो व्यभिविरुद्ध इत्यर्थ । **निर्वाहकत्वायोगाच्चेति ॥** असत्यात्सत्यप्रतिपत्तिनिरासादिति भाव· ॥

१०२ यथार्थख्याति

अथ यथार्थख्यातिवाद स्वसिद्धान्तमाह—**यथार्थं सर्वविज्ञानमिति ॥** अत्र सर्वसर्वात्मकत्वसिद्धान्तः । सोऽयम्—

नानात्मकानामेकत्वं नानात्वं च विपर्यये ।
सर्वात्मकत्वादर्थस्य नैरात्म्याद्वा व्यवस्थितम् ॥

इति भर्तृहरिणा (१८६ पु) नूदित । कुमारिलादिभिरुपबृंहित । **तेनाभिधाभिदेति ॥** भूयस्त्वेन व्यपदेशव्यवस्थेत्यर्थ । सदृशे सदृशान्तरैकदेशसद्भाव दर्शयति—**सोमेति ॥ श्रुत्यैव** त्रिवृत्करणश्रुत्या प्रतिनिधिश्रुत्या वा **बोधितः** बोधः फलित· । शब्दव्यवस्थामाह—**रूप्यशुक्तीति ॥** भ्रमप्रवृत्तिबाधानामुपपत्तिमाह—**कदाचिच्चक्षुरिति ॥ शुक्तिभूयस्त्ववैकल्यग्रहः** शुक्तिभूयस्त्वाग्रहः भ्रमः । तत्साकल्यग्रहः

बाधः । मिथ्यार्थविषयो भ्रम , सत्यार्थविषय बाध इति परमत न सिद्ध्यतीत्याह—**नात इति** ॥ मिथ्यासत्यशब्दौ पराभिमतमिथ्यात्व-सत्यत्वपरौ । तथाचात्रापूर्वरजतकल्पना सङ्केतमूला दूरोत्सारितेति भाव ॥

त्रिवृत्करणश्रुतिप्रतिनिधिश्रुतिभ्यामनिर्वाह्य स्वाम्नार्थ श्रुत्यन्तरेण निर्वहति—**स्वप्ने च प्राणिनामिति** ॥ **रथयोगाः** रथे योक्तुमर्हा अश्वादयः । सुन्दरवस्तुदर्शनेन जाता प्रीतिरानन्द । स्वीयत्वधिया जाता मुत् । उपयोगेन जाता प्रमुदिति विशेष । स्पष्ट श्रुत्यन्तरम्—**य एषु सुप्तेष्विति** ॥ अयमेव सम्प्रदाय इत्याह—**सूत्रकारो हीति** ॥ अपूर्वसृष्टावुपपत्त्यन्तरम्—**अपवरकादिष्विति** ॥ ईश्वरसृष्ट्यनिर्वाह्य भ्रम-मुपपादयति—**पीतशङ्खादाविति** ॥ **तद्ग्रहणजनितेति** ॥ यथा नेदि-ष्ठदशागृहीतगृध्रस्य दविष्ठदशायामपि पूर्वग्रहणजनितसस्कारसचिवच-क्षुषा ग्रहण तथाऽत्रापीति भाव । निरुक्तन्यायानिर्वाह्य स्थल निर्व-हति—**जपाकुसुमेति** ॥ **मरीचिकाजलेति** ॥ अदृष्टस्य नियामकत्व साधारणाकारग्रह. असाधारणाकाराग्रहश्चेत्यादिक सर्वैरुपेतम् । मन्त्रार्थ-वादप्रामाण्येन त्रिवृत्करणादिश्रुत्यर्थस्वीकार गुरुमताद्विशेष ॥

अलातेति ॥ **अन्तरालाग्रहणादिति** ॥ अलातस्य तत्तत्प्र-देशेन पूर्वापरकालसयोगयो मध्यकालाग्रहणात् क्रमाग्रहणादित्यर्थ । **दर्पणेति** ॥ विपर्यस्तसव्यदक्षिणभागस्य दर्पणस्य मुखस्य च निरन्तर-भानात्तथा प्रतीति । **दिङ्मोहेति** ॥ दिगन्तरोपाधे. दिगन्तरस्य नीर-न्ध्रधीरवधेया । पीतशङ्खादिदिङ्मोहपर्यन्तेषु प्रतिबिम्ब विना पञ्चसु स्थलेषु द्रव्यान्तरससर्गान्निर्वाह ॥

द्विचन्द्रज्ञान निर्वहति—**द्विचन्द्रेति** ॥ चाक्षुषतेजोगतिरूप-सामग्रीद्वयजन्यमतिशैघ्र्यादगृहीतक्रममगृहीतभेद च ज्ञानद्वयमगृहीतै-

कत्व च चन्द्रमगृहीतान्तराल देशान्तरं च निरन्तर गृह्णाति, ततो द्विचन्द्रव्यवहार इति प्रकृतार्थः । **देशान्तरस्येति ॥** निरन्तरमप्रधानत्वेनभातत्वमेव सर्वत्रविशेषणत्वमित्यर्थ । **ग्राह्याकारद्वित्वं** निरन्तरभातदेशद्वित्वम् । चन्द्रैकत्वाग्रहमुपपादयति—**तत्रविशेषणद्वयेति ॥** सोऽय देवदत्त इत्यादौ सम्कारसहकृतमेव चक्षुरैक्यग्राहकम् । प्रकृते सम्कारस्य विलम्बितभावित्वान्न तद्ग्रह इत्यर्थः । यथार्थख्यातिवाद निगमयति —**अतस्सर्वमिति ॥**

नेत्रवृत्ती द्विधा भूता द्वे तु वित्ती वितन्वती ।
द्वित्वं चन्द्र च युगपत् निर्भासयति तत्र नः ॥

इति प्राभाकरा वित्तिगतद्वित्वमगृहीतासर्गक भासत इति वदन्ति । सिद्धान्ते तु देशगत द्वित्वमिति विशेष ॥

अथवेति—समंजसामित्यन्तं भाष्य बहुषु श्रीकोशेषु न दृश्यते । अथापि व्याख्यातृभि व्याख्यातमिति श्रुतप्रकाशिकादिषूक्त्वा व्याख्यातम् । **सेत्स्यति उपपद्यते** इति मानतर्कसिद्धिरुक्ता । अत्र स्वाप्नप्रपञ्चवैचित्र्य परमार्थमित्युपपाद्य दृष्टान्तासिद्धिरनिर्वचनीयत्वे प्रदर्शिता भवति॥

१०३ श्रुत्यादिदूषणम्

अथानिर्वचनीयाविद्यायां श्रुतिमसिद्धयति—**यत्पुनस्सदसदिति॥** "एत ब्रह्मलोक न विन्दन्ति अनृतेन हि प्रत्यूढा " इति श्रुति कर्मबद्धससारिविषया, ऋतशब्दस्य कर्मपरत्वात् " नासदासीत् " इतिश्रुतिरपि प्रलयसमये सदसच्छब्दवाच्यव्यष्टिचेतनाचेतनशून्यतापरा । शङ्कते—**सत्यं तम इति ॥** पुनश्शङ्का —**मायेति ॥ यथोक्तं तेन मायेति ॥** इद विष्णुपुराणे प्रह्लादोपाख्यानवचनम् । न हि रज्जुसर्पे शस्त्रच्छेद्य इति भवः ॥

श्रुत्यर्थापत्तिं व्युदस्यति—**नाप्यैक्येति** ॥ वेदान्तव्युत्पत्तिं सूचयति—**अनेन जीवेनेति** ॥

१०४ स्मृतिप्रमाणदूषणम्

उपबृहणयोस्तदप्रतीतिमाह—**इतिहासेति** ॥ अत्रैव विष्णुपुराणे (२-१२-३८) भुवनकोशदशश्लोकी—

यदम्बु वैष्णवः कायः ततो विप्र वसुन्धरा ।
पद्माकारा समुद्भूता पर्वतादध्यादिसंयुता ॥
ज्योतींषि विष्णु. भुवनानि विष्णुः
वनानि विष्णुर्गिरयो दिशश्च ।
नद्यस्समुद्राश्च स एव सर्वं
यदस्ति यन्नास्ति च विप्रवर्य ॥ १ ॥
ज्ञानस्वरूपो भगवान्यतोऽसा-
वशेषमूर्तिर्न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदान्
जानीहि विज्ञानविजृम्भितानि ॥ २ ॥
यदा तु शुद्धं निजरूपि सर्वं-
कर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि सङ्कल्पतरो. फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः ॥ ३ ॥
वस्त्वस्ति किं कुत्रचिदादिमध्य-
पर्यन्तहीनं च सदैकरूपम् ।
यच्चान्यथात्वं द्विज याति भूयः
न तत्तथा तत्र कुतो हि तत्त्वम् ॥ ४ ॥
मही घटत्वं घटतः कपालिका
कपालिकाचूर्णरजस्ततोऽणुः ।
जनैस्स्वकर्मस्तिमितात्मनिश्चयैः
आलक्ष्यते ब्रूहि किमत्र वस्तु ॥ ५ ॥

तस्माच्च विज्ञानमृतेऽस्ति किंचि-
त्क्वचित्कदाचिद्द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्मभेद
विभिन्नचित्तैर्बहुधाऽभ्युपेतम् ॥ ६ ॥

ज्ञानं विशुद्धं विमलं च नित्य-
मशेषलोभादिनिरस्तसङ्गम् ।
एकस्सदैकं परमः परेश-
स्स वासुदेवो न यतोऽन्यदस्ति ॥ ७ ॥

सद्भाव एवं भवतो मयोक्तः
ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत्संव्यवहारभूतं
तत्रापि चोक्तं भुवनाश्रितं ते ॥ ८ ॥

यज्ञः पशुर्वह्निरशेषक्रत्वि-
क्सोमस्सुरास्स्वर्गमयश्च कामः ।
इत्यादिकर्माश्रितमार्गदृष्टं
भूरादिभोगाश्च फलानि तेषाम् ॥ ९ ॥

यच्चैतद्भुवनगतं मया तवोक्तं
सर्वत्र व्रजति हि तत्र कर्मवश्यः ।
ज्ञात्वैतत् ध्रुवमचलं सदैकरूपं
तत्कुर्याद्विशति हि येन वासुदेवम् ॥ ४७ ॥ १० ॥

इय भुवनकोशदशश्लोकी। तत्र द्वितीयतृतीयषष्ठसप्तमाष्टमा पञ्चश्लोकाः पूर्वपक्षे समुदाहृता । अस्या पूर्वपक्षरीत्या तात्पर्यमनुवदति --**ननु ज्योतींषीति** ॥ अत्र बाधायां सामानाधिकरण्यं चोर स्थाणुरितिवत् । स्थाणुरेवाय न चोर इति तदर्थ । **विशुद्धं विमलं** अविद्यातत्कार्य-व्यावृत्ति. । **एकं सदैकं** सजातीयविजातीयभेदव्यावृत्ति । **संव्यवहार-भूतं** व्यवहारार्हं यदेतत्सर्वं तत्राप्यज्ञानमेव कारणमिति प्रोक्तमित्यर्थः ॥

अत्र पौर्वापर्यपरामर्शेन सिद्धान्ततात्पर्यं विशदयति—**नैतदेवमिति॥** अत्र ज्ञानतदन्यसत्यासत्यास्तिनास्तिशब्दा. चेतनाचेतनपरा । अविद्याऽज्ञानादिशब्दा कर्मपरा । एकाद्वितीयादिशब्दा प्रकारैक्यपरा । भेदविकारादिशब्दा देवमनुष्यादिदेहपरा । सामानाधिकरण्य शरीरात्मभावनिबन्धनम् । इत्यादयोंशा सिद्धान्तशिक्षणीया । अत्र सक्षिप्य उपदिष्टोऽर्थ एष - चेतनाचेतनयो स्वरूप तदुभयस्य भगवच्छरीरत्व च । **एतद्रूपमिति ॥** अर्थरूपमित्यर्थ ॥

उक्तमुपपादयति—**तथाहि यदम्बु वैष्णव इति ॥** परोक्तार्थाननुगुणत्वमाह—**अत्र निर्विशेषपर इति ॥** अस्तिनास्त्यादिशब्दानां निरुक्तार्थपरत्व न साङ्केतिकमित्याह—**एतदुक्तं भवति ज्ञानेति॥** यथावस्थिततत्त्वत्रयनिरूपणपर विष्णुपुराणमित्यनुभाषणेन निर्णीतमित्याह—**श्रोतुश्च मैत्रेयस्येति ॥**

१०७ विवर्तकानुपपत्ति

अथ निवर्तकानुपपत्ति—**यदुक्तं निर्विशेषब्रह्मविज्ञानादिति ॥** बह्वीभ्य श्रुतिभ्य सविशेषब्रह्मविज्ञानस्यैव मोक्षहेतुत्वावगमात् तादृशज्ञान भवदीयाया अविद्याया न निवर्तकमित्यनिर्मोक्षप्रसङ्ग इति भाव ॥

१०६ सामानाधिकरण्यम्

अथ सामानाधिकरण्यानुपपत्त्या परोक्तनिर्विशेषधिय उपायत्व व्युदस्यति—**तत्त्वमस्यादीति ॥** शाब्दसामानाधिकरण्यविषये एवं विकल्पा पराभिमता । सत्यज्ञानादिवाक्येषु सामानाधिकरण्यमतद्व्यावृत्तिमुखेन वस्त्वैक्यपरम् । तत्त्वमस्यादिषु जीवब्रह्मणो अन्वयमुखेनोपलक्षितवस्त्वैक्यपरम् । सर्वं खल्विद ब्रह्मेत्यादिषु अचिद्ब्रह्मणो अतात्विकरूपारोपणेन वस्त्वैक्यपरम् । ज्योतीषि विष्णुरित्यादिषु इतरव्यावृत्तिलक्ष-

णापवादरूपबाधमुखेन वस्त्वैक्यपरम् । इति चतुर्धा सामानाधिकरण्यं परा-भितम् । अपिच शारीरकभाष्ये (३-३-१०) "व्याप्तेश्च समजसम्" इति सूत्रे अपर चतुर्विध बुद्धिसामानाधिकरण्यमुक्तम् । यथा—अध्यासाप-वादैकत्वविशेषणभेदेन । अध्यास प्रतिमादिषु विष्णुबुद्धि । अपवाद तत्त्वमसीत्यादिबुद्धि । अनया देहात्मबुद्धिरपोद्यते । एकत्व अनतिरिक्ता-र्थत्वलक्षण द्विजोत्तमो ब्राह्मणो भूमिदेव इत्यादि । विशेषण सङ्कोच-लक्षण नील यदुत्पल तदानीतित्यादौ । एव व्यवहारवैचित्र्यस्य मूल शब्दबुद्धयोरविवेकमूलविज्ञानवादवासनेति विवेचका विदामासु । सिद्धान्ते तु सर्वत्र अनेकविशेषणविशिष्टैकविशेष्यबोधकत्वमेव सामाना-धिकरण्य शाब्दमेकमिति निर्णय । अत्रसामानाधिकरण्य स्वरूपार्थमुता-पवादलक्षणनिवृत्तिरूपबाधार्थ वेति विकल्प । आद्ये पक्षे सामानाधि-करण्यलक्षणहानि लक्षणापत्ति उपक्रमविरोध प्रतिज्ञाविरोध सक-लापुरुषार्थाश्रयत्वापत्तिश्चेति पञ्च दोषा । द्वितीये अधिष्ठानलक्षणा निवृ त्तिलक्षणा बाधकादर्शन विरुद्धधर्मानुपस्थितिश्चेति चत्वारो दोषा ॥

अयमत्र पदार्थ —**बाधार्थत्वे चेति** ॥ एकेन पदेनाधिष्ठाने लक्षिते परेण धर्मान्तरनिवृत्तिर्लक्ष्येति लक्षणाद्वय रज्जुस्सर्प चोर स्थाणु-रित्यादौ प्रसिद्धम् । **इयांस्तु विशेषः** अधिक दोषद्वयमित्यर्थः । रज्जु-स्सर्प इत्यादौ वाक्ये प्रत्यक्षादिप्रमाणेनैक्यानुपपत्तिलक्षण बाधकदर्शन-मस्ति तथा रज्जुत्वरूपधर्मान्तरस्य सर्पत्वविरुद्धस्योपस्थापन च रज्जुपदेन वर्तते। तदुभयमत्र बाधकल्पकम्। तादृशमुभय तत्त्वमसीत्यत्र नास्तीत्यर्थ । विरुद्धधर्म एवोपस्थाप्य इति न नियम , विरुद्धार्थोपस्थापनमेव बाधकल्प-कमित्याशङ्क्य परिहरति—**अधिष्ठानमिति** ॥ अधिष्ठानमतिरोहित-स्वरूपं यथा भवति तथोपस्थाप्यत इति क्रियाविशेषणम् । तदाश्रये-

त्याश्रयशब्दो विषयपर । **भ्रमाश्रयमधिष्ठानमिति ॥** आश्रयशब्दस्य नित्यपुल्लिङ्गतया आश्रयोऽधिष्ठानमिति पाठस्स्यादिति श्रुतप्रकाशिकाचार्यास्सूचयन्ति । **अधिष्ठानातिरेकिपारमार्थिकेति ॥** रज्जुत्वमिथ्यात्वे सर्पसत्यत्वप्रसङ्ग इति भाव । विरोध्याकारस्यापारमार्थ्येऽपि भ्रमनिवृत्तिरुपपद्यते । यथा—"भ्रमरी भ्रमरभ्रमेण वृन्ते यददावभ्रममाश्लिषत्पलाशम्" इति । तत्रापि पुष्पत्ववृन्तत्वादीना पारमार्थ्यात् । अन्यथा भ्रमपरपैरेव शरणमिति ॥

स्वसिद्धान्तमाह—**जीवशरीरकेति ॥ एकविज्ञानेनेति ॥** कार्यकारणयोरेकद्रव्यत्वात् प्रतिज्ञोपपत्तिरित्यर्थ । विशेषणाज्ञानेऽपि विशेषमात्रज्ञानेन ज्ञातत्वव्यवहार मुख्य सोय देवदत्तो मया ज्ञातपूर्व इत्यादिः प्रसिद्ध इति भाव । **उद्देश्योपादेयविभाग कथमिति ॥** मानान्तरावगतस्यैवोद्देश्यतया जीवशरीरकब्रह्मणोऽनवगतत्वात्तत्पर्यन्तस्योद्देश्यत्वासम्भवात् जीवमात्रमुद्दिश्य तस्य ब्रह्मभावो विधीयत इत्युपगन्तव्यमिति शङ्कितुराशय । अस्य वाक्यस्य प्राप्तविषयत्वात् उक्तार्थप्रतिष्ठार्थनिगमनरूपत्वेन उपदिष्टत्वादत्रोद्देश्यविधेयभाव एव नास्तीति समाधातुराशय । **ऐतदात्म्यमिति ॥** इद सर्वमस्य सदात्मकत्वरूपविधेयसमर्पकम् । **एष** आत्मा यस्य तदेतदात्म, तदेवैतदात्म्यम्, स्वार्थे ष्यञ्चातुर्वर्ण्यब्राह्मण्यादिवत् । **सदायतना इति ॥** अनेनाधाराधेयभावस्सिद्ध । चेतनेन यावदात्मभावितया धार्य द्रव्य हि शरीरम् । हेतुत्वप्राकट्याय वाक्यान्तरम्—**सर्व खल्विति ॥** अस्य च वाक्यस्य कार्यकारणावस्थप्रकार्यैकत्वमर्थ । स्वप्रकरणवाक्य **अनेन जीवेनेति ॥ जीवेन** जीवशरीरकेण **आत्मना** मयेत्यर्थ । "सिहेन भूत्वा बहवो मयाऽत्ता" इतिवत् । **वस्तुत्वं** तत्तद्देवादिवस्तुत्व **शब्दवाच्यत्वं** देवादिशब्दवाच्यत्वम् ।

ब्रह्मानुप्रवेशादेवेति ॥ न स्वरूपैक्यादित्यर्थ. । ऐतदात्म्यशब्दव्याख्यानोपसहार —**अतस्सर्वशब्दानामिति ॥** ऐतदात्म्यमिद सर्वमिति वैयधिकरण्येन सामान्येनोक्तस्य तत्त्वमसीति सामानाधिकरण्येन विशेषेणोपसहार इति भाव । तत्त्वमसीत्यत्र पुरुषव्यवस्था तु "प्रकृत्याश्रय. पुरुषो भवति" इति महाभाष्यवचनात्प्रकृतित्वविवक्षानिबन्धना । प्रकृतित्व च तत्पदार्थस्य तात्पर्यभूमित्वम् । अत एव "यदग्ने त्व स्यामहमह वा त्व स्या" इत्यत्दौ विवक्षाधीनो नियमः । अतएव च न्यायपरिशुद्धौ सुवर्णे खदिराङ्गारसदृशे कुण्डले भवत इत्यादिप्रयोगात् उद्देशानुसारित्वनियमाभावस्समर्थित. ॥

१०७ अपर्यवसानवृत्ति

शरीरवाचकशब्दस्य शरीरिणि मुख्यत्वे प्रमाण पूर्वमीमासाऽऽकृत्यधिकरण (१-३-१०) उपजीव्य प्रवृत्तमुत्तरमीमांसागतमशाधिकरण (२-३-७) अभिमतम् । आकृत्यधिकरणे हि जातिगुणवाचकपदानां द्रव्यपर्यन्तत्वं व्यवस्थापितम् । तत्र जातिवाचकत्व गुणवाचकत्व वा मिथ. व्यभिचारेण प्रयोजकमिति वक्तु न शक्यत इत्यनुगतप्रयोजकपरीक्षायां अयुतसिद्धविशेषणवाचकत्व प्रयोजकमित्याकृत्यधिकरणसिद्धोऽर्थ. । इम च न्याय मनसिकृत्वा "अशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके" (२-३-४२) इति सूत्र प्रवृत्तम् । तत्र हि जीवपरयो. विशेषणविशेष्यत्वकृत स्वभाववैलक्षण्यमाश्रित्य भेदनिर्देशा. प्रवर्तन्ते । अभेदनिर्देशास्तु पृथक्सिद्धयनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य मुख्यत्वेनोपपद्यन्ते इति सिद्धान्त. कृत । अस्य च सिद्धान्तस्याकृत्यधिकरणन्याय एव मूलम् । शरीरवाचकपदानामपि लोकवेदयोरात्मपर्यन्तत्वेन प्रयोगप्राचुर्यात् अपृथक्सिद्धविशेषणवाचकत्व विशेष्यपर्यन्त-

ताप्रयोजकमिति निर्णयः । एतेनाशाधिकरणेन निर्णीतेन न्यायेन सर्वेषां श्रुतिवाक्यानां सौहार्दं प्रदर्श्यते सिद्धान्ते । परेषा सिद्धान्तेषु चतुर्षु बहुविधो विरोधः । अतस्तान्विरोधान् प्रदर्श्य प्रागुक्त मुख्यत्वमुपपादयितुमुपक्रमते—**अतो निर्विशेषेति ॥** अतः तत्तन्नामभाक्त्वनिर्वाहकशरीरशरीरिभावश्रवणात् । **भेदाभेदवादिन इति ॥** स्वाभाविकौपाधिकभेदवादिनो यादवभास्करयोस्तन्त्रेणोक्ति । **केवलभेदवादिनः** स्वनिष्ठभेदवादिनो वैशेषिकादेरित्यर्थ । उपपादयति— **एकस्मिन्वस्तुनीति ॥ सामानाधिकरण्यतादात्म्येति ॥** तृतीयातत्पुरुष. । बाधार्थसामानाधिकरण्यनिरासादित्यर्थः । **केनापीति ॥** विशेष्याशतोऽप्यैक्यासिद्धेरित्यर्थ ॥

सिद्धन्तमाह —**निखिलेति ॥ सम्यक्त्वम्** मुख्यत्वम् । जातः पुरुष कर्मभिरित्यत्र पुरुषपद विवक्षितम् । **द्रव्यप्रकारत्वमेवेति ॥** न त्वद्रव्यत्वमित्यर्थ । **परस्परव्यावृत्ताः** परम्परानुगता । अत्र प्रतिबन्धभिप्रेता । **सामानाधिकरण्यावसेयमिति ॥** न मत्वर्थप्रत्ययेनेत्यर्थ ॥

यत्रापृथक्सिद्धविशेषणत्व तत्र विशेष्येण सहधीनियम जात्यादिषु दृष्ट । प्रकृते व्यापकनिवृत्त्या शरीरिणि देवमनुष्यादिव्यवहार लाक्षणिक इत्याशङ्क्य गङ्गापदादावनुगताकारादर्शनेन लाक्षणिकत्वाभ्युपगमेऽपि तादृशाकारदर्शनेन प्रकृते सम्भवति मुख्यत्वे क्वचिदमुख्यताकल्पन विनिगमनाविरहादनुचितमिति समाधत्ते—**यदि गौरश्व इति ॥ तत्प्रकारत्वं चेति ॥** पृथगवस्थितत्वेनाप्रतिपन्नत्व चेत्यर्थ । **जात्यादितुल्यमिति ॥** मत्त्वर्थप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोजकापृथक्सिद्धविशेषणत्वे प्रयोजक तुल्यमित्यर्थः । **तत्प्रकारत्वमपीति ॥** पृथक्स्थितत्वप्रतीत्यभावोऽपीत्यर्थ । **एतत्** निरुक्त रूपत्रयम् ॥

अपृथक्सिद्धविशेषणत्वसहधीनियमयो व्यासिरेकसामग्रीवेद्यत्व-रूपोपाधिदुष्टेत्याह —**जातिव्यक्त्योर्नियमेनेति ॥** एकसामग्रीवेद्यत्व-मेवापृथक्सिद्धविशेषणत्वे प्रयोजक स्यादित्याशङ्क्य प्रागुक्तयुक्त्या परि-हरति—**पृथग्ग्रहणेति ॥ प्रकारतैकस्वरूपत्वमिति ॥** प्रकारत्वमेव स्वरूप धर्मो यस्येति बहुव्रीहि । निरुक्तव्याप्तेर्व्यभिचारमप्याह—**यदा चक्षुषा पृथिव्यादेरिति ॥** अबाधित व्यवहार तत्र प्रमाणयति—**आत्मप्रकारतयेति ॥**

शरीरवाचकशब्दत्व यत्र तत्र शरीरिपर्यन्तत्वमित्यत्र निष्कर्षक-भिन्नत्वेन शब्दो विशेषणीय इति शङ्कासमाधानाभ्या सूचयति—**ननु च शाब्देपीति ॥** निष्कर्षकशब्देष्वपि केचिद्वैवक्षिकनिष्कर्षका । केचित् नियतनिष्कर्षका । आद्या शुक्लनीलात्मादिशब्दाः । अनन्तरा. जातिगोत्वशरीरादिशब्दा । प्रयोगाधीना त्विय व्यवस्था । **अयमर्थ इति ॥** सर्वस्य शरीरत्वेऽपि तत्प्रयुक्तदोषानवकाशादिक तत्र निरूपित-मिति भाव ॥ स्वरूपैक्यपरत्वेन पराभिमत सूत्र वाक्य च व्याचष्टे—**इदमेवेति ॥** अहमित्येव परमात्मानमुपासीतेत्यर्थ । तत्रास्मच्छब्द अन्तर्यामिपरमात्मपर्यन्त इति भाव ॥

१०८ सङ्गलितार्थ

अथ शङ्करभास्करयादवप्रकाशाभिमतविवर्तपरिणामभेदाभेदपक्षा पेक्षया स्वपक्षे सर्वप्रमाणसामरस्यलक्षण वैलक्षण्य तत्रतत्रप्रोक्त सुग्रहत्वाय सङ्कलय्य दर्शयति -**अत्रेदं तत्त्वमिति ॥ स्वरूपविवेकः ॥** स्वभावभेद अत्रोदाहृतवाक्येषु व्याख्येयव्याख्यानभावेन प्राय क्रमोऽवगन्तव्य । **भोक्ताभोग्यमिति ॥** अय समग्रो मन्त्र श्वेताश्वतरोपनिषदि (१-१२)—

एतत् ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किंचित् ।

भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्म मे तत् ॥ इति ॥

इयं श्रुति "अपिचैवमेके" (३-२ १३) इति शाङ्करसूत्रभाष्यानुसारेण सक्षेपशारीरके (३-२१२) एव व्याख्याता—सर्व त्रिविध ब्रह्म मे मह्य प्रोक्त पूर्वैरिति मन्त्रदृगाहेति । इदानीमुपलभ्यमानमुद्रितश्वेताश्वतरभाष्ये ब्रह्मामिति पद विच्छिद्य व्यख्यातम् । अतो न तद्भाष्य सम्प्रदायानुसारि, नापि शाङ्करमिति विभावयन्ति सुधिय । वेदार्थसङ्ग्रहश्रुतदीपिकाया "त्रिविध ब्रह्म चैतत्" इति पाठ स्वीकृत इत्यवगम्यते ॥

एव भेदश्रुतीरुदाहृत्याभेदश्रुतिविरोध परिहर्तु घटकश्रुतीरुदाहरति—**एवं भोक्तृभोग्येति ॥ यः पृथिवीमन्तरे सञ्चरन्निति ॥** सुबालोपनिषदियम् । **अन्तः प्रविष्टेति ॥** अन्त प्रविश्य नियामकत्वस्यैव शरीरलक्षणत्वात् शरीरात्मभावोऽनेनापि फलित ॥

अथ भेदश्रुतीरुदाहृत्य व्याख्याति—**एवं सर्वावस्थाऽवस्थितेति॥ तद्धेदं तर्हीति ॥** नामरूपाभ्यामिति विशेषणे तृतीया । अनया श्रुत्या कालविशेषोक्तमैक्य नामरूपव्याकरणाभावरूप न स्वरूपैक्यरूपमित्यवगम्यते ॥

अथ सर्वेश्रुतीनामस्मिन्नेवार्थे मुख्यत्व दर्शयन् उपक्रमगतमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञान मध्यगत कार्यकारणयोरैक्य उपसहारगत तत्त्वमसीतिसामानाधिकरण्यमित्येतत्त्रयमद्वैतप्रतीतिकारण पराभिमत निर्वहति—**अतः कार्यावस्थ इति ॥** स्वपक्षे दोषाः परै शङ्किता निराक्रियन्ते- **अतः स्थूलसूक्ष्माचिदचिदिति ॥ एवं च सति परस्येति ॥** अयमाशय —सर्वावस्थाऽवस्थितसर्ववस्तूनामन्तर्यामित्वेन सर्वदाऽवस्थानात् तत्तत्कालीनतत्तदवस्थवस्तुनियमनरूपस्यावस्थाविशेषस्याद्वारेण ब्रह्म-

णस्सम्भवात् कारणत्वकार्यत्वव्यवहार. मुख्यः । अचिद्वृतस्य चिद्वृतस्य-च सर्वविधस्यावस्थाविशेषस्य स्वाश्रयाश्रयत्वेन परम्परयाऽप्याश्रितत्व सम्भवतीति कार्यकारणादिसर्वशब्दवाच्यत्वमुपपद्यत इति च ॥

भेदनिषेधश्रुत्यर्थमाह—**सोऽकामयत बहु स्यामिति ॥ रूपतया** शरीरतया **अब्रह्मात्मकवस्तुनानात्वं** ब्रह्मान्तर्यामिकत्वरहितवस्तुभेद । विहितव्यतिरिक्तस्वनिष्ठवस्तुभेद. । विहितव्यतिरिक्तस्वनिष्ठवस्तुभेद इति यावत् । **योऽन्यत्रात्मनस्सर्वं वेदेति ॥ अन्यत्रेति** अव्यय विनाशब्दपर्यायम् । ब्रह्मण पृथग्भूत तदविनाभावरहित वस्तु वेदेत्यर्थ ॥

इममर्थ वैदिकदृष्टान्तेनोपपादयति—**चिदचिदीश्वराणामिति ॥** अयमर्थ —आग्नेय अग्नीषोमीय उपाशुयाज ऐन्द्र पय. ऐन्द्र दधि ऐन्द्राग्नश्चेति षड्यागाः । तत्राद्यत्रय पौर्णमास्या कर्तव्यमिति पौर्णमासीशब्देन व्यवह्रियते । अनन्तरत्रिकममावास्याया कर्तव्यमित्यमावास्याशब्देनाभिधीयते । एतत्त्रिकद्वय दर्शपूर्णमासयागपदेन व्यपदिश्यते । "यदाग्नेयोऽष्टाकपाल" इत्यादिभि वाक्यै उत्पत्तिविधिनामकै षण्णां यागाना स्वरूपाण्यवगम्यन्ते । "य एव विद्वान् पौर्णमासी यजते, य एव विद्वानमावास्या यजते" इति वाक्याभ्यां समुदायानुवादभ्यां कर्तव्य· कालोऽवगम्यते । "दर्शपूर्णमासाभ्या स्वर्गकामो यजेत" इत्यधिकारविधिवाक्येन स्वर्गार्थं दर्शपूर्णमासयाग कतर्व्य इत्यवधार्यते ॥

तत्र यथा विभिन्नस्वरूपस्वभावानेतान् षड्यागान् एकेनोपाधिना द्विराशीकृत्यापरेणोपाधिना एकराशीकृत्य वचोभङ्ग्या व्यवहरे कृतेऽपि षडेव यागव्यक्तय वस्तुत प्रतिपाद्यन्ते न द्वे व्यक्ती नाप्येका व्यक्ति· । तथा प्रकृते भोक्तृभोग्यप्रेरितृरूप तत्त्वत्रय शरीरात्मभेदेन द्विराशीकृत्य कार्य-

कारणभावेनैकराशीकृत्य तत्तत्पदेन व्यवहारे कृतेऽपि वस्तुतः तत्त्वत्रयमेव प्रतिपाद्यत इत्यवधेयम् । इयान् विशेष.—तत्र यागा. कर्तव्यकालबोधनाय द्विराशीकृताः । अनुष्ठानायैकराशीकृता. । तत्त्वत्रये तु शरीरात्मभावेन पारतन्त्र्यसूचनाय द्विराशीकरणम् । कारणत्वेनोपासनायैकराशीकरणमिति । कारणत्वे रक्षकत्वमन्तर्नीतमिति सर्वविद्यानुयायीदं कारणत्वमिति केषा चिदाचार्याणामभिप्राय ॥

आग्नेयादिसमुदायेऽन्यतमवाचकपदेन समुदायानभिधानेऽपि अत्र परमात्मवाचकसदादिशब्देन समुदायाभिधाने लौकिक दृष्टान्त प्रदर्शयति —**चिदचिद्वस्तुशरीरिण इति** ॥ अयमर्थ — आग्नेयादिसमुदाये प्रत्येक स्वनिष्ठ याग । अत्र तु एकस्य इतरत् द्वयमपृथक्सिद्धम्, अत· सद्ब्रह्मात्मादिशब्दा· अर्थात्प्रकरणात् सापेक्षत्वाच्च पृषदाज्यन्यायेन विशिष्टस्योपस्थापका इति । पृषदाज्यपद हि "पृषदाज्येनानूयाजान्यजति" इत्यादौ न द्रव्यान्तरपरम्, अपि तु लौकिकदधिसस्कृतप्राकृताज्यपरमिति निर्णीतम् ॥

१०१. निवृत्त्यनुपपत्ति

अथ निवर्तकाभावे निवृत्त्यनुपपत्ति —**यत्पुनरिति** ॥ **प्रपञ्चो** न ज्ञाननिवर्त्य सत्यत्वात् सत्यसर्पवत् । ज्ञान न भेदरूपप्रपञ्चनिवर्तकं अपरमार्थभूतैक्यविषयकत्वात् सम्मतवदित्यत्राशय· । **परमपुरुषप्रसादेति** ॥ उपासनस्य गरुडोपासनादिवत् देवताप्रीतिरूपादृष्टद्वारा निवर्तकत्वमित्यभिप्राय· । **मिथ्यैतदिति** ॥ "परमात्मात्मनोर्योग परमार्थ इतीष्यते" इति पूर्वार्धम् । अत्र योग ऐक्यलक्षण सबन्ध· । इष्यते इति पूर्वपक्षः । प्रमाणविरोधमुक्त्वा युक्तिविरोधमाह —**अपि च भवदिति** ॥ **तत्कल्पनाकल्पकेति** ॥ विनाशज्ञानकल्पकदोषरूपाविद्ये-

त्यर्थः । **अन्वेषणायिमिति** ॥ अनवस्थादोष इति भावः । **तदुत्पत्त्यसंभवादिति** ॥ अन्यथा विरोधपरित्यागप्रसङ्ग इति भाव· ॥

निवर्तकज्ञानाशे विरोधमभिधाय ज्ञात्रशे तमाह—**अपिच चिन्मात्रेति** ॥ मानजा धीस्साश्रयैवेति भावः । **अध्यास इति** ॥ कल्पित इत्यर्थ. । **न तस्येति** ॥ कर्तुस्सिद्धत्वात्कर्मण साध्यत्वात्कालविरोध ॥ **किं स्वरूपमिति** ॥ स्वाभाविकमित्यर्थः । **त्रिरूपत्वादिति** ॥ कर्तृकर्मक्रियात्मकानि त्रीणि रूपाणि ॥ **अस्मदीय इति** ॥ ब्रह्मणोऽपि धर्मभूतज्ञानाश्रयत्वादिति भाव· । स्वनाशप्रवृत्तिपरिहार शङ्कते—**तन्नाशस्येति** ॥ कर्तृनाशस्येत्यर्थ । तन्नाशे तिष्ठति तदुत्पत्त्यसभवादित्यभिप्रेत्याह—**भेददर्शनेति** ॥

इदमत्रावधेयम्—तत्त्वटीकायां महापूर्वपक्षेऽविद्यानिरूपणसन्दर्भे "केचिदाहु. बन्धमूलमज्ञान कर्मरूपं प्रवाहानादि । भ्रान्तिमूल त्वज्ञान इन्द्रियादिदोषोऽधिष्ठानयाथात्म्यज्ञानप्रागभावश्चेति । एतत्सर्वं तत्कार्याणि च सदसद्विलक्षणानि । सर्वमूलाविद्या त्वर्धपञ्चमाकारा । तन्निवृत्तिर्हि पञ्चमाकारेति" इति दृश्यते ॥ सर्वार्थसिद्धावपि—

अविद्यां विश्वअननीमर्धपञ्चमरूपिणीम् ।
निवृत्तिपञ्चमाकारां कल्पयन्तोऽप्यधःकृताः ॥

इति ॥ सोऽय विलक्षणोऽविद्यापरिष्कार· अविद्याभ्रान्त्यज्ञानानां वैलक्षण्याभिप्रायगर्भः । अत्र प्रपञ्चः सदसद्विलक्षणलक्षणतुरीयकोटिविश्रान्त· । तत्कारणीभूतस्तु अविद्यापदवाच्य· सार्धतुरीयकोटिविश्रान्तः । तन्निवृत्तिपदार्थस्तु पञ्चमकोटिविश्रान्तः । अनेन परिष्कारेण अविद्यानिवृत्तिविषयकपरकीयचोद्यानां परिहारः भवतीत्यभिसन्धि· ॥

परमप्रकृतस्य ब्रह्मविचारस्य कर्मसापेक्षत्व निगमयति—**तस्मादिति** ॥ वस्तुसामर्थ्यासिद्धेरित्यर्थः । **कर्मप्रवाहरूपेत्येनेननिर्वाच्यत्व-**

व्युदासः । **उक्तलक्षणेत्यनेन** वाक्यार्थज्ञाननिरास । **तत्रकेवलेति ॥** कर्मणामेव अल्पास्थिरफलत्वानन्तस्थिरफलत्वयोः कथन फलद्वारा हानार्थं स्वरूपेणोपादानार्थम् ॥

23 प्रथमसूत्रतात्पर्यार्थः.

११० अधिकार्यभाव

एव महता प्रबन्धेन बन्धस्य सत्यत्वव्यवस्थापनेन धी न कर्मसमुच्चिता इत्यनुमाने मिथ्याभूतवस्तुबाधनपर्याप्तत्वलक्षण सामर्थ्यहेतुरसिद्धीकृत. । ततश्च कर्मविचारो न ब्रह्मविचारपूर्ववृत्त विद्यासमुच्चयानर्हविषयकत्वादिति लघुपूर्वपक्षमूलभूतप्रत्यनुमाने हेतुरप्यसिद्धीकृत. । ततश्च कर्मविचारो ब्रह्मविचारपूर्ववृत्त ब्रह्मविचारनियतपूर्ववृत्तित्वादिति युक्ति व्यवस्थाप्य अथशब्द. आनन्तर्यार्थक असाधारणवृत्तविशेषादृष्टिलक्षणप्रसिद्धयपवादकलिङ्गाभावादिति युक्ति समर्थिता । तथैवातश्शब्देऽपि ॥

एव सूत्राक्षरार्थमुक्त्वा तात्पर्यार्थ वक्तुमारभते—**तत्र पूर्वपक्षवादीति ॥** यथा पूर्वतन्त्रे अध्ययनस्याचार्यकाधिकारकत्वात् न शास्त्रमारम्भणीयमिति पूर्वपक्ष कृत्वाऽर्थज्ञानाधिकारकत्वादारम्भणीयमिति सिद्धान्त प्राभाकरै कृत. । यथा वा—अध्ययनस्य स्वर्गार्थत्वात् न शास्त्रमारम्भणीयमिति पूर्वपक्ष कृत्वा अर्थज्ञानार्थत्वादारम्भणीयमिति सिद्धान्तः भाट्टै कृत. । एवमत्रापि सिद्धव्युत्पत्त्यभावात् न शास्त्रमारम्भणीयमिति पूर्वपक्ष कृत्वा कार्यव्युत्पत्तेरेवासभवादारम्भणीयमिति सिद्धान्तः क्रियते ॥

अयमत्र सारार्थः—यथा पूर्वतन्त्रे वेदाचार्यो जैमिनिः "स्वाध्यायोऽध्येतव्य." इति श्रुत्यर्थमनुसन्धाय "अथातो धर्मजिज्ञासा" इति

सूत्रयामास, तथा वेदान्ताचार्यो बादरायण· "परीक्ष्य लोकान्" इति श्रुत्यर्थमनुसन्धाय "अथातो ब्रह्मजिज्ञासा" इति सूत्रयामास ।

अत्राधिकारी विषयः सबन्धश्च प्रयोजनम् ।
चतुस्सूत्र्या सूचितं स्यात् प्रवृत्त्यङ्गचतुष्टयम् ॥

"परीक्ष्य लोकान्" इति श्रुत्या च न्यायसिद्धार्थानुवादेन ब्रह्मविचाराय गुरूपसदन नियम्यते शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषण न कुर्यादिति । तथाच विचारकर्तव्यत्वप्रसक्ति । अत्रेत्थमाशङ्का—वेदान्तवाक्यार्थपरीक्षारूप· ब्रह्मविचार न कर्तव्य —प्रेक्षावत्प्रवृत्त्यनर्ह· । विशिष्टाधिकारिशून्यत्वात् । काकदन्तपरीक्षावत् । सा चेत्थ सगृहीता—

काकस्य कति वा दन्ताः मेषस्याण्डं कियत्पलम् ।
कम्बले कति रोमाणि का वार्ता चोलमण्डले ॥

इति। प्रकृते अधिकारिवैशिष्ट्य तु कर्मविशेष्यकाल्पास्थिरफलत्वप्रकारकनिर्णयविशिष्टब्रह्मविशेष्यकानन्तस्थिरफलत्वप्रकारकापातप्रतीतिमत्त्वम् । तादृशाधिकारिशून्यत्व च शब्दस्य सिद्धवस्तुबोधनसामर्थ्यावधारणरूपसिद्धव्युत्पत्तिविरहेण वेदान्तवाक्यस्य सिद्धे ब्रह्मणि तात्पर्यग्रहविरहात् यत् यादृशार्थतात्पर्यग्रहशून्य तत्तादृशार्थनिर्णायकाधिकारिशून्य यथा यूपादित्यैक्यतात्पर्यशून्य "आदित्यो यूपः" इत्यादिवाक्यम् ॥

१११ सिद्धव्युत्पत्तिविरह

सिद्धव्युत्पत्तिविरहश्च प्राथमिकव्युत्पत्तिग्रहस्य नियोगरूपकार्यान्वितविषयकव्यवहाराधीनत्वात् । तथाहि—व्युत्पित्सु· बाल· गामानयेत्यादिप्रयोजकवाक्यश्रवणसमनन्तर गवानयने प्रवृत्त प्रयोज्यमुपलभ्य इयं गवानयनप्रवृत्ति· गवानयनकार्यताज्ञानसाध्या गवानयनप्रवृत्तित्वात् मदीयगवानयनप्रवृत्तिवदिति प्रयोज्यस्य गवानयनकार्यताज्ञानमनुमाय तच्च ज्ञानं निरुक्तशब्दजन्य तदन्वयव्यतिरेकानुविधायित्वात् यत् यदन्वयव्य-

तिरेकानुविधायि तत्तज्जन्यामिति सामान्यमुखव्यासया तस्य शब्दजन्यतां निश्चिनोति । एव बहुषु प्रयोगेषु अनुवृत्तशब्दस्यानुवृत्तार्थसबन्ध व्यावृत्तशब्दस्य व्यावृत्तार्थसबन्ध गृहीत्वा आवापोद्वापमुखेन अर्थविशेषशब्दविशेषसंबन्ध निश्चिनोतीति प्राथमिकी व्युत्पत्ति कार्यार्थावलम्बिनी । तदुपजीविद्वितीयादिव्युत्पत्तिग्रहोऽपि कार्यविशेषविषयक एवेति कार्यानन्विते सिद्धार्थे ब्रह्मणि व्युत्पत्तिग्रहासभवाद्वेदान्तानां तत्परत्वग्रहासभवेन अनन्तस्थिरफलापातप्रतीतिरूपविशेष्याशासिद्धि । यद्युपासनाविधिशेषभूतमन्त्रार्थवादाधीनानन्तस्थिरफलब्रह्मापातप्रतीति तर्हि "अक्षय्य ह वै चातुर्मास्ययाजिनस्सुकृत भवति" इत्यादिवाक्याधीनानन्तस्थिरफलकर्मप्रतीत्या विशेषणांशासिद्धि । अतो विशिष्टाधिकारिविरह इति पूर्वपक्षसग्रह.। अत्र सिद्धव्युत्पत्तिसमर्थनेन वेदान्ताना ब्रह्मणि तात्पर्यसमर्थनात् ततश्चाधिकारिसमर्थनाच्च अनारम्भपूर्वपक्षहेतुरसिद्ध इति सिद्धान्तसारार्थ ॥

श्रीभाष्यार्थस्तु—**व्यवहारेति** ॥ गवानयनप्रवृत्ते कार्यताज्ञानसाध्यत्वादित्यर्थ । भाट्टमत व्युदस्यति—**न च पुत्रेति** ॥ **वाक्येष्वित्यस्य अर्थविशेषबुद्धीत्यनेनान्वय**· नैयायिकमत व्युदस्यति—**नापि व्युत्पन्नेति** ॥ पुरुषस्येति शेष· । **ज्ञातकार्येति** ॥ अत्रापि पूर्ववत् शेष. ॥ मायावादिमत व्युदस्यति—**नच सर्पेति** ॥ शाङ्करे समन्वयसूत्रे मतमिदमुपलभ्यते । अन्यान्वितसिद्धपरवादिवाचस्पतिमत व्युदस्यति—**कार्यबुद्धीति** ॥ सर्वपदानामित्यन्वय· । यत्र प्रवृत्त· तत्र कार्यताज्ञानमिति व्याप्ति । व्याप्तिभङ्गमाशङ्क्याह—**इष्टसाधनेति** ॥

११२ सिद्धव्युत्पत्तिसमर्थनम्

अत्राभिधीयते हति ॥ सूत्रकृतेति शेष ॥ सबन्धस्य सामयिकत्ववाद निरस्यति—**सङ्केतायित्रिति** ॥ अस्य शब्दस्यायमर्थ इति

विशिष्यव्युत्पत्तिमाह—**पुनश्चेति** ॥ बुद्धिपूर्वकव्युत्पत्तिमुक्त्वा यादृच्छिकीं व्युत्पत्तिमाह — **प्रकारेति** ॥ शब्दानपेक्षत्वायाह — **मूकवदिति** ॥

अभ्युपगम्याह—**कार्यार्थत्वेऽपीति** ॥ विशिंषन् विषय· धात्वर्थः । **उपासनविषयेति** बहुव्रीहिः । कार्यविशेषणम् । तत्राधिकृतस्य पुरुषस्येत्यर्थ· । फलतया सिद्धिकथनात् विषयतया सिद्धि वदतां ध्याननियोगवादिनां मतस्य व्युदास । तन्मते हि ध्येयस्वरूपसमर्पणमात्रपर्यवसानात् वस्तुसत्यत्वासिद्धि । फलतया सिद्धिकथने फलस्यासत्यत्वे प्रवृत्तिरेव न घटेतेति भाव । विधिस्थफलस्यार्थवादिकविशेषणस्वीकारः—**दुःखेति** ॥ आर्थवादिकस्यैव फलस्य स्वीकार —**रात्रीति** ॥ विधेयविरोधिफलस्य वाक्यान्तरस्थस्य स्वीकार —**अपगोरणेति** ॥

24 कार्यवाक्यार्थः.

११३ मण्डनमतखण्डनम्

अथ कार्यव्युत्पत्तेरेवाभावाय कार्यप्रतिक्षेप. क्रियते । अत. तत्स्वरूपमवधेयम् ।

अत्र कार्यवाक्यार्थवाद वाक्यार्थमातृकाया शालिकनाथेन निरूपितः अत्यवश्यज्ञातव्यतया सगृह्यते । अत्र मण्डनमिश्रा प्राहु —

पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रचक्षते प्रवर्तनाम् ॥
कर्तुरिष्टाभ्युपाये हि कर्तव्यमिति लोकधी· ।
विपरीतं त्वकर्तव्यमिति तद्विपये मतिः ॥

इति । इष्टसाधनत्वमेव प्रवर्तक तदेव कार्यतारूप कृतिसाध्यत्वमिति । अत्र गुरवो वदन्ति —

आस्तां तावत्क्रिया लोके गमनागमनात्मिका ।
अन्ततः स्तनपानादितृप्तिकारिण्यपि क्रिया ॥

सा यावन्ममकार्येयमिति नैवावधार्यते ।
तावत्कदाऽपि लोकेऽत्र प्रवृत्तिर्न भविष्यति ॥

इति । कार्यताज्ञानमेव प्रवर्तकम् । इष्टसाधनता न कार्यतारूपेति ॥

१।४ कार्यतानिरूपणम्

कार्यता कृतिसाध्यत्वं फलसाधनता पुनः ।
कारणत्व फलोत्पादे भिद्येते ते परस्परम् ॥

अतीतस्यानागतस्य चेष्टसाधनताऽस्ति । न च तत्कर्तव्यतयाऽध्यवसीयते । तेनान्या कार्यता अन्या चेष्टसाधनतेति । तथाच प्रवृत्तिरपि तन्मात्रावगमायत्ता न भवतीति । यद्यप्येकवस्तुनिवेशिता द्वयो । तथापि स्वरूपभेदोऽस्त्येव । तदेवहि वस्तु फल प्रत्युपायभावात्फलसाधनमित्युच्यते । कृत्यधीनात्मलाभतया च कार्यमिति । किमितीष्टाभ्युपायेष्वेव कर्तव्यताऽवगमोऽन्यत्र नेति । तत्राह—

किं तु स्वयं क्लेशरूपं कर्म यत्कार्यतां व्रजेत् ।
फलसाधनता तत्र कारण तेन कार्यता ॥
तद्भावभाविनी नित्य तदात्मेव प्रकाशते ॥

स्वभावेन हि कर्माणि दु खोत्पादहेतुभूतानि । तेषु कार्यत्वावगम· फलसाधत्वावगमनिबन्धन । कार्यता हि न कृत्यधीनसिद्धिमात्ररूपा । किं तु यत् कृतिं प्रति प्रधानभूतं सत् तदधीनसत्ताक तत्कार्यमुच्यते । तच्च कृतेः प्रधानम्, यदधिकृत्य कृति प्रवर्तते । न च दु.ख दु खहेतु वाऽधिकृत्य कृते· प्रवृत्तिरुपपन्ना । किन्तु सुख सुखहेतु वा । तत्र न तावत्स्वय सुखरूप कर्म । सुखसाधनमिति चेत्, स्यात्, न तस्य कृतिं प्रति प्राधान्याभ्युपगमो घटते । अत· कर्मसु कार्यत्वावगम फलसाधनत्वावगमनिबन्धन इति ज्ञापककोटिनिविष्टां फलसाधनतां कार्यताऽनुरुध्यते, न त्वसौ तदात्मैव ॥

तथाचासाधनस्यापि सुखस्यैवास्ति कार्यता। सुखं हि सर्वैः कार्यतयाऽवैति, न तस्य फलसाधनतामपेक्षते। तेन साधनतोत्तीर्णकार्यत्वावगमेन मे प्रवृत्तिरिति निश्चित्य व्युत्पित्समानः चैत्रं प्रवर्तमानं दृष्ट्वाऽनुमिनोति चैत्रोऽपि कार्यबोधात्प्रवर्तत इति। चैत्रस्य प्रवृत्तिर्धर्मिणी कार्यबुद्धिपूर्विकेति साध्यो धर्म। बुद्धिपूर्वकत्वे सति प्रवृत्तित्वात् मदीयप्रवृत्तिवदिति। लिङादयश्च प्रवृत्तिहेतुभूतार्थाभिधायिनः कार्यमेवाभिदधते, तस्यैवावगतस्य प्रवृत्त्यनन्तरकारणत्वात्। इच्छा यद्यपि प्रवृत्तिहेतुस्तथापि सा लिङादिवाच्या न भवति तदवगमस्य प्रवृत्तावनपेक्षितत्वात्। उत्पन्ना हि सा प्रवृत्तिकारणम्। नावगता। अतश्च—

शब्दान्तराणि स्वार्थेषु व्युत्पद्यन्ते यथैव हि।
आवापोद्वापभेदेन तथा कार्ये लिङादयः॥ इति॥

११५ कार्यत्वावगम

केन पुनः प्रमाणेन बालः स्वय कार्यमवगच्छति, यतः प्रवर्तत इत्यत आह—

कृतिसाध्यं प्रधानं यत्तत्कार्यमवसीयते।
तच्च मानान्तरेणापि वेद्यमोदनपाकवत्॥

कृतौ सत्यां च भावादसत्यां चाभावादनुमानतः कृतिसाध्यता तावदवगम्यते। यदधिकृत्य कृति प्रवर्तते तत्कृतिप्रधानम्। प्रयत्नश्च कृतिः। स च मानसप्रत्यक्षवेद्य इति विशिष्टप्रयोजकताऽपि प्रयत्नस्य प्रत्यक्षवेद्यैव। तेन प्रत्यक्षानुमानाभ्यामवगम्यते, यथा ओदनपाकस्येति न किंचिदनुपपन्नम्—

एवं कार्यात्मकेऽप्यर्थे व्युत्पद्यन्ते लिङादयः।
तदन्वितेषु स्वार्थेषु तथा शब्दान्तराण्यपि॥ इति॥

११६. क्रियातिरिक्तता.

एवमपि कथे मानान्तरवेद्यकार्यवाचिता लिङादीनामित्याशङ्क्य मीमांसावतारः—

संप्रधार्यमिदं त्वत्र तत्कार्यं किं क्रियात्मकम् ।
यद्वा तद्व्यतिरेकीति तत्र लोकानुसारतः ॥
प्रमाणान्तरविज्ञेया क्रिया कार्येति यद्यपि ।
प्रतिभाति तथा वेदे सिद्धान्तो न भविष्यति ॥
स्वर्गकामादयः कार्ये नियोज्यत्वेन सङ्गताः ।
स्वर्गकामादिभिः शब्दैर्वक्तव्या इत्यवस्थितम् ॥

लिङादिप्रयोगे तावत्कार्यावगतिरस्तीति निर्विवादम् । कृतिसाध्य च कार्यं भवति । सति कर्तरि तस्यात्मलाभ । कर्तृलाभश्च स्वसबन्धिकार्यविबोधे सति भवति नान्यथा । तेन यद्यपि लोकानुसारेण क्रियाया एव कार्यतया बोध्यमानाया वाक्यार्थत्वात् तदन्वयित्वाच्चेतरेषामपि पदार्थाना, कारकत्वादृते चान्यस्य क्रियान्वयित्वासभवात् लोहितोष्णीषिन्यायेन विशेषणभूतस्वर्गकामनासमर्पणपरतया कर्तृविशेषणत्वेन स्वर्गकामस्यान्वयोऽवगम्यते । तथापि स्वसबन्धिकार्यबोद्धृत्वेनैवान्वयो वर्णनीय इति नियोज्यसमर्पकत्वमेव आश्रीयते ॥

नियोज्यस्स च कार्य यस्स्वकीयत्वेन बुध्यते ।
स्वर्गादिः कामयोगाच्च साध्यत्वेनैव गम्यते ॥

साध्यविषयैव हि सर्वत्र कामना भवति । तेन तत्सबन्धात् साध्यभूत स्वर्गादि काम्यमानतया पुरुष विशिनष्टि ॥

तेन साध्यत्वपर्यन्तस्वर्गादीच्छाविशेषित. ।
तदेव शक्नुयात्कार्य बोद्धुं यत्काम्यसाधकम् ॥
लिङादिस्तत्र कार्यं चेत् क्रियामेवावबोधयेत् ।
समन्वयो नियोज्येन तदानीमेव हीयते ॥
क्रिया हि क्षणिकत्वेन न कालान्तरभाविनः ।
स्वर्गादेस्साध्यमानस्य न शक्ता जननं प्रति ॥

इष्टस्याजनिका सा च नियोज्येन फलार्थिना ।
कार्यत्वेन न संबन्धमर्हति क्षणभङ्गिनी ॥
तस्मान्नियोज्यसंबन्धसमर्थं विधिवाचिभिः ।
कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते ॥

शक्तिमति चातीते शक्तिरप्यतीतेति प्रमाणान्तरसिद्धमिति न क्रिया-शक्तिरपि स्थायिनी शक्या कल्पयितुम् ॥

११७ देवताराधनाविचार

ननु यागादिक्रिया देवताराधनोपायभूता सती कार्यतयोच्यताम् । सा तत्प्रत्यासत्तिद्वारेण कालान्तरेऽपि फल जनयितुमलमेव । देवता फलदानसमर्था कर्मभिराराध्यते । साऽऽराधिता प्रसीदति । प्रसन्ना च कर्तृन् कालान्तरेऽपि फलेन योजयत्येवेति ॥ नैतदेवम्—यागादीनां देवताराधनहेतुत्वे प्रमाणाभावात् । ननु देवतापूजार्थ एव यजि स्मर्यते । पूजा च सर्वा पूज्यमानार्थेत्यवगतम् । उच्यते—न स्मृति· प्रमाण स्मृतित्वादेव । प्रमाणान्तरापेक्षया च स्मृतीनामर्थवर्णनम् । न च प्रमाणान्तरेण देवताराधनोपायता यागस्येत्युक्तम् । अतो देवतोद्देशेन द्रव्य-त्यागो याग इति गौणं देवतापूजात्मकत्वमवगमयितव्यम् । पूजाऽपि पूज्योद्देशेनैव हि प्रवर्तत इति ॥

अपि च सा कर्मभिराराध्यते, याऽऽराधन प्रतिपद्यते । नाना-दिग्देशगामिना पुरुषेणानुष्ठीयमानयागात्मकपूजावगमश्च देवताया इति प्रमाणविरुद्धमेव । तस्या अनादित्वानुपपत्ते· । देवताधिकरणे च प्रपञ्चे-नायं ग्रन्थो निरस्त इति नातीव यतितव्यम् ॥

११८ कल्प्यापूर्ववादनिरास

ननु क्रियैव कार्यतयोच्यताम् । फलसाधनता च तस्या एवाश्री-

यताम्। तदन्वयानुपपत्त्या तु किंचिदप्यपरं तज्जन्यं फलोदयानुगुणं कालान्तरस्थायि आत्माश्रय परिकल्प्यताम्। मा भूत्तस्य लिङादिवाच्यतेति। उच्यते—तद्धि तदनुपपत्त्या कल्प्यते यद्यस्योपपादकम्। न च क्रियाजन्येनान्येन फलजनकेन कल्पितेन क्रियायास्साधनतोपपादिता भवति। न हि साधनसाधन तस्य साधन भवति। अवान्तरव्यापारो वा शक्तिर्वा तत्साधन निर्वाहयति। व्यापारयोगितयैव शक्तिमतां साधनता यत। नचात्मसमवायि अर्थान्तर कर्मणामवान्तरव्यापारो. नापि शक्तिरिति न तस्यार्थापत्तिगम्यता युक्ता। किंत्वन्विताभिधाने स्थिते नियोज्यानुगुण्यात् शब्दवाच्यतैवोचितेति॥

११९ अपूर्वं नियोगश्च

तद्धि कालान्तरस्थानात् शक्तं स्वर्गादिसिद्धये।
संबन्धोऽप्युपपद्येत नियोज्येनास्य कामिना॥
क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत्।
अतोमानान्तरापूर्वमपूर्वमिति गीयते॥
कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ।
नियोग इति मीमांसानिष्णातैरभिधीयते॥
कार्यस्यैव प्रधानत्वात् वाक्यार्थत्वं च युज्यते।
वाक्यं तदेव हि प्राह नियोज्यविषयान्वितम्॥
आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः॥

यत्तदपूर्वं कार्यं तस्य नियोज्यान्वयं विना कार्यत्वानुपपत्ति। अनुष्ठानं विना तदसभवात्। कर्त्रा च विना तदनुपपत्ते.। अधिकारिणा च विना कर्तुरभावात्। नियोज्यत्व विना तदयोगात्। अकामसाधने च नियोगानवगमात् इत्यात्मसिद्ध्यर्थमेव नियोग काम्यमानफलसिद्धिहेतु-

त्वमवलम्बते स्वामिवत्। यथा आत्मन एव संविदधानः स्वामी गर्भदासस्योपकरोति। तथा नियोगोऽपि नियोज्यस्येति न प्राधान्यपदच्युतिः॥

एवं कामाधिकारार्थपर्यालोचनचिन्तया।
व्युत्पत्तिस्सर्ववाक्यार्थप्रतिपत्तिनिबन्धनम्॥
व्युत्पत्तिरिह कार्येऽर्थे व्यवहारानुसारिणी।
किं तु निर्धारणामात्रं वेदवाक्यविमर्शजम्॥
अपूर्वं हि क्रियासाध्यं साधिता खाधनं क्रिया।
तस्मादपूर्वसाध्यत्वं क्रियासाध्यत्वसङ्गतम्॥
प्रमाणान्तरगम्यं हि लोकश्शब्दैर्विवक्षति।
क्रियाकार्यत्व एवातः प्रयोगो लक्षणान्वितः॥
लक्षणानभिमानं तु मुख्यार्थानवधारणात्।
ये तु मुख्यार्थकुशलाः तेषां लाक्षणिकत्वधीः॥
तस्मान्मानान्तरावेद्यं कार्यमर्थान्तरान्वितम्।
वेदवाक्यं ब्रवीतीति संक्षेपोऽयमुदाहृतः॥ इति॥

१२०. शाब्दबोध

स्वर्गकामो यजेतेत्यत्र प्राभाकरमते कार्यवाक्यार्थवादे शाब्दबोधक्रमस्त्वय मानमेयरहस्यवार्तिके सगृहीतः प्रकाश्यते—

यजेतेति पदात्कार्यप्रधानं यागगोचरम्।
स्यात्कार्यं यागविषयमिति बोधस्स चादिमः॥
ततश्च यागविषयं कार्यं स्यात्स्वर्गसाधनम्।
इत्यर्थाध्याहारविद्भिः द्वितीयो बोध इष्यते॥
स्वर्गकामपदश्रुत्या स्वर्गकामनियोज्यकम्।
प्रागुक्तद्विदलं कार्यमिति स स्यात्तृतीयकः॥
ततश्च स्वर्गकामीयकृतिसाध्यमिति क्रमात्।
प्रागुक्तत्रिदलं कार्यमिति बोधस्तुरीयकः॥
नापूर्वे स्वर्गहेतुत्वं यागे तेन विना भवेत्।
इति चानुपपत्तेस्तु प्रतिसन्धानसंभवे॥

स्वर्गकामकृतेस्साध्यः स्वर्गकामनियोज्यकः ।
स्वर्गस्य साधनं यागः इति बोधस्तु पञ्चमः ॥
यदप्यनुपपत्तेस्तु प्रतिसन्धानमुच्यते ।
तदुपादानमित्युक्तं धीरौपादानिकी ह्यसौ ॥
विध्याक्षेप उपादानं श्रुतार्थापत्तितः पृथक् ।
सा स्यादभिहितापर्यवसानाऽश्रुतकल्पना ॥
अभिधानानवसितिरुपादानमितीर्यते ।
तेनौपादानिकीत्युक्ता फलसाधनतामतिः ॥
इति प्राभाकरमतं वादावल्ल्यामुदाहृतम् ॥ इति ॥

१२१ कार्यनिराकरणम्

अथापूर्वकार्ये दुर्निरूपत्वेन प्रत्याख्याय व्युत्पत्तेः सिद्धसाध्यभेदेन द्वैविध्येमवोन्मूल्य सिद्धव्युत्पत्त्यभावरूपां मूलयुक्तिमेवासिद्धयति—**गामिति ॥** कृतिसाध्यत्वमिष्टत्व कृत्युद्देश्यत्व चेति कार्यस्य त्रय आकारा । आद्यद्वय धात्वर्थफलसाधारणम् । अन्त्यस्त्वपूर्वस्य विशेष इत्याहुः । अत्र तृतीयमाकार विकल्प्य विदूषयति—**कृतिभावभावीति॥** किं कृतिकर्मत्व किं प्रेरकत्व किमनुकूलत्व कि शेषित्व कि प्रयोजनत्व किं स्वतइष्टत्वरूपप्रयोजनत्वप्रयुक्त प्राधान्य कि वा सुखरूपत्वलक्षणं प्रयोजनत्वमिति सप्त विकल्पा । कर्मत्वमुद्देश्यत्वमिति पक्षे इष्टस्य कृति-साध्यत्व एव पर्यवस्यतीति भावः । अथेष्टस्य इच्छाविषयत्व प्रेरकत्व चेत्याकारद्वयमस्ति । तत्र द्वितीय आकार उद्देश्यत्वमिति द्वितीयविक-ल्पेऽपि पूर्ववदेव दोष इत्याह—**इच्छाविषयस्येति ॥** अनुकूलत्वमिति तृतीयं पक्षमसिद्धयति—**न च पुरुषस्येति ॥** शेषित्वमिति तुरीय दूषयति—**न च कृतिं प्रतीति ॥ कृतेरशेषत्वेनेति ॥** कृत्यनुकूलकृ-तेरभावेन कृतौ कृतिव्याप्त्यर्हत्वलक्षणकृतिसाध्यत्वघटितशेषत्वलक्षणस्या-सभवेनेत्यर्थः । निरुक्तशेषत्वलक्षणस्यातिव्याप्तिमाह—**प्रधानस्यापीति॥**

अव्याप्तिमाह—**न भृत्योपि हीति ॥** शेषत्वलक्षणं तु—"परस्याति-शयाधानेच्छया उपादेयत्वमेव यस्य स्वरूप स शेष, परश्शेषी" इति वेदार्थसंग्रहे निरूपितम् । प्रयोजनत्वमिति पञ्चम दूषयति—**नापि कृतिप्रयोजनत्वमिति ॥ पुरुषस्येति ॥** न हि कृतिः चेतन इति भाव. । साक्षादिष्टत्वप्रयुक्तकृतिसाध्यत्वसवलितं कृतिप्रधानत्वमिति षष्ठ दूषयति—**नियोगस्यापीति ॥ अत इति ॥** स्वर्गसाधनतया इष्टत्वेन कृतिसाध्यत्वादेवेत्यर्थ ॥

विवृणोति—**स्वर्गकामेति ॥** कृतिप्रधानत्वमाशङ्क्यनिरस्यति—**अत इति ॥** व्युत्पत्तावेव साधनत्वोल्लेख । व्युत्पन्नस्य तु अनन्यार्थ-तया प्रतीयते इत्यत्राह—**सुखेति ॥** उक्तदोषपरिहाराय नियोगस्य सुख-रूपत्वलक्षणप्रयोजनत्वपक्ष सप्तममाशङ्क्य परिहरति—**अपिचेति ॥** पण्डापूर्वसुखवाद निरस्यति—**नापि नित्येति ॥** योग्यानुपलब्धिमाह—**नियतेति ॥** कृतिसाध्यत्वमपि निरस्यति—**अतो विधीति ॥** सुख-रूपत्वासभवादित्यर्थ. । विशिष्टहेतुसिद्धिमाह—**अतो वेदान्ता इति ॥** कार्ये व्युत्पत्त्यसभवादित्यर्थ ॥ अधिकरणार्थमुपसहरति—**अतः केव-लेति ॥** विशिष्टाधिकारिशून्यत्वादनाम्भणीयमित्यत्र हेतुरसिद्ध इतिभाव ॥

सोऽय कार्यरूपापूर्ववाद प्राभाकरसमत शकराचार्येणाप्युपनि-षद्भाष्यादिषु निरस्त । कल्प्यापूर्ववादश्च भट्टसमत स्वीकृत । ततश्च सिद्धपराणामपि वाक्याना प्रामाण्य व्यवस्थापितम् । अतएव माधवाचार्येण पराशरस्मृतिव्याख्यायां (१-१८) "व्यवहारे भट्टनय इत्यभ्युपगमात्" इति धर्मपदव्याख्यायामुक्तम् । तत्त्वटीकायामनुभूतेरवेद्यत्वानिराकरणप्र-करणे "व्यवहारे भट्टनय" इति पराभिसन्धिरनूदित । अनेनाभ्युपग-मेन प्राभारनयो व्यवच्छिद्यते ॥

१२२ पूर्वपक्षयुक्तिस्वारस्यम्.

शांकरभाष्ये—

अथातोधर्मजिज्ञासासूत्रमाद्यमिदं कृतम् ।
धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ॥

इति कुमारिलवार्तिक हृदि निधाय ब्रह्मात्मैक्यरूपविषयप्रयोजनसिद्ध्यर्थमध्यासो निरूपित· । एवच विषयप्रयोजनाभावे शास्त्रमनारम्भणीयमिति पूर्वपक्षयुक्तिरत्राभिमता । ततश्च प्रयोजननिरूपणपर प्रथम सूत्रमिति मतम्। श्रीभाष्ये तु सबन्धनिरूपणपर तदिति मतम् । तथाहि— कर्मकाण्डमात्रप्रामाण्यवादिनां "वेदोषरा वेदान्ता·" इति वादिनां जरन्मीमांसकानां कार्यवाक्यार्थसिद्धान्तानुरोधेन वेदान्तानामेव प्रामाण्यासिद्ध्या तद्व्याख्यानम्यरम्भणानर्हता हृदि निधायाप्रामाण्यहेतुभूत सिद्धव्युत्पत्त्वभावः पूर्वपक्षयुक्तितयाऽऽशङ्क्य निराकृत ॥

अत्र प्रयोजनरूपविषयनिरूपण सर्वव्यापाराणां साधारणम् । सबन्धनिरूपण प्रबन्धासाधारणमित्यभिप्रेत्य तदेवादृतम् । प्रयोजननिरूपण तु तुरीयसूत्रे क्रियते । अत्रापीत्थ कुमारिलवचनम्—

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्य चित् ।
यावत्प्रयोजनं नोक्त तावत्तत्केन गृह्यते ॥
सिद्धार्थ सिद्धसबन्धं श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यस्संबन्धस्सप्रयोजनः ॥

इति । अतएव वाक्यारम्भे वररुचि "सिद्धे शब्दार्थसबन्ध" इत्याह । सोऽय सिद्धव्युत्पत्त्यभाववाद· सौगतसंमतार्थासस्पर्शवादसोदर । अर्थासस्पर्शवादनिरासायैव हि अनुबन्धचतुष्टये सबन्धनिरूपणमन्तर्भाव्यते । स खलु वाद प्रकरणपञ्चिकायामुपपाद्य दूषित ॥

न शब्दसंस्पर्शयोग्या निर्विकल्पाः स्वलक्षणाः ।
सामान्यलक्षणास्तुच्छा अपोहा अपि तादृशाः ॥

विकल्पयोनयश्शब्दाः विकल्पाश्शब्दयोनयः ।
कार्याकारणता तेषां नार्थ शब्दाः स्पृशन्त्यमी ॥

इति । ततश्च समन्वयसूत्र प्रयोजनपरम् । प्रथमसूत्र संबन्धपरमिति श्रीभाष्यमतम् । शांकरे तु विपर्ययः ॥ इति ॥

25. चतुस्सूत्र्यर्थः.

१२३ जिज्ञासासूत्रार्थ

तथाचाय प्रथमसूत्रस्य निर्गलितार्थ —**अथातो ब्रह्मजिज्ञासा ॥** अत्र शब्दस्वारस्यात् समभिव्याहृतपदस्वारस्यात् अर्थस्वारस्याच्च अथशब्दस्यानन्तर्यमर्थ । स चाध्याहर्तव्यकर्तव्यपदार्थान्वयी । अवध्याकाक्षापूरक कर्मविचारादिति पदमध्याहर्तव्यम् । अनुक्तिस्तु अतश्शब्दोपस्थितस्यैव वृत्तस्य तदुपस्थापकपदोद्भावनद्वारा उपस्थितिर्भवतीत्यभिप्रायेण । वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचकैतच्छब्दस्य कर्मविचारोऽर्थ । स चाप्रामाण्यशङ्कानास्कन्दितकेवलकर्मविशेष्यकाल्पास्थिरफलत्वप्रकारकनिर्णयविशिष्टाप्रमाण्यशङ्कासहब्रह्मविशेष्यकानन्तस्थिरफल - त्वप्रकारकप्रतीतिलक्षण । कर्मविचारात्पूर्व ब्रह्मविचारानन्तर वा ब्रह्मविचारे प्रवृत्तिवारणाय विशेषणविशेष्यांशौ । तसिलर्थ जन्यत्वं प्रकृत्यर्थस्य प्रत्ययार्थे निरूपितत्वसंबन्धेनान्वय· । तस्य च ब्रह्मजिज्ञासापदार्थे आश्रयतासबन्धेनान्वय । ब्रह्मशब्दार्थ निरतिशयोत्कृष्टविशिष्ट. श्रिय पति· । जिज्ञासापदार्थ वेदान्तवाक्यार्थविचारात्मक लाघवतर्क. । स च अयुक्तांशप्रतिषेधपूर्वकयुक्ताशाभ्युपगमलक्षण. ज्ञानबिशेष सकलेतरपुरुषार्थतत्साधनपरित्यागपूर्वकप्राप्यत्वोपायत्वावच्छिन्नविषयताशालिनिर्णयफलक. । तस्य च रागप्राप्तत्वप्रियतमत्वद्योतनार्थः सन्प्रयोग । अध्याहृतकर्तव्यपदार्थः प्रेक्षावत्प्रवृत्त्यर्हत्वम् ॥

तथाच — अप्रामाण्यशङ्कानास्कन्दितकेवलकर्मविशेष्यकाल्पा — स्थिरफलत्वप्रकारकनिर्णयविशिष्टाप्रामाण्यशङ्कासहब्रह्मविशेष्यकानन्तस्थिरफलत्वप्रकारकप्रतीतिनिष्ठजनकतानिरूपितजन्यतावविशिष्टनिरतिशयोत्कर्षविशिष्टलक्ष्मीपतित्वावच्छिन्नविषयकविचारात्मकज्ञानविशेष निरुक्तप्रतीत्यनन्तरकालीनप्रेक्षावत्प्रवृत्त्यर्ह इति फलितार्थ । रागतो ब्रह्मविचारे प्रवृत्तस्यापि सिद्धवस्तुनि व्युत्पत्तिर्नास्तीति युक्त्याभासेन अनारम्भणीयत्व ज्ञायते । त प्रति सिद्धवस्तुनि व्युत्पत्तिसभवात् आरम्भणार्हत्वज्ञापनमज्ञातज्ञापनरूपमित्युद्देश्योपादेयविभागवत्त्व सूत्रस्येत्यवधेयम् ॥

पुनरिदमत्रावधेयम् उपदेशज्ञापनन्यायभेदेन सूत्रलक्षण शास्त्रं तावत्त्रिविधम् । "अथ योगानुशासनम्, अथ शब्दानुशासनम्," इत्यारभ्यमाणमाद्यम् । "अथातो दर्शपूर्णमासौ व्याख्यास्याम., अथातस्सामयाचारिकान् धर्मान् व्याख्यास्याम " इत्यादिक द्वितीयम् । "अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासा" इत्यादिजिज्ञासापदघटितप्रारम्भक तृतीयम् ॥ तथाच न्यायनिबन्धनात्मकत्वादस्य शास्त्रस्य न्याय इत्थ प्रयोक्तव्य —ब्रह्मजिज्ञासापद पक्षपर, अथ कर्तव्येति साध्यपर, अत इति हेतुपरम् । तथाच ब्रह्मविचार कर्मविचारानन्तरकर्तव्यत्वार्ह , कर्मविचारहेतुकत्वात्, यो यद्धेतुकः स तदनन्तरकर्तव्यत्वार्ह साङ्गाध्ययनहेतुक कर्मविचार सामान्येनोदाहरणमिति ॥

कर्मविचारस्य हेतुत्व च- ब्रह्मविचारस्य कर्मविचारसिद्धन्यायोपजीवकत्वात्, यत्सशयव्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति न्यायेन कर्मणामल्पास्थिरफलत्वव्यतिरेकरूपानन्तस्थिरफलत्वसशयनिश्चययो· ब्रह्मविचार प्रति प्रतिबन्धकतयाऽल्पास्थिरफलत्वनिश्चयस्य तत्र हेतुत्वात्, विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारक-

निर्णयस्य कारणतया यज्ञेनविविदिषन्तीत्यखण्डवाक्यर्थबोधं प्रति यज्ञपदार्थज्ञानस्य कारणत्वात्, दृष्टान्तदार्ष्टान्तिकभावज्ञानस्य दृष्टान्तज्ञानसापेक्षत्वात्, अङ्गिज्ञानस्याङ्गज्ञानपूर्वकत्वादित्यादिविधया बोद्धव्यम् ॥

अत्र ब्रह्मशब्दस्यैव निखिलमुमुक्षूपास्यतावच्छेदकनिरतिशयबृहत्वावच्छिन्नवाचकत्वात् तदवच्छिन्नज्ञानस्यैव साक्षान्मोक्षोपायत्वात् सर्वज्यायस्त्वस्यैव सर्वशेषितानियामकत्वात् परशेषतैकरसत्वज्ञानस्यैव सर्वोज्जीवकत्वात् तैत्तिरीयाद्युपनिषत्सु साक्षात् ब्रह्मपदस्यैव श्रवणात् एवभूतनिरतिशयोत्कर्षनियामकस्य सर्वजगच्छरीरत्वसत्यज्ञानाद्यात्मकत्वनिरवधिककल्याणगुणवत्त्वादे नारायणपदार्थतावच्छेदकस्य जगत्कारणत्वलक्षणप्रतिपादकश्रुत्यनुरोधेन द्वितीयसूत्रे प्रतिपादयिष्यमाणत्वाच्च सदात्माकाशनारायणादिशब्दानादर इति ॥

अपिच काण्डत्रयात्मकेऽस्मिन् मीमासाशास्त्रे सङ्कर्षकाण्डस्योपसहारे "अन्ते हरौ तद्दर्शनात्" इति देवताकाष्ठा प्रदर्श्य "स विष्णुराह हि" इति सर्वदेवताराधनाना तत्पर्यवसानाय तस्य सर्वान्तरात्मत्वेन व्याप्ति प्रतिपाद्य 'त ब्रह्मेत्याचक्षते त ब्रह्मेत्याचक्षते" इति तस्यैव वेदान्तवेद्यपरब्रह्मत्वोपक्षेपेणोपसहारात् ब्रह्मकाण्डारम्भे ब्रह्मपदमेवोचित प्रयोक्तुमिति सप्रदाय । अधिक शतदूषण्या शास्त्रैक्यवादे द्रष्टव्यम् ॥ अत्रेद तत्त्वरत्नाकरपद्य तत्त्वटीकायामुदाहृतमनुसन्धेयम् ॥ ५४ ॥—

कर्मदेवताब्रह्मगोचरा सा त्रिधोद्भवौ सूत्रकारतः ।
जैमिनेर्मुने· काशकृत्स्नतः बादरायणादित्यतः क्रमात् ॥ इति ॥

१२४ जन्मादिसूत्रार्थ

अथ जन्मादिसूत्राणामपि विशिष्टैकार्थ्यसिद्धये वाक्यार्थः प्रदर्श्यते । प्रारम्भे "पूर्ववृत्तात्कर्मज्ञानादनन्तर ततएव हेतोः ब्रह्म ज्ञात-

व्यमित्युक्तं भवति'' इति भाषितत्वात् निरतिशयबृहत्त्व जिज्ञास्यतावच्छेदक मुमुक्षूपास्यतावच्छेदकत्वात् इति ''परीक्ष्यलोकान्'' इति श्रुत्यर्थस्सूचितः। तत्रायमाक्षेपः—निरतिशयबृहत्त्व न जिज्ञास्यतावच्छेदक दुर्निरूपत्वात्। तच्च बहूनामसभवित्वेसति बहुषु प्रतीयमानत्वात् अनेकवाक्यप्रतिपन्न चैत्रपितृत्वादिक सामान्येनोदाहरणमित्यत आह—

जन्माद्यस्य यत इति ॥

अस्य यतो जन्मादि तद्ब्रह्म जिज्ञास्यमित्यन्वय। ''यतो वा इमानि'' इत्यादिशास्त्रेण यज्जगत्कारण तद्ब्रह्मेत्यवगमात् या गन्धवती सा पृथिवीत्यादौ गन्धस्य पृथिवीत्वनियामकत्वमिव कारणत्वस्य निरतिशयबृहत्त्वनियामकत्वेन बहुषु प्रतीयमानत्वस्यान्यथासिद्धया दुर्निरूपत्वासिद्धि। अन्यथासिद्धिश्च ''आपो वा इद सर्वम्'' इत्यादीना कर्मविधिशेषत्वम्। सृष्टिप्रलयश्रुतयस्तु अनन्यपरा अशेषभूताश्चेति ॥ नच कारणत्वस्यापि बहुषु प्रतीयमानत्वात्तद्दोषतादवस्थ्यमितिचेन्न—कारणत्वमेकमात्रवृत्तीति श्रुत्यभिप्राय इति सूत्रकाराशयात् ॥

अथ—अथातो ब्रह्मजिज्ञासा। तत्सत्यादिलक्षणम्। इति कुतो नासूत्रयदितिचेत् विभूतेरुपास्यतावच्छेदकत्वसूचनार्थ कारणत्वलक्षानुसरणम्। कारणत्वस्य सत्यत्वाद्याक्षेपकत्वमस्ति। सत्यत्वादेः कारणत्वाक्षेपकत्व नास्ति। कारणत्वस्यैवोत्तरत्र विचारायिष्यमाणत्वात्तत्प्रस्तावोऽप्यावश्यक इत्यवधेयम् ॥

तर्हि—तज्जगत्कारणम्। इति सूत्र्यतामित्यपि शङ्का नोचिता। प्रथम तावत्कारणत्वसाधकहेतूना दुर्निश्चयत्वात् वक्ष्यमाणैः न्यायै यत्र कारणता पर्यवस्यति तद्ब्रह्म भविष्यतीति तात्पर्येण श्रुत्यनुसारेण च यत इत्येव सूत्रणस्योचितत्वात्। अतएव नोत्तराधिकरणाना वैयर्थ्यशङ्काऽपि ॥

नन्वथातो जगत्कारणजिज्ञासा । इति सूत्र्यताम् । अत्रोच्यते — तत्तद्वाद्यभिमतस्य प्रधानपरमाण्वादे कारणत्वस्य प्रतिक्षेप्यत्वात् ब्रह्मण एव सर्वशेषित्व सर्वरक्षकत्व सर्वकर्मसमाराध्यत्व सर्वफलप्रदत्वाना चतुर्भिर्न्यायै स्फुटीकरणाय ब्रह्मजिज्ञासेत्येव सूत्रयितव्यमिति ॥

१२५ शास्त्रयोनिसूत्रार्थ

अथ जगज्जन्मादिकारणत्वावच्छिन्ननिरतिशयबृहत्व जिज्ञास्यतावच्छेदक न भवितुमर्हति शास्त्रप्रतिपाद्यतावच्छेदकत्वाभावात् । स चाभाव शास्त्रतात्पर्यविषयत्वाभावात् । स च "अप्राप्ते हि शास्त्रमर्थवत्" इति न्यायेन शास्त्रप्रामाण्यविरहात् इत्याक्षेपे प्राह—**शास्त्रयोनित्वादिति ॥**

शास्त्रमेव वेदाख्य योनि. कारण प्रमाण यस्य तच्छास्त्रयोनि । तस्य भाव । तस्मान्निरुक्तब्रह्मजिज्ञासा कर्तव्येत्यन्वय । अत्र त्रिसूत्र्यामेकवाक्यत्वमभिमतम् । अतएव "अथातो धर्मजिज्ञासा । चोदनालक्षणोर्थो धर्मः" इतिवत् "अथातो ब्रह्मजिज्ञासा । जगत्कारण ब्रह्म" इत्यनिर्देश । ब्रह्मणि शास्त्रप्रामाण्य च शास्त्रेतरप्रमाणागोचरत्वेन सिद्धयतीति सूत्रार्थः । तेन न साध्याविशेष । तेन प्रामाण्यविरहरूपहेतुरसिद्ध । ततश्च तात्पर्याविषयत्वासिद्धि । ततश्च प्रतिपाद्यत्वाभावासिद्धिः । ततश्च जिज्ञास्यत्वसिद्धिरिति ।

अत्र जिज्ञासापदेन श्रुत्यधीनसाधकबाधकयुक्तिचिन्तनरूपस्य निर्णयजनकव्यापारविशेषस्य विचारस्य विवक्षितत्वात् न तच्छङ्कावकाश । शङ्कातु—शास्त्रैकगोचरस्याप्यनेकस्याजिज्ञास्यत्व दृश्यते । शास्त्रेतरगोचरस्याप्यनेकस्य जिज्ञास्यत्व पश्यामः । अतश्शास्त्रयोनित्वमन्यथासिद्धमिति ॥

१२६ समन्वयसूत्रार्थ

ननु इष्टप्राप्त्यनिष्टनिवृत्त्यन्यतरप्रयोजनकप्रवृत्तिनिवृत्त्यन्यतरप्रयोजकानवगतार्थविषयकज्ञानजनकवाक्यत्व शास्त्रत्वम्—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥

इति कुमारिलवचनच । (४०६ पु.) तत यत्र शास्त्रप्रामाण्य तत्र सप्रयोजनत्व यत्र सप्रयोजनत्व तत्र प्रवृत्तिनिवृत्त्यन्यतरान्वय । तथाच वेदान्तानां सिद्धवस्तुनि व्युत्पत्तावपि प्रवृत्तिनिवृत्त्यन्वयरूपव्यापकनिवृत्त्या प्रयोजननिवृत्ति । ततश्च ब्रह्मणि शास्त्रप्रामाण्यविरह । तेन च तात्पर्यविरह । तेनच जिज्ञास्यत्वविरह इत्याक्षेपे प्राह-**तत्तुसमन्वयादिति ॥**

तु शब्द प्रसक्ताशङ्कानिवृत्यर्थ । **तत्** शास्त्रप्रमाणकत्व सभवतीति शेष । **समन्वयात्** बोध्यबोधकभावरूपस्सबन्धोऽन्वयपदार्थ । सशब्दार्थ अनुकूलत्वम् । तच्च प्रकारतया बोधान्वयि । तथाच ब्रह्म शास्त्र प्रमाणकं शास्त्रजन्यबोधीयानुकूलत्वावच्छिन्नविषयताशालित्वात् ज्योतिष्टोमादिवत् इति ॥

अयमर्थ—अनुकूलत्वमेवानन्दपुरुषार्थसुखादिपदप्रवृत्तिनिमित्तम् । तच्च स्वत इष्टत्व इतरेच्छानधीनेच्छाविषयत्वलक्षणम् । तदेतत् विषयविषयिसाधारण सिद्धसाध्यसाधारणम् . पुत्रोत्सवनिधिपयःपानगतिश्रवणादौ सुखव्यवहारात् । परमपुरुषेऽप्येतादृशमानन्दत्व स्वरूपतस्स्वभावतश्च स्वात्मनीव श्रुतिशतसमधिगतम् । एतादृशानन्दप्रतिपादक शब्द प्रमाणमितिच सर्वसमतम् । ततश्च सप्रयोजनत्वप्रवृत्तिनिवृत्त्यन्वययोः न व्याप्यव्यापकभाव इति भावः । अपिच सामान्यत प्रयोजन प्रति प्रवृत्तिनिवृत्त्यन्वयोऽप्रयोजकः, प्रवृत्त्यन्वयिन स्वशिरश्छेदादेः निवृत्त्यन्व-

यिन पय पानादे तदुभयरहितस्य शत्रुवृद्ध्यादेश्च पुरुषार्थत्वाननुभवात् ॥ इति चतुस्सूत्र्यर्थ ॥ तदुच्यते —

व्युत्पत्त्यभावात्प्रतिपत्तिदौ-
स्थ्यादन्येन सिद्धेरफलत्वतश्च ।
अमात्वमाशङ्क्य निराचकार
न्यायैश्चतुर्भिः प्रतिपाद्यमेतत् ॥ इति ॥
समन्वयोऽविरोधश्च साधनं साध्यमेव च ।
इति शास्त्रस्य सारार्थः चतुर्भिस्सूच्यते क्रमात् ॥
शेषित्वं रक्षकत्वं च कर्माराध्यत्वमेव च ।
पुरुषार्थत्वमित्येते रहस्यार्थाः क्रमादिह ॥ इति ॥

26 जन्माद्यधिकरणम्.

१२७ अधिकरणम्

अत्र प्रदर्श्यमानस्सशयस्सर्वोऽपि बुभुत्सोरेव । न पूर्वपक्षिण नापि सिद्धान्तिन. नापि मध्यस्थस्य यस्यकस्यचित् । सोऽपि वाक्यस्य तत्तदसाधारणतत्तद्विरुद्धपदघटितत्वात्तात्पर्याश एव मानस. । स एव पूर्वपक्षे सिद्धान्ते च प्रदर्शनीय । अत एवोच्यते तन्त्रवार्तिके (२२२) "दृढविपर्ययज्ञानानन्तर सहसैव सम्यक् ज्ञानोत्पादातिभारात् एकदेशावतरणार्थं सशयोत्थापनामात्रमेव तावद्युक्तम्" इति ॥

अस्मिंश्च शास्त्रे स च सशय क्वचित्पदार्थविषयक क्वचिद्वाक्यार्थविषयक क्वचित्पदार्थनिर्णयविषयक । आनन्दमयाधिकरणान्तरधिकरणवैश्वानराद्यधिकरणानि क्रमेणोदाहरणानि । तथा च सौत्रपद क्वचित्पदार्थलाक्षणिक क्वचित्पदघटितवाक्यार्थलाक्षणिक क्वचित्पदार्थनिर्णयलाक्षणिकम् । वाक्यस्य विषयत्व तु सशयविषयकोटिद्वयोपस्थापकपदघटितत्वे सति न्यायाधीनतात्पर्यनिर्णयप्रयोज्यान्यतरकोटिविषयकप्रमाज-

नकवाक्यत्वम् । न्यायत्व च विषयसशयपूर्वपक्षोत्तरपक्षप्रयोजनरूपाङ्ग-पञ्चकप्रतिपादकवाक्यसमुदायत्वमधिकरणत्वलक्षणम् ॥

१२८. लक्षणम्

जन्माद्यस्य यतः ॥ अस्य सूत्रस्य सङ्गतिरर्थश्च प्रागेव प्रतिपादितौ । इह श्रीभाष्य विभूष्यते । अस्य लक्षणसूत्रत्वाल्लक्षणविषये सक्षेपशारीरकमुदाहियते--

लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्थान्
निश्शेषतो यदतिरिच्य तदर्थवस्तु ।
लक्ष्यं निवेदयति लक्षणमेतदाहुः
सामान्यलणमिद त्रिषु लक्षणेषु ॥ १-५१५ ॥

यत् धर्मरूप वस्तु लक्ष्यार्थसबद्धमुपलब्ध सत् तदर्थवस्तु लक्ष्यात्मक वस्तु लक्ष्य अतोऽन्यतोऽर्थान् लक्षणीयात्सकाशात् व्यतिरिक्तान्सर्वानर्थानतिरिच्य व्यावर्त्य निवेदयति अवगमयति तल्लक्षणमित्यर्थ । व्यावर्तकत्व लक्षणसामान्यलक्षणमिति भाव ॥ अथ लक्षणविभागः—

लक्ष्यस्य लक्षणमिह त्रिविधं प्रसिद्धं
लोके स्वलक्षणममुष्य विशेषणं वा ।
यद्वोपलक्षणमिमानि च लक्षणेन
व्याचर्ष्याम पृथगेव तु तत्प्रताहि ॥ ५१४ ॥

अमुष्य लक्ष्यस्य स्वरूपलक्षण विशेषणलक्षण उपलक्षणलक्षण चेति लक्षण त्रिविधमित्यर्थ । तत्र स्वरूपलक्षणस्य लक्षणमिदम् —

लक्ष्यस्वरूपमपि सत् यदमुष्य साक्षात्
अर्थान्तराद्भवति भेदकमेतदाहु ।
अस्य स्वलक्षणतयैव तु लक्षणं खं
छिद्रं जलं द्रवमितीदृशमत्र लोके ॥ १-५१६ ॥

यद्वस्तु लक्ष्यस्वरूपमेव सत् लक्ष्यस्यार्थान्तरात् भेदकं चेत् एतत् स्वरू-

पलक्षणमित्यर्थ । आकाशं छिद्र जल द्रवमित्यादिकमुदाहरणम् । विशेषणलक्षणस्य लक्षणमिदम्—

स्वानुरक्तमतिजन्मकारणं
यत्पुनर्भवति लक्ष्यवस्तुनि ।
तद्विशेषणतयाऽस्य लक्षणं
केसरादिकमिवाश्वतस्तुनः ॥ १-५१७ ॥

यल्लक्षण स्वानुरक्ततया लक्ष्यस्वरूपावियुक्ततया लक्ष्यस्य व्यावर्तक भवति तद्विशेषणमिति ॥ केसरादीत्यादिपदेन शोणत्वादिपरिग्रहः । उपलक्षणस्य लक्षणमाह—

स्वानुरक्तमतिजन्महेतुतां
लक्ष्यवस्तुनि निरस्य लक्षणम् ।
अस्वरूपमपि तस्य यद्भवेत्
काकवत्तदुपलक्षणं विदुः ॥

स्वानुरक्तमतिजन्महेतुता निरस्य तद्व्यतिरेकेणेत्यर्थ । काकनिलय यद्दृश्यते तद्देवदत्तगृहमित्यत्र उपलक्ष्यस्य गृहस्याम्वरूपभूत· विशेषणतयाचाननुप्रविष्ट काक देवदत्तगृह लक्षयतीत्यवधेयम् ॥

एतत्सर्वमवलोक्य सप्रदाय च समाश्रित्य जगत्कारणत्वस्य विशेषणत्वमुपलक्षणत्व वेति विकल्प्य पूर्वपक्षं कृत्वा उभयरूपत्वमपि विवक्षाभेदेन सभवतीति सिद्धान्त उच्यते ॥

तद्गुणेति ॥ "सर्वादीनि सर्वनामानि" इत्यादिवत् विधेयान्वयित्व तद्गुणसविज्ञानत्वम् । विशेष्यपर तच्छब्द । विशेषणपर· गुणशब्द· । तद्गुणौ सविज्ञायेते यस्मि समासे इति विग्रह· ॥ कारणत्वप्राप्यत्वप्रापकत्वौपयिकानि विशेषणान्युपादीयन्ते — **यस्मादिति** ॥ **सत्यसङ्कल्पादिति** ॥ इदमुभयलिङ्गलोपपादकम् । **परमकारुणिकादिति** ॥ प्रलयकालेष्वसत्कल्प चेतनजात निरीक्ष्य दयया

सृष्टिः । अतः जगत्सर्गे प्रधान निमित्त कारुण्यम् । समुदितकारणत्व-मेव निरतिशयबृहत्वनियामकमिति भाव ॥

१२९ विशेषणदूषणम्

विशेषणपक्ष दूषयति—**विशेषणत्वं हीति** ॥ जन्मकारणत्वं स्थितिकारणत्वादिधर्मावच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदक तत्समानाधिकरणत्वेन प्रमाणान्तराप्रतिपन्नत्वे सति व्यावर्तकत्वात् खण्डत्वमुण्डत्वादिवदिति पूर्वपक्षाशय । सिद्धान्ताशयस्तु जन्मकारणत्व स्थितिकारणत्वादिसमानाधिकरण तद्विरुद्धतया मानान्तराप्रतिपन्नत्वे सत्येकवचनान्तपदोपस्थाप्यार्थवृत्तित्वेन प्रतीयमानत्वात् देवदत्तत्वयुवत्वादिवदिति ॥ **अत एवेति** ॥ शब्दैकसमधिगम्यविशेषणनानात्वस्य परस्परसमानाधिकरणधर्मद्वयावृत्तित्वव्याप्यत्वादित्यर्थ । ज्ञाप्यान्तर्भूतः ज्ञाप्यप्रतीत्युपाय धर्म विशेषणम् । ज्ञाप्यानन्तर्भूत तादृशो धर्म उपलक्षणमिति विवेक ॥

१३० उपलक्षणदूषणम्

उपलक्षणपक्ष दूषयति —**नाप्युपलक्षणत्वेनेति** ॥ **आकारान्तरं** पूर्वप्रतिपन्नाकार केदारत्वस्थानीय । **अन्योन्याश्रयणादिति** ॥ सत्यत्वादिलक्षणस्य विशेषणत्वे विशेष्यभेदापत्त्या उपलक्षणत्वस्याश्रयणीयत्वे तृतीयाकारज्ञानस्यर्थ यतोवेत्यादिवाक्यसापेक्षत्वादन्योन्याश्रय ॥

१३१ सिद्धान्त

एवंप्राप्तेऽभिधीयत इति ॥ सूत्रकाराभिप्रेते पूर्वपक्षे प्राप्ते सूत्रकाराभिप्रेतस्तत्परिहार उच्यत इत्यभिप्राय ॥ **उपलक्षणभूतैरिति** ॥ धीस्थत्वक्रमेण उपलक्षणपक्षे समाधानम् । तृतीयाकारमाशङ्कापूर्वक विश-

दयति—**नचोपलक्षणेति॥ तदर्थत्वादिति** पञ्चम्यन्तस्य **नचवाच्य-मित्यनेनान्वयः**। एतेनोपलक्ष्याकार उक्त । **तदुपलक्षणेत्यनेनेनोपलक्षणा-कार** उक्त । **यतो येनेत्यनेन** सर्वज्ञत्वसत्यसङ्कल्पत्वादिस्तृतीयाकार उक्त. । **आक्षिप्तेत्यनेन** प्रागुक्तान्योन्याश्रयस्यानवसरस्सूचित । उपल-क्षणस्य उपलक्ष्यस्य च सबन्ध हेतुहेतुमद्भावलक्षणश्च प्रदर्शित । **इतिचेति॥** अतश्चेत्यर्थः । केदारत्व सारससबन्ध· देवदत्तीयत्व चेति त्रय आकारा. दृष्टान्ते अवगन्तव्या ॥

अयमत्र निष्कर्ष —जगज्जन्मादौ सारसादाविव स्वान्वयितावच्छेदकपूर्वप्रतिपन्नकिञ्चिद्धर्मावच्छिन्नविशेष्यकस्वनिरूपितोपलक्ष्यताव —च्छेदकधर्मप्रकारकप्रमितिजनकत्वस्योपलक्षणत्वव्यापकस्य तादृशकिञ्चि-द्धर्माप्रसिद्धया व्यापकनिवृत्त्या व्याप्यनिवृत्तिरिति पूर्वपक्षाशय । निरु क्तसर्वज्ञत्वादिधर्मप्रसिद्धया न व्यापकनिवृत्तिरिति सिद्धान्ताशयः ॥

अथ विशेषणतया लक्षणत्वमप्युपपादयति—**जगज्जन्मादीनां विशेषणतयेति॥** अत्र पूर्वपक्षसिद्धान्ताशयौ प्रागेव निरूपितौ। **अत्र तु कालभेदेनेति॥** एतेन विशेषणाना विरोधशङ्कापरिहार । प्रागुक्तान्योन्याश्रयदोष प्रत्याह—**यतो वा इमानीति॥ कारणवा-क्येनेति॥** कारणत्वमेव लक्षणत्वेनोक्तमिति कारणवाक्यताव्यपदेश । **व्यावृत्तं स्वरूपमिति॥** व्यावृत्ति इतरभेदविधेयकानुमिति । सा द्वि विधा—लक्ष्येतरत्वावच्छिन्नप्रतियोगिताकभेदविधेयका लक्ष्येतरत्वसमाना-धिकरणतत्तद्धर्मावच्छिन्नप्रतियोगिताकभेदकूटविधेयका च । जगत्का-रणत्व प्रथमव्यावृत्तिजनक सत्यत्वादिक द्वितीयव्यावृत्तिजनकमित्यवधे-यम्। सत्यत्वादीनां स्वरूपनिरूपकधर्मत्वेन स्वरूपलक्षणत्वेन व्यवहार । जगत्कारणत्व विशिष्टनिष्ठम् । सत्यत्वादिक स्वरूपनिष्ठमिति विशेषः।

जगत्कारणत्व केषुचिदुपासनेषु अनुसन्धेय केषुचिन्नेति विशेषसद्भावात् तत्र विशेषणत्वोपलक्षणत्वपक्षयो ज्ञाप्यान्तर्गतत्वानन्तर्गतत्वरूपविरोधसत्त्वेऽपि पक्षद्वयमप्युपपादितम् । अधिक तैत्तिरीयभृगुवल्ल्युपनिषद्ष्येऽनुसन्धेयम् ॥

अस्य सूत्रद्वयस्य परपक्षासङ्गतिमाह—**येतु निर्विशेषेति** ॥ निरतिशयोत्कर्षलक्षणबृहत्वकारणत्वेक्षणकर्तृत्वादिरूपानन्तविशेषणवैशिष्ट्य—प्रतिपादनात् न निर्विशेषवस्तुसिद्धिरिति भावः । **तर्कश्चेति** ॥ अनुमानमपीत्यर्थ । **प्रकाशैकरसता** प्रकाशैकस्वभावता । **प्रकाशत्वं** प्रकाशपदवाच्यत्वम् । **व्यवहारयोग्यतापादनस्वभावः** व्यवहारानुगुण्यापादनरूप स्वभाव । तदनभ्युपगमे केवला सौगती गतिरिति भाव ॥

27 शास्त्रयोनित्वाधिकरणम्

१३२ अधिकरणावतरण

शास्त्रयोनित्वात् ॥ अथ शास्त्रयोनित्वसूत्रसङ्गति सूत्रार्थश्च प्रागेव प्रतिपादितौ । भाष्यार्थस्तु—**अत्यन्तातीन्द्रियत्वेनेति** ॥ अत्रेन्द्रियप्रत्यक्षशब्दयो करणतत्फलविवक्षया भिन्नार्थता । **अप्राप्ते त्विति** ॥ शाबरे भाष्ये अनुमानादिप्रमाणलक्षणेषु "असन्निकृष्टेऽर्थे बुद्धि" इत्यसनिकृष्टार्थविषयकत्व विशेषणमुक्तम् । तस्य व्यावृत्ति कुमारिलेनैवमुच्यते—

असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
तादृष्येण परिच्छित्तिः तद्विपर्ययतोऽपि वा ॥
तादृष्येण परिच्छन्ने प्रमाणं निष्फलं परम् ।
वैपरीत्यपरिच्छिन्ने नावकाशः परस्य तु ॥ इति ॥ ३६३ ॥

अथानुमाननिरासकर्ता ईश्वरानभ्युपगन्ता मीमासकश्चोदयति—**किं तर्हि प्रमाणमिति** ॥ न किञ्चिदित्यर्थ । विशदयति—**नतावदिति** ॥

प्रकर्षपर्यन्तजन्मनः प्रकर्षस्य पर्यन्तात् काष्ठात जन्म यस्येत्यर्थः। **विशेषतोदृष्टं** वह्निमान् धूमादित्यादौ धूमादिकम्। **सामान्यतोदृष्टं** आदित्यो गतिमान् देशान्तरप्राप्तिमत्त्वाद्देवदत्तवदित्यादौ देशान्तरप्राप्ति। **नियतं** व्याप्तम्॥

१३३ यामुनेयमतम्

अत्रत्यस्सर्वो वाक्यार्थस्सिद्धित्रये ईश्वरसिद्धौ आगमप्रामाण्ये च दृश्यते। तार्किकैस्तु कार्यलिङ्गकमदृष्टलिङ्गकमुपदेशलिङ्गक चेतीश्वरेऽनुमात्रयं प्राधान्येनोक्तम्। अत्र लिङ्गपद पक्षपरम्। प्राकट्यलिङ्गकानुमानमित्यत्रापि लिङ्गपद पक्षपरम्। क्षित्यङ्कुरादिक सकर्तृक कार्यत्वात् घटादिवदिति कार्यलिङ्गकमनुमानम्। अदृष्ट तदभिज्ञचेतनाधिष्ठित अचेतनत्वे सति कार्यकरत्वात् वास्यादिवदित्यदृष्टलिङ्गकम्। ज्योतिष्टोमाद्युपदेश तदर्थसाक्षात्कर्तृपूर्वक उपदेशत्वात् वैद्यकाद्युपदेशवदिति उपदेशलिङ्गकम्। अचेतनारब्धत्वलिङ्गकमनुमान तु—

नन्वेकचेतनाधीनं विवादाध्यासितं जगत्।
अचेतनेनारब्धत्वादरोगस्वशरीरवत्॥

इतीश्वरसिद्धौ श्रीयामुनमुनिनोदाहृतम्। प्रकृते उपदेशलिङ्गक नानूदितम्। वैशेषिकै शब्दप्रामाण्यानभ्युपगमात् तन्मतरीत्या कार्यलिङ्गकमदृष्टलिङ्गक चेति द्विविधमेवानुमानम्। तयोरपि क्रमे हेतुरयमागमप्रामाण्ये तेनैवमुनिनैव सूचित —नच वाच्य कर्मणामेव स्वानुष्ठातृपुरुषसमीहितानि सपादयता अन्तरा नान्तरीयक तनुभुवनाधिकार्यनिर्माणमिति, यत. चेतनानधिष्ठितानि तानि न कार्याणि जनयितुमुत्सहन्ते अचेतनत्वात् वासीवत्। न हि चेतनेन तक्ष्णाऽनधिष्ठिता वासी स्वयमेव यूपादीन्यापादयितुमलम्—

नचापूर्वाण्यधिष्ठाय द्रव्य निर्मातुमीश्वरा.।
न हि कर्मोदयात्पूर्वं साक्षात्कर्तुं क्षमामहे ॥ इति ॥

एतेन कार्यलिङ्गकानुमानमदृष्टेनान्यथासिद्धमपि अदृष्टलिङ्गकमनन्यथासिद्धमित्यभिप्रायोऽवगम्यते । अनुमानेनेश्वरसाधनप्रकार ईश्वरसिद्धावागमप्रामाण्ये च विस्तरेणावगन्तुमर्हं ॥

१३४ मध्यस्थशङ्कासमाधा

अत्रपूर्वपक्षाभिमानी सामान्यतोदृष्टमनुमान शङ्कते—**ननु च जगत इति ॥ संप्रदानं** भोक्ता **प्रयोजनं** विनियोग । जगत् उपादानोपकरणसप्रदानपयोजनाभिज्ञकर्तृक कार्यत्वात् घटादिवत् । जगत् एकचेतनाधीन अचेतनारब्धत्वात् अरोगम्वशरीरवदिति प्रयोग । कार्यत्व च सावयवत्वात्सिद्धमित्यर्थ ॥

अत्र सिद्धान्ताभिमानी प्रतिवक्ति —**किमिदमेकचेतनेति ॥** बुद्धिस्थोऽत्र क्रम. । एकचेतनाधीनत्व तदायत्तोत्पत्तित्व अथ तदायत्तस्थितित्वमुततदायत्तप्रवृत्तित्वमिति विकल्प्य प्रथमद्वितीययो दृष्टान्तस्य साध्यविकलता । पञ्चवृत्तिप्राणसहितत्वलक्षणस्थितिविवक्षायां बाध । तृतीये रथादौ व्यभिचार । एकत्वाविवक्षाया जीवात्मभिस्सिद्धसाध्यतेति चत्वारो दोषा द्वितीयहेतोरित्यर्थ ॥ **किञ्चोभयेति ॥** अत्र कार्यत्वहेतोः जीवैस्सिद्धसाध्यता शक्यक्रियत्व शक्योपादानादिविज्ञानत्व चेत्युपाधिद्वय विशेषविरुद्धत्व चेति त्रयो दोषा उक्ता । अनुमानदूषण निगमयति —**अत्र इति ॥** निरुक्तदोषत्रयादित्यर्थ ॥

१३५ साक्षात्पूर्वपक्ष

अथ साक्षात्पूर्वपक्षिणोऽनुमान समर्थयन्ति दोषत्रय च परिहरन्ति—**अत्राहुरिति ॥** अत्र प्रथम सकलदोषविकल हेतुमाह—**सावयवत्वादेवेति ॥** महत्पदेन परमाणो· क्रियावत्त्वमूर्तत्वपदाभ्यां

गगनादेश्च व्यवच्छेद । सोपाधिकत्वप्रतिक्षेपस्सामान्येन—**सावयवेषु द्रव्येष्विति ॥ रूपान्तरमुपाधि** । उपाधिं विशदीकृत्य प्रतिक्षिपति—**कार्यत्वप्रतिनियतमिति ॥** ज्ञानशक्त्यनुमानेन पक्षेऽपि शक्यक्रियत्व शक्योपादानादिविज्ञानत्व च विज्ञायेते, ततश्च न साधनाव्यापकत्वमिति भाव । एतेनोपाधि· प्रतिक्षिप्त ॥

अनुमानान्तरम्—**किञ्च सर्वेति ।** इदमेवादृष्टलिङ्गकम्। अयमर्थ —धर्माधर्मौ स्वसाक्षात्कर्तृचेतनाधिष्ठितौ अचेतनत्वे सति कार्यकरत्वात् वास्यादिवदिति । एतेनातीन्द्रियार्थसाक्षात्कारक्षम. पुरुषविशेषस्सिध्यतीति । बीजेनाङ्कुरमुत्पद्यते सुखादिना पुलकाङ्गकम्पादि । तत्र चेतनाधिष्ठान नास्तीति व्यभिचाराशङ्काया तेषा पक्षत्वमुपगम्य ईश्वराधिष्ठानस्य सिषाधयिषिततया न व्यभिचार इत्याह—**बीजाङ्कुरादेरिति ।** सिद्धसाधनपरिहारः—**न च लाघवेनेति ।** लाघवादृष्ट्या अशक्तस्य कार्यकरत्वकल्पनायामेकेन्द्रियवादपरिग्रहप्रसङ्ग इति भावः ॥

अदृष्टलिङ्गकानुमान निगमयति—**अतः प्रमाणेति ॥** पक्षधर्मताबललब्ध विशेष कार्यलिङ्गकानुमाने प्रदर्श्य सिद्धसाधन वारयति—**समर्थकर्तृपूर्वकेति ॥** अत्रैव विशेषविरुद्धत्व निराकरोति—**यत्त्वनैश्वर्येति ॥** अयमर्थः—लिङ्गबलेन लिङ्गसहचरिता धर्मास्सर्वे लिङ्गिन्युपस्थाप्यन्ते इति शङ्कितुराशय· । नियमेन लिङ्गापेक्षिता एव धर्मा उपस्थाप्यन्त इति समाधातुराशय । ते च धर्माः प्रकृतकार्यविषयकशक्त्युपादानविज्ञानादय । न त्वन्यासामर्थ्यज्ञानादय इति। एतेन दोषत्रयमपि परिहृतम् । अभ्यासामर्थ्यादीनामकिञ्चित्करत्व विकल्प्य विशदयति—**किञ्चक्रियमाणेति ॥ कार्यत्वस्यासाधकानामिति ॥** नियमेनानपेक्षितानामित्यर्थ ॥

शरीर कार्योपयोगितयाऽपेक्षितमिति शङ्कते—**कुलालादीनामिति** ॥ तदीयव्यापारानुकूलव्यापारत्वरूप प्रेरकतात्वलक्षणमधिष्ठानत्व यत्र तत्र शरीरावच्छिन्नत्वमिति व्याप्ति भूतवेतालगरलाद्यधिष्ठाने व्यभिचारदर्शनात् शरीरमनपेक्षितमिति समाधत्ते—**न सङ्कल्पमात्रेणेति** ॥ सङ्कल्पश्चेच्छात्मक आत्मविशेषगुण । तत्रापि शरीरमेवावच्छेदकत्वेन कारणमित्याक्षिप्य मन एव कारण शरीरमन्यथासिद्ध मनश्चेश्वरेऽभ्युपगम्यते इति समाधत्ते—**कथमशरीरेति** ॥ मुक्तात्मना मनस्सत्त्वेऽपि सकल्पज्ञानाद्यनुत्पाद भोगसाधनादृष्टविरहनिबन्धन । इश्वरस्य तु सकल्प जगदनुग्रहनिबन्धन इति भाव । इदानीतनैयायिकग्रन्थेषु प्रक्रियैषा नोपलभ्यते । नैयायिकैकदेशिमतमिद स्यात् यतस्सिद्धित्रयेऽयमर्थ अनूदितोऽस्ति ॥

पक्षधर्मताबललब्ध क्षेत्रज्ञवैलक्षण्य सिद्धसाधनदोषपरिहाराय पुनरनुकीर्तयति—**अतो विचित्रेति** ॥ एवमीश्वरानुमाननिरासक मीमांसक परिभूय तार्किक· वेदान्तिनमाक्षिपति—**अतः प्रमाणान्तरेति** ॥ निमित्तोपादानैक्यस्य गगनादिसृष्टेश्चानुमानाविषयत्वेन शास्त्रस्याधिकविषयत्वाद्ब्रह्मणि प्रामाण्यमाशङ्क्य तद्विषयस्यापि बाधकान्तरेण बाधितत्वात् अप्रामाण्यमेवेत्याह—**किंचात्यन्तेति** ॥ शास्त्रस्यानुमानसापेक्षत्वे तदनुरोधेनैव शास्त्र नेतव्यमिति भाव· ॥

१३६ सिद्धान्त

एवंप्राप्ते इति ॥ प्रथम जगत्कर्तु क्षेत्रज्ञवैलक्षण्योपपादक पक्षधर्मताबल त्रेधा विकल्प्यासिद्धयति । तत्रैते विकल्पा —कि कार्याणा कर्तृकालैक्यनियम कि विपुलत्वविचित्रत्वादिक किंवा शरीरानपेक्षसृष्टिकर्मत्वमिति । प्रथमस्यासिद्धिः—**महीमहार्णवेति** ॥ **एकं कार्यत्वं**

एकसामग्रीपूर्वकत्वम् । अथ द्वितीयस्य—**नच क्षेत्रज्ञानामिति ॥ तदतिरिक्तेति ॥** धर्मिकल्पनातो वर धर्मकल्पनेति भाव । अथ तृतीयस्य— **नचयुगपदिति ॥** युगपत्सर्वलये देहानपेक्षकर्तृत्वं जीवस्य न सभवतीति शङ्कितुराशय । **अतः** पक्षधर्मताबलस्यासिद्धत्वादित्यर्थ । अभिज्ञकर्तृकत्वसाध्य चतुर्भिर्दोषैर्दूष्यते—**बुद्धिमदेककर्तृकत्व इति ॥** अत्र एककर्तृकत्वे सर्वज्ञकर्तृकत्वे सकर्तृकत्वे इति विकल्पाः बोध्याः ॥ पक्षविशेषाधीनविशेषविकल्पेन द्वाभ्या दोषाभ्या हेतु दूषयति— **सार्वज्ञ्येति ॥ अत्रापीति ॥** घटपटादौ दृष्टस्य भिन्नकर्तृकत्वस्य प्रतिक्षेप इत्यर्थ । शास्त्राविरोधोपपादनम्—**कुम्भकार इति ॥** इदमर्धोपादान, न तु पाठक्रम । कुम्भरथयोरेककर्तृकत्वे तत्कर्त्रोः पृथगुक्तिः व्यर्थेत्यर्थ. । पक्षधर्मताबलेन कार्यस्य हेतुभूतेनैव कर्मसबन्धविशेषेण विशेषविरोधमाह—**अपिच सर्वेषामिति ॥**

एव सप्त दोषानभिधाय चतुर प्रतितर्कानाह—भवन्ति च प्रयोगा इति ॥ कार्यत्वे क्षेत्रज्ञकर्तृकत्वप्रसङ्ग । कर्तृत्वे सापेक्षत्वसशरीरत्वप्रसगौ । कालत्वे लोकवत्त्वप्रसङ्गश्चेति । तृतीयप्रसङ्गे व्यभिचारमाशङ्क्यपरिहरति—**नच क्षेत्रज्ञानामिति ॥** अनादित्व प्रवाहत । क्षेत्रज्ञवैलक्षण्य शरीरनिरपेक्षस्रष्टृत्व विशिष्य दूषयन् अदृष्टलिङ्गकानुमानमपि दूषयति—**अपिच किमीश्वर इति ॥** कृतिलक्षणव्यापारमात्रेण स्रष्टृत्वमसिद्धयति—**स किं सव्यापार इति ॥** इच्छालक्षणव्यापारमात्रेण स्रष्टृतां निवारयति—**कार्य जगदिति ॥** दर्शनानुगुण्येनैते दोषा कल्पनायाम् । श्रुत्यनुसरणे यथाश्रुति प्रतिपत्तव्यमिति भाव सूचयति—**अतो दर्शनानुगुण्येनेति ॥** मानान्तरेण बाधितोऽर्थो न शास्त्रेण शक्यप्रतिपादन इत्येतदनूद्य परिहरति—**यत्तु निमित्तेति ॥** शास्त्रैक-

प्रतिपाद्यत्वे मानान्तराप्रतिपाद्यत्वहेतुरशुद्ध इत्युपसंहरति—**अतः प्रमाणान्तरेति ॥**

28. भावनावादः.

१३७ शास्त्रावस्था

इदपुनरिहावधेयम्—वेदाख्यस्य शास्त्रस्य कालक्रमेण तिस्रोऽवस्थास्सपन्ना इत्यवधार्यते । तत्र शास्त्र नियोगापरपर्याय फलचिन्ता भयचिन्ता वा विनैव केवल कर्तव्यमिति श्रद्धया स्वाभाविक्याऽनुवर्तनीयमिति प्राथमिकी आर्यसप्रदायसिद्धा दशा । यैषा भगवताऽप्युपदिश्यते "कार्यमित्येव यत्कर्म नियतं क्रियते" इति । तत यत्किञ्चनफलमुद्धिश्यैव शास्त्र प्रवर्तयति, तस्मात् फलेऽपि दृष्टि निधाय हितानुशासनवदनुवर्तितव्यमिति द्वितीयाऽवस्था । तृतीया तु शास्त्र राजशासनवदनुवर्तितव्य प्रत्यवायभयेनेति ॥

तत्रेद प्रमाणम्—तन्त्रवार्तिके कुमारिलेन "न हि विधिशतेनापि तथा पुरुष. प्रवर्तते यथा लोभेन" इति (९९९) द्वितीयाऽवस्थाप्रकाशिता । विधिविवेके मण्डनमिश्रेण "भयात्प्रवृत्तिस्तु ध्रुवभाविनी न तथा लोभात्" (३१६) इत्ति प्राभाकरसमता तृतीया दशाऽनूदिता । प्राथमिकी दशा तु बाह्यैरप्यनूदिता—

सुखार्थं क्रियते कर्म तथापि स्यान्न वा सुखम् ।
कर्मैव तु सुखं यस्य निष्कर्मा स सुखी कथम् ॥

इति ॥ बोधि (२७७.)

१३८ प्रयोजनविचार

नैयायिकादिभिस्तु अनिष्टनिवृत्तिमपि फलपक्षे निक्षिप्य फलवाद एव समर्थ्यते ॥

अत्रैते श्लोका अवगन्तव्या —

यावत्खलु प्रमातृणां प्रवर्तननिवर्तने ।
शब्दा न कुर्वते तावत् न निराकाङ्क्षबोधनम् ॥
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।
एवमेव प्रवृत्तौ तु चैतन्येनास्य किं फलम् ॥
न हि प्रयोजनापेतं वाक्यमुच्चार्यते क्वचित् ।
प्रयोजनक्षमं नापि पदमाख्यातवर्जितम् ॥
भयं नाशङ्कते यस्मात् फलं वाऽपि समीहितम् ।
तथाविधस्य राज्ञोऽपि नाज्ञाऽनुष्ठीयते जनैः ॥
वर्तमानापदेशेऽपि फलं यत्रावगम्यते ।
तत्र प्रवर्तते लोकः लिङादिष्वश्रुतेष्वपि ॥
भवत्यारोग्यसंपत्तिः भुञ्जानस्य हरीतकीम् ।
तत्कामो भक्षयेच्चेति को विशेषः प्रवर्तने ॥
विधिर्वीर्यस्वभावस्तु क्रियेरपि तथाविधः ।
सप्रत्ययप्रेरकतां विधिर्नोपैति निष्फलः ॥
क्वचित्साक्षात्पदोपात्तं क्वचित्प्रकरणागतम् ।
क्वचिदालोचनागम्यं फलं सर्वत्र गम्यते ॥
तस्मात्फलस्य साध्यत्वात् सर्वत्र तदवर्जनात् ।
क्रियादीनां च तादर्थ्यात् तस्य वाक्यार्थतेष्यते ॥
वेदाद्गुरुनियोगाद्वा शासनाद्वा महीभुजाम् ।
न सचेताः क्रियां काञ्चिदनुतिष्ठति निष्फलाम् ॥
जडो माणवकोऽप्येषः चपेटापातहानये ।
मोदकावाप्तये वाऽपि करोति गुरुशासनम् ॥
तस्मात्पुंसः प्रवृत्तौ प्रभवति न विधिः नापि शब्दो लिङादिः
व्यापारोऽप्येतदीयो न हि पटुरभिधा भावनानामधेया ।

न श्रेयस्साधनत्वं विधिविषयगतं नापि रागादिरेवं
तेनाख्यत्काम्यमानं फलममलमतिः प्रेरकं सूत्रकारः ॥
इति श्लोकवार्तिकन्यायमञ्जर्यादौ ॥

१३९ भावनास्वरूपम

अत्र नियमेन ज्ञातव्य भावनास्वरूप नियोगस्वरूप च विशदयामः । कार्यम्वरूप तु प्रागेव निरूपित जिज्ञासासूत्रे । तत्रैवं मन्यन्ते भाट्टा —भाव्यनिष्ठ पुरुषव्यापार. करोत्यर्थ अर्थभावनापदवाच्य· आख्यातार्थ । लिङादिशब्दव्यापारस्तु शब्दभावनाख्य. अर्थभावनानुष्ठाने प्रवर्तकः, स विधिरित्युच्यते ॥

भाव्यनिष्ठ भावकव्यापारो हि भावना । भाव्य स्वर्गादि फल साध्यमानत्वात् । साध्यत्व चास्य भवनक्रियाकर्तृत्वात् । भवनक्रियाया च कर्तृत्वमुत्पत्तिधर्मकस्य वस्तुनो दृष्टम् . न नित्यभूतस्याकाशादे. । नापि नित्यमभूतस्याकाशकुसुमादे । तन्निष्ठ तदुत्पादकश्च पुरुषव्यापारो यस्सा भावना । सा ण्यन्तेन भवतिनोच्यते । प्रकृत्यर्थस्य भवते. कर्ता यः स्वर्गादि स एव ण्यन्तस्य तस्य कर्मता प्रतिपद्यते । कर्तात्वस्य प्रयोजक भावयितेद्यादौ तृन्प्रत्ययाद्यर्थ । णिज्वाच्य प्रयोजकव्यापार. । पुरुषो हि भवन्त स्वर्गादिमर्थ स्वव्यापारेण भावयति सपादयति । स तत्सपादको व्यापारः भावनेत्युच्यते—

भावार्था· कर्मशब्दा ये तेभ्यो गम्येत भावना ।
यजेतेत्येवमादिभ्य. स एवार्थो विधीयते ॥
क्रियाविशेष एवायं व्यापारो ज्ञातुरात्मनः ।
स्पन्दात्मकबहिर्भूतक्रियाक्षणविलक्षणः ॥ इति केचित् ॥
पुरुषस्य प्रयत्नो वा भावनेत्यभिधीयते ।
औदासीन्यदशापायं पुमान्येन प्रपद्यते ॥

स यत्नः यागहोमादिक्रियानिर्वृत्तिकारणम् ।
तस्य तद्व्यतिरिक्तत्वं प्रायस्सर्वोऽनुमन्यते ॥
स चायमात्मधर्मोऽपि न विभुत्वादिवन्मतः ॥
साध्यरूपाभिसंबन्धाद्धत्ते विषयतां विधेः ॥ इत्यन्ये ॥

सैषा पुरुषार्थभावनेत्युच्यते । तस्या आकाङ्क्षितमंशत्रयं किं केन कथमिति साध्य साधनमितिकर्तव्यता च । स्वर्गकामो यजेतेत्यत्र स्वर्गः साध्यत्वेनान्वेति । याग करणत्वेन । प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेन । इय भावनाऽऽख्यातत्वेनाभिधीयते । लिङ्त्वेनाभिधीयमाना शब्दव्यापारलक्षणा शब्दभावनाऽप्यशत्रयवती । तत्रांशत्रयवती आर्थीभावना साध्यभूता । लिङादिज्ञान करणम् । अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यता ॥ विशिष्टशाब्दबोधप्रकारस्तु मानमेयवार्तिके विज्ञेयः । यथा—

यजेतेत्यत्र चाख्यातं लिङत्वेनाख्याति भावनाम् ।
अभिधाख्यां तथैवार्थीमाख्यातत्वेन बोधयेत् ॥
उभे अंशत्रययुते इति विश्रुतमेव तत् ।
विशिष्टशाब्दीप्रयोज्या तादृश्यार्थीति गम्यते ॥
प्रयोज्यत्वं स्वविषयज्ञानजन्याऽनुमा तु या ।
तत्प्रयोज्यत्वमनुमा त्वेतादृश्यत्र गम्यताम् ॥
यागो मदिष्टहेतुस्स्यादित्याकारा तया पुनः ।
पुमान् प्रवर्तत इति प्रयोज्यत्वं निरूपितम् ॥
यागस्य चेष्टहेतुत्वमेव प्राशस्त्यलक्षणम् ।
स शब्दभावनांशस्सन् एवमत्रोपयुज्यते ॥

इति ॥ शब्दभावनायाः प्रवर्तकत्वान्यथाऽनुपपत्त्या यागस्येष्टसाधनत्वमवगम्यते । तादृशावगम एवानुमितिः । सा पुरुषप्रयत्न प्रति प्रयोजिकेति भावः ; तथाच यजेत स्वर्गकाम इत्यादौ निरुक्तांशत्रययुतशब्द-

भावनाप्रयोज्या स्वर्गसाध्यका यागकरणिका प्रयाजादीतिकर्तव्यताका भावनेति भावनामुख्यविशेष्यक शाब्दबोध इति भावनावादिभाट्टसंप्रदाय. ॥

29. नियोगवादः

१४० नियोगस्वरूपम्.

अथ नियोग एव विधिपदाभिधेयो वाक्यार्थ इति प्रभाकरमत निरूप्यते—क. पुनरसौ नियोग ? यस्मिन् ज्ञाते सति नियुक्तोऽहमत्रेति प्रतिपद्यते पुरुषः सोऽसावर्थ एव विधिरित्युच्यते । स च प्रेषणात्मकः । यः प्रेष्यते स करोति य । कराति, प्रेष्यते हि स इति क्रियाकर्तृसबन्धादन्य एवाय प्रैषप्रैष्यसबन्ध. । यतः प्रेषितोऽहमिति विदित्वा क्रियाया प्रवर्तते । आचार्यचोदित करोमीति हि दृश्यते । यजेतेति श्रुते नियुक्तोऽहमिति प्रथममवगच्छति । ततो यजते । तेनायमाद्यस्सबन्धः । पाश्चात्यस्तु क्रियाकर्तृसबन्ध. ॥

स च नियोग णिजर्थविलक्षण । प्रयोजकव्यापारो हि णिजर्थः । ज्ञापकव्यापारस्तु लिङर्थ । प्रवृत्ताक्रियाविषयश्च प्रयोजकव्यापार. णिजर्थ' । इह तु तद्विपरीत' । तत्र हि कार्य पश्यत. प्रवर्तनम् । इह तु प्रवार्तितस्य कार्यदर्शनामिति महान् भेदः ॥

१४१ नियोगावगम .

एष नियोग. प्रमाणान्तरानवगम्यश्चेत्कथ शब्दैकगोचरे तत्र सबन्धव्युत्पत्ति. । अत्राहु —गच्छाधीष्वेति शृण्वन् वृद्धश्चेष्टमानो दृश्यते । चेष्टा च स्वात्मनि प्रवर्तकावगमपूर्विका दृष्टा । प्रत्यक्षदृष्टे चाम्रादौ सुखसाधनतयाऽन्वयव्यतिरेकाभ्यामवगते तदनुस्मरणात्प्रवर्तमानः कस्मिश्चिदात्माकूते समुपजाते सति भौतिक व्यापारमारभते । स चात्म-

धर्मः । आत्मैव स्वसवेद्य । स्वेनैव सवेद्य । अहंप्रत्ययगम्यो ह्यात्मा। नासौ परस्मै दर्शयितु शक्यते । न चर्चयितु शक्यते । एतावता नानुभूयते इति न शक्यते वक्तुम् । परोऽपि ह्यनमहप्रत्ययेनानुभवत्येव। तथाऽयमपि भौतिकव्यापारहेतुरात्माकूताविशेषः न प्रमाणान्तरवेद्यो भवति न च न वेद्यते । तत्सवेदने सति चेष्टा । यद्वन्त दृष्ट्वा तस्यापि तादृश-प्रेरणावगमोऽनुमीयते । तदेतदात्मप्रत्यक्षम् ॥

लिङादिशब्दश्रवणे सति प्रेरणावगतिर्भवति । ननु यदि लिङा-दिव्यतिरेकेण नान्यतो नियोगोऽवगम्यते कथमसौ नियोगशब्दात्प्रतीयते। कथ वा नियोगशब्दस्य नाम्नोऽप्यर्थ· प्रमाणान्तरागोचरस्स्यात् । अयि साधो न नियोगो निपूर्वेण युजिना घञन्तेन बोधयितु शक्यते, व्यव-हारमात्रमेतत्स्वरूपमाख्यातुमाश्रीयते । यथा तु यजेतेत्येवमादिभ्य· शब्देभ्यस्सोऽवगम्यते तथा नान्यत इत्यत एव न प्रमाणान्तरगोचरो धर्म· । लिङर्थो हि नियोग वाक्यार्थ । स च धर्म एव । स च न प्रमाणान्तरगम्य इति ॥

१४२ नियोग एव कार्यम्

इदमत्रावधेयम्—प्रेरकत्वमेव शब्दार्थ । आर्थ तु तस्य नियोगस्यानुष्ठेयत्वलक्षण कार्यत्वम् । यतो विधिरनुष्ठेयतयाऽवगम्यते आचार्याज्ञा करोमि राजाज्ञा करोमीति । किमर्थ तर्हि विषयानुष्ठान-मिति चेत् न ह्याज्ञा घटादिवत्स्वरूपेण कर्तु शक्या । अपि तु विषय· द्वारक तत्सपादनम् । कमण्डलु बिभृहीत्याचार्येणाज्ञप्त कमण्डलु भृत्वाऽऽचार्याज्ञा कृता मन्यते । कटक गच्छेति राज्ञाऽऽज्ञप्त कटक गत्वा राजाज्ञां कृता मन्यते सोऽय नियोग एवानुष्ठेय ॥

अन्ये तु शाब्द कार्यत्व नियोगस्य । प्रेरकत्व त्वार्थमित्या

चक्षते । अनुष्ठेयता हि तस्य निज रूपम् । स्वसिद्धये स तु नियोज्यं नियुञ्जान· प्रेरक इत्युच्यते । तदुक्तम्—

कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ ।
नियोग इति मीमासानिष्णातैरभिधीयते ॥ (प्रक १८८) ॥

इति । तदिद कार्यत्वमपरित्यक्तप्रेरकभावमवगम्यते । प्रेरकत्वं चापरि-त्यक्तकार्यभावमित्यन्यतरदत्र शाब्द रूपमिति । कार्यवाक्यार्थवाद· प्रागेव विस्तृत· ॥

१४३ नियोगानुबन्ध

स चाय नियोगः प्रतीयमान यजेत स्वर्गकाम इत्यनुबन्धद्वया-वच्छिन्न प्रतीयते । यज्यादिनाऽस्य विषयानुबन्ध धातुनोच्यते । स्वर्गकाम इत्यधिकारानुबन्ध पदान्तरेणार्प्यते । तत्र च स्वर्गकामस्यैव-मधिकारो निर्वहति यदि भावार्थस्य स्वर्ग प्रति साधनत्वमवगम्यते । एव तर्हि स्वर्गकामेनैवाय कृतो भवति । एव स्वर्गकामपदान्वय । न पुनस्स्वर्गादिफलप्रदर्शनपूर्वक विधे प्रवर्तकत्वम्, अम्वातन्त्र्यप्रसङ्गात् । न हीदृश शास्त्रस्य दैन्य, यत्फल विना पुस प्रवर्तयितु न शक्नोति । अन्यथा यावज्जीव यजेतेत्यादावप्रवर्तक शास्त्र स्यात् । किं यावज्जीव-मित्यादिचोदना फलशून्या एव? ओमित्युच्यते । न हि विधि फलमाकाङ्क्षति । अपि तु नियोज्य विषय, कस्य नियोग कुत्र नियोग इति । अत· पर फलकल्पन पुरुषबुद्धिप्रभव भवति न शास्त्रीयम् । कामाधिकारे तु नियोज्यतैवान्यथा स्वर्गकामस्य नोपपद्यत इति स्वर्गस्य साध्यत्वमुपगतम् । न पुनर्विधे फलार्थत्वात् । अत एव न तत्र वैधी प्रवृत्तिरिति लिप्साऽर्थलक्षणेत्याहेति ॥

प्रतिषेधाधिकारेऽपि प्रत्यवायो न कल्प्यते ।
निषेध्यविषयादेव लब्धत्वादधिकारिणः ॥

नियोज्यस्तावदेतावान् कृद्धोऽरिहननोद्यतः ।
विषयस्तन्निवृत्तिश्च नियोगो ह्यत्र गम्यते ॥ इति ॥

अयमत्र निर्णयः—भट्टमते अप्रवृत्तप्रवर्तकत्व विधित्व, लिङादिवृत्तेश्शब्दभावनाया पुरुषार्थभावना प्रति हेतुत्वाभ्युपगमात् । "अभिधत्ते करोति च" इत्यभ्युपगमाच्च । प्रभाकरमते अज्ञातज्ञापकत्व विधित्वम्, लिङादिर्हि नियोग कार्य वा बोधयतीति विशेष । कार्यत्वावगमादेव प्रवृत्तिरिति । सैषा शास्त्रदशा प्रागेव निरूपिता ॥

१४४ अर्थपदार्थ

इदमप्यत्रावधेयम् —"चोदनालक्षणोऽर्थो धर्म" इत्यत्र चोदनालक्षणमात्रस्य धर्मत्व मा भूदित्यर्थशब्देन विशेष्यते। चोदनाशब्देन च प्रवर्तक निवर्तक च वाक्यमुच्यते । ततश्च निषेधवाक्यै· "न हिंस्यात्" इत्यादिभि अनर्थत्वेन लक्ष्यमाणाना हिंस्रादीनामपि धर्मत्व स्यात्तद्व्यावृत्त्यर्थ य एवार्थरूपेण प्रवर्तकवाक्यैर्लक्ष्यते तस्यैव धर्मत्व वक्तुमर्थग्रहणमिति कौमारिल मतम् ॥

प्राभाकरास्तु लक्षणा परिहरन्त· श्येनादिस्वरूपमेवार्थपदस्य व्यावर्त्य मन्यन्ते । तेषामेव "नैव श्येनादय कर्तव्या विज्ञायन्ते" इति विधेयत्वनिराकरणेन प्रतिषेधविषयत्वसमर्थनात् । कथपुनस्तेषा विधेयत्व निराकरिष्यते? तत्राहु —यस्य हि विधि स्वसिद्ध्यन्यथाऽनुपपत्त्याऽनुष्ठानमाक्षिपति तद्विधेयमित्युच्यते। काम्येषु च कर्मसु कामनावशादेव प्रवृत्तिसिद्धे तत एव विधिस्सिध्यन् अन्यथानुपपत्त्यभावात् न स्वयमनुष्ठानमाक्षिपति ॥

ननु कर्तव्यतावोधनमेव प्रवर्तन, कर्तव्यता च वेदे यागस्य लिङैव बोधितेति कथमविधेयत्वम् । सत्यम्, न तु यागस्य कर्तव्यता

लिङाऽभिधीयते । स्वार्थस्य कर्तव्यतां लिङभिधत्ते । यागश्च तस्य विषयः करणं च । सोऽयं कर्तव्यतात्मा नियोगोऽन्यथानुपपत्त्या स्वविषयस्य कर्तव्यतां बोधयन् अनुष्ठापक इत्युच्यते । श्येनादीनां तु रागादेवानुष्ठानसिद्धेः न नियोगस्तेषामनुष्ठानमाक्षिपतीति न तेषां विधेयत्वम् । असति च विधेयत्वे तेषां निषेधविषयत्वात् अनर्थत्वमिति तद्व्यावृत्त्यर्थमर्थपदमिति ॥ कुमारिलमते तु यागो विहितः, हिंसा प्रतिषिद्धेति विरोधपरिहार ॥

30 समन्वयाधिकरणम्.

१४५. अधिकरणविषय

अस्मिन्नधिकरणे पूर्वपक्षी मीमांसकः भाट्टमतानुयायी प्रपञ्चसत्यतावादी उपनिषदप्रामाण्यवादी वेदान्ताना प्रामाण्य प्रथममाक्षिपति । स प्रथमः वाक्यार्थः । निष्प्रपञ्चीकरणनियोगपरत्वेन वेदान्तानां प्रामाण्य संभवतीति जरन्मायावादिवाक्यार्थः द्वितीयः । अयं पुनर्वादः गौडमीमांसकासंमत इति सर्वार्थसिद्धावुक्त. । स च गौडमीमांसकः प्रकरणपञ्चिकादिप्रणेता शालिकनाथ इति न्यायकुसुमाञ्जलिबोधिन्यां व्याख्यातं तृतीयपरिच्छेदे । ततस्तृतीयो वाक्यार्थः पूर्वपक्षिणा क्रियमाण द्वितीयवाक्यार्थप्रतिक्षेपः । तत ध्याननियोगवादिजरन्मायावादिमतानुसारेण वेदान्तप्रामाण्यविचारः तुरीयः । एष एव परिष्कृतः मण्डनमिश्रसम्मतः । तस्य निराकरणरूपः नवीनमायावादिशाङ्करसम्मतः पञ्चमः वाक्यार्थः । तस्य निरासः ध्याननियोगवादिन षष्ठ । सप्तमाष्टमावपि भेदाभेदवादः भास्करसंम्मतः तन्निरासश्च ध्याननियोगवादिन एव वाक्यार्थौ । ततो ध्याननियोगवादनिरासपूर्वक. पूर्वपक्ष नवमः । दशमस्तु सिद्धान्त इत्यस्मिन्नधिकरणभाष्ये दश प्रधानभूतावाक्यार्था इति संग्रहः ।

१४६ अधिकरणारम्भ·

तत्तु समन्वयात्॥ अस्य सूत्रस्यार्थः सङ्गतिश्च प्रागेव प्रतिपादितौ। श्रीभाष्यार्थस्तु—**एवमिवेति॥** उत्तरोत्तरं विशेषशब्दाः। तेषां सर्वशाखाप्रत्ययन्यायात् सामान्यविशेषन्यायाच्चैकार्थ्यम्। पुरुषार्थत्वायाह—**आनन्द इति॥ प्रवृत्तिनिवृत्तिरूपप्रयोजनेति॥** सुखदुःखनिवृत्तिलक्षणस्य मुख्यप्रयोजनस्य प्रवृत्तिनिवृत्तिसाध्यत्वात् तद्रूपत्वोक्तिः। **अन्यपरत्वं** तात्पर्याभावः। अप्रामाण्यमिति यावत्। **स्वविषयेति॥ यत्र प्रामाण्यं** तत्र प्रवृत्तिनिवृत्त्यन्यतरान्वयः। ततश्च व्यापकनिवृत्त्या**व्याप्य**निवृत्तिरिति शङ्कितुराशयः। तृणलोष्टादिदर्शनेषु भग्नेय व्याप्तिरिति यत्र प्रामाण्य तत्र विषयपरिच्छेदकत्वलक्षणं व्यवहारानुगुण्यसपादकत्वमिति व्याप्तिरिति समाधातुराशयः॥

नच प्रयोजनेति॥ यत्र प्रामाण्य तत्र सप्रयोजनत्व यत्र सप्रयोजनत्व तत्र प्रवृत्तिनिवृत्त्यन्यतरान्वय इति पुनरशङ्कायां तत्रापि प्राथमिकी व्याप्तिः लोष्टदर्शनादिष्वेव भग्नेति भाव॥ **प्रयोजनं हीति॥** यत्र सप्रयोजनत्वं तत्र प्रामाण्यमिति व्याप्तिरित्यर्थ। प्रत्यक्षादिषु यथातथाभावेऽपि बुभुत्सितग्राहिणि शास्त्रे प्रयोजनाभावे बुभुत्सानुदयात् प्रयोजनपर्यवसायित्वं शास्त्रप्रामाण्यव्यापकमिति शङ्कायां तदुपेत्य प्रयोजनस्य न प्रवृत्तिनिवृत्त्यन्वयव्याप्यत्वमित्याह—**नच प्रवृत्तीति॥ विरहिण इति॥** शास्त्रस्येति शेषः। चशब्दो व्याप्यनिषेधद्वयसमुच्चये। यथा मानत्व न प्रवृत्तिनिवृत्त्यन्वयव्याप्य तथा प्रयोजन चेति। तत्र हेतुः—**पुरुषार्थेति॥** ब्रह्मणः तथाऽन्वयप्रतीतेरित्यर्थः। लौकिकेसिद्धपरवाक्येऽपि पुरुषार्थान्वयं दर्शयति—**तथा स्वरूपपरेष्विति॥** एवमक्षरयोजनायां सक्षेपेणार्थ उक्तः। अथ तात्पर्य वक्तु पूर्वपक्षं विस्त-

रेण प्रस्तौति—**अत्राह नेति** ॥ सिद्धपरस्यापि प्रयोजनपर्यवसान दृष्टमित्याशङ्क्य दूषयितुमनुवदति—**यत्पुनरिति** ॥

१४७. निष्प्रपञ्चीकरणनियोग

अथ निष्प्रपञ्चीकरणनियोगवादं प्रस्तौति - **अत्र कश्चिदाह वेदान्तेति** ॥ नियोगवाक्यार्थवादिनः जरत्प्राभाकराः टीकाकारा. । नव्यप्राभाकरास्तु कार्यवाक्यार्थवादिनो गौडमीमांसका. । निरूपितः प्रागनयोर्विशेषः ॥ सोऽय नियोगवाद. शाङ्करेष्युभयलिङ्गाधिकरणे निराकृतोऽस्ति । **न दृष्टेरिति** ॥ पञ्चम्यन्तमिदम् । खण्ड्यति—**तदयुक्तमिति** ॥ नियोगो हि पञ्चाङ्गः । तत्र नियोगस्वरूप प्राङ्निरूपितम् । तस्य कुत्र नियोगः कस्य नियोग इत्यशद्वयापेक्षित्वात् **नियोज्यः** वक्तव्यः । तस्य नियोज्यतासिद्धयर्थ **विशेषणमपि** निरूपणीयम् । तच्च यागस्थले स्वर्गकामना शौचजीवनादिकम् । **विषयः** यागादिः । नियोगस्याक्रियारूपत्वेन साक्षात्कृतिसाध्यत्वाभावात् यागद्वारा कृतिसाध्यतेति प्रतीयते । ततश्च "कृतितत्साध्यमध्यस्थो यागादिर्विषयो मत." (भाव) इत्युक्तरीत्या यागविषयकृतिसाध्यो नियोग इति प्रतीतौ नियोगकृतिविषयत्वेन यागस्य भानात् नियोग प्रति यागस्य विषयत्वम् । तत्र फल प्रत्यकरणस्य तत्कामकृतिविषयत्वासभवात् यागस्य नियोगफल प्रति करणत्वमपि अभिबानापर्यवसानलक्षणोपादानप्रमाणेनावगम्यते । ततश्च कार्यज्ञप्तौ विषय. याग. । तदुत्पत्तौ करणमिति विशेषः ॥

इतिकर्तव्यता नाम कथ कर्तव्यमित्यपेक्षायां इत्थं कर्तव्यमिति करणस्य प्रकाराणामुपदेशात् इतिकर्तव्य करणं इतिकर्तव्यता करणस्य प्रकारः, **अङ्गमिति** यावत्, दर्शपूर्णमासादौ प्रयाजादि. । **प्रयोक्ता**

प्रयोगोऽनुष्ठानम्। तस्य कर्ताऽनुष्ठाता। नियोज्यस्यैवेदमाकारान्तरम्। तदुक्तम्—

कर्तृत्वमधिकारित्वं नियोज्यत्वमिति स्थितम्।
अवस्थात्रितयं तत्रानुष्ठातृत्वं हि कर्तृता॥
अधिकारः स्वकीयत्वबुद्धिमत्त्वं हि कर्मणि।
कार्ये स्वकीयत्वबुद्धिमत्त्वं तु स्यान्नियोज्यता॥

इति मानमेयवार्तिके (५०५) विस्तरः द्रष्टव्यः। अतएव भगवद्गीतायां निरुक्ताकारत्रयप्रतिषेधाय फलसङ्गकर्तृत्वत्याग उपदिश्यते॥

१४८ नियोगनिराकरणम्

तत्र विशेषणानुपपत्त्या नियोगं दूषयति—**नियोज्यविशेषणमनुपादेयमिति॥** उपादेयं विधेय अनुष्ठापकं तद्भिन्न वक्तव्यमित्यर्थः। नैमित्तिकनियोगो वा काम्यनियोगो वेति विकल्प्य दूषयति—**निमित्तं फलं वेति॥** जीवनादिवन्निमित्तपक्ष प्रतिक्षिप्य पुत्रजन्मादिवन्निमित्तपक्ष प्रतिक्षिपति—**निमित्तत्वेचेति॥** अथ विषयानुपपत्त्या नियोगदूषणम्—**कश्चात्र नियोगेति॥** अत्र विषयविचारे द्वयी गतिः प्रपञ्चनिवृत्तिर्विषय, अपवर्गः फलमित्येका। स्वर्गकामस्य यागोऽनुष्ठातव्यइत्युपदिश्यते। एवमपवर्गकामस्य प्रपञ्चविलय.। तमस्यवस्थित घटादितत्त्व बुबुत्समानेन तत्प्रत्यनीकं तमः प्रविलाप्यते, तथा ब्रह्मतत्त्व बुबुत्समानेन तत्प्रत्यनीक प्रपञ्चः प्रविलापयितव्य इति॥

प्रपञ्चनिवृत्तिरेव फलं ज्ञानं विषय इति द्वितीया गतिः। ततश्च प्रपञ्चप्रविलयविषयो वा ज्ञानविषयो वा नियोग इति पक्षद्वयम्। द्वितीयपक्षे ज्ञानेन प्रपञ्चस्य नियोगद्वारा निवृत्तौ सत्यत्वप्रसंग इति दूषणस्य स्पष्टत्वात् प्रपञ्चनिवृत्तिरेव विषय इति पक्ष परिशिष्यते। तत्रापि प्रपञ्चनिवृत्तिव्यतिरेकेण नियोगसाध्यस्य ब्रह्मतत्त्वावबोधस्या-

संभवात् तयोरैक्य सिद्धवत्कृत्यान्योन्याश्रयेण दूषणं प्रधानभूतोऽर्थः। **अभव्यरूपत्वात्** असाध्यत्वात्। **अभावार्थत्वात्** क्रियारूपत्वाभावात्। फलत्व विषयत्व चेत्याकारद्वयोपगमेऽन्योन्याश्रय इत्याह—**अस्य चेति** ॥ निवृत्तेरित्यर्थः। फलत्वविवक्षया क्लीवता ॥

स्ववाक्यात् प्रपञ्चमिथ्यात्वब्रह्मनिर्विशेषत्वपरवाक्यात्। अथ करणानुपपत्त्या नियोगदूषणम्—**अपिच किमिति** ॥ सत्यत्वेऽपि फलानुपपत्तिमुखेन करणानुपपत्तिरुच्यते—**प्रपञ्चस्य निवर्त्यत्व इति** ॥ सत्यत्वेन नियोगनिवर्त्यत्वे इत्यर्थ. ॥

इतिकर्तव्यत्वानुपपत्तिं वक्ष्यन् प्रयोक्तृनुपपत्तिमत्रैव सूचयति—**अथ ब्रह्मस्वरूपव्यतिरिक्त इति** ॥ अथेतिकर्तव्यत्वानुपपत्तिः—**किञ्च प्रपञ्चनिवृत्तेरिति** ॥ भावपक्षे निष्पादिका अनुग्राहिका चेतीतिकर्तव्यता द्विविधा। आद्या अवघातादि दृष्टरूपा। द्वितीया प्रोक्षणादिरदृष्टरूपा। उभयधाऽपि न सभवतीत्याह—**भावरूपा चेति** ॥ **अत्र** करणशरीरनिष्पादकरूपमङ्गमप्रसिद्धम्। निष्पन्नस्य **करणस्य** फलोत्पत्तौ सहकारिलिक्षणमङ्गमपि न सभवति सिद्धयसिद्धयोः **व्याघातादिति** भावः। अद्वितीयताज्ञानस्याङ्गतामाशङ्क्य प्रपञ्चनिवृत्ते. करणत्वव्याघातकत्वान्न सभवतीति समाधत्ते—**ब्रह्मणोऽद्वितीयत्वेति** ॥ अभावपक्षः अप्रामाणिक इत्याह—**अभावरूपत्व इति** ॥ **अभावादेव** अप्रामाणिकत्वादेव। शमादीनां निवृत्तिरूपत्वेऽपि ज्ञाननिष्पादकत्वमेव नतु प्रपञ्चनिवृत्तिं प्रत्यङ्गत्वमिति भाव.। **अतः** पञ्चविधस्याप्यङ्गस्यानुपपत्त्या **विधिः** नियोगः न सभवति। वेदान्तवाक्यजातमप्रमाणमेवेति भावः ॥

१४९ ध्याननियोगवाद.

अथ ध्याननियोगवाद **अन्योप्याह यद्यपीति** ॥ अत्र

ध्याता प्रयोक्ता साक्षात्कर्ता नियोज्यः। अविद्यानिवृत्तिः फलतया नियोज्यविशेषणम्। ध्यान विषयः करणं च इतिकर्तव्यता शमादिः। अत्रापि फलविषये त्रयी गतिः ब्रह्मभावः अविद्यापनयः साक्षात्कारो वेति। अत्र शाङ्कररीत्या वाचस्पतिदूषणमिदम्—"तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयमात्रेणाविर्भावात् अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव संभवात् उपासनायास्संस्कारहेतुभावस्य संस्कारस्य च साक्षात्कारोपजनने मनस्साचिव्यस्य च मानान्तरसिद्धत्वात् आत्मेत्येवोपासीतेति न विधिः। अपि तु विधिसरूपोऽयं यथोपांशुयाजवाक्ये विष्णुरुपांशुयष्टव्य इत्यादयो विधिसरूपा न विधय इति" (१–१–४)॥

श्रीभाष्ये तु साक्षात्कारद्वाराऽविद्यानिवृत्तिं प्रति नियोगस्य उपायत्वपक्षोऽनूद्यते। वाक्यार्थज्ञानमात्रोपायवाद प्रत्यक्षविरोधेन शास्त्रविरोधेन च निरस्त इत्याह—**नच वाक्यादित्यादिना॥**

१५० वाक्यार्थज्ञानोपायवादः.

अथ ध्याननियोगवाद्येव शाङ्करपरिगृहीत वाक्यार्थज्ञानोपायवादमनुवदति—**अथोच्येत रज्जुरेषेति॥** अत्रायं सारार्थ·—साक्षात्कारस्य नियोगद्वारत्वेऽपि अविद्यानिवृत्तिपूर्वकब्रह्मभावस्यापि नैयोगिकफलत्वेन मोक्षस्यानित्यत्वप्रसङ्ग·। अविद्यालक्षणस्य भ्रमस्य विद्यालक्षणप्रमाणज्ञानेनैव दृष्टविधया निवृत्तिसंभवात् न धर्मलक्षणनियोगापेक्षा। नित्यस्यैव मोक्षस्य प्रतिबन्धनिवृत्तिः परं वाक्यार्थज्ञानेन क्रियते। अतोऽविद्याकल्पितभेदनिवृत्तिपरं शास्त्रम्। ब्रह्म तु स्वतस्सिद्धम्। भेदलक्षणाविद्यानिवृत्तिस्साध्याऽपि प्रध्वंसाभावरूपत्वान्न विनश्यति। श्रवणमननध्यानादिविधयस्तु अनादिप्रवृत्तसकलेतरविकल्पविमुखीकरणद्वारेण वाक्यार्थज्ञानहेतवः। प्रत्यक्षविरोधस्त्वसिद्धः। शरीरपातादूर्ध्वं बन्धनिवृत्ति-

पक्षस्तु भ्रान्तिप्रमितिस्वभावाविवेकमूलः । बन्धनिवृत्त्यदर्शने ज्ञानं नैव जातम् । शरीरस्थितिप्रतिभासस्तु दग्धपटे पटप्रतिभासवत् अकार्यकरः । अतो विधिशेषतया वेदान्तेन न ब्रह्मणस्सिद्धिः । अपितु सिद्धरूपार्थपरेणैवेति ॥

पदार्थस्तु—**तस्मात्** संसारफलत्वप्रसङ्गात् । **इत्यशरीरत्वरूप इति** ॥ नियोगसाध्यत्वे धर्माधर्मफलसबन्धराहित्यश्रवणानुपपत्तिरिति श्रुत्यर्थापत्तिरुक्ता भवति । **नियोगविशेषः** प्रायश्चित्तादिनियोगः । **अन्यत्रधर्मात्** धर्मेण विना । **कृताकृतात्** वर्तमानात् । **अपिचोत्पत्तीति** ॥

उत्पत्तिराप्तिर्विकृतिस्संस्कृतिश्चेति साध्यता ।
आधानाधीत्यवाघातप्रोक्षणैरिह भज्यंते ॥

निघर्षेण पाणावादर्शस्य आदर्शे पाणेश्च । देहाश्रयस्नानादिक्रिययाऽऽत्मसंस्कारमाशङ्क्यापनुदति—**नच देहेति** ॥ **अविद्यागृहीतः** अविद्याकल्पित । **तत्संगतः** देहसङ्गत· । **तत्साक्षित्वादिति** ॥ यो यस्य साक्षी न हि स एव स इति भाव· । **तयोरहङ्कर्त्रात्मनो·** । आत्मेन्द्रियेत्यत्रात्मा देहः । **पर्यगात्** अमन्यत । धर्मासाध्यत्वनिगमनम्— **अविद्यागृहीतादिति** ॥

अपरयाऽपि श्रुत्यर्थापत्त्या ब्रह्मण· विधिसबन्ध वारयति—**नच विदिक्रियेति** ॥ नियोगद्वयनिषेधाय कर्मत्वद्वयोपादानम् । अथ शास्त्रप्रत्यक्षविरोधयोः परिहार·—**नचैतावतेति** ॥ **इदन्तया** प्रमेयतया । **अविषयं** अविषयतया प्रतिपादयदित्यन्वयः । **न निवृत्तः** न निवृत्त इति प्रत्ययः । **शरीरस्थितिः** शरीरप्रतिभासः । एतादृशध्याननियोगवादकटाक्षेण कुमारिलमतकटाक्षेण च नित्यशुद्धबुद्धमुक्तस्वभाव ब्रह्मे-

त्युपदिश्यते । नित्यशुद्धत्वात् शरीरादिसंबन्धाभावः । नित्यबुद्धत्वात् नित्यसिद्धत्वात् कयाऽपि विधया कर्मसाध्यत्वाभावः । बुद्धत्वं सिद्धत्वम् । नित्यमुक्तत्वात् संसारस्याविद्याकल्पितत्वात् तन्निवृत्त्यर्थं ज्ञानप्रधान सकलं शास्त्रमिति भावः ॥

१५१ वाक्यार्थज्ञानोपायतानिरास

अथ वाक्यार्थज्ञानोपायवादनिरास.—**तदयुक्तं वाक्यार्थज्ञानेति॥** अयमर्थः—वाक्यार्थज्ञानस्योपायत्ववादिनी कण्ठोक्तिर्नास्ति । **न च प्रत्यक्षभ्रमः** परोक्षेण वाक्यजन्यज्ञानेन निवर्तते । शब्दस्यापरोक्षधीजनकत्वं नास्तीति प्रत्यक्षविरोधः स्थिरः । आप्तोपदेशस्य भयनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षप्रवृत्तिहेतुत्वेन । श्रवणादिविधीनामितरेतराश्रयदोषात् शास्त्रविरोधोऽपि स्थिर । अतएव जीवन्मुक्तिरपि नास्तीति ॥

१५२ जीवन्मुक्ति.

सशरीरत्वं बन्ध इति ॥ सशरीरत्वप्रतिभासो बन्ध इत्यर्थः । **मिथ्याप्रतिभासः** भ्रमः । सशरीरत्वभ्रमनिवृत्तिः जीवन्मुक्तिरिति पक्ष दूषयित्वा सशरीरत्वभ्रमे तात्त्विकत्वाभिमाननिवृत्तिः जीवन्मुक्तिरिति पक्षं बाधितानुवृत्तिरूप निरस्यति—**अथ सशरीरत्वप्रतिभासो बाधित इति ॥ चन्द्रैकत्वभानाविषयत्वेनेति ॥** बाधकज्ञाने प्रतिषेध्यतय विषयत्वाभावेनेत्यर्थः ॥

प्रथमसूत्रे बाधितानुवृत्तिनिराकरणे दोषस्य पारमार्थिकतया बाधकज्ञानबाध्यत्वाभावात् भ्रमानुवृत्तिरुक्ता । अत्र तु बाधकज्ञानाविषयतया दोषस्याबाधितत्वात तदनुवृत्तिरुक्तेति विशेषः ॥

जीवन्मुक्तिपक्षे श्रुतिस्मृतिविरोधमाह — **तस्य तावदेवेति ॥ सैषेति ॥** आपस्तम्बधर्मे संन्यासाश्रमनिरूपणप्रकरणे—"सत्यानृते

सुखदुःखे वेदानिमं लोकममुं च लोकं परित्यज्यात्मानमन्विच्छेत् । बुद्धे क्षेमप्रापणम् । तच्छास्त्रैर्विप्रतिषिद्धम् । बुद्धे चेत् क्षेमप्रापणमिहैव न दुःख-मुपलभेत । एतेन परं व्याख्यातम्" । इति पञ्च सूत्राणि पठितानि ॥

तत्राद्यद्वयं पूर्वपक्षसूत्रम् । अवशिष्टं त्रय सिद्धान्तसूत्रम् । अय-मर्थः—ज्ञानबलावष्टम्भेन हतविधिनिषेधानां स्वैर प्रवर्तमानानां सिद्ध मन्यानां मत पूर्व पक्ष· । ज्ञानबलव्याजेन स्वैरचारो दुराचार शास्त्र-विरुद्धः प्रत्यक्षविरुद्धश्चेत्युत्तर पक्ष· । पदार्थस्तु—सत्य वक्तव्यमिति नियम विपत्कालेऽसत्य वक्तव्यमिति च नियम सुखदु खे वेदाध्ययन ऐहिकामुष्मिक वैदिक काम्य कर्म सर्व परित्यज्यात्मानमेकमुपासीत । तेन चात्मज्ञानेन सर्वाशुभनिवृत्तिपूर्वकक्षेमलाभ इति ॥ अस्मिन् पक्षे यतीनामेव कर्तव्यविधायकान्यनन्तानि शास्त्राणि विशेषेण विरुद्धानि । प्रत्यक्षेणापि ज्ञानिमूर्धाभिषिक्ता· दु खमनुभवन्तो दृश्यन्ते । एतेन परं पारलौकिकमपि नरकादिदु ख स्वैरचारिणां न निवर्तत इति व्याख्यात-मिति । जीवन्मुक्तिविचारः पूर्व निरूपित (८७ पु.) द्रष्टव्यः ॥

नियोगसाध्यत्वे मोक्षस्यानित्यताप्रसङ्ग पूर्ववादिमतानुसारेणैव वारयति—**नचानियोगसाध्यत्व इति** ॥ उपास्यत्वप्रतिषेधपरत्वेना-भिमतस्य वाक्यस्य जगद्वैलक्षण्यप्रदर्शनपरत्वेन व्याख्यां करोति—**नेदं यदिदमिति** ॥

१५३ भेदाभेदवाद

अथ भेदसत्यतावादिमत दूषयितुं ध्याननियोगवादिन एव भेदाभेदवादिमतानुवाद —**यदपि कैश्चिदुक्तमिति** ॥ **अथोच्येतेति** ॥ समासेनोक्तस्य व्यासेन विशदयितुमारम्भ·—**छायातपादिष्विति** ॥ सहानवस्थानलक्षणः कालविरोध· । भिन्नाधारत्वलक्षणः देशविरोध ।

नाश्यनाशकभावः वस्तुविरोध. । त्रिविधोऽप्यत्र प्रतीतिपराहत इति भावः । तदुच्यते भास्करेण सूत्रभाष्ये (१६ पु.—

एकस्यैकत्वमस्तीति प्रमाणादेव गम्यते ।
नानात्वं तस्य तत्पूर्वं कस्माद्भेदोऽपि नेष्यते ॥
यत्प्रमाणैः परिच्छिन्नं अविरुद्धं हि तत्तथा ।
वस्तुजातं गवाश्वादि भिन्नाभिन्नं प्रतीयते ॥
प्रतीयते चेदुभयं विरोधः कोयमुच्यते ।
विरोधे चाविरोधे च प्रमाणं कारणं मतम् ॥
एकरूपं प्रतीतत्वात् द्विरूपं तत्तथेष्यताम् ।
एकरूपं भवेदेकमिति नेश्वरभाषितम् ॥
कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथा भेद कुण्डलाद्यात्मना भिदा ॥ इति ॥

अथ पिण्डानामपि गवाश्वादीनां भेदाभेदः—**एवमेव देशत इति ॥** देहात्मनोरपि भेदाभेदप्रसङ्गमाशङ्क्य बाधबलेन समाधत्ते—**अथोच्येत मृदयमिति ॥** अय विशेष·—अचिद्ब्रह्मणोः भेदाभेद इति भास्करयादवयोरुभयोरपि मतम् । चिद्ब्रह्मणोस्तु भेदाभेदौ स्वाभाविकाविति यादवमतम् । भेद औपाधिकोऽभेदः स्वाभाविक इति भास्करमतम् ॥

ननु च सोश्नुत इति ॥ अत्र भोक्तृसाहित्येन शङ्का । भोज्यसाहित्येन समाधि. । अप्राधान्यं भोक्त्रन्तरापेक्षया दोषः स्वगुणापेक्षया गुण एव । **जगद्व्यापारेति ॥** इद सूत्र मोक्षे भेदपक्षे दूषणपरतया सूत्रकारेण वक्ष्यत इति भावः ॥

१५४ भेदाभेदवादनिरास .

अथ भास्करमतदूषणं ध्याननियोगवादिनः—**अत्रोच्यतेऽद्वितीयेति ॥ पूर्वस्मिन् कल्प इति ॥** अत्रापि विकल्पत्रयं जाति

व्यक्तयोः किं भेदः किं वा अभेदः अथ भेदाभेद इत्यभिप्रेत्य क्रमेण वाक्यत्रयेण दूषणम्—**व्यक्तिगतो भेद इति** ॥ तृतीयकल्पदूषणं—**एकस्मिंश्चेति** ॥ कण्ठोक्तद्वितीयविकल्पदूषण—**द्वितीये त्विति** ॥ जातिव्यक्त्यात्मकपदार्थद्वयाधारभूत· तृतीयः पदार्थः नास्तीति दोष· । तृतीयाभ्युपगमेन विरोधपरिहारेऽपि द्वयापेक्षया तृतीयस्य किं भेदः उताभेदः किं वा भेदाभेद इति विल्प्य दूषण वक्तुमभ्युपगममनुवदति—**तृतीयाभ्युपगमेऽपीति** ॥ भेदपक्षे दूषणम्—**स्वस्मादिति** ॥ स्वशब्दत्रयमाश्रयपरम् । **कथंभवेदिति** ॥ कपिसंयोगतदभावाविरोधनिर्वाहकयोरग्रमूलयो· वृक्षस्य चावयवावयविभावोऽस्ति, प्रकृते जातिव्यक्तयो· कल्पितस्याश्रयस्य स नास्तीति भाव । द्वितीयकल्पदूषणम्—**अविलक्षणमिति** ॥ तृतीयकल्पेऽनवस्था—**आकारद्वयेति** ॥

भेदाभेदयोर्विरोधाभ्युपगमे हि तत्परिहारचिन्ता । प्रतीतिबलेनैव तदविरोधः, निर्विकल्पके अभेदेन ग्रहणात् सविकल्पके च भेदेन ग्रहणादित्यत्र तादृशप्रतीतिरेवापह्नूयते—**न च संप्रतिपन्नेति** ॥ आविद्यकभेदपक्षापेक्षया औपाधिकभेदपक्षे विशेषदोष दर्शयितुमुपक्रमते—**नन्वेवं ब्रह्मण इति** ॥ **छित्वा भित्वा वेति** ॥ अङ्गुल्यादेरिव च्छेदः । अच्छेदेऽपि पाणिपादादेरिव भेदः । **अयं प्रष्टव्य इति** ॥ अत्र तुरीयपञ्चमविकल्पौ गत्यन्तराभावेनोपाक्षिप्तौ । न तु पराभ्युपगमेन । **पूर्वोक्तः** प्रतिक्षणं बन्धमोक्षादिरूपः । तृतीयकल्पे शुद्धब्रह्मासिद्धिः ॥

१५५ ध्याननियोगवादनिरास

अथ मीमांसकः पूर्वपक्षी ध्याननियोगवाद प्रतिक्षिपति—**तदप्ययुक्तं ध्यानेति** ॥ प्रवृत्तिनिवृत्तिरूपप्रयोजनविधुरत्वं ध्येयविशेषस्व-

रूपसमर्पणमात्रपर्यवसान ज्ञानमात्रपर्यवसान चेति त्रिभिः दोषैः वेदान्ता न प्रमाणमिति ॥

ननु प्रथमसूत्रे विधिशेषतयाऽपि ब्रह्मणि प्रामाण्योपगमः अत्रानभ्युपगमश्चेति विरोध इति चेत्—अत्रेदमवधेयम्, प्रथमं फलत्वेन सिद्धिरुक्ता । फलतया सिध्यतोऽपारमार्थ्ये स्वर्गाद्यर्थ यागादेरप्यननुष्ठानप्रसङ्गः । अत्र तु विषयत्वेन सिद्धिरुच्यते । विषयापारमार्थ्येऽपि प्रतीकोपासनादिवत् नाननुष्ठानप्रसङ्ग इति भाव· । किञ्च "कार्यार्थत्वेऽपि वेदस्य ब्रह्मविचारः कर्तव्य एव" इति श्रीभाष्यमभ्युच्चययुक्तिः । ननु सूत्रकाराभिमता ॥

१५६ सिद्धान्त

तत्र प्रतिपद्यत इति ॥ सिद्धान्तो विज्ञायत इत्यर्थः । सूत्रकारो जानातीति वा । कर्तरि कर्मणि च रूपस्याविशिष्टत्वात् । **पुरुषार्थतयेति** समित्यस्यार्थ· । विशेषणे तृतीया । **अभिधेयतयेत्यभेदे** तृतीया । निष्प्रप ञ्चकरणेनियोगवादे नियोगस्वरूपासिद्धि· । ध्याननियोगवादे ब्रह्मासिद्धिः । वाक्यार्थज्ञानोपायवादे प्रत्यक्षशास्त्रविरोधौ । भेदाभेदपक्षे प्रतीतिविरोधः । पूर्वपक्षिमीमासकपक्षे निरीश्वरवादलक्षण नास्तिक्यम् । तस्मात्सर्वेषां दोषाणामनवकाशाय विलक्षणः मार्ग प्रदर्श्यते । ब्रह्म च निरतिशयानन्दरूपमिति शास्त्रतस्सिद्धम् । यत्र शाब्द प्रामाण्य तत्र प्रवृत्तिनिवृत्त्यन्वय इति न व्याप्तिः । अपितु यत्र शाब्दं प्रामाण्य तत्र सप्रयोजनत्वमिति । प्रकृते निरतिशयप्रयोजनरूपब्रह्मप्रतिपादनपरतया वेदान्तशास्त्रे व्याप्तिभङ्ग इति भावः ॥

राजकुलवासी राजकुलान्तरङ्ग· । **कौलेयककुलं** श्वोपजीविकुलम् । विशेषणासित्यन्त मुक्तानामित्यस्य विशेषणं पूर्वकालावच्छेदेन ।

स्वस्य ब्रह्मण । **संभवे** "परम साम्यम्" इत्यादिशास्त्रादवगतिसम्भवे । **प्रवृत्तिनिवृत्तिनिष्ठं** तत्प्रतिपादक वाक्यम् । शास्त्रविरोधपरिहारः— **एवं भूतमिति** ॥ कुशलववृत्तान्त मनसि कृत्वा उदाहरणान्तर— **यथाच कश्चिदिति** ॥ गाम्भीर्यादय सौलभ्योपयुक्ता । शौर्यादयः परत्वोपयुक्ताः ॥

गाम्भीर्यं सप्रदानलाघवदीयमानगौरवानपेक्षत्वम् । **औदार्यं** दातृप्रतिग्रहीतृविभागबुद्धिविरहेण प्राप्त कृतमिति प्रतिपत्तिमत्त्वम् । **वात्सल्यं** दोषेष्वपि गुणत्वबुद्धि । **सौशील्यं** महतो मन्दैस्सह नीरन्ध्रसंश्लेषस्वभावत्वम् । शौर्य शत्रुमध्ये गृह इव प्रवेश सामर्थ्यं भीरुत्वविरोधि । **वीर्यमश्रान्तिः** । **पराक्रमः** विक्रमणम् ॥

यत्पुनरिति ॥ वेदान्तः न प्रमाण अर्थसद्भावाभावेऽपि पुरुषार्थपर्यवसानात् उपच्छन्दनवाक्यवदित्यनुमान स्वरूपासिद्धमिति भाव । प्रवर्तकवाक्यानामिव सिद्धपरवाक्यानामप्यध्यापनाद्युपपत्तये पुरुषार्थपर्यवसानस्यावश्यवक्तव्यतया यथोक्तलक्षणं ब्रह्म बोधयति वेदान्तवाक्यगणः ॥

एतादृशनिरतिशयभोग्यभूतपरिपूर्णपरब्रह्मानुभवरूपपरमात्मप्राप्तिरेव परमपुरुषार्थलक्षणो मोक्षः । अत्रैव शास्त्रे सर्वशास्त्राधिकतरसारसमुद्धारैकप्रयोजनताधिकृते चतुर्थाध्याये अनेनैव क्रमेण मोक्षो निरणायि । नचैषोऽध्यायः अर्वाचीनफलविषय कल्प्यः, तत्साधनादिविषयाणां पूर्वेषामपि त्रयाणामध्यायानां तदुदाहृतानामुपनिषदा स्मृतीतिहासादीना च अर्वाचीनविषयत्वेन बहिश्शास्त्र मोक्षनिर्णयप्रसङ्गात् । तस्मादयमेव मार्गः संप्रदायसमागतः समीचीन इति शास्त्रमारम्भणीयमिति चतुरश्रम् ॥

इति श्रीभाष्यभूषणे समन्वयाधिकरणम्, चतुरसूत्री समाप्ता

॥ श्रीः ॥

नयसङ्गतिमालिका

कारणं सर्वजगतां शरणं संश्रितात्मनाम् ।
अनन्तं सत्यमानन्दं विज्ञानममलं श्रये ॥
अभिवन्द्य महोदारामस्मद्गुरुपरंपराम् ।
कुर्वे श्रीभाष्यसिद्धान्ते नयसंङ्गतिमालिकाम् ॥
अनन्तराभिधाने या जिज्ञासा स्यात्प्रयोजिका ।
तद्धेतुज्ञानविषयसंबन्धस्सङ्गतिर्मता ॥
उपोद्घातश्चापवादः प्रत्युदाहृतिरेव च ।
दृष्टान्ताक्षेपातिदेशप्रसङ्गा इति सप्तधा ॥
उपोद्घातः प्रस्तुतार्थस्योपपादकता ततः ।
चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ॥ 5
पूर्वाधिकृतिसिद्धान्तन्यायं यत्रावलम्बते ।
उत्तराधिक्रियापूर्वपक्षस्तत्रापवादिकी ॥
पूर्वाधिकृतिसिद्धान्तन्यायस्याविषयीक्रियाम् ।
आलम्ब्य पूर्वपक्षस्योत्थाने स्यात्प्रत्युदाहृतिः ॥
पूर्वाधिकृतिसिद्धान्तन्यायसाधर्म्यसंश्रयात् ।
उत्तराधिक्रियोत्थाने भवेत् दृष्टान्तसङ्गतिः ॥
पूर्वाधिकृतिसिद्धान्तन्यायस्यानुपपन्नताम् ।
शङ्कित्वा पूर्वपक्षस्योत्थाने त्वाक्षेपसङ्गतिः ॥
कृत्वा यत्राधिकां शङ्कां पूर्वमेवातिदिश्यते ।
सङ्गतिः कथिता सद्भिः काचित्तत्रातिदेशिकी ॥ 10
स्मृतस्योक्तार्थसंबन्धादुपेक्षाया अनर्हता ।
प्रसङ्ग इति यत्प्राहुः यस्मात्सैव हि सङ्गतिः ॥

तस्मादुपोद्घातमुखसङ्गतिभ्यः पृथक्कृता ।
या सङ्गतिस्स प्रसङ्ग इति निष्कृष्टलक्षणम् ॥
प्रायेण हि प्रबन्धेऽस्मिन्नपवादादिशब्दतः ।
सङ्गतिस्सूच्यत इति समुद्भावन्तु सूरयः ॥
धर्मधीर्मानभेदाङ्ग प्रयुक्तिक्रमकर्तृभिः ।
सातिदेशविशेषोहबाधतन्त्रप्रसक्तिभिः ॥
स्वरूपमादौ तद्भेदः तदुपासनपूर्वकम् ।
फलं च देवताकाण्डे देवतानां तु कथ्यते ॥ 15
समन्वयोऽविरोधश्च साधनं च प्रयोजनम् ।
काण्डत्रये प्रधानार्था एते विंशतिलक्षणे ॥
सिद्धं साध्यमिति द्वेधा विषयो विषयीत्यपि ।
तार्तीयीकं काण्डमिदं द्विकद्वितयगर्भितम् ॥
शास्त्रकाण्डद्विकाध्यायपेटिकाधिक्रियाङ्घ्रिभिः ।
सूत्रभेदाच्चाष्टविधा वक्तव्या सङ्गतिस्त्विह ॥
अन्तर्भावात्मिका शास्त्रादिषु षट्स्विह सङ्गतिः ।
आनन्तर्यात्मिका ज्ञेयाऽधिक्रियासूत्रयोः पुनः ॥
वेदार्थन्यायरूपत्वान्मीमांसाशास्त्रसङ्गतिः
वेदान्तार्थविचारत्वात्काण्डसङ्गतिरुच्यते ॥ 20
सिद्धवस्तुविचारत्वात् प्रथमद्विकसङ्गतिः ।
समन्वयप्रधानत्वात् प्रथमाध्यायसङ्गतिः ॥
अत्रायोगव्यवच्छेदपादे स्यात्पेटिकात्रयम् ।
चतुर्भिश्च त्रिभिश्चैव चतुर्भिश्च नयैः क्रमात् ॥
तत्राद्यपेटिका शास्त्रस्यानारम्भप्रशान्तिकृत् ।
न्यायैश्चतुर्भिः प्रथमे पुनरेषाऽवधार्यताम् ॥
देवताकाण्डचरमाधिक्रियायां हि सूत्रितम् ।
अन्ते हरौ दर्शनात्सः विष्णुराहेत्यतः परम् ॥
१-१-१ तं ब्रह्मेत्यादिनिर्देशात् ब्रह्मशब्दार्थगोचराम् ।
अप्रसिद्धिं निराचष्टे तस्मादाक्षेपसङ्गतिः ॥ 25

१-१-२ प्रमाणलक्षणाभ्यां च वस्तुसिद्धिरिति स्थिते ।
स्यात्प्रमेयपरीक्षाऽथ प्रमाणाक्षेपमूलिका ॥
१-१-३ इश्वरस्यानुमानेन सिद्धस्याप्राप्तयसंभवात् ।
प्रामाण्यस्य समाक्षेपः शास्त्रयोनिनये धुतः ॥
१-१-४ प्रामाण्यफलयत्नानां क्रमे व्यापकहानितः ।
समन्वयनयस्तुर्यः प्रामाण्याक्षेपमच्छिनत् ॥
असंभवो लक्षणस्य लक्ष्यासिद्धिनिबन्धनः ।
योऽयोगस्तद्वयवच्छेदः प्रथमे पाद उच्यते ॥
अतिव्याप्तिर्योऽन्ययोगः तद्वयवच्छेदलक्षणः ।
अर्थस्त्रिपाद्यामिति च विवेकस्स्यात्समासतः ॥ 30
१-१-५ वेदान्तसारसद्विद्या वक्ति प्रकृतिहेतुनाम् ।
इत्याक्षेपप्रतिक्षेपः स्यादीक्षतिनयेऽधुना ॥
एवं बह्वयस्सङ्गतयः प्रोक्ता मुखविभेदतः ।
तत्र मुख्या संगृहीता शिष्यविक्षेपशान्तये ॥
१-१-६ अथानन्दाधिकरणे जीवो मुख्येक्षणादिमान् ।
जगतः कारणं स्यादित्यपवादोऽत्र वार्यते ॥
१-१-७ स यश्चायमिति श्रुत्या पूर्वाधिकृतिशेषतः ।
अन्तर्णये पुण्यजीवकारणत्वमपोद्यते ॥
१-१-८ विशेषलिङ्गं प्रबलं सामान्यश्रुतितो मतम् ।
विपरीतमिहाकाशनयेऽतः प्रत्युदाहृतिः ॥ 35
१-१-९ अत्र कृत्वाऽधिकाशङ्कां पूर्वन्यायातिदेशतः ।
अपाकरोत्प्राणनये सङ्गतिस्त्वातिदेशिकी ॥
१-१-१० स्ववाक्योक्तब्रह्मलिङ्गविशेषादर्शनादिह ।
ज्योतिर्विचार्यते तस्मात् प्रत्युदाहृतिसङ्गतिः ॥
१-१-११ पूर्वोक्तात्पूर्वपक्षः स्यादुपक्रमपराक्रमात् ।
इन्द्रप्राणाधिकरणे सङ्गतिस्त्वापवादि की ॥
एवं समगमन्नाद्यपादे प्रथमलक्षणे ।
षेटिकात्रितयं चैकादशाधिकरणान्यपि ॥

इति नयसङ्गतिमालिकाया प्रथमाध्याये प्रथम पाद

अथ द्वितीयपादेऽस्मिन् त्रिकद्विकविभागतः ।
अल्पस्थानमहास्थानस्थितेशोपास्तिपेटिके ॥

१ २-१ महावाक्यगतं ब्रह्मलिङ्गं प्रबलमीरितम् ।
तादक्षलिङ्गतस्सर्वनये शङ्का व्यपोद्यते ॥
१-२-२ भोक्तृत्वं नास्तिचेदन्तर्यामिणः जीव एव सः ।
अत्ता स्यादिति शङ्कातः सङ्गतिः प्रत्युदाहृतिः ॥
१-२-३ अत्तुर्दुर्दर्शतायां स्यादक्षिदृश्यस्सुदर्शनः ।
प्रत्युदाहृतिसङ्गत्याऽतोऽन्तराधिक्रियोदयः ॥
१-२-४ अक्षिस्थपुरुषस्यैव ब्रह्मत्वस्योपपादिका ।
अथान्तर्याम्यधिकृतिः तेनोपोद्घातसङ्गतिः ॥
१-२-५ अदृश्यत्वाधिकरणे द्रष्टृत्वादेरनुक्तितः ।
प्रकृतिर्वा पुमान्वेति शङ्कातिः प्रत्युदाहृतिः ॥
१-२-६ प्राग्विश्वरूपोपन्यासः द्युमूर्धत्वादिना कृतः ।
तत्कल्पतया चिन्त्यते वैश्वानरविद्याऽपवादतः ॥
इत्थं ह्यधिक्रियाषट्कं पेटिकाद्वयलक्षणम् ।
अध्याये प्रथमे द्वैतीयीकपादे सुसङ्गतम् ॥

इति नयसङ्गतिमालिकाया प्रथमाध्याये द्वितीय पाद

अथ द्वाभ्यां चतुर्भिश्च त्रिभिरेकेन च क्रमात् ।
न्यायैस्तृतीयचरणे पेटिकानां चतुष्टयम् ॥
१-३-१ द्युपृथिव्यादिसंबन्धः प्राक्पादान्ते निरूपितः ।
जीवेऽस्तीत्यपवादेन द्युभ्वादिनयनिर्णयः ॥
१-३-२ उक्तात्प्रकरणस्यैक्यादेव सिद्धान्तयुक्तितः ।
अपवादो भूमनये जीवेनात्र निराकृतः ॥
१-३-३ प्रकृतौ पुरुषे वैषा स्वे महिम्नि प्रतिष्ठितिः ।
प्रोक्ताऽस्तीत्यपवादेन स्यादक्षरनयोदयः ॥
१-३-४ उक्ताऽदृष्टद्रष्टृताऽत्र न संश्लिष्यत इत्यतः ।
भवेदीक्षतिकर्माधिकरणे प्रत्युदाहृतिः ॥

१-३-५ निर्णीतः प्राक्पुरिशयः पुरुषश्रुतिवैभवात् ।
प्रत्युदाहृतिसङ्गत्या दहराधिक्रियोत्थितिः ॥
१-३-६ ब्रह्मणोऽस्त्वल्पमानत्वं प्रमिताधिकृतौ पुनः ।
तद्विशेषश्रुतेर्जीवस्स्यादिति प्रत्युदीर्यते ॥
१-३-७ उपासनं मनुष्याधिकारं चेत्प्रमितोक्तितः ।
देवाधिकारापवादः देवतानयवारितः ॥ 55
१-३-८ यद्यप्युपास्तिसामान्ये स्यात्सामर्थ्यादिसंभवः ।
प्रत्युदाहरणत्वेन मध्वादिनयसंभवः ॥
१-३-९ शूद्रो विद्याधिकारी स्यात् सामर्थ्यार्थित्वयोगतः ।
इत्याशङ्कापवादार्थमपशूद्रनयोदयः ॥
१-३-१० प्रसक्तानुप्रसक्तत्वेत्थमधिकारचतुष्टयम् ।
दहनीत्युत्थापवादमर्थान्तरनयोऽच्छिनत् ॥
एवं चतुष्पेटिकोऽयं दशाधिकरणात्मकः ।
अध्याये प्रथमे पादस्तार्तीयीकस्सुसङ्गतः ॥

इति नयसङ्गतिमालिकाया प्रथमस्य तृतीय पाद

आद्याध्याये तुर्यपादे नीत्यष्टकमसूत्रयत् ।
तत्र षड्भिर्नयैस्साङ्ख्यान् द्वाभ्यां यौगानशीशमत् ॥ 60
१-४-१ मुक्तवैलक्षण्यमुक्तं प्राक्पादान्ते न युज्यते ।
परस्यैव प्रतिक्षेपादाक्षेपो ह्यानुमानिके ॥
१-४-२ पारिशेष्यस्थानमाने नाजावाक्ये स्त इत्यतः ।
प्रत्युदाहरणत्वेन चमसाख्यनयोदयः ॥
१-४-३ वाक्यान्तरस्य चाभावात् तत्त्वसङ्ख्याविरोधतः ।
सङ्ख्योपसंग्रहनये शङ्कातः प्रत्युदाहृतिः ॥
१-४-४ यस्मिन्निति पुरा प्रोक्तमाश्रयत्वं न विद्यते ।
इत्याशङ्का कारणत्वनयेऽतः प्रत्युदाहृतिः ॥
१-४-५ सिद्धान्तः प्राक्प्रकरणात् ईक्षितृत्वादियोगतः ।
जीवलिङ्गात् जगद्वाचिनयस्स्यादपवादतः ॥ 65

१-४-६ अन्यथोपपत्त्याख्यन्यायस्यात्र त्वसंभवात् ।
शङ्कातो वाक्यनीतौ स्यात् प्रत्युदाहृतिसङ्गतिः ॥
१-४-७ उक्तं ह्युभयहेतुत्व सर्वविज्ञानतः पुरा ।
प्रकृत्यधिकृतौ तस्य सम्यगाक्षिप्य निर्णयः ॥
१-४-८ सर्वत्रोक्तप्रकारेण निर्वाहः स्वयमूह्यताम् ।
इति चात्रातिदिश्यन्ते प्रागुक्तास्सर्वनीतयः ॥
इत्थमष्टाधिकरणी पेटिकाद्वयसङ्गता ।
आद्याध्याये तुर्यपादे सन्दर्भ समुपागमत् ॥

इति नयसङ्गतिमालिकाया प्रथमस्य तुर्याय पाद , अध्यायश्च

अथाविरोधाध्याये द्वौ पादौ कारणमूलकम् ।
अनन्तरौ कार्यमूलं विरोधं च निरास्यताम् ॥ 70
आद्ये स्यात्पेटिकायुग्मं द्वाभ्यामप्यष्टभिर्नयैः ।
स्मृत्या तर्कैश्च सञ्जातः विरोधो भज्यते क्रमात् ॥
२-१-१ सर्वव्याख्यानाधिकृतावीप्सिते चोपबृंहणे ।
सांख्यस्मृत्याऽपवादेन स्मृतिन्यायः प्रवर्तते ॥
२-१-२ योगस्मृत्याऽपवादे तु पूर्वन्यायातिदेशतः ।
योगप्रत्युक्तपधिकृतिः सङ्गतिस्त्वातिदेशिकी ॥
२-१-३ विलक्षणत्वाधिकृतौ सांख्यस्तर्कावलम्बनः ।
पुनः प्रत्यवतिष्ठेत तस्मादाक्षेपसङ्गतिः ॥
२-१-४ शिष्टापरिग्रहनये योगाद्यास्तर्कसाधनाः ।
अतिदेशाच्चिरस्यन्ते सङ्गतिस्त्वातिदेशिकी ॥ 75
२-१-५ प्राक् शरीरात्मभावेन कृतास्सर्वोपपत्तयः ।
वैलक्षण्यापवादोऽतः भोक्रापत्तिनयोदयः ॥
२-१-६ वैलक्षण्ये कार्यहेत्वोरसत्कार्याभ्युपागमात् ।
आरम्भणाधिकरणमपवादनिरासकृत् ॥
२-१-७ सर्वतोऽनन्यता स्याच्चेत् ईश्वरस्स्यादनीश्वरः ।
अपाकृतोऽपवादोऽयं तदनन्तरनीतितः ॥

२-१-८ वैलक्षण्यं सत्यकामत्वादिभिः प्रतिपादितम् ।
तन्नोपपद्यत इति ह्याक्षेपोऽत्र निवार्यते ॥
२-१-९ क्षीरोदकादिकं सांशं निरंशं ब्रह्म संमतम् ।
कृत्स्नप्रसक्त्यधिकृतौ सङ्गति.प्रत्युदाहृतिः ॥ 80
२-१-१० प्रयोजनं विना नेशो विचित्रं स्रष्टुमर्हति ।
इति प्रयोजननये प्रोक्तमाक्षेपदूषणम् ॥
एवं द्वितीयाद्यपादे मिथस्समगमन् क्रमात् ।
पेटिकाद्वयगूढानि दशाधिकरणान्यपि ॥

इति नयसङ्गतिमालिकाया द्वितीयस्य प्रथम पाद

एवं बाधः परिहृतः प्रतिपक्षो निरस्यते ।
पार्श्वस्थसंशयोच्छित्त्यै द्वितीये चरणे पुनः ॥
२-२-१ विफला चित्प्रवृत्तिश्चेत् तादृश्येवाचितो वरम् ।
इति शङ्काऽपोद्यतेऽत्र रचनासम्भवात्पुनः ॥
२-२-२ ईश्वराधिष्ठितैरेव जगत्स्यात्परमाणुभि ।
महहीर्घाधिकरणे शङ्कैषा प्रत्युदीर्यते ॥ 85
२-२-३ संघातवादे प्रारम्भवाददोषो न विद्यते ।
समुदायनये चापि शङ्कैषा प्रत्युदीर्यते ॥
२-२-४ वस्त्वस्ति यदि बाह्यं तत् प्रोक्तदोषः प्रसज्यताम् ।
इत्यतोऽथाभावनयः प्रत्युदाहृतिसङ्गतेः ॥
२-२-५ न हि सर्वाभाववादे कोऽपि दोष. प्रसज्यते ।
इति माध्यमिको वादः प्रत्युदाहृतिसङ्गतः ॥
२-२-६ अथ सार्वात्म्यवादेन सर्वदोषनिराकृतिम् ।
अभ्युपेत्यार्हतनयस्योदयात्प्रत्युदाहृतिः ॥
२-२-७ तन्त्रं पाशुपतं सर्वसम्भवास्पदमिष्यताम् ।
इति शङ्कासम्भवेन चात्रापि प्रत्युदाहृति. ॥ 90
२-२-८ पाञ्चरात्रे तन्त्रसाम्यात्प्रामाण्यं चेदपोद्यते ।
उत्पत्यसम्भवनयः प्रामाण्यं प्रत्यतिष्ठिपत् ॥

इत्थमष्टाधिकरणी पेटिकाद्वयगर्भिता ।
शारीरके तर्कपादे सन्दर्भं समुपागमत् ॥

इति नयसङ्गतिमालिकाया द्वितीयस्य द्वितीय पाद

एवं निरस्तोपरोधा ब्रह्मकारणता स्थिता ।
निराबाधा कार्यताऽपि वर्तते पादयोर्द्वयो ॥
अत्र पादद्वयमपि पेटिकाद्वयलक्षणम् ।
आद्या सप्ताधिकरणी द्वितीयाऽष्टनयात्मिका ॥
२-३-१ औपचारिकमित्युक्तं प्राग्जीवोत्पत्तिभाषितम् ।
तथेति वियदुत्पत्तिवादस्स्यादित्यपोद्यते ॥ 95
२-३-२ साक्षात्तु ब्रह्मकार्यत्वं न स्यात्तेजोजलादिषु ।
इति तेजोऽधिकरणे शङ्का पुनरपोद्यते ॥
२-३-३ प्रागुक्तयुक्त्या जीवोऽपि कार्यस्स्यादिति संशयात् ।
आत्माधिकरणं प्राप्तमपवादाख्यसंगतेः ॥
२-३-४ ज्ञानरूपस्य जीवस्यानुत्पत्त्यैव व्यपोदिते ।
स्वभावेऽप्यन्यथाभावे स्यात् ज्ञाधिकरणोदयः ॥
२-३-५ ज्ञानैकगुणसारस्य निर्विकारस्य चात्मनः ।
अपोदिते च कर्तृत्वे भवेत्कर्तृनयोदयः ॥
२-३-६ स्वातन्त्र्यविनिवृत्त्यैव कर्तृत्वं विनिवर्तते ।
इत्याक्षेपं समाधातुं परायत्तनयोदयः ॥ 100
२-३-७ परायत्ते च कर्तृत्वे परांशत्वं विरुध्यते ।
इति प्राप्तेऽपवादेऽथ स्यादंशाधिकृतिः पुनः ॥
इत्थं सप्ताधिकरणी द्वितीयाध्यायवर्तिनि ।
तृतीयपादे ग्रथिता संगत्यौवानया मिथः ॥

इति नयसगतिमालिकाया द्वितीयस्य तृतीय पाद

२-४-१ आत्माधिकरणार्थस्यैवातिदेशो भवेदिह ।
प्राणाधिकरणे तस्मादातिदेशिकसंगतिः ॥

२-४-२ तथेन्द्रियाणां कार्यत्वमुक्तं तस्य प्रसंगतः ।
संख्याचिन्ताऽधुना तेषां स्यात्सप्तगतिनीतितः ॥
२-४-३ प्रसंगनैवेन्द्रियाणां प्राणानामेव चिन्त्यते ।
प्राणाणुत्वाधिकरणेऽणुत्वं वृत्तिविकासिनाम् ॥ 105
२-४-४ मुख्यप्राणस्वरूपेऽपि विवादानां बहुत्वतः ।
वायुक्रियाधिकरणे प्रसंगात्तत्त्वनिर्णय. ॥
२-४-५ श्रेष्ठप्राणस्य कार्यत्वं स्वरूपं चोपवर्णितम् ।
श्रेष्ठाणुत्वाधिकरणेऽणुत्वं चापि प्रसंगतः ॥
२-४-६ प्राणानां जन्यतेयत्ता परिमाणप्रसंगतः ।
अग्न्यादिदेवतानां चाधिष्ठानं तत्र चिन्त्यते ॥
२-४-७ प्राणेन्द्रियाविभागेन विचारो विफलस्त्विति ।
आक्षेपपरिहारार्थं स्यादिन्द्रियनयोदय. ॥
२-४-८ समष्टिसृष्टौ हेतुत्वं स्यादेव परमात्मनः ।
संज्ञामूर्तिनये व्यष्टौ जीवस्य तदपोद्यते ॥ 110

इति नयसगतिमालिकाया द्वितीयस्य तुरीय पाद अध्यायश्च

वैराग्यमुभयं लिङ्गं विद्या विद्याङ्गमेव च ।
तार्तीयीकाध्यायपादप्रधानार्था इमे मताः ॥
३-१-१ कृतो मूर्तिप्रसंगः प्रागिह मूर्त्यन्तरग्रहे ।
तदन्तरनये भूतसूक्ष्मयोगो निरूप्यते ॥
३-१-२ अथैकभविकन्यायात्कर्मशेषविलोपने ।
भुक्तशिष्टस्य संबन्धः कृतात्ययनयोदितः ॥
३-१-३ प्राक्छुतेष्टापूर्तदत्तकारिणां चन्द्रमोगतिः ।
आशङ्क्य सैषाऽनिष्टादिकारिणां प्रतिषिध्यते ॥
३-१-४ इष्टादिकारिणामत्र मृगाङ्कादवरोहताम् ।
तत्स्वाभाव्यापत्तिनीत्याऽवादिभावपरिष्क्रिया ॥ 115
३-१-५ अब्भ्रादिभावावस्थायां चिराचिरविचारणा ।
कृता नातिचिरन्याये जीवदुःखप्रसिद्धये ॥

३-१-६ ब्रह्मादिभावो जीवानामवरूढवता मिह ।
आश्लेषोऽऽन्याधिष्ठितेन तेन ब्रह्मादिनोच्यते ॥
इत्थं तृतीयाध्यायाद्यपादे षण्णीतयः क्रमात् ।
प्रसङ्गसङ्गत्यैवैकप्रेटिकान्तर्गता मिथः ॥

इति नयसङ्गतिमालिकाया तृतीयस्य प्रथम पाद

३-२-१ जाग्रद्दोषविनिर्मुक्तः जीवः स्वप्नदशास्थितः ।
निर्दोष इति शङ्केषा सांध्यनीत्या प्रतीर्यते ॥
३-२ २ स्वाप्नो जीवोऽथ दुष्टोऽस्तु सौषुप्तो दोषवर्जितः ।
तदभावनये चैषा शङ्केव प्रत्युदीर्यते ॥ 120
२ ३-३ कर्मानुस्मृत्यधिकृतौ सुषुप्तान्यसमुत्थितौ ।
निर्दोषो जीव एव स्याच्छङ्केषा प्रत्युदीर्यते ॥
३-२-४ उक्तावस्थात्रयस्थस्य दोषभूयस्त्वसिद्धये ।
मुग्धन्यायस्संप्रवृत्तः तेनापोद्घातसंगतिः ॥
३-२-५ अथात्रोभयलिङ्गाधिकरणे परमात्मनः ।
चेतनत्वेन सामान्यात्प्राप्तो दोषो व्यपोद्यते ॥
३-२-६ तथाहिकुण्डलनये प्रोक्तशुद्धिविशुद्धये ।
अचितो ब्रह्मरूपत्वं तेनापोद्घातसंगतिः ॥
३-२-७ उपादानात्प्रपञ्चस्य निमित्तं परमिष्यते ।
विशुद्धं तत्त्वमित्येवं चोद्यं परनयोच्छिनत् ॥ 125
३-२-८ फलप्रदं यदा कर्म कारणोपासना तदा ।
व्यर्थेत्याक्षेपशान्त्यर्थं दाता फलनयोदितः ॥
इत्थमष्टाधिकरणी पेठिकाद्वयभूषिता ।
तृतीयस्य द्वितीयेऽस्मिन् पादेऽन्योन्यं सुसङ्गता ॥

इति नयसङ्गतिमालिकाया तृतीये द्वितीय पाद

उपासनाप्रसन्नेशफलदत्वप्रसङ्गतः ।
अनुष्ठानोपयोगाय तद्भेदाभेदचिन्तना ॥

३-३-१ शाखान्तराधिकरणप्रोक्तयुक्तिसमुच्चयात् ।
तद्वैश्वानरविद्याऽऽदौ सर्ववेदान्तनीतितः ॥
३-३-२ अथान्यथात्वाधिकृतौ प्राग्वैश्वानरनीतिवत् ।
उद्गीथोपासनानामप्येकताऽपोद्यतेऽधुना ॥ 130
३-३-३ सर्वाभेदाधिकरणे रूपभेदनिदानतः ।
प्राणविद्याभेदशङ्काऽपोद्यतेऽन्तर्गतत्वतः ॥
३-३-४ सत्यादिविद्या भिन्ना स्यात्प्रक्रियारूपभेदतः ।
इति शङ्काऽऽनन्दनये स्वरूपात्प्रत्युदीर्यते ॥
३-३-५ कार्याख्यानाधिकरणे प्राणवासस्त्वचिन्तना ।
नियतेत्याह पूर्वाधिकरणन्यायसाम्यतः ॥
३-३-६ समानाधिकृतौ चापि रूपभेदाभिमानतः ।
विद्याभेदोऽपोद्यतेऽन्तर्गतं हि वशितादिकम् ॥
३-३-७ अथ संबन्धाधिकृतौ रूपाभेदाभिमानतः ।
अक्ष्यर्कविद्यैक्यशङ्काऽपोद्यते स्थानभेदतः ॥ 135
३-३-८ संभृत्यधिकृतौ स्थानभेदाभावानिबन्धना ।
व्याप्तिस्सर्वगता स्यादित्याशङ्का प्रत्युदीर्यते ॥
३-३-९ ब्रूते पुरुषविद्याधिकृतिः सन्निधिमानतः ।
पुंविद्यां परविद्याङ्गं साधर्म्यादिह याजुषीम् ॥
३-३-१० अथ वेधाद्यधिकृतौ पुंविद्योक्तप्रयत्नतः ।
शुक्रमित्यादिमन्त्राणां शङ्किताऽपोद्यतेऽङ्गता ॥
३-३-११ प्रोच्यते हान्यधिकृतौ प्राग्यथा कर्मशेषता ।
तथैव वस्तुसामर्थ्यलिङ्गादन्योन्यशेषता ॥
३-३-१२ सांपरायाधिकरणे हानोपायनचिन्तना ।
स्थाप्यते कालनिष्कर्षात्तेनोपाद्धातसंगतिः ॥ 140
३-३-१३ तथैवानियमन्याये सर्वेषामर्चिरादिका ।
गतिश्चेत्पूर्वसिद्धान्ताः भवेयुरुपपादिताः ॥
३-३-१४ अथाक्षरध्यधिकृतौ अर्चिरादिगतेरिव ।
स्युः सम्भन्धोऽक्षरधियामिति दृष्टान्तसंगतिः ॥

३-३-१५ ब्रह्मणो हेयराहित्यात् प्राणनादेरसम्भवात् ।
अन्तरत्वाधिकरणे जीवशङ्का व्यपोद्यते ॥
३-३-१६ कामाद्यधिकृतौ पूर्वन्यायेन वशितादिकम् ।
नियतं स्यादितीयं तु शङ्काऽपि प्रत्युदीर्यते ॥
३-३-१७ स्यात्तन्निर्धारणन्याये प्राङ्न्यायाधीनशङ्कया ।
उद्गीथोपासनानां च नियमोऽपि व्यपोद्यते ॥ 145
३-३-१८ अपवादसमायातं पूर्वाधिकरणं ततः ।
स्यात्प्रधानाधिकरण कामाधिकृतिशेषत. ॥
३-३-१९ प्राक्सर्वदहविद्यैक्ये प्रक्रियाबलसंमते ।
लिङ्गभूयस्त्वाधिकृतौ वाक्यात् शङ्का व्यपोद्यते ॥
३-३-२० अपवादकवाक्यस्याभावात् प्रकरणात्पुनः ।
शङ्का पूर्वविकल्पाख्यनयेन प्रत्युदीर्यते ॥
३-३-२१ अथासत्तेरतिशयात् तत्कालाकारचिन्तनम् ।
उपासकेऽपोद्यतेऽथ शरीरेभावनीतितः ॥
३-३-२२ पूर्वाधिकृतिसिद्धान्तादासत्त्यतिशयेऽपि च ।
अङ्गाववद्धनीत्या स्यात् सर्वोद्गीथसमन्वय ॥ 150
३-३-२३ उद्गीथोपासनन्यायाद्वैश्वानरमतावपि ।
समस्तव्यस्ततासऽशङ्का भूम्नोन्यायादपोद्यते ॥
३-३-२४ नानाशब्दाधिकरणे वैश्वानरनयक्रमात् ।
सदक्षिहार्दादिधियामैक्यशङ्का व्यपोद्यते ॥
३-३-२५ विद्याभेदव्यवस्थायामेकस्यैवाधिकारिण. ।
समुच्चयस्यापवाद. विकल्पाधिक्रियोदितः ॥
३-३-२६ उद्गीथोपास्तिनियम विकल्पनियमो यथा ।
इतिशङ्काऽपोद्यतेऽत्र यथाश्रयनये पुनः ॥
एवं तृतीयाध्यायेऽस्मिन तृतीयचरणेऽपि च ।
षड्विंशत्यधिकारणा सङ्गतिस्समुदाहृता ॥ 155

इति नयसङ्गतिमालिकाया तृतीयस्य तृतीय पाद

चतुर्भिस्सप्तभिः द्वाभ्यां द्वाभ्यां न्यायैश्चतुर्विधैः ।
अङ्गपादे पञ्चदशाधिक्रियाणां समन्वयः ॥
३-४-१ नोद्गीथोपास्तिवत् ब्रह्मोपास्तेः क्रत्वर्थतेष्यते ।
पुरुषार्थाधिकरणे सङ्गतिः प्रत्युदाहृतिः ॥
३-४-२ ब्रह्मसंस्थार्थवादत्वाभावेऽप्याश्रमवाक्ययोः ।
शङ्कोद्गीथार्थवादत्वे स्तुतिनीत्या प्रतीर्यते ॥
३-४-३ उद्गीथोपास्तिविधिवत् पारिप्लवविधिर्भवेत् ।
इति शङ्कापोद्यतेऽथ विद्यार्थत्वव्यवस्थया ॥
३-४-४ स्तुतिप्रसक्तौ न्यायौ द्वौ पारिव्राज्ये स्थिते सति ।
कर्मणोऽनङ्गताऽऽशङ्काऽपोद्याऽग्निन्धननीतितः ॥ 160
३-४-५ यज्ञानपेक्षा विद्यैषा स्यादग्निन्धननीतिवत् ।
इति शङ्काऽपोद्यतेऽथ सर्वापेक्षानये पुनः ॥
३-४-६ गृहस्थस्यापि विद्या चेत् शान्तिदान्त्याद्ययोगतः ।
शमाद्यनङ्गताऽऽशङ्का शमनीत्या व्यपोद्यते ॥
३-४-७ नापेक्षेत प्राणविद्या शममाहारगोचरम् ।
इति सर्वान्नानुमतिन्यायात् शङ्का व्यपोदिता ॥
३-४-८ एव कर्माखिलं ज्ञाने विदुषां चेत्समाप्यते ।
अन्येषां स्वैरिताक्षेपापवादो विहितत्वतः ॥
३-४-९ चेद्विद्याऽऽश्रमधर्माङ्गा नाधिकुर्यादनाश्रमी ।
इत्याक्षेपोपोऽद्यतेऽथान्तराचापिनये पुनः ॥ 165
३-४-१० आरूढपतितानामप्यधिकारो भवेदिति ।
शङ्का तद्भूताख्यनये वचनेन व्यपोद्यते ॥
३-४-११ उद्गीथोपासने क्रत्विङ्नाधिकुर्यात्फलश्रुतेः ।
इत्याक्षेपोऽपोद्यतेऽथ स्वामिनीतौ प्रसङ्गतः ॥
३-४-१२ कर्माविरोधान्मननं सहकार्यन्तरं मतम् ।
प्राक्पञ्चमनयेनास्य सङ्गतिस्त्वापवादिकी ॥
३-४-१३ विद्याकर्मावरुद्धत्वात् बाल्य वैवाङ्गमिष्यते ।
इत्याक्षेपापवादस्स्यादनाविष्कृतिनीतितः ॥

३-४-१३ कर्म नाङ्गं भोगहेतूपासने व्यभिचारतः ।
इत्याक्षेपप्रतिक्षेपः स्यादैहिकनयादिह ॥ 170
३-४-१५ एवं मुक्तिफलोपास्तौ प्रोक्तो न्यायोऽतिदिश्यते ।
ततश्चानियमः प्रायः प्रबलं प्रतिबन्धकम् ॥
एवं तृतीयाध्यायस्य तुर्ये पादे सुसङ्गता ।
अधिक्रियापञ्चदशी बहुसङ्कीर्णनिर्णया ॥

इति नयसङ्गतिमालिकायां तृतीयस्य तुरीय पाद तृतीयश्चाध्याय

अथतुर्याध्यायपादप्रधानार्था मता इमे ।
अघाश्लेषोत्क्रान्तिमार्गपरब्रह्मोपसंपदः ॥
पेटिकाद्वयमाद्याङ्घ्रौ एका विद्याविशोधिनी ।
नीतिपद्काऽपरा नीतिपञ्चका फलबोधिनी ॥
४-१-१ शास्त्रार्थस्य सकृत्त्वे तु केयं निष्पत्तिचिन्तना ।
इत्याक्षेपं प्रतिक्षेप्तुमावृत्तिन्यायसंभवः ॥ 175
४-१-२ साक्षात्सदाऽऽत्मनः स्फूर्तौ काऽसावावृत्तिसाध्यता ।
इत्याक्षेपं प्रतिक्षेतु मात्मत्वोपास्त्यधिक्रिया ॥
४-१-३ स्वात्मत्वेनोपास्तिरूपा विद्यौपनिषदी यदि ।
प्रतीकोपासनेऽप्येवमाक्षेपोऽपि व्यपोद्यते ॥
४-१-४ पुरापकृष्ट तूत्कृष्टदृष्टिः न्याय्येत्युदीरिता ।
आदित्यादाविहोद्गीथदृष्टिशङ्का व्यपोद्यते ॥
४-१-५ आवर्तव्या यद्युपास्तिः स्वैरमावृत्तिरिष्यते ।
इति शङ्काऽपवाद. स्यादासीनाधिकृतौ पुनः ॥
४-१-६ आवृत्ताऽप्युपसंहार्या स्वेच्छयेत्येष संशयः ।
आप्रयाणाधिकरणेऽपोद्यते श्रुतिदर्शनात् ॥ 180
४-१-७ प्राचीनपापानन्त्येन प्रायणान्ताऽप्युपासना ।
फलायानवकाशेति चाक्षेपोऽपि ततो हतः ॥
४-१-८ अथेतराधिकरणे पुण्यानन्त्येऽपि पूर्ववत् ।
नाशाश्लेषाविमौ प्रामादिकदुष्कर्मगोचरौ ॥

४-१-९ तथाऽनारब्धातिरिक्तविषयावित्यपि स्थिति· ।
नातोऽध्यक्षविरोधस्स्यादित्याक्षेपः प्रशाम्यति ॥
४-१-१० सुकृतस्स्याप्यसंश्लेषे स्वैराचार प्रसज्यते ।
इत्याक्षेपस्यापवाद· ह्यग्निहोत्रनये पुनः ॥
४-१-११ अग्निहोत्रादिसुकृतात् प्रारब्धस्य विनाशनम् ।
इत्याक्षेपस्यापवाद· भोगान्तत्वव्यवस्थिते· ॥ 185
इत्थ तुरीयाध्यायस्य पादे प्राथमिके पुन ।
एकादशानां न्यायानां क्रमात्संङ्गतिसग्रहः ॥

इति नयसङ्गतिमालिकाया चतुर्थस्य प्रथम पाद

अत्र सप्तचतुस्संख्यैः न्यायैस्स्यात्पेटिकाद्वयम् ।
क्रमेण सामान्यगतिविशेषगतिगोचरम् ॥
४-२-१ प्रारब्धान्तेऽप्यनियतोत्क्रान्तौ फलविलम्बनम् ।
इत्याक्षेप प्रतिक्षेप्तु वागादिन्यायचिन्तना ॥
४-२-२ ततो मनोधिकरणं प्रत्युदाहरणागतम् ।
तत्सर्व फलपर्वत्वाद्योगिचिन्त्य विचिन्त्यते ॥
४-२ ३ उक्तं श्रौत क्रमं ज्ञात्वा पूर्वपक्षस्य सभवात् ।
आपवादिकसंङ्कल्पा स्यादध्यक्षनयोदयः ॥ 190
४-२-४ यथाश्रुतार्थमादाय पूर्वपक्षसमुद्भवात् ।
भूताधिकरणे चापि प्रोक्ताऽऽशङ्का व्यपोदिता ॥
४-२ ५ अत्र ब्रह्माश्नुते विद्वानिति स्पष्टमनुश्रवात् ।
उत्क्रान्त्याक्षेपसंशान्त्यै आसृतिन्यायचिन्तना ॥
४-२-६ उत्क्रान्तिमध्ये विश्रान्तेर्वैफल्याक्षेपशान्तये ।
फलस्य कल्पनायैव परसपत्त्यधिक्रिया ॥
४-२-७ परसंपत्तिसत्त्वै सा लय एव भविष्यति ।
इति शङ्कापवादायाविभागनयनिर्णयः ॥
४-२-८ गतिसामान्येऽपि नाडी हुर्विवेका यदा भवेत् ।
अनैयत्योदिताऽऽशङ्का तदोकोनीत्यपोदिता ॥ 195

४२९ रात्रियाने रश्म्यभावादचिन्त्या गतिचिन्तना ।
इत्याक्षेपापवादोऽपि रश्म्यनुन्यायगोचरः ॥
४-२-१० सत्त्वसु सौरेषु तेजस्सु कालदोषनिबन्धनम् ।
प्रतिहन्तुमिहाक्षेप निशाधिकरण मतम् ॥
४-२-११ दक्षिणायनयाने तु चन्द्रम.प्राप्तिसंभवात् ।
निर्निरोधगतिस्थित्यै दक्षिणायननिर्णय. ॥
एवं चतुर्थाध्यायस्य द्वितीये चरणेऽपि च ।
द्विपेटिकान्तरक्षाधिकरणानि समागमन् ॥

इति नयसगतिमालिकाया तुर्यस्य द्वितीय पाद

४-३-१ कालदोषप्रशान्तावप्यर्चिरध्वाव्यवस्थितौ ।
विक्षेपान्मोक्षलाभस्याक्षेपोऽर्चिर्नीत्यपोदित. ॥ 200
४ ३-२ शाखाविरोधशान्तावप्यवान्तरदिकल्पतः ।
विक्षेपस्यापवादाय वायुन्यायसमुद्भवः ॥
४-३-३ वरुणाधिक्रियाऽप्यवमन्तस्सशयभेदिनी ।
योगाङ्गत्वेनार्चिरादिचिन्तनं निरुपद्रवम् ॥
४-३-४ आतिवाहिकनीतावप्येवं विशयधूननम् ।
आक्षेपो वाऽपवादो वा संगतिस्त्ववधार्यताम् ॥
४-३-५ आतिवाहिकनिर्णीतावप्यतिवाह्याव्यवस्थितौ ।
वैफल्याक्षेपसंशान्त्यै कार्याधिकरणोदयः ॥
तृतीयपादे पञ्चाधिकरण्युभयसंपुटा ।
मार्गातिवाहविशयापुनरङ्कुरशान्तये ॥ 205

इति नयसगतिमालिकाया तुर्यस्य तृतीय पाद

तुर्याऽध्याये तुर्यपादे पेटिकाद्वयभूषिते ।
त्रिकद्विकविभागेन मुक्त्यैश्वर्य निरूप्यते ॥
४-४-१ मुक्ति. स्वरूपाविर्भावश्चेत्सुषुप्तिरपीदृशी ।
मार्गादिचिन्तावैयर्थ्य संपन्नीत्या व्यपोदितम् ॥

४-४-२ अविभागेनेतिनये स्वरूपार्थविनिर्णयात् ।
उपोद्घातप्रक्रियया संगति. वेदितु क्षमा ॥
४ ४-३ ब्राह्माधिकरणचापि प्रक्रिया प्रागुदीरिता ।
प्रोक्तैव सगतिरपि तत्रिक ह्येकपीटका ॥
४-४-४ एवं मुक्तस्य चैश्वर्ये सर्वभोगात्मके सति ।
पर्यायेणैष संसार इत्याक्षेपोऽथ वारित. ॥ 210
४ ४-५ अविघातेच्छमैश्वर्य संकल्पनयबोधितम् ।
अनन्तरनये प्रायेणान्तरातङ्कशोधनम् ॥
४-४-६ जगद्व्यापारविरहे संपत्सावधिका भवेत् ।
इत्याक्षेपप्रतिक्षेप जगद्व्यापारनीतितः ॥
एव षण्णीतय पादे तुरीये तुर्यलक्षणे ।
समागमन् शास्त्रसारनिरूपणपरे शुभम् ॥
षटपञ्चाशद्युतशतामिताधिकरणावले ।
आचार्यसूक्तिकुसुमपूर्णा सगतिमालिका ॥
इमां श्रीभाष्यनिर्णीतनयसगतिमालिकाम् ।
समर्पिता मोदते स्म प्रतिगृह्य श्रिय. पति. ॥ 215
मालैषा संग्रहेच्छूनां मोदाय समगृह्यत ।
लक्ष्मीपुर श्रीनिवासविपश्चिच्चक्रवर्तिना ॥ 216

इति नयसगतिमालिकाया चतुर्था ग्रा.स्य चतुर्थ पाद
अन्यायश्च समाप्त

इति श्रावत्सकुलतिलकस्य लक्ष्मीपुरमभिजनश्रीनिवासाचार्यस्य
कृतिषु श्रीभाष्यनयसगतिमालिका सपूर्णा

षट्पञ्चाशद्युनशतविषयावलिगुम्भितम् ।
श्रीभाष्यभूषण नाम जीयात् श्रीभाष्यटिप्पणम् ॥
श्रीभाष्यभूषणमिदमात्मविद्याशुश्रूषया ।
लक्ष्मीपुरं श्रीनिवासदासेन परिकर्मितम् ॥
चतुस्सूत्र्यन्तभाष्योक्तन्यायैस्सर्वोऽनुगम्यते ।
श्रीभाष्यार्थ इति ज्ञात्वा कृत सक्षिप्तभूषणम् ॥

विदितसकलवेद्ये. दर्शितार्थाशलेशै.
ग्रथितमिदमपूर्व भूषण भाष्यसूक्ते. ।
विकसितमतितायै गुम्भित सपुटेऽस्मिन्
निखिलमतनिशान्ते क्षन्तुमर्हन्ति सन्त. ॥

इति श्रीमत्सत्सम्प्रदायसदाचार्यसुशिक्षितमतिना गुणगुरुश्रीभाष्यकारसुतवेङ्कटस्वामितनयेव श्रीमद्विरक्तराघवार्यकरुणाकटाक्षविषयाकृतेन श्रीमत्पण्डितरत्नकस्तूरङ्गनाथकृपासमासादितसारस्वतसर्वस्वेन श्रीमन्महीसूरमहाराजतुर्य श्रीकृष्णराजपारपोषितेन लक्ष्मापराभिजनश्रीनिवासाचार्येण महामहोपाध्यायेन पण्डितरत्ननारायण वर्मणिकारिणा प्रणीतामद श्रीभाष्यभूषणनाम भगवद्रामानुजाचार्य शारीरकभाष्यस्य विवरणं समाप्तम्

वासुदेव प्रीयताम्

आगमसारः

आगमशब्दार्थः

वासुदेवं नमस्कृत्य सर्वव्यापकमीश्वरम् ।
लिखाम्यागमसाराख्यं प्रबन्धं सर्वसंमतम् ॥

प्रायेण हि शब्दानामिह जगति प्रयोग स्वार्थविरुद्धार्थव्यावृत्ति-विवक्षान्वयव्यतिरेकानुविधायीति प्रस्पष्ट शास्त्रमर्यादापरिचयवताम् । प्रपञ्चे खल्वस्मिन् सर्वस्यापि वस्तुन शुक्लरूपमेकमेव यदि स्यात् तदा शुक्लपदमेव नोदीयात् प्रयोजनाभावात् । अतएव गवादिपदाना प्रवृत्तिनिमित्तपरीक्षाया अपोहश्शब्दार्थ इति व्यतिरेकानिष्ठा सौगता प्राहुः । तदनुयायिन एव प्राञ्च. प्राय निर्विशेषतत्त्ववादाभिलाषिण' ॥

अन्वयनिष्ठा पुन गवादिपदाना प्रवृत्तिनिमित्त भावरूप गोत्वा-दिजातिलक्षणमिति, तेनैवेतरव्यावृत्ति फलतीति प्राहु । लाघवाभि लाषिणो निरूपकास्तु जातिरूपो वा आकाररूपो वा असाधारणो धर्म एव इतरव्यावृत्तिरिति समरसयन्ति ॥

ततश्चेदानी पदानामर्थनिर्णयं चिकीर्षूणामस्माक प्रथम यस्य पदस्यार्थविषयिणी जिज्ञासा वर्तते तस्य पदस्य प्रतिद्वन्द्विभूत पद मनसि कृत्वा प्रवृत्तिनिमित्तनिर्णय कर्तव्यो भवति ॥

प्रकृते खलु आगमपदस्यार्थ क इति जिज्ञासाया तत्प्रतिद्वन्द्वि-भूत निगमपद धियमधिरोहति बहुशास्त्रपरिचयवताम् । तस्य च निगमपदस्यार्थ' क इति जिज्ञासाया ऋग्वेदभाष्यभूमिकायां यास्क-निरुक्तग्रन्थप्रयोजनवर्णनावसरे श्रीमान् माधवाचार्य प्राहैवम् '' निगम-

शब्दो वेदवाची, यास्केन तत्रतत्र निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात्। तस्मिन् निगम एव प्रायेण वर्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्डे उपदिष्टत्वात् तस्य काण्डस्य नैगमत्वम्" इति॥

ततश्च पौरुषेयापौरुषेयभेदेन निगमागमव्यवहारो मुख्यः। अत एवोच्यते प्रमाणनयतत्त्वालोकालकारे देवसूरिभि (४-१) "आप्तवचनादाविर्भूतमर्थविशेषसंवेदनमागमः। उपचारादाप्तवचन च—

आगमो ह्याप्तवचनमाप्तिं दोषक्षयं विदुः।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसंभवात्॥ इति॥

तथा—सांख्यसप्ततिव्याख्यायां जयमङ्गलायाम्—

स्वकर्मणाऽभियुक्तो यो रागद्वेषविवर्जित।
निर्वैरः पूजितस्सद्भिः आप्तो ज्ञेयस्स तादृशः॥ इति॥

आप्तः क्षीणदोष इति। शब्दकल्पद्रुमे तु एवमुदाहृतम्—

सृष्टिश्च प्रलयश्चैव देवतानां तथाऽर्चनम्।
साधनं चैवमन्त्राणां पुरश्चरणमेवच॥
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः।
सप्तभिर्लक्षणैर्युक्त त्वागमं तद्विदुर्बुधाः॥ इति॥

ततश्च एवमवधारयामः—अनादे कालात् निगमविरुद्धप्रस्थाननिष्ठै सौगतार्हतादिभि आगमसप्रदाय समाश्रित। ततश्च निगमसंप्रदायनिष्ठैरपि निगमानुकूल्येन सकलजनश्रेय·कामनयाऽऽगमसप्रदाय· प्रवर्तित इति॥

ततश्च वैदिकागमः अवैदिकागम इति विभागः परिनिष्पन्नः। तथापि केचिद्विद्याधीराः निगमसरक्षणायागममात्रस्याप्रामाण्य साधयन्ति॥ निगमानुकूल्यमेव स्मर्यतेऽपि च वाराहे पुराणे (आगम प्रा. ५७)—

वेदेन पञ्चरात्रेण भक्त्या यज्ञेन च द्विज।
प्राप्योऽहं नान्यथा प्राप्यः वर्षलक्षशतैरपि॥ इति॥

एतत्सर्वमवधार्य निगमागमसप्रदाययोर्विदूरतामाशङ्क्य परकालसूरिभिरेवमुक्तमिति पाञ्चरात्ररक्षायां (८८) श्रीवेदान्ताचार्यै द्राविडं पद्यं संस्कृतीकृतम्—

स्तुतिजपनिजबिम्बालोकनध्यानसेवा
स्मृतिकथनसमर्चाकर्मभिः श्रौतदूरैः ।
वृषभशिखरिनाथ त्वामभीप्सन्ति केचित्
श्रुतिपथपरिनिष्ठप्रापणीयाङ्घ्रिपद्मम् ॥ इति ॥

आगमशब्दनिर्वचनमपि पौष्करसंहितागतं श्रीभाष्ये पाञ्चरात्रनये समुदाहृतम्—

कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते ।
क्रमागतैः स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत् ॥

इति । अयमर्थः — यत्र चातुरात्म्योपासन स्वसज्ञाभि नमश्शब्दाद्युपेतैः तत्तद्यूहनामभिः क्रमागतै कर्तव्यत्वेन प्रतिपाद्यते स आगम इति । अत एवागमशास्त्रप्रवर्तकस्य सङ्कर्षणस्य आगम इति संज्ञा मूलश्रुतिसिद्धेति सहस्रनामभाष्ये (१९२) भाषितमस्ति ॥

"प्रतिक्षणपरिणामिनस्सर्वे भावा" इति तत्त्वदर्शिना निर्णयानुरोधेन सकलपदार्थवत् शब्दा अपि अर्थविषये प्रयोगपरम्परया विचित्र परिणाम न भजन्तीति नशक्य वक्तुम् । ततश्च आगमपद शास्त्रमात्रे मन्वादिभिः प्रयुज्यते । यथा—(१२ अ)

प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥ इति ॥

हरिरप्याह वाक्यपदीये —

प्रज्ञाविवेकं लभते विभिन्नागमदर्शनैः ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥ इति ॥

ततश्च शब्दप्रमाणमात्रे इदानीमागमपदं प्रयुज्यते ॥

तन्त्रशब्दार्थः.

तथा तन्त्रपदमपि मन्त्रपदप्रतिद्वन्द्वितया प्रयुज्यते । स्वतन्त्र परतन्त्र इत्यादौ तन्त्रपदमधीनमित्यर्थमवगमयति । ततोऽपि पुरुषाधीनमिति शक्यते समुल्लिखितुम् । न्यायभाष्येतु (१-१-२६) इतरेतराभिसंबन्धस्यार्थजातस्य उपदेशः शास्त्र तन्त्रमित्युक्तम् । तन्त्रलक्षणमप्येवं तन्त्रविद्भिरुदीर्यते—(शैवदर्शने सर्वदर्श)—

त्रिपदार्थं चतुष्पादं महातन्त्रं जगद्गुरुः ।
सूत्रेणैकेन संक्षिप्य प्राह विस्तरतः पुनः ॥ इति ॥

चतुष्पादमित्यनेन विद्याक्रियायोगचर्याख्यैः चतुर्भिः पादैः सहितः प्रबन्धः महातन्त्रमिति सिद्ध्यति । विष्णुसंहितायां तु सप्तमपटले—

सर्वेऽर्थाः येन तन्यन्ते त्रायन्ते च भयाज्जनाः ।
इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः परिचक्षते ॥

इति श्रूयते । अनेन मननान्मन्त्रः तननात् तन्त्र इति सिध्यति । तपोविशेषेण मनसा साक्षात्कृतो मन्त्र । तदर्थस्य विस्तरेण निरूपणात् तन्त्रः । अयमपि विभाग पौरुषेयापौरुषेयरूप इत्येव फलति । अत एव वाराहतन्त्रे तन्त्रलक्षणमेवमुक्तमिति शब्दकल्पद्रुमः—

सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च ।
देवतानां च संस्थानं तीर्थानां वर्णनं तथा ॥
तथैवाश्रमधर्मस्य विप्रसंस्थानमेव च ।
संस्थानं चैव भूतानां यन्त्राणां चैव निर्णयः ॥
उत्पत्तिर्विबुधानां च तरूणां कल्पसंज्ञितम् ।
संस्थानं ज्योतिषां चैव पुराणाख्यानमेव च ॥
कोशस्य कथनं चैव व्रतानां परिभावनम् ।
शौचाशौचस्य चाध्यानं नरकाणां च वर्णनम् ॥
हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् ।
राजधर्मो दानधर्मः युगधर्मस्तथैव च ॥

व्यवहारः कथ्यते च तथाचाध्यात्मवर्णनम् ।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥ इति ॥

एतेन सर्वसग्रहः तन्त्रप्रबन्ध इति विस्तारार्थकतनुधातुनिष्पन्नस्तन्त्र-शब्द इति युक्तमुत्पश्याम. । यामललक्षणमप्येवमेव समुदाहृत तत्रैव—

सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदः जातिभेदस्तथैव च ।
युगधर्मश्च संख्यातः यामलं चाष्टलक्षणम् ॥ इति ॥

एवञ्च प्राणभृतां सर्वव्यवहारानुकूल. सर्वशास्त्रसग्रहस्तन्त्रप्रबन्ध इत्या-गमपरामर्शिनां विदितमेवैतत् ॥

अत्राप्यागमेषु बहवो मन्त्राः श्रूयन्ते । तेषां कल्पमन्त्रा इति नाम । तेऽपि सप्तकोटिमहामन्त्रान्तर्गता वैदिका एवेति सिद्धान्त । कल्पपदमपि मन्त्रब्राह्मणात्मकवेदविलक्षणप्रयोगशास्त्रपरतया मीमांसकै. व्यवहियते—

वेदादृतेऽपि कुर्वान्त कल्पैः कर्माणि याज्ञिकाः ।
न तु कल्पैर्विना कैश्चित् मन्त्रब्राह्मणमात्रकात् ॥

इति । (तन्त्रवा १६५) अत एव पराशरसहिताया (१२)

स एव श्रुतिमन्त्रस्स्याछेदस्वरविवर्जितः ।
तान्त्रिकं मन्त्रमित्युक्तं तदेव श्रुतिचोदितम् ॥ इति ॥

तन्त्रवार्तिके (४३६)—

तानेव वैदिकान् वर्णान्भारतादिनिवेशितान् ।
स्वाध्यायनियमं हित्वा लोकबुध्या प्रयुञ्जते ॥ इति ॥

आगमपदाभिधेयानामेतेषां प्रबन्धानां चतुर्दशविद्यास्थानेषु धर्मशास्त्रेऽन्त-र्भाव प्रकाशयन्ति पूर्वाचार्या. ॥

विभाग

ते चागमा तन्त्रवार्तिके (११४) एवमनूदिताः—"सांख्य-

योगपाञ्चरात्रपाशुपतशाक्यनिर्ग्रन्थधर्माधर्मनिबन्धनानि चिकित्सावशीकरणोच्चाटनोन्मादनादिसमर्थकतिपयमन्त्रौषधकादाचित्कसिद्धिनिदर्शनबलेनाहिंसासत्यवचनदमदानदयादिश्रुतिस्मृतिसवादिस्तोकार्थगन्धवासितजीविकाप्रायार्थान्तरोपदेशानि, यानि च बाह्यान्तराणि म्लेच्छाचारमिश्रकभोजनाचरणनिबन्धनानि, तेषामेवैतत् श्रुतिविरोधहेतुदर्शनाभ्यामनपेक्षणीयत्वं प्रतिपाद्यते" इति। अत्र बाह्यानि बाह्यान्तराणीति द्वेधा विभागोऽवगम्यते। अत्र पाञ्चरात्रपदमपि प्रयुक्तवता भट्टाचार्येण श्लोकवार्तिकारम्भे—

न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः।
दोषो ह्यविद्यमानोऽपि तद्धित्तानां प्रकाशते॥

इति लिखितस्य स्वयमप्युदाहरणं भवितुमर्हति॥

भट्टाचार्याभिप्रायस्त्वेष·—वैदिकैरभ्युपगताना स्मृतीनां मध्ये परिदृश्यमानाना केषाचित् स्मृतिवाक्यानां विरोधाधिकरणोदाहरणत्वाभ्युपगमे भिक्षुपादप्रसरणन्यायेन सर्वेषामप्रामाण्य प्रसजेत्। तस्मात् श्रुतिविरुद्धत्वेन प्रसिद्धाना साख्यादिस्मृतीनामेवाप्रामाण्य "विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम्" (१–३–३) इति सूत्राभिप्रेतमिति वक्तव्यमिति। तदुच्यते (८५) तन्त्रवार्तिके—

प्रसरं न लभन्ते हि यावत्कचन मर्कटाः।
नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे॥ इति।

आचार्यशबरस्वामिना तु श्रुतिविरुद्धास्स्मृतय एता उपात्ता· अर्थत·—यदौदम्बर्यास्सर्ववेष्टन "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति श्रुत्या विरुद्धम्। अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्य "जातपुत्र· कृष्णकेशोऽग्रीनादधीत" इत्यनेन विरुद्धम्। क्रीतराजको भोज्यान्न इति "तस्मा-

दर्भीषोमे संस्थिते यजमानस्य गृहेऽशितव्यम्" इत्यनेन विरुद्धम्। अतः स्मृतिः व्यामोहः, हेतुदर्शनादिति। तथा षष्ठे अधिकारलक्षणे—

पत्नी पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥

इति मनुस्मृति(८–४१६)वचनमपस्मृतिरिति शाबर भाष्यम्। कुमारिलस्त्वेतन्नानुमन्यते। बहुषु स्थलेषु भाष्यकारमत खण्डयन्नेवमप्याह

ततश्च भाष्यकारेण यदिहोक्तमचिन्तितम्।
वाक्यभङ्गभयन्तरं तत्र कर्तव्योऽतीव नादरः॥ इति॥ (७३१)

सांख्यतत्वकौमुद्यां वाचस्पतिमिश्रेण (५म श्लो) "शाक्यभिक्षुनिर्ग्रन्थकसंसारमोचकादीनामागमाभासाः परिहृता भवन्ति" इति आगमाभासाः परिगणिताः। वाचस्पतिमिश्रगुरुणा जयन्तभट्टाचार्येण तु न्यायमञ्जर्यां अधिकारिभेदेन सर्वेषामप्यागमाना प्रामाण्य व्यवस्थापितम्। प्रायस्स एव मार्गः वीरमित्रोदयादिप्रबन्धैरनुसृत इति विज्ञायते। तत्रागमाभासानां प्रामाण्याभावेऽपीतरेषा वेदानुकूलाना मार्ग भक्तिमार्ग इत्यत्र नाधिकमस्ति वक्तव्यम्। तत्प्रभेदाश्च पुराणसारे प्रपञ्चिता इति पराशरमाधवीये (६८ पु.) प्रदर्शिताः—

शैवं च वैष्णवं शाक्तं सौरं वैनायकं तथा।
स्कान्दं च भक्तिमार्गस्य दर्शनानि षडेव हि॥ इति।

तत्र शैवागमस्वरूप सक्षिप्य निरूप्य वैष्णवागमस्वरूप विशदयामः॥

शैवागम

भास्करभाष्ये शाङ्करभाष्यमनुसृत्यैव (१२७) "पशुपतिनेश्वरेण प्रणीत पञ्चाध्यायी शास्त्रम्। पञ्च तत्र पदार्थाः व्याख्यायन्ते कारण कार्यं योगो विधिः दुःखान्तः" इति॥ तत्रैषा पाशुपतप्रक्रिया (आग. ४१)—

जीवाः पशव उच्यन्ते तेषामधिपतिश्शिवः ।
स तेषामुपकाराय पञ्चाध्यायीमचीक्लृपत् ॥
तत्र पञ्च पदार्थास्तु व्याख्याताः कारणादयः ।
कारणं कार्यं विधिर्योगो दुःखान्त इति ॥

तथा तत्रैव—

शैवं पाशुपतं सौम्यं लागुडं च चतुर्विधम् ।
तत्रभेदस्समुद्दिष्टः संकरं न समाचरेत् ॥ इति ।

अत्र पाशुपतादिप्रक्रिया महती कथा । तस्या नात्रास्माकमवकाशः । उदयनाचार्येणापि न्यायकुसुमाञ्जल्यारम्भे—लोकवेदविरुद्धैरपि कर्मभिर्निर्लेपः स्वतन्त्र ईश्वर इति महापाशुपता." इति लिखितमस्ति । अनेन सर्वं व्याख्यात भवति । शैवाद्यागमानां विभागा अवान्तरविभागाश्च कामिकाद्यागमेषु वैकुण्ठदीक्षितीयादिषु निबन्धेषु च विस्तृता वेदितव्याः ॥

तत्र शैवागम वैष्णवागमयोरिद वैलक्षण्यम्—वैष्णवागमनिष्ठा वेदान्तमूल. वेदान्तानुगुण वैष्णवागम इति स्थापयन्ति । शैवागमनिष्ठास्तु वेदान्तवत् शैवागम स्वतन्त्रप्रमाणभूत वैदान्तवदीश्वरप्रोक्तत्वात्, वेदान्तसिद्धान्तो भिन्न शैवसिद्धान्तश्च भिन्नः । वेदान्तासिद्धान्ते ब्रह्मण एवोपादानत्व निमित्तत्व च । शैवसिद्धान्ते तु ब्रह्मपदवाच्यस्य परमशिवस्य निमित्तत्वमात्रमिति। भोजदेवप्रणीतत्तत्वप्रकाश व्याख्यायामघोरशिवाचार्य एव कथयति—"शैवदर्शन तु वेदान्तवासनाबद्धि. विद्वद्भि व्याकुलीकृतम्" इति ॥

अपि च सर्ववैदिकसप्रदायविरुद्ध वेदान्ताना पौरुषेयत्वं शैवासिसिद्धान्ते स्वीक्रियते । नैव वैष्णवागमनिष्ठा मन्यन्ते । अत एव श्रीकण्ठभाष्यव्याख्याया शिवार्कमणिदीपिकायामप्पयदीक्षिता शैवाग-

मानामप्यभिन्ननिमित्तोपादानवाद एव तात्पर्यमिति सन्धिं कुर्वन्ति। बादरायणसूत्र शाङ्करादिभाष्य च शैवागमाना निमित्तमात्रवाद एव तात्पर्यमित्यनूद्य खण्डयति शैवसिद्धान्तम्। एव श्रीकण्ठाचार्येणापि स्वीयभाष्ये सन्धि कर्तु शिवविष्ण्वोरैक्यं प्रदर्शितम्— "विष्णुशिवयोः उपादाननिमित्तयोः अवस्थाभेदमन्तरेण स्वरूपभेदो नास्ति" इति (१-३-१२) अधिक दर्शनोदये शैवदर्शने परामृश्यावगन्तव्यम्॥

पाञ्चरात्रागम

सनत्कुमारसहिता नाम काचित्सहिता समुपलभ्यते। आगम-प्रामाण्येऽपि "सनत्कुमारनारदादिभ्य अवोचत्" इति दृश्यते। सैषा संहिता ब्रह्मरात्र-शिवरात्र-इन्द्ररात्र-ऋषिरात्र-बृहस्पतिरात्रलक्षणपञ्चविध-विभागविभक्ता पाञ्चरात्रनाम्ना प्रथितेति युक्त वक्तुमित्युत्पश्याम। इय च सहिता महीशूरप्राच्यकोशागारे ५०३२ सख्याङ्कित तालपत्रपुस्तकम्॥

इममर्थ रातर्शब्दकोशे समुदाहृत वचनमपि द्रढयति —

वासिष्ठं नारदीयं च कापिलं गोतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रं च पञ्चकम्॥

इति। सनत्कुमारसहितागतेन्द्ररात्रवचनामागमप्रामाण्येऽपि पूरणपूजाविष-यक निर्माल्यप्रकरणे धृतमस्ति। ब्रह्मरात्रवचनानि बहूनि सच्चारित्ररक्षा-दिषूपात्तानि पश्याम। इममेववार्थ प्रकारान्तरेण ईश्वरसहितायामेकविशेऽ-ध्याये विजानीमः—

आद्यमेकायनं वेदं रहस्याम्नायसंज्ञितम्।
दिव्यमन्त्रक्रियोपेतं मोक्षैकफललक्षणम्॥
पञ्चापि पृथगेकैकदिवारात्रं जगत्प्रभुः।
अध्यापयामास यतः ततस्तन्मुनिपुङ्गवाः॥
शास्त्रं सर्वजनैर्लोके पञ्चरात्रमितीर्यते॥

इति । सुमन्तुजैमिनिभृगूपगायनमौञ्जयायननामभ्य. पञ्चभ्य. ऋषिभ्यः अस्यार्थस्योपदिष्टत्वात् इयं सज्ञा समागतेति ॥ पाद्मतन्त्रे तु—

पञ्चेतराणि शास्त्राणि रात्रीयन्ते महान्त्यपि ।
तत्सन्निधौ समाख्याऽसौ तेन लोके प्रवर्तते ॥

इति श्रूयते । एव निर्वचनस्य मूलमिद स्यात्, यत्—बादरायणसूत्रे द्वितीयाध्यायद्वितीयपादे कापिल हैरण्यगर्भ सौगतार्हत पाशुपताख्या· पञ्चागमा निराकृताः । पाञ्चरात्रस्याप्रामाण्यपि निराकृतमिति विशिष्टाद्वैतसप्रदाय इति ॥

नारदपञ्चरात्रे तु—

रात्रं च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्र च प्रवदन्ति मनीषिणः ॥ इति ॥

तस्येद विवरण महाभारते मोक्षधर्मे—

एवमेकं सांख्ययोगं वेदारण्यकमेव च ।
परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते ॥

इति । अस्य श्लोकस्य श्रीभाष्यम्—" साख्य च योगश्च साख्ययोग वेदाश्चारण्यकानि च वेदारण्यक परस्पराङ्गान्येतानि एकतत्त्वप्रतिपादनपरतया एकीभूतानि एक पञ्चरात्रमिति कथ्यते । एतदुक्त भवति—सांख्योक्तानि पञ्चविंशतितत्त्वानि योगोक्त च यमनियमाद्यात्मक योग वेदोदितकर्मस्वरूपाणि अङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वं योगस्य च ब्रह्मोपासनप्रकारत्व कर्मणां तदाराधनरूपतामभिदधति ब्रह्मस्वरूप प्रतिपादयन्त्यारण्यकानि । एतदेव परेण ब्रह्मणा नारायणेन स्वयमेव पाञ्चरात्रतन्त्र विशदीकृतमिति " इति ॥

अत्र चत्वारि शास्त्राणि सभूयैकमिति पञ्चविधज्ञानसमाहारात् पञ्चरात्रमिति सज्ञा व्यासेन प्रकाशितेति श्रीभाष्याभिप्रायः । अयमेवार्थः—

इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
सांख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम् ॥

इति (१२-१६१३) वचनस्याप्यवधेयः । विष्णुतत्त्वसहिता—(सह.४९९)

एकैव पञ्चधा भूता प्रधाना विग्रहात्मिका ।
सर्वशक्तिसमेतोऽपि पुरुषो नियतीरिमाः ॥
न जहाति स्वभावोत्थकारुण्येन समाश्रितः ।
परमेष्ठी पुमान् विश्वो निवृत्तिस्सर्व एव च ॥
पञ्चैताश्शक्तयः प्रोक्ताः परस्य परमात्मनः ॥

इति । तथा (१४९) विष्वक्सेनसहितायाम्—

पञ्चशक्तिमयो देवो बहिर्लोकेश्वरेश्वरः ।
आस्ते स्वानन्दभावेन परमव्योम्नि संस्थितः ॥ इति ॥

एव भगवतो वासुदेवस्यार्चन मण्डल कुम्भ पुष्पमण्डल स्थण्डिल प्रतिमासु विधीयते जयादिषु सहितास्विति । तथा तापपुण्ड्रनाममन्त्र-यागरूपपञ्चसम्कारा अप्यस्मिन् शास्त्रे प्रतिपाद्यन्ते इति । एवं समाराध्यस्य पञ्चविधमूर्तीनां स्थानाना सस्काराणां वा समाराधकस्य प्रतिपादकत्वात् शास्त्रमपि पञ्चशास्त्रमिति व्यवहर्तव्यमासीत् । शास्त्ररात्र-शब्दयो ज्ञानार्थत्वेन पर्यायत्वे पञ्चरात्रमिति व्यवहार युक्त इत्यप्युन्नेतुमस्ति सभावनेति ॥

शतपथब्राह्मणे तु (१३-६-१) पुरुषो ह नारायणोऽकामयताति॒ष्ठेय सर्वाणि भूतान्यहमेवेद सर्व स्यामिति स एत पुरुषमेध पञ्चरात्र क्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वाऽत्यतिष्ठत्सवाणि भूतानीदं सर्वमभवदति तिष्ठति सर्वाणि भूतानि सर्वं भवति य एव विद्वान्पुरुषमेधेन यजते यो वैतदेव वेद । तस्य त्रयोविशतिर्दीक्षा द्वादशोपसद पञ्चसुत्या । स एष चत्वारिंशसदीक्षोपसत्क चत्वारिंशदक्षरा विराड्विराजमभिसपद्यते ।

ततो विराडजायत विराजो अधिपुरुष इत्येषा वै सा विराडेतस्या एवैतद्विराजो यज्ञं पुरुष जनयति" इति ॥

अत्र पञ्चरात्रशब्दश्श्रयते नारायणशब्दश्चेति पाञ्चरात्रशास्त्रं नारायणप्रणीतं "पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्" इति महाभारतनारायणीयवचनानुसंधानेन सूच्यते इति केचित् उत्प्रेक्षन्ते। तदेतदस्माकमविरुद्धमपि अत्र पुरुषमेधपदविशेषणीभूत पञ्चरात्रपद पञ्चसुत्याकत्वेन प्रयुक्तमस्ति। नत्वत्र योगरूढ तत्पदम्। उत्तरत्रानुवाके दशरात्रपदमपि श्रूयते। तस्मात् "पौर्वापर्यापरामृष्ट· शब्दोऽन्यां कुरुते धियम्" इत्यस्येदमेकमुदाहरणम् ॥

पञ्चरात्रवैखानसविभाग.

पाञ्चरात्रवैखानसविभागः—(पा १६) वेदव्यासादिनिबद्धश्रीवैष्णवधर्मशास्त्रादिषु—

कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते ।
वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः ॥

श्रीभगवानुवाच—

शृणु पाण्डव तत्सर्वमर्चनाक्रममात्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥
अष्टाक्षरविधानेनाप्यथवा द्वादशाक्षरैः ।
स्थापितं मां ततस्तस्मिन् अर्चयित्वा विचक्षणः ॥
पुरुषं तु ततस्सत्यं अच्युतं च युधिष्ठिर ।
अनिरुद्धं च मां प्राहुः वैखानसविदो जनाः ॥
अन्ये त्वेवं विजानन्ति मां राजन् पाञ्चरात्रिणः ।
वासुदेवं च राजेन्द्र संकर्षणमथापि वा ॥
प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तीः प्रचक्षते ।
विद्ध्यनर्थान्तरा एवं मामेवं चार्चयेद्बुधः ॥

इति । मरीचिविमानार्चनकल्पे (५०८) "पञ्चानां मूर्तीनामादिमूर्तिर्विष्णु । तद्भेदाश्चतस्रो मूर्तय· पुरुषसत्याच्युतानिरुद्धा· । ता· धर्माज्ञैश्वर्यवैराग्यैः पादादर्धात्रिपादात्केवलाद्विद्यन्ते प्रातिलोम्येन" इत्यप्यस्ति । तथा—

हिरण्यगर्भः पित्राख्यः यत्र ब्रह्मा व्यजायत ।
ब्रह्मणश्चापि संभूतश्शिव इत्यवधार्यताम् ॥
शिवात् स्कन्दः संबभूव ह्येतत् सृष्टिचतुष्टयम् ॥

(अनुशा ४४) इत्यपि विज्ञायते । पद्मपुराणे (वैकुण्ठदीक्षितीये २ पु)—

श्रौतं वैखानसं प्रोक्तं वासिष्ठं स्मार्तमुच्यते ।
पञ्चरात्राभिधं शास्त्रं दिव्यागममितीरितम् ॥

इति । हारीतस्मृतौ—(उत्त, ५१)

श्रौतेनैव हरिं देवमर्चयन्ति मनीषिणः ।
श्रौतस्मार्तागमै· विष्णोः पूजनं त्रिविधं स्मृतम् ॥ इति च ॥

पाञ्चरात्ररक्षाया तु—(१७) "वैष्णवशास्त्रभेदत्वेन समपठितयो· वेदाविरुद्धयो भगवद्यामुनमुनिवासुदेवस्वामिप्रभृतिभि· स्थापितप्रामाण्ययो श्रीपाञ्चरात्रवैखानसशास्त्रयो अप्रामाण्यप्रसग· दूरपरिहरणीय· ॥ वैखानससूत्रानुसारिषु काश्यपमरीचिभार्गवात्रेयेषु तदनुबन्धिषु चाधिकारग्रन्थेषु सग्रहविस्तररूपेषु भगवदर्चनप्रतिष्ठादिक सपूर्णमुपदिष्टमस्ति ॥ यत्तु वैखानसे—

आग्नेयं पाञ्चरात्रं तु दीक्षायुक्तं च तान्त्रिकम् ।
अवैदिकत्वात्तत्तन्त्रं तस्माद्वैखानसेन तु ॥
सौम्येन वैदिकेनैव देवदेवं समर्चयेत् ॥ इति ।

यच्चोक्तं पाञ्चरात्रे—

अश्रीकरमसौम्यं च वैखानसमसात्त्विकम् ।
तद्विधानं परित्यज्य पञ्चरात्रेण पूजयेत् ॥

इत्यादीनि वचनानि । तानि परस्परस्थानाक्रमणलोलुपै· वट्टभि· पूजकाधमै· निवेशितानीत्यवगन्तव्यम् ॥

एतेनेदमप्यपास्तम्, यत् पारमेश्वरे दिव्यायतननिर्णयाध्यायोक्तम् । तत्र हि—साक्षाद्भगवत्प्रणीत ब्रह्मादिभि· प्रवर्तित शास्त्रं दिव्यम्, ब्रह्मादिभि· ऋषिभिश्च स्वय प्रणीत शास्त्र मुनिभाषितमिति द्विधा विभज्य पौरुष मनुजकृतमित्यपि कचित्प्रभेदमुक्त्वा मुनिभाषितस्य सात्त्विकराजसतामसभेदेन विभागमुक्त्वा तेषां लक्षणानि चोक्त्वा सात्त्वतपैष्करजयादीनि शास्त्राणि दिव्यानि ईश्वरभारद्वाजसौमन्तवपारमेश्वरवैहायसपितृशिखण्डिसहिताजयोत्तरादीनि, सात्त्विकानि, सनत्कुमारपद्मोद्भवशातातपतेजोद्रविणमायावैभवादीनि राजसानि, श्रीप्रश्नतत्त्वसागरादीनि तामसानीति निर्देशोऽपि कृत । तदनन्तरमुच्यते—

तामसेन तु मार्गेण पूजाद्यं यत्र वर्तते ।
तत्रापि राजसेनैव पूजाद्यं सिद्धिदं भवेत् ॥
राजसेन तु पूजाद्यं वर्तते यत्र नित्यशः ।
तत्रापि सात्त्विकेनैव पूजाद्यं शुभदं सदा ॥
सात्त्विकेन तु पूजाद्यं वर्तते यत्र नित्यशः ।
तत्र राजसमार्गेण न कुर्यात्पूजनादिकम् ॥

इति " ॥ अयमपि सदर्भ· स्थलाक्रमणरूपलोभमूलप्रक्षेपशङ्काकलङ्कित इत्यवधेय इति पाञ्चरात्ररक्षासिद्धान्त । दिव्यमुनिभाषितपौरुषादि विभाग· तत्तल्लक्षणविशेषश्च सात्त्वतसहितायामपि दृश्यते । एतेनेतरशास्त्रवत् पाञ्चरात्रशास्त्रमपि कालदेशदशारुच्यादिभेदेन विविधपरिणाम वद्भवतीत्यपि शास्त्रत एवावगत भवति ॥

इदमत्रावधेयम्—अथेदानीमतिविस्तृतस्यास्य पाञ्चरात्रशास्त्रस्य कर्ता कालश्च विमर्शकै· कैश्चित् विचारितो दृश्यते । तत्रचास्माभि·

सम्प्रदायविद्भिरिदमुच्यते—"पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्" इति वेदव्यासेन कृत्स्नस्यापि नारायण एव वक्तेति स्पष्टमुक्तम्। सोऽपि वक्ता अनादिनिधनाविच्छिन्नसम्प्रदायसिद्धस्य रहस्याम्नायाख्यस्यैकायनाभिधानस्य वेदान्तजातस्य च सारार्थं संगृह्य व्यूहसङ्कर्षणरूपेणेद शास्त्रमुपदिदेश। ब्रह्मादीना देवाना नारदादीनां देवर्षीणा च सहिताकर्तृत्वेन अधिकारस्य भगवतैव समर्पितत्वात् नारायण एव वक्तेत्यस्य नानुपपत्ति.। अयमर्थ. पाञ्चरात्ररक्षायां (३०) आचार्यै सुविशद प्रकाशित—"पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्" इति स्ववक्तृके शास्त्रे भगवतैव तेषामृषीणा तत्तत्पुण्यविशेषानुसारेण नित्यवेदे सूक्तकाण्डमन्त्रकृत्ववत् सहिताकर्तृत्वस्याधिकारतया समर्पितत्वात् कात्स्न्यैन भगवच्छास्त्रस्य प्रामाण्यम्। ततश्च भगवद्व्यतिरिक्तब्रह्मादिपुरुषकृताशेषु न कारणदोषस्सम्भवति। यथा च व्यासोक्त महाभारते वैशम्पायनसहिताभेद', एवमत्रापीति" इत्युक्तमस्ति। ततश्च वक्तृबहुत्वेऽपि अशावेशानुप्रवेशाद्यवताररूपेण नारायणेनैव प्रणीतामिति सम्प्रदायसस्कृतविपश्चितामाशयः। सुगतागमकथाप्रसङ्ग (३२) प्रागेव सूचितोऽय पन्था। जयायामयमर्थ उपबृहित.—

सक्षान्नारायणो देवः कृत्वा मर्त्यमयी तनुम्।
मन्नानुद्धरत लोकान् कारुण्यात् शास्त्रपाणिना॥ इति।

पाञ्चरात्रविभाग

पाञ्चरात्रशास्त्रविभागः कालोत्तरे—

अनेकभेदभिन्नं च पञ्चरात्राख्यमागमम्।
पूर्वमागमसिद्धान्तं मन्त्राख्यं तदनन्तरम्॥
तन्त्रं तन्त्रान्तरं चेति चतुर्धा परिकीर्तितम्।
एतद्वै पाञ्चरात्राख्यं शास्त्रं सर्वोत्तमोत्तमम्॥
नारायणीयं मौद्गल्यमाग्नेकाश्यपसंज्ञितम्॥

इत्यादि ॥ (पा २२)

चतुर्धा भेदभिन्नं च स्वयं व्यक्तादिभेदतः ।
स्वयं व्यक्तं हि सिद्धान्तमागमाख्यं पुरोदितम् ॥
मन्त्रसिद्धान्तसंज्ञं तु यद्दिव्यं परिकीर्तितम् ।
तन्त्रसिद्धं हि यच्छास्त्रं तत्सैद्धं समुदाहृतम् ॥
तन्त्रान्तरं तु यत्प्रोक्तं आर्षं तत्समुदाहृतम् ॥

इति । अनेन स्वयव्यक्तदैवसैद्धार्षादिस्थलविभागोऽपि आगमपूजाभेद-निबन्धन इत्यवधार्यते । तत्रैव पूजानिर्णयाध्याये—"वैदिक तान्त्रिक श्रौत मिश्र चेति चतुर्विधम्" इति मूलश्रुतिदिव्यमन्त्रप्रवृत्तश्रुति-तत्सम्भेदनिमित्तनामधेयानीमानि । श्रीकरसहिताया तु प्रागुक्तस्यैव सिद्धान्तचतुष्टयस्य वेदसिद्धान्त दिव्यसिद्धान्त तन्त्रसिद्धान्त पुराण-सिद्धान्त इति प्रागुक्तादूरविप्रकृष्टै. नामभेदै विभाग उक्त.।(पा २१) पाञ्चरात्रशब्दवत् सिद्धान्तशब्दोऽपि चतुर्णा साधारणः । हयग्रीव-सहितायाम् (पा.७)—

आगमाख्यं तु सिद्धान्तं सन्मोक्षैकफलप्रदम् ।
मन्त्रसंज्ञं हि सिद्धान्तं सिद्धिमोक्षफलं नृणाम् ॥
तन्त्रसंज्ञं हि सिद्धान्तं चतुर्वर्गफलप्रदम् ।
तन्त्रान्तरं हि सिद्धान्तं वाञ्छितार्थफलप्रदम् ॥

इति चतुर्णामपि परब्रह्मभूतवासुदेवप्रापकत्वमविशिष्टम् । आगमप्रामाण्ये (२३)—

भाक्तं भागवतं चैव सात्त्वतं च त्रिधा मतम् ।
इत्येवं तन्त्रभेदोक्ति. पञ्चरात्रेऽपि दृश्यते ॥

इत्युक्तम् ॥

ततश्च सत्त्वान् भगवान् भज्यते यैः पर पुमान् ।
ते सात्वता भागवताः इत्युच्यन्ते द्विजातयः ॥

इति निर्णयः । पाद्मे—

सिद्धान्तेषु चतुर्ष्वेकं पूर्वैर्नृभिरनुष्ठितम् ।
त्यक्त्वा समाश्रयेदन्यं नरो भवति किल्बिषी ॥
तस्माज्जन्मप्रभृत्येकराद्धान्तनियतो भवेत् ।
सिद्धान्तानां चतुर्णां तु साङ्कर्यं व्यसनावहम् ॥

इति च श्रूयते । पाञ्चरात्ररक्षायां (३२) जयाख्यसात्वतपौष्करााणां रत्नत्रयमिति प्रसिद्धिरित्यप्युक्तम् । सात्वतस्य सर्वसहितासारभूतत्व च सच्चरित्ररक्षाया (४३) मुक्तम् ॥

पाद्मेचर्यापादे १९ अध्याये—

पाञ्चरात्रश्रुतितरो· सर्वसेव्यस्य संप्रति ।
दृश्यन्ते संहिताशाखाः चतुर्विंधफलाश्रयम् ॥

इति । तासामासां सहिताना नामनिर्देशपूर्वक गणना अत्रैव सहितायां अग्निपुराणे कपिञ्जलसहिताया विष्णुसहिताया हयशीर्षसहितायां च वर्तते । श्लोकाना सख्याभेदेन उत्तममध्यमाधमभेदेन च सहितालक्षण-मप्युक्तम् । हेमाद्रिविरचितचतुर्वर्गचिन्तामणौ कालनिर्णयखण्डे—(६६०) "महापञ्चरात्र, क्रतुपञ्चरात्र, और्वपञ्चरात्रम्" इत्येतैर्नामभि· पाञ्चरात्रप्रबन्धास्समुल्लिखिता दृश्यन्ते । ६५९ पुटे द्वापरे पञ्चरात्रप्राश-स्त्यमुपदर्शितम् ॥

प्रतिपाद्यविचारः

पाञ्चरात्रागमप्रतिपाद्यविषये श्रीभाष्यम्—"वासुदेवाख्य परं ब्रह्मैवाश्रितवत्सलं स्वाश्रितसमाश्रयणीयत्वाय स्वेच्छया चतुर्धाऽवतिष्ठत इति भागवतप्रक्रिया । यथा पौष्करसहितायाम्—

कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते ।
क्रमागतैस्स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत् ॥

इति । तच्च चातुरात्म्योपासनं वासुदेवाख्यपरब्रह्मोपासनमिति सात्त्वतसंहितायामुक्तम्—

ब्राह्मणानां हि सद्ब्रह्मवासुदेवाख्ययाजिनाम् ।
विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत् ॥

इति । तद्धि वासुदेवाख्य परं ब्रह्म संपूर्णषाड्गुण्यवपु. सूक्ष्मव्यूहविभवभेदभिन्न यथाधिकार भक्तैः ज्ञानपूर्वेण कर्मणाऽभ्यर्चित सम्यक्प्राप्यते । विभवार्चनाद्व्यूह प्राप्य व्यूहार्चनात्पर ब्रह्म वासुदेवाख्य सूक्ष्म प्राप्यत इति वदन्ति । विभवो हि रामकृष्णादिप्रादुर्भावगणः । व्यूहो वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूप· चतुर्व्यूहः । सूक्ष्म तु केवलषाड्गुण्यविग्रह वासुदेवाख्य पर ब्रह्म । यथा पौष्करे—

यस्मात्सम्यक्परं ब्रह्म वासुदेवाख्यमव्ययम् ।
अस्मादवाप्यते शास्त्रात् ज्ञानपूर्वेण कर्मणा ॥

इत्यादि" ॥ इति । व्यूहशब्दार्थस्तु विग्रहसस्थानविशेष ॥

वर्णैश्चतुर्भिश्चत्वारः पूजनीया यथाक्रमम् ।
वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाः ॥

इत्यागमप्रामाण्यम् । श्रीसहस्रनामभाष्ये चतुर्मूर्तिपदे—"बलभद्रवासुदेव प्रद्युम्नानिरुद्धाभिज्ञा. चतस्रो मूर्तय· यदुकुलेऽप्यस्तीति चतुर्मूर्ति." इति भाषितम् ॥

अत्रैव विषये शाङ्करानुवादः (२-२-४२) "तत्र भागवता मन्यन्ते भगवानेवैको वासुदेवो निरञ्जनज्ञानस्वरूप परमार्थतत्त्वम् । स चतुर्थाऽऽत्मान प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण सकर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च । वासुदेवो नाम परमात्मोच्यते । सकर्षणो नाम जीवः । प्रद्युम्नो नाम मन. अनिरुद्धो नामअहकारः । तेषां वासुदेवः परा प्रकृतिः । इतरे सकर्षणादयः कार्यम् ।

तमित्थभूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगै. वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति" ॥ अत्रागमप्रामाण्यमिदमवधेयम्—

नानेनवचनेनेह जीवजन्माभिधीयते ।
अपि तु व्यूहरूपेण व्यक्तिर्देवस्य कीर्त्यते ॥
तत्र संव्यवहारार्थं जीवशब्दः प्रयुज्यते ।
वर्णानामानुलोम्येन पूज्यभेदप्रसिद्धये ॥ इति ॥

नारायणीयभगवद्गीते

अत्र नारायणीयभगवद्गीतयोस्सन्दर्भः—

श्रुतिस्मृतीतिहासेषु प्रपत्तिर्नाम विश्रुता ।
तेषां तु तपसांन्यासमतिरिक्तं ततश्श्रुतम् ॥
ब्रह्मणे त्वामहस इत्यात्मानं विनियोजयेत् ।
अहं मुमुक्षुश्शरणं प्रपद्य इति च श्रुतम् ॥
प्रपन्न इन्द्रं शरण सर्वस्य शरण सुहृत् ।
इत्यादयः श्रुतिशतं विश्रुतं शरणागतौ ॥
तामेव साक्षान्मोक्षस्य भक्तेरङ्गतयाऽपि वा ।
वदन्तिहेतुं श्रुतय. सेतिहासपुराणकाः ॥
पाञ्चरात्रं शास्त्रमपि साक्षान्मोक्षस्य हेतुताम् ।
प्रपत्तेर्बोधनायैव प्रवृत्तमिति निर्णयः ॥
पाञ्चरात्रस्य सारांशं संगृह्य व्यासमस्करी ।
शान्तौ नारायणीयेन कृपयैव न्यरूपयत् ॥
तस्यापि संग्रहं प्राह गीता भगवतो हरेः ।
तत्रत्यं श्लोकयुगलं सावधानं निशम्यताम् ॥
एवमेष महान् धर्मः स ते पूर्वं नृपोत्तम ।
कथितो हरिगीतासु समासविधिकल्पितः ॥
समुपोढेष्वनीकेषु कुरुपाण्डवयोर्मृधे ।
अर्जुने विमनस्के च गीता भगवता स्वयम् ॥

इति लोकानुग्रहाय समासव्यासयोगतः ।
भगवत्प्रमुखैः पाञ्चरात्रशास्त्रं प्रवर्तितम् ॥

सैषा भगवद्गीता नारायणीयसिद्धान्त इत्यत्र शाङ्करगीताभाष्य-वचनान्युदाह्रियन्ते । प्रारम्भ एव—

नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम् ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥ इति ॥
स आदिकर्ता नारायणो विष्णुः । (१-१)
अत एव भगवान्नारायणः । (२-२१)
हृदयेशयं सर्वकर्मफलाध्यक्षं
सर्वप्रत्ययसाक्षिणं नारायणम् । (५-२८)
मां परमेश्वरं नारायणम् । (७-१५)
सर्वात्मानं मां नारायणम् । (७-१९)
अनन्या अपृथग्भूताः परं देवं नारायणम् । (९-२२)
महायोगेश्वरो हरि र्नारायणः । (११-९)
मां चेश्वरं नारायणम् । (१४-२६)
ममैव परमात्मनो नारायणस्य । (१५-७)
भगवत ईश्वरस्य नारायणाख्यस्य । (१५-१६)
ईश्वरस्सर्वज्ञो नाराणाख्यः । (१५-१७)

एव दिङ्मात्रमुपदर्शितम् । गीताया भगवद्वाक्येषु श्रूयमाणस्यास्मच्छब्दस्य भगवान् वासुदेव. नारायणः विष्णुः इत्यादीनि पदानि विहाय न क्वचिदपि व्याख्यान दृश्यते । एतेन भगवत्पादा· परमभागवता· वैष्णवाग्रेसरा इत्यत्र ना तोऽप्यधिक वक्तव्यमस्ति ॥

तथैव तेषां भगवत्पादाना परमाचार्योऽपि गौडपादाचार्यवर्यः नारायणैकनिष्ठः परमभागवत इत्यत्र आनन्दगिरीय वचनमुदाहराम. माण्डूक्यकारिकायामलातशान्तिप्रकरणारम्भे—

ज्ञानेनाकाशकल्पेन धर्मान्यो गगनोपमान् ।
ज्ञेयाभिन्नेन संबुद्धः तं वन्दे द्विपदां वरम् ॥

इति पद्यभाष्यव्याख्याने आनन्दगिरिः "आचार्यो हि पुरा वदरिकाश्रमे नरनारायणाधिष्ठिते नारायण भगवन्तमभिप्रेत्य तपो महदतप्यत। ततो भगवानतिप्रसन्न तस्मै विद्या प्रादादिति प्रसिद्ध परमगुरुत्व परमेश्वरे इति भावः" इति व्याख्याति ॥

सैषा भगद्गीताभक्तिशास्त्रम्। भक्तिरेव मोक्षस्य सुगमो मार्ग इत्यत्र शाङ्करभाष्यवाक्यानि श्रूयन्ताम्—

१. अर्जुनस्यात्यन्तमेव हितैषी भगवान् कर्मयोगं भेददृष्टिमन्तमेवोपदिशति ॥ १२-१३ ॥

२. अध्यात्मचेतसा अह कर्ता ईश्वरस्य भृत्यवत् करोमि ॥ ३-३० ॥

३. ईश्वरायैव करोमि न मम फलाय ॥ ५-१२ ॥

४. अत्रात्मेश्वरभेदमाश्रित्य विश्वरूपे ईश्वरे चेतस्समाधानलक्षण. योग उक्त, ईश्वरार्थं कर्मानुष्ठानादि च ॥ १२-१३ ॥

५. स्वकर्मणा भगवत. अभ्यर्चनभक्तियोगस्य फल ज्ञाननिष्ठायोग्यता ॥ १८- ५४ ॥

६. अनन्या भक्ति. सर्वैरपि करणै· वासुदेवादन्यत् नोपलभ्यते यया ॥ ११-५४ ॥

७ एव भगवत सत्यप्रतिज्ञत्व बुध्वा भगवद्भक्तेरवश्यभावि मोक्षफलमवधार्य भगवच्छरणैकपरायणो भवेत् ॥ १८-६५ ॥

८ कर्मयोगनिष्ठाया परम रहस्यमीश्वरशरणता ॥ १८-६५ ॥

९. ये पुनः श्रद्दधाना भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ता. ॥ ९-१३ ॥

१०. विध्वस्तसर्वोपाधिविशेषस्य अक्षरस्योपासकापेक्षया सर्व-

योगैश्वर्यसर्वज्ञानशक्तिमत्सत्त्वोपेतस्य उपासका युक्ततमा इति चोक्तम् ॥ १२-२ ॥

११. न केवल मद्भक्तानां अनावृत्तिलक्षणमनन्तफल, सुखाराधनश्चाहम् ॥ ९-२६ ॥

१२. अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थ. नि.श्रेयसार्थः अनुष्ठेयत्वेन समुच्चित्योच्यते ॥ ११-५५ ॥—

मत्कर्मकृत् मत्परमः मद्भक्त. सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यस्समामेति पाण्डव ॥ इति ॥

इदमत्रावधेयम्—भक्तिसिद्धान्तः केवलागमैकमूल· । विशिष्टाद्वैतादिसिद्धान्ताना श्रीरामानुजाचार्यादिप्रवर्तितानां भक्त्यवलम्बनात् तन्त्रसाङ्कर्यमस्तीति केचिदधुनातना· अपकर्षमिव समारोपयन्ति । विशुद्धाद्वैतसिद्धान्तप्रवर्तकाचार्यस्य भगवत्पादस्य वचास्यनुचिन्त्य विशुद्धहृदयास्तेऽपि भवन्त्वितीयान् विस्तर ॥ अन्यदेतत् ॥

भागवतसिद्धान्त

श्रीमतो वेदान्ताचार्यस्य हृदयपरामर्शेन तु पञ्चरात्रपदस्येत्थमभिप्रायोऽवधार्यते । यथा पाञ्चरात्ररक्षायाम् (१२६)—

विदितनिगमसीम्ना वेङ्कटेशेन तत्त-
द्बहुसमयसमक्षं वद्धजैत्रध्वजेन ।
प्रतिपदमवधानं पुष्यतां सात्त्विकानां
परिषदि विहितेयं पञ्चकालव्यवस्था ॥

इति । अनेन पद्येन पञ्चकालकर्तव्यभगवदाराधनप्रतिपादनपरत्वादस्य शास्त्रस्य पञ्चरात्रसंज्ञा समुचितेत्याचार्याभिप्रायः । पञ्चकालविभागस्त्वित्थमवगम्यते । (पा. ३२) जयाख्यसंहितायां नारद·—

एको हि श्रूयते देव कालो लोके न चापरः ।
पञ्च कालास्त्वयोद्दिष्टाः किमेतन्मेऽत्र संशयः ॥

श्रीभगवानुवाच—

एकस्यैव हि कालस्य वासरीयस्य नारद ।
आप्रभातं निशान्तं वै पञ्चधा परिकल्पना ॥
पृथक्कर्मवशात्कार्या न काला बहवस्मृताः ।

अभिगमनोपादानेज्यास्वाध्याययोगभेदेन पञ्चविधविभागविभक्त अहोरात्रात्मक. काल इत्यर्थः ॥

प्रातस्सङ्गवमध्याह्नापराह्णसायाह्नभेदेन शास्त्रान्तरे विभक्तानामेवास्मिन् शास्त्रे इमानि सज्ञान्तराणि । तथा सङ्गवस्सोमो विष्णुप्रियः धर्मो विराग इत्यपि नामान्तराण्युपलभ्यन्ते ॥

तेषु च कालेषु कर्तव्यानि कर्माणि त्रय्यन्तैकायनश्रुतिविहितानि सहितासु सर्वासूपबृंहितानीति नात्र प्रतन्यते । एव वर्तमानस्य सर्व. कालोऽप्यवन्ध्यो भवति । सर्वे व्यापारा कैङ्कर्यरूपा भवन्ति । सर्वोऽप्यानुषगिको भोग. क्रीडाशुकक्षीरास्वादन्यायेन स्वामिभोगशेषभूतो भवतीति भगवत्कैङ्कर्यैकरते परमैकान्तिनः अनादिमायानिशावसाने अनन्तमोक्षवासरप्रारम्भे च प्रत्यूषवदवस्थितोऽयमायुश्शेषकाल इति। तत्र योगपदार्थस्तु शाण्डिल्यस्मृत्युक्त (पा ४१) अवधेयः—

ईदृशः परमात्माऽयं प्रत्यगात्मा तथेदृशः ।
तत्संबन्धानुसंधानमिति योगः प्रकीर्तितः ॥

दक्ष. —

सर्वोपाधिविनिर्मुक्त क्षेत्रज्ञं ब्रह्मणि न्यसेत् ।
एतत् ध्यानं च योगश्च शेषोऽन्यो ग्रन्थविस्तरः ॥

इति । स्वाध्यायपदार्थस्तु आचार्यैरेव निर्णीत. (पा १०५) शमाद्युपयुक्तशब्दसंशीलनं कुर्यादिति स्वाध्यायसारः । उक्त च महाभारते—

यच्छ्रुतं न विरागाय न धर्माय न शान्तये ।
सुबद्धमपि शब्देन काकवाशितमेव तत् ॥

इति । अधिकं पाञ्चरात्ररक्षायामवगन्तव्यम् ॥

श्रीपाञ्चरात्रसिद्धान्त एव भागवतसिद्धान्त इत्युच्यते । यत इदमुच्यते—(पा ३५)

द्वादशाक्षरतत्त्वज्ञः चतूर्व्यूहविभागवित् ।
अच्छिद्रपञ्चकालज्ञः स तु भागवतः स्मृतः ॥ इति ॥

अच्छिद्रत्व नाम अन्यार्थकर्मानन्तरितत्वम् ॥

ततश्च सत्त्वान् भगवान् भज्यते यैः परः पुमान् ।
ते सात्त्वता भागवता इत्युच्यन्ते द्विजातयः ॥

इत्यागमप्रामाण्ये (६७) निर्णीतम् । श्रीसालग्रामप्रसगे ब्रह्माण्डे (सच्च ११०)

हृदि रूपं मुखे नाम नैवेद्यमुदरं हरेः ।
पादोदकं च निर्माल्यं यस्य मूर्ध्नि स वैष्णवः ॥ इति ॥

विष्णुपुराणे (५-१७)

यज्ञभिर्यज्ञपुरुषः वासुदेवश्च सात्त्वतैः ।
वेदान्तवेदिभिर्विष्णुः प्रोच्यते तं नतोऽस्म्यहम् ॥

इति । एतेन वासुदेवोपासकास्सात्त्वता भागवता इति निर्णय. । अनेन श्लोकेन कश्चिक्रमोऽपि समुल्लिख्यते सूक्ष्मदर्शिभि· वैदिकसप्रदाय· आगमसंप्रदायः औपनिषदसंप्रदायश्चेति ॥

इदमप्यत्रावधेयम् । (पा १०४) आह चैवं बोधायन·—

जपमध्ये गुरुर्वाऽपि वैष्णवो यस्समागतः ।
संभाषणादि पूजान्तं तस्य कृत्वाऽनुमान्य च ॥
अनुश्राव्य तत कुर्यात् जपशेषं समाहितः ।
सर्वस्य प्रभवो यस्मात् विष्णुपादाश्रया नराः ॥
तन्मूलतः क्रियास्सर्वाः सफलास्तु भवन्ति हि ।

इति । जयसहितायामपि--

यस्माद्देवो जगन्नाथः कृत्वा मर्त्यमयी तनुम् ।
मग्नानुद्धरते लोकान् कारुण्यात् शास्त्रपाणिना ॥ इति ॥

तत्रापि---

देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम् ।
नमस्कारं न कुर्याच्चेत् उपवासेन शुद्ध्यति ॥

इत्यादिकमपि प्रतिबुद्धेतरविषयमिति व्यवस्था कृता । भागवतधर्मानुष्ठानसौकर्यमिदम्---(पा ५०) जयसहिता---

शयनासनदानादावासक्तश्चापि भोजने ।
हृद्गतं न त्यजेद्ध्यानं आनन्दफलदं हि तत् ॥
व्यापृतेनापि मनसा विष्णुस्संध्योऽन्तराऽन्तरा ।
मेधीबद्धो भ्राम्यमाणः घासग्रासं करोति गौः ॥

इति। तथा---एतादृशभागवतमर्यादाप्रविष्टानां परिपूर्णब्रह्मवित्त्वाभावेऽपि ह्युपनीतावस्थत्वमात्रेण द्विजत्ववत् सम्कारविशेषादियोगमात्रेण भागवतत्वमात्र सिद्धमित्यप्युक्तम् । अत्रेदमपि भागवतरहस्यमवधेयम्, दानप्रतिग्रहादिषु मन्त्रविशेष यमेनोक्त शौनक स्मरति---

दानं ददद्भिर्यैरुक्त अच्युत. प्रियतामिति ।
प्रतिग्रहीतृभिश्चैवं न ते मद्विषयोपगा. ॥

इति । तथा---

त्वय्याराधनकामोऽयं व्रतं चरितुमिच्छति ।
संकल्पसिद्धये भगवन् पूरयास्य मनोरथान् ॥

इत्ययमपि भागवतानामतिरहस्यभूतो मन्त्र· सदाचार्यसकाशादेवाधिगन्तव्य· ॥ इति ।

मूलश्रुति

अस्य च पाञ्चरात्रशास्त्रस्य त्रय्यन्ता. एकायनश्रुतिश्च मूलमिति सर्वाभ्यस्संहिताभ्य· महाभारतादिपुराणेभ्यः आगमप्रामाण्यादिप्रबन्धेभ्य

श्रावगम्यते । सहितावचनानि परिस्फुटानीति न लिख्यन्ते । महाभारते तु (१२–७८७२)—

एवमेकायनं धर्ममाहुर्वेदविदो जनाः ।
यथा ज्ञानमुपासन्तः सर्वे यान्ति परां गतिम् ॥
ये तु वाकनिषन्निष्ठाः तत्तत्संस्कारसंस्कृताः ।
ते वै भागवताश्शुद्धाः वासुदेवैकयाजिनः ॥

त्रय्यां "अनुवाक., उपनिषत्" इति व्यवहारः । अत्र तु "वाक, निषत्" इति । ततश्चायमेव वेदः अनादिसिद्ध· । अत एवेत्थमुच्यते (भा ३–११२५३, ५–१६६३)—

एकवेदस्य चाज्ञानाद्वेदास्ते बहवोऽभवन् ॥

इति । आनुशासनिके यज्ञपुरुषमाहात्म्येऽपि—

एको वेदो ब्राह्मणानां बभूव
चतुष्पादः त्रैगुणो ब्रह्मशीर्षम् ।
पादं पादं ब्राह्मणा वेदमाहु·
त्रेताकाले तं च तं विद्धि शीर्षम् ॥ इति ।
यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यधर्माणः सत्यं सत्येषु नामसु ॥

इति राजधर्मे (४७–२६) श्रूयते ॥

अथ निबन्धकृता वचनानि—सेयमेकायनश्रुति· रहस्याम्नाय इति बह्वीषु सहितासु तदनुगुणप्रबन्धेषु च व्यवह्रियते उदाह्रियते च । क्वचित् रहस्याम्नायब्राह्मणमित्यप्यवतार्योदाह्रियते । तत· एकायनशाखायां मन्त्रभाग· ब्राह्मणभाग इत्यपि विभागोऽवधार्यते ॥

छान्दोग्योपनिषदि भूमविद्यायां एकायनामिति पद श्रूयते । तस्य नीतिशास्त्रमिति शाङ्कर व्याख्यानम् । प्रसिद्धिविरुद्ध तदिति श्रुतप्रकाशिकायां लिखितमस्ति ॥

विष्णुसहस्रनामभाष्ये कूरेशविरचिते अस्या श्रुते वाक्यानि बहून्युपात्तानि समुपलभ्यन्ते। तत्र सर्वत्र मूले इत्येव व्यवहारो दृश्यते। ईश्वरसहितायामाप (२)—

महतो वेदवृक्षस्य मूलभूतो महानयम्।
स्कन्धभूता ऋगाद्यास्तु शाखाभूतास्तथा परे॥
मूलश्रुतिं यथावच्च ऋषयोऽध्यापितास्तु ते।
ततस्ते ऋषयस्त्वष्टौ लोकानां हितताम्यया॥ इति च।

अत्र महतो वेदवृक्षस्येति पद्ये इद पद मूलश्रुतिपरमित्यवगम्यते। न्यायपारिशुद्धौ तु (२०४)—इद वचन भारतस्थमित्युदाहृत्य इदपद पाञ्चरात्रशास्त्रपरमित्यभिसधाय मूलभूत इति पदस्य वेदमूलभूताशस्य उपबृहणमिति व्याख्यान दृश्यते॥

इम च वेदभेद भोजराजबलदेवाचार्यादयश्च विविञ्चते (पा ४)—

यो वेदवृक्षं बहुमूलशाखं
नानाफलर्थिद्विजसंघसेव्यम्।
पूर्वश्रवानुश्रवभेदभिन्नं
आरोपयन्तं पुरुषं प्रपद्ये॥ इति॥

आगमप्रामाण्ये—"स खलु भगवानमोघसहजसवेदनसाक्षाद्भवदाखिल वेदराशि विप्रकीर्णविविधविध्यर्थवादमन्त्रात्मकानेशाखाध्ययनधारणादि-ष्वधीरधियो भक्तानवलोक्य तदनुकम्पया लघुनोपायेन तदर्थ सक्षिप्योपदिदेश। यथाऽऽहु·—

वेदान्तेषु यथा सारं संगृह्य भगवान् हरिः।
भक्तानुकंपया विद्वान् संचिक्षेप यथासुखम्॥

इति। तत्रैवान्यत्र—"आदिकाले भगवान् प्रलीननिखिलकरणकलेबरादिभोगोपकरणचेतनेतरायमाणजीवजातावलोकनजनितमहानुग्रह सकलमपि जगदुपजनय्य तदभिलषितसमस्तसासारिकसपत्प्राप्त्युपायप्रकाशन-

बहुलांत्रयीमेकतस्समुपदिश्य विविधदुरितपरंपराकीर्णभवार्णव निमज्जान-वलोकयन् परमकरुणतया तप्तमानस परमनिश्श्रेयससाधनस्वाराधनाव-बोधसाधनीभूता. पञ्चरात्रसहिता सनत्कुमारनारदादिभ्योऽभ्यवोचत्" इति ॥

अर्चाविचार

शौनकोऽहं प्रवक्ष्यामि नित्यं विष्णवर्चनं परम् ।
प्र व. पान्थमन्धसो धियेत्यर्धर्चस्य विधानतः ॥

इति शौनकसूत्रम् ॥ (पा. ४६) ॥ एव बोधायनवैखानसप्रभृतय. प्राय. कल्पसूत्रकाराः श्रौतपथपरिनिष्ठिताः सर्वेऽपि विष्णवर्चनप्रतिष्ठादिक सूत्र-यन्ति । असूत्रयतामप्यापस्तम्बादीनाम् "अनुक्तमन्यतो ग्राह्यम्" इति न्यायेन सम्मतोऽयमर्थ , यत इदमुच्यते पाञ्चरात्ररक्षायाम् "तदुक्तिरहित-सूत्रनिष्ठानामन्यापेक्षायां पाञ्चरात्रशास्त्र साधारणम्" इति ॥ (१४)

प्र व. पान्तमन्धसो धियायते
महे शूराय विष्णवे चार्चत ।
या सानुनि पर्वतानामदाभ्या
महस्तस्थतुर्वर्तेव सानुना ॥ इति (ऋक्सं १-१५५-१)

इति ॥ अय मन्त्र अच्छावाकशस्त्रतया द्वादशाहे विनियुक्त । येषु मन्त्रेषु विधिपरत्व न दृश्यते तेष्वपि विनियुक्तत्वेन मन्त्रत्वेन तत्समुदाय त्वेन वा विधिपरत्व नापक्रान्तम् । अपितु अनुवादलिङ्गप्राप्तार्थत्वा-दिभिः । अपरथा "वसन्ताय कपिञ्जलानालभेत, यय क्रतुमधीते तेन-तेनास्येष्ट भवति" इत्यादौ मन्त्रत्वेऽपि विनियुक्तत्वेऽपि विधिपरत्वस्य नय-वित्सम्मतत्वात्। सर्वस्यापि वेदस्य जपाध्ययने विनियुक्तत्वात् क्रतूनामेव निर्मूलत्वप्रसङ्गाच्च । तस्माद्विधिपरत्वे विष्णवर्चनं श्रुतिसिद्ध भवति ॥

विशिष्टमन्त्रार्थ याज्ञिकसम्प्रदायसिद्ध वेदभाष्ये प्रदर्शितो यथा—हे अध्वर्य्वादय वः युष्माक सम्बन्धि पान्त पालनस्वभावं

अन्धस अन्न सोमरूपं प्रार्चत प्रकर्षेण सम्पादयत । कस्मै ? धियायते स्तुतीरिच्छते शूराय विक्रान्तायेन्द्राय विष्णवे व्यापकाय एतन्नामकाय देवाय । कस्तयोरतिशय ? उच्यते—या याविन्द्राविष्णू पर्वतानां प्रीणनवता पूरणवतां वा लोकाना सानुनि समुच्छ्रिते प्रदेशे तस्थतुः तिष्ठतः अदाभ्या अदम्भनीयौ महः महान्तौ साधुना अभिमतदेश-प्रापणसमर्थेन अर्वता वेगवता अश्वेन यथा उच्छ्रित प्रदेशमारोहति तद्वदुच्छ्रितं पदमारूढौ । तस्मात्ताभ्यामर्चत ॥

एतेन विष्णोरर्चन सम्पन्नमपि "अर्धर्चस्य विधानत" इति स्मरणेन शौनकसम्मतोऽर्थस्त्वेष —हे मनुष्या व सम्बन्धिना पान्त पालनसमर्थेन अन्धसः अन्नेन अदनीयेन भोग्यवस्तुना धियायते स्तोतव्याय महे महते शूराय सर्वशक्तिसम्पन्नाय विष्णवे प्रार्चत प्रकर्षेण पूजयत विष्णुपूजा कुरुत इति विधि । अस्योपबृहणभूत इतिहासोत्तमे महाभारते शान्तौ ३५८ अध्याये वचनम्—

ऋग्वेदपाठे पठितं व्रतमेतत्सुदुश्चरम् ।
सुपर्णाख्याप्यधिगत. धर्म एष सनातन ॥ इति ॥

मरीचिनाऽपिविमानार्चनकल्पे (११२) इय श्रुति भगवदर्चनप्रमाणतया समुपात्ता । एतदभिप्रेत्यैव विष्ण्वर्चनमपि प्रत्यक्षश्रुतिसिद्धमित्यनुगृहीत पाञ्चरात्ररक्षायाम् ॥ (१२१)

एष एव हि भगवान् शौनक विष्णुधर्मे अर्चावतारविचार सम्यगाहेति स्तोत्रभाष्ये (५४) धृतानि वचनानीमानि--

यादृशे तु मनः स्थैर्यं रूप बध्नाति चक्रिण. ।
नृसिंहवामनादीनां तादृश कारयेद्बुधः ॥
सुरूपां प्रतिमा विष्णो. प्रसन्नवदनेक्षणाम् ।
कृत्वाऽऽत्मनः प्रीतिकरीं सुवर्णरजतादिभि. ॥

तस्यां ब्रह्म समारोप्य मनसा तन्मयो भवेत् ।
तामर्चयेत्ता प्रणमेत्तां यजत्तां विचिन्तयेत् ॥
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम् ।

इति । (१०३) अत्रहि प्रतिष्ठादिवशात् मुख्यावतारत्व विवक्षितम् । उक्तं हि भगवच्छास्त्रे—

सर्वातिशायि षाड्गुण्यं संस्थितं मन्त्रविम्बयो· ।
तेनार्च्यो भगवान् साक्षात् नोपचारधिया क्वचित् ॥

इति ॥ एवमेव शौनकोऽपि—

देवो वैकुण्ठनाथस्तु अनन्तासनसंस्थितः ।
सेव्य श्रीभूमिनीलाभि· प्रादुर्भावैस्तथाऽखिलैः ॥
बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते ।
अर्चाऽपि लौकिकी या सा भगवद्भाविनात्मनाम् ॥
मन्त्रमन्त्रेश्वरन्यासात्साऽपि षाड्गुण्यविग्रहा ।

इति । बिम्बम्याकृतिरिवाकृतिर्यस्य स : तादृशेनात्मना दिव्यमङ्गलविग्रहेण समागत्य क्षीरनीरन्यायेनाविभाग प्राप्य सनिधत्ते । षाड्गुण्यविग्रहा षाड्गुण्यप्रकाशकशुद्धसत्त्वद्रव्यमयीत्यर्थः ॥

सोऽयमर्चासप्रदाय सर्वोपनिषत्समत अनादिसप्रदायसिद्धः क्षिप्रसिद्धिप्रद इति श्रीशकराचार्येणापि सूचित । यथा—छान्दोग्ये (१-१-१) "ओमित्येतदक्षरमुद्गीथमुपासीत । ओमित्येतदक्षर परमात्मनोऽभिधान नेदिष्ठ, तस्मिन् हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोक । तथाचार्यादिवत् परमात्मन प्रतीक सपद्यते । एव नामत्वेन प्रतीकत्वेन च परमात्मोपासन श्रेष्ठमिति सर्व वेदान्तेष्ववगतम्" इति ॥ भाषितमस्ति ॥

पाञ्चरात्ररक्षायामपि (११४) "एव च परव्यूहप्रभृतिचित्तालम्बनेषु प्रपत्त्येकनिष्ठा· नाथमुनिप्रभृतय सुलभतमत्वेन परिपूर्णत्वा

विशेषाच्च समाहितचित्तानामप्यनुसधेयमर्चावतारमेव चेतसश्शुभाश्रयमालम्बन्ते । तत्र यद्यपि साक्षात्कारहेतुभूतो मन्त्रविशेष उच्छिन्नसप्रदाय इति वृद्धा विदामासु. । तथापि स्वावगतैः मन्त्रविशेषैः अमन्त्रक वा यथासप्रदाय तदनुसधानमवर्जनीयमेव" इत्याभिधीयते । ततश्चोपासकाना प्रपन्नाना च परिग्राह्योऽयमर्चासप्रदाय अनादिसिद्ध इति ॥

अस्य च सप्रदायस्यानादिसिद्धत्वादेव प्राभाकरमीमांसकानामेतन्निराकरण सश्लिष्यते । ते हि मीमांसका· देवता चेतनलक्षणां काचि, न्नाभ्युपगच्छन्ति । तदय सग्रह.—

विग्रहो हविरादानं युगपत्कर्मसन्निधिः ।
तृप्तिः फलप्रदानं च देवतानां न विद्यते ॥

इति विग्रहादिपञ्चकरहितदेवतावादः । अचेतनदेवतावाद इति यावत् । तस्मिन् हि वादे वेदोक्तयागादिकतूनां देवताराधनरूपतां निराकुर्वन्ति । तस्य च निराकरणस्य प्रतियोगितया मूल "यज देवपूजायाम्" इत्यनाद्यार्यसप्रदायसमागत धातुपाठलक्षण स्मरणमेव । तस्माद्विग्रहादिविशिष्टदेवतापूजाऽनादिसप्रदायसिद्धा । एतद्विचार प्रकरणपञ्चिकाया गौडमीमासकशालिकनाथप्रणीताया विस्तरेणावगतन्तव्य । निरूपित चैतत् (४२६) प्रागेव ॥

अर्चनचेद सर्वाधिकारिकम् । तथाहि—

सप्तजन्मकृत पाप स्वल्प वा यदि वा वहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ॥

इति विष्णुधर्म. (८३-२०) सहस्र. भा (६०४) । दक्षोऽपि—

ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
प्रायश्चित्तिर्हि सर्वस्य दुष्कृतस्येति वै श्रुतिः ॥

इति ॥ अन्यत्रापि महतामपि पातकानां प्रायश्चित्ततया विधीयते (पा. ८२).

आपीठान्मौलिपर्यन्त पश्यतः पुरुषोत्तमम् ।
पातकान्याशुनश्यन्ति किंपुनस्तूपपातकम् ॥ इति ॥

तथा—पौष्करसहितायामपि—

सन्दर्शनादकस्माच्च पुंसां संमूढचेतसाम् ।
कुवासना कुबुद्धिश्च कुतर्कनिचयश्च यः ॥
कुहेतुश्च कुभावश्च नास्तिकत्व लयं व्रजेत् ॥

इति ॥ पुण्डरीकसवादे—

ये नृशंसा दुरात्मानः पापाचाररतास्तथा ।
तेऽपि यान्ति पर धाम नारायणसमाश्रयाः ॥ इति ॥
समस्तलोकनाथस्य देवदेवस्य शार्ङ्गिणः ।
साक्षात् भगवता विष्णो. पूजन जन्मनः फलम् ॥

इत्यष्टाक्षरब्रह्मविद्या नारदीया (पाञ्च—१२३)

अर्चन सुकरम्

यथा युवानं राजानं यथा च मदहस्तिनम् ।
यथा च पुत्रं दयितं तथैवोपचरैद्धरिम् ॥

इत्यादिवचनैः सुदुश्चरतमत्वावगमेऽपि बहुसुकरम्—

यो न वित्तैः न विभवैर्न वासोभिर्न भूषणै. ।
तोष्यते हृदयेनैव कस्तमीशं न पूजयेत् ॥

इति विष्णुधर्म· वचनात् ॥(९०-९६)—

दीपान्तमर्चनं प्रोक्तं नैवेद्यान्तं तु पूजनम् ।
बल्यन्तं शान्तिकं प्रोक्तं पूजा हि त्रिविधोच्यते ॥

इति कामिकागमे ॥ (२-३७७)

भक्तैरण्वप्युपहृतं प्रेम्णा भूर्येव मे भवेत् ।
भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥

पृथिवीं रत्नसंपूर्णां यः कृष्णाय प्रयच्छति ।
तस्याप्यन्यमनस्कस्य सुलभो न जनार्दनः ॥
अन्यत्पूर्णादपाकुम्भादन्यत्पादावनेजनात् ।
अन्यत्कुशलसंप्रश्नान्नेच्छति जनार्दनः ॥

इति स्तोत्ररत्नभाष्योदाहृत महाभारतवचनम् ॥ तथा द्रोणपर्वणि (२०० अ.)---

अञ्जलिः परमा मुद्रा क्षिप्रं देव प्रसादिनी ॥ इति ॥

भगवद्गीताऽपि ---

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ इति ॥
भावशुद्धिर्मनुष्याणां प्रमाणं सर्ववस्तुषु ।
अन्यथाऽऽलिङ्गयत कान्ता स्नेहेन दुहिताऽन्यथा ॥

इति विष्णुतत्त्वे इति सहस्रनामभाष्यम्। तस्मात् ॥

रागाद्यैरपेत हृदयं वागदुष्टाऽनृतादिना ।
हिंसादिरहित कार्य कृशवाराधन त्रयम् ॥

इत्याश्वमेधिके ॥

धर्म भजस्व सतत त्यज भूतहिंसा
सेवस्व साधुपुरुषान जहि कामशत्रून ।
अन्यस्य दोषगुणचिन्तनमाशु मुञ्च-
सत्यं वदार्चय हरिं भज जन्मलाभम् ॥

इति स्मृतिरत्नाकरे काञ्चनमालिनीवाक्यमित्युदाहृतम् ॥

अहिंसा प्रथम पुष्पं पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः ॥
शान्तिः पुष्पं तपः पुष्प ध्यानं पुष्प तथैवच ।
सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं सदा ॥

इति पद्मपुराणवचन तात्पर्यचन्द्रिकायामुदाहृतम् ॥

लक्ष्मीपुर श्रीनिवासमद्विपाश्चिदपाश्चिमात्। सकलागमसारेण संपूर्णः दर्शनोदय

ग्रन्थोऽयं दशभिः शुभै प्रकरणैः सपूरितोऽत्यद्भुतः
तत्तद्दर्शनतत्त्वसंग्रहकृतां विद्यावतां स्यात्कृते ।
प्राज्ञानामपि च प्रचारणविधौ विक्षेपविश्रान्तये
तल्लोकोत्तरलौकिकोपकृतितः सम्प्रीयतामच्युतः ॥

के वा कुतो वा वस्त्वत्र नवमुत्प्रेक्षितु क्षमा ।
इदं विविच्यविन्यासं प्रावा च त्रां चयैः कृतम् ॥

नाहमेतादृशग्रन्थसन्दर्भोपायपुष्कल ।
यत्नपूर्त्या तु सुकृतमसम मम पुष्कलम् ॥

प्रपञ्चाभ्युदयस्साक्षात् सर्वशास्त्रार्थनिर्णय ।
इति दृष्ट्वा प्रबन्धोऽय विशिष्टक्रमलक्षण ॥

यत्करोमि यदश्नामि यज्जुहोमि ददामि यत् ।
यत्तपस्यामि हे कृष्ण तत्करोमि त्वदर्पणम् ॥

इति श्रीमत्समस्तभूमण्डलमण्डनायमान निखिलदेशावतस कर्णाटकसपदधिष्ठानभूत श्रीमन्महाशूरमहासस्थानमध्यदेदीप्यमान दिव्यरत्नसिंहासनाधीश्वरे यदुकुलातिलके श्रीमन्महाराणीवाणीविलाससान्निधानगर्भशुक्तिमुक्ताफलायमाने श्रामद्राजाधिराज महाराज चामराजतपाराशफलभूते श्रामन्महाराजाधराज महाराज तुरीयकृष्णराजे राज्य पारपालयति शालिवाहनशके षट्पञ्चाशदुत्तरायामष्टादशशत्या तस्यैव महाराजस्य पञ्चाशत्सवत्सरवर्षवर्तीमहोत्सवसमये तदीयास्थानधर्माधिकारिणा सकलविद्याविशारदेन महामहोपाध्याय पण्डितरत्नाद्यनेकबिरुदावली समलकृतेन श्रीवत्सवशमुक्तामणिना सदाचार्यसत्कटाक्षपात्रीभूतेन मानमेयरहस्य श्लोकवार्तिक शाबरभाष्यभूषणाद्यनन्त प्रबन्धनिर्माणधुरन्धरेण लक्ष्मीपुराभिजनेन श्रीनिवासाचार्येण प्रणीत प्रकाशित दर्शनोदय जगति विजयताम्
श्रीवासुदेव प्रीयताम्

शुद्धिपत्रम्

पृ	प	शुद्धम्
4	11	सर्वाभिनिवेश
24	12	तुच्छलक्षणा
30	21	वर्धयन्नेव
42	13	नैरात्म्यम्
47	14	सुखदु ख
55	18	सहकारि
58	20	प्रतिपादना
59	19	ईश्वरोदित
67	18	कोपो
77	18	व्यवस्थिति
82	33	नापलब्धि
103	13	तस्त्वसत्र
105	5	शरावाद
105	14	वादाना
108	15	विप्रकृष्यते
111	19	जीवपरिणामवादनो हेरण्यगर्भावा
115	11	लक्षणान्याम
117	20	प्रथम
119	12	लब्धुमर्ह
119	22	विविक्तयो
122	21	एन्त सक
124	6	उपादिश्यते
126	13	सचास्य स
129	18	बाधने
129	19	मानिर्वाच्या
130	14	तोर्वैध
132	19	परमार्थ
135	17	लापयुक्ति
138	5	त्यशेन
144	4	एवपप
147	20	तामास्ति क
149	17	गतोमार्ग
149	21	परिदृश्य
151	14	निर्धारयि
151	3	शाबर
162	16	कंचिदर्थं
167	15	त्यतोचात्म
175	23	रावसरे
178	8	नजर्थेन
197	19	देजुहोति
203	21	जिह्वाघ्राण
209	14	निराक्षेप
213	19	नास्तत्त
218	17	नुभाविकी
223	10	पूर्वात्व
225	22	गार्हत्व
228	11	चारणी

पु	पं	शुद्धम्
228	17	ब्रह्मेश्व
232	13	गुणाधिकर
232	22	पुरुषैक्येपि
238	16	पूर्वकमे
242	11	नोद्देशेन
256	16	अर्धस्वभा
267	21	श्रौपनिष
276	23	पदार्घेण
291	19	निष्क्रीणीष्वे
294	18	विवक्षाया
295	6	मनुसृत्या
295	19	प्रोक्षणीय
296	6	विशेषेण
296	22	विधिर्नित्य
306	20	एतेदर्शन
311	2	कर्मावचा
311	12	देवताधिक
312	7	अङ्गत्वेऽपि
315	18	सविशेषत्व
318	22	वाक्यद्वय
344	3	सविकल्पकं
344	10	भेदाभेदस
352	15	दुरुद्दर
365	1	येनयुक्ति
365	22	व्याकृत्य
391	14	साम्यपदा
421	19	प्रवृत्ति
430	16	दनारम्भ
430	23	प्रभाकर
431	11	नस्यारम्भ
431	23	मुपपाद्य
432	10	कर्मविचा
435	12	अथकारण
437	18	गीतश्रवण
439	4	तिरर्थश्च
448	9	मर्थोपादा
453	9	रोति । य क
467	6	विकल्प्य
468	14	करणनियो
497	16	वचनमा
499	20	त्यतिष्ठेयं
502	1	वर्मज्ञानै
509	7	त्यन्तमेव
515	3	तायामपि
515	18	कानेकशा
519	16	वगन्तव्य
520	17	चरेद्धरिम्